आराधना-कथाकोशः

रचयिता–

ब्रह्मचारी श्रीमन्नेमिदत्तः ।

सम्पादकः—

उदयलालः काशलीवालः ।

नमो वीराय।

आराधना-कथाकोशः

मङ्गलं प्रस्तावना च।

श्रीमद्भव्याब्जसद्भानूल्लोकालोकप्रकाशकान्।
आराधनाकथाकोशं वक्ष्ये नत्वा जिनेश्वरान् ॥ १ ॥

नमस्तस्मै सरस्वत्यै सर्वविज्ञानचक्षुषे।
यस्याः सम्प्राप्यते नाम्ना पारं सज्ज्ञानवारिधेः ॥ २ ॥

रत्नत्रयपवित्राणां मुनीनां गुणशालिनाम्।
वन्देऽहं बोधसिन्धूनां पादपद्मद्वयं सदा ॥ ३ ॥

इत्याप्तभारतीसाधुपादपद्मप्रचिन्तनम्।
अस्तु मे सत्कथारम्भप्रासादकलशश्रिये ॥ ४ ॥

श्रीमूलसङ्घे वरभारतीये
गच्छे बलात्कारगणेऽतिरम्ये।
श्रीकुन्दकुन्दाख्यमुनीन्द्रवंशे
जातः प्रभाचन्द्रमहायतीन्द्रः ॥ ५ ॥

देवेन्द्रचन्द्रार्कसमर्चितेन
तेन प्रभाचन्द्रमुनीश्वरेण।
अनुग्रहार्थं रचितः सुवाक्यै—
राराधनासारकथाप्रबन्धः ॥ ६ ॥

तेन क्रमेणैव मया स्वशक्त्या
श्लोकैः प्रसिद्धैश्च निगद्यते सः
मार्गे न कि भानुकरप्रकाशे
स्वलीलया गच्छति सर्वलोकः ॥ ७ ॥

अथ श्रीजिनसूत्रेण कथ्यते विमलश्रिये ।
आराधनेति कि नाम सतां सन्तोषहेतवे ॥ ८ ॥

सम्यग्दर्शनबोधवृत्ततपसां संसारविच्छेदिनां
शक्त्या भक्तिभरेण सद्गुरुमतात्स्वर्गापवर्गश्रिये ।
उद्योतोद्यमने तथा च नितरां निर्वाहणं साधनं
पूर्तैर्निस्तरण महामुनिवरैराराधनेतीरिता ॥ ९ ॥

उक्तं च–

उज्जोवणमुज्जवणं णिव्वाहण साहणं च णित्थरणं
दंसणणाणचरित्तं तवाणमाराहणा भणिया ॥

तद्यथा–

यत्सम्यग्दर्शनज्ञाने चारित्रतपसां भवेत् ।
लोके प्रकाशनं तत्स्यादुद्योतनमितिध्रुवम् ॥ १० ॥
तथा हि स्वीकृतानां च तेषामालस्यवर्जितः ।
बाह्याभ्यन्तरमुद्योगः प्रोक्तमुद्यमनं बुधैः ॥ ११ ॥
तेषां सद्दर्शनादीनां सम्प्राप्ते त्यागकारणे ।
संकष्टैरपरित्यागो भवेन्निर्वाहणं शुभम् ॥ १२ ॥
तत्त्वार्थादिमहाशास्त्रपठने यन्मुनेः सदा ।
दर्शनादेः समग्रत्वं साधनं रागवर्जितम् ॥ १३ ॥
तथादृग्ज्ञानचारित्रतपसां मरणावधि ।
निर्विघ्नैः प्रापणं प्रोक्तं बुधैर्निस्तरणं परम् ॥ १४ ॥

इति पंचप्रकारोक्तं श्रीमज्जैनविदांवरैः ।
आराधनाक्रमं प्रोक्त्वा कथ्यते तत्कथाः क्रमात् ॥ १५ ॥

कथारम्भः—

१–पात्रकेसरिणः कथा ।

सम्यक्त्वोद्योतनं चक्रे प्रसिद्धः पात्रकेसरी ।
तच्चरित्रं प्रवक्ष्येऽहं पूर्वं सद्दर्शनश्रिये ॥ १६ ॥
अत्रैव भरतक्षेत्रे पवित्रे श्रीजिनेशिनाम् ।
विचित्रैः पंचकल्याणैः सर्वभव्यप्रशर्मदैः ॥ १७ ॥
निवासे सारसम्पत्तेर्देशे श्रीमगधाभिधे ।
अहिच्छत्रे जगच्चित्रे नागरैर्नगरे वरे ॥ १८ ॥
पुण्यादवनिपालाख्यो राजा राजकलान्वितः ।
प्राज्यं राज्यं करोत्युच्चैर्विप्रैः पञ्चशतैर्वृतः ॥ १९ ॥
विप्रास्ते वेदवेदाङ्गपारगाः कुलगर्विताः ।
कृत्वा सन्ध्याद्वये सन्ध्यावन्दनां च निरन्तरम् ॥ २० ॥
विनोदेन जगत्पूज्यश्रीमत्पार्श्वजिनालये ।
दृष्ट्वा पार्श्वजिनं पूतं प्रवर्तन्ते स्वकर्मसु ॥ २१ ॥
एकदा ते तथा कृत्वा सन्ध्यायां वन्दनां द्विजाः ।
जिनं द्रष्टुं समायाताः कौतुकाज्जिनमन्दिरे ॥ २२ ॥
देवागमाभिधं स्तोत्रं पठन्तं मुनिसत्तमम् ।
चारित्रभूषणं तत्र श्रीमत्पार्श्वजिनाग्रतः ॥ २३ ॥
दृष्ट्वा सम्पृष्टवानित्थं तन्मुख्यः पात्रकेसरी ।
स्वामिन्निमं स्तवं पूतं बुध्यसे, स मुनिस्ततः ॥ २४ ॥
नाहं बुध्येऽर्थतश्चेति संजगौ, प्राह सद्द्विजः ।
पुनः सम्पठ्यते स्तोत्रं भो मुने यतिसत्तम ॥ २५ ॥

ततस्तेन मुनीन्द्रेण देवागमनसंस्तवः ।
पठितः पदविश्रामैः सतां चेतोनुरञ्जनैः ॥ २६ ॥
शब्दतर्थैकसंस्थत्वात्तदासौ पात्रकेसरी ।
हेलया मानसे कृत्वा देवागमनसंस्तवम् ॥ २७ ॥
तदर्थं चिन्तयामास स्वचित्ते चतुरोत्तमः ।
ततो दर्शनमोहस्य क्षयोपशमलब्धितः ॥ २८ ॥
यदुक्तं श्रीजिनेन्द्रस्य शासने वस्तुलक्षणम् ।
जीवाजीवादिकं सत्यं तदैवात्र त्रिविष्टपे ॥ २९ ॥
नान्यथेति समुत्पन्नजैनतत्त्वार्थसद्रुचिः ।
गत्वा गृहे पुनर्धीमान् स विप्रो वस्तुलक्षणम् ॥ ३० ॥
चित्ते सञ्चिन्तनं कुर्वन्रात्रौ विप्रकुलाग्रणीः !
जीवाजीवादिकं वस्तु प्रमेयं जिनशासने ॥ ३१ ॥
तत्त्वज्ञानं प्रमाणं च प्रोक्तं तत्त्वार्थवेदिभिः ।
लक्षणं नानुमानस्य भाषितं तच्च कीदृशम् ॥ ३२ ॥
श्रीमज्जिनमतेऽस्तीति सन्देहव्यग्रमानसः ।
यावत्सन्तिष्ठते तावन्निजासनप्रकम्पनात् ॥ ३३ ॥
पद्मावत्या महादेव्या तत्रागत्य ससम्भ्रमम् ।
स द्विजो भणितस्तूर्णं भो धीमन्पात्रकेसरिन् ॥ ३४ ॥
प्रातः श्रीपार्श्वनाथस्य दर्शनादेव निश्चयः ।
लक्षणे चानुमानस्य सम्भविष्यति ते तराम् ॥ ३५ ॥
इत्युक्त्वा सल्लिखित्वेति पार्श्वेशफणमण्डपे ।
सा गता ह्यनुमानस्य लक्षणं श्लोकमुत्तमम् ॥ ३६ ॥
" अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ॥"

देवतादर्शनादेव सञ्जाता तस्य शर्मदा ।
श्रीमज्जैनमते श्रद्धा भवभ्रमणनाशिनी ॥ ३७ ॥
प्रभाते परमानन्दात्पार्श्वनाथं प्रपश्यतः ।
फणाटोपेऽनुमानस्य लक्षणश्लोकदर्शनात् ॥ ३८ ॥
जातस्तल्लक्षणोत्कृष्टनिश्चयश्च द्विजन्मनः ।
भास्करस्योदये जाते न तिष्ठति तमो यथा ॥ ३९ ॥
ततोऽसौ ब्राह्मणाधीशः पवित्रः पात्रकेसरी ।
प्रहर्षाञ्चितसर्वाङ्गो जिनधर्ममहारुचिः ॥ ४० ॥
देवोर्हन्नेव निर्दोषः संसाराम्भोधितारकः ।
अयमेव महाधर्मो लोकद्वयसुखप्रदः ॥ ४१ ॥
एवं दर्शनमोहस्य क्षयोपशमयोगतः ।
अभूदुत्पन्नसम्यक्त्वरत्नरञ्जितमानसः ॥ ४२ ॥
तथानिशं जिनेन्द्रोक्तं तत्त्वं त्रैलोक्यपूजितम् ।
पुनःपुनर्महाप्रीत्या भावयन्पात्रकेसरी ॥ ४३ ॥
तैर्द्विजैर्भणितश्चैवं किं मीमांसादिकं त्वया ।
त्यक्त्वा संस्मर्यते जैनमतं नित्यमहो हृदि ॥ ४४ ॥
तच्छ्रुत्वा भणितास्तेन ते विप्रा वेदगर्विताः ।
अहो द्विजा जिनेन्द्राणां मतं सर्वमतोत्तमम् ॥ ४५ ॥
अतः कारणतः कष्टं त्यक्त्वा मिथ्याकुमार्गकम् ।
भवद्भिश्चापि विद्वद्भिः संग्राह्यं जैनशासनम् ॥ ४६ ॥
ततो राजादिसान्निध्ये पात्रकेसरिणा मुदा ।
जित्वा सर्वद्विजांस्तांश्च विवादेन स्वलीलया ॥ ४७ ॥
समर्थ्य शासनं जैनं त्रैलोक्यप्राणिशर्मदम् ।
स्वसम्यक्त्वगुणं सारं सम्प्रकाश्य पुनः पुनः ॥ ४८ ॥

कृतोऽन्यमतविध्वंसो जिनेन्द्रगुणसंस्तुतिः ।
संस्तवः परमानन्दात्समस्तसुखदायकः ॥ ४९ ॥
पात्रकेसरिणं दृष्ट्वा ततः सर्वगुणाकरम् ।
सारपण्डितसन्दोहसमर्चितपदद्वयम् ॥ ५० ॥
ते सर्वेऽवनिपालाद्यास्त्यक्त्वा मिथ्यामतं द्रुतम् ।
भूत्वा जैनमतेऽत्यन्तं संसक्ताः शुद्धमानसाः ॥ ५१ ॥
गृहीत्वा सारसम्यक्त्वं संसाराम्भोधितारणम् ।
प्राप्य श्रीजैनसद्धर्मं स्वर्मोक्षसुखकारणम् ॥ ५२ ॥
त्वं भो द्विजोत्तम श्रीमज्जैनधर्मे विचक्षणः ।
त्वमेव श्रीजिनेन्द्रोक्तसारतत्वप्रवीक्षणः ॥ ५३ ॥
त्वं श्रीजिनपादाब्जसेवनैकमधुव्रतः ।
इत्युच्चैः स्तवनाद्यैस्तं पूजयन्ति स्म भक्तितः ॥ ५४ ॥

पञ्चभिः कुलकम् ।

इत्थं श्रीशिवशर्मदं शुचितरं सम्यक्त्वमुद्योतनं
कृत्वा प्राप नरेन्द्रपूजनपदं पात्रादिकः केसरी ॥
अन्यश्चापि जिनेन्द्रशासनरतः सद्दर्शनोद्योतन
भक्त्या यस्तु करोति निर्मलयशाः स स्वर्गमोक्षं भजेत् ॥ ५५ ॥

सत्कुन्देन्दुविशुद्धकीर्त्तिकलिते श्रीकुन्दकुन्दान्वये
श्रीभट्टारकमल्लिभूषणगुरुभ्रातुः सदादेशतः ।
सूरिश्रीश्रुतसागरस्य सुधियः सम्यक्त्वरत्नश्रिये
सान्निध्ये शुचि सिंहनन्दिसुमुनेश्चक्रे मयेदं शुभम् ॥ ५६ ॥

इति कथाकोशे सम्यक्त्वद्योतिनी पात्रकेसरिणः कथा समाप्ता ।

२–अकलङ्कदेवस्य कथा।

अथ श्रीजिनमानम्य सर्वसत्वसुखप्रदम्।
वक्ष्येऽकलङ्कदेवस्य ज्ञानोद्योतनसत्कथाम्॥ १॥
अत्रैव भारते मान्यखेटाख्यनगरे वरे।
राजाऽभूच्छुभतुङ्गाख्यस्तन्मंत्री पुरुषोत्तमः॥ २॥
भार्या पद्मावती तस्य तयोः पुत्रौ मनःप्रियौ।
सञ्जातावकलङ्काख्यनिष्कलङ्कौ गुणोज्वलौ॥ ३॥
नन्दीश्वरे महाष्टम्यामेकदा परया मुदा।
पितृभ्यां रविगुप्ताख्यं नत्वा भक्त्या मुनीश्वरम्॥ ४॥
गृहीत्वाऽष्ट दिनान्युच्चैर्ब्रह्मचर्यं सुशर्मदम्।
क्रीडया पुत्रयोश्चापि दापितं तद्व्रतं महत्॥ ५॥
ततः कैश्चिद्दिनैर्दृष्ट्वा विवाहोद्यममद्भुतम्।
पुत्राभ्यां भणितस्तातः किमर्थं क्रियते त्वया॥ ६॥
परिश्रमो महानेप भो पितस्तन्निशम्य सः।
भवतो सद्विवाहार्थं प्राहैवं पुरुषोत्तमः॥ ७॥
तच्छ्रुत्वा कथितं ताभ्यां किं विवाहेन भो सुधीः।
आवयोर्ब्रह्मचर्यं च दापितं शर्मदं त्वया॥ ८॥
पित्रोक्तं क्रीडया वत्सौ दापितं भवतोर्मया।
ब्रह्मचर्यमिति श्रुत्वा प्राहतुस्तौ विचक्षणौ॥ ९॥
धर्मे व्रते च का क्रीडा व्रीडा वा तदनन्तरम्।
सम्प्राह युवयोर्दत्तं व्रतं चाष्ट दिनानि तत्॥ १०॥
इत्याकर्ण्य पितुर्वाक्यं पुत्रौ तावूचतुः पुनः।
आवयोर्न कृता तात मर्यादाष्ट दिनैस्तथा॥ ११॥

सूरिणा भवता चापि तस्मादाजन्म निर्मलम् ।
ब्रह्मचर्यं व्रतं वर्यं नियमस्तु विवाहके ॥ १२ ॥
इत्युक्त्वा सकलासारं व्यापारं परिहृत्य च ।
नाना शास्त्राण्यधीतानि ताभ्यां भक्तया बहूनि वै ॥ १३ ॥
तथा बौद्धमतज्ञाता मान्यखेटे न वर्तते ।
ततस्तस्य मतं ज्ञातुं मूर्खच्छात्रस्य रूपकम् ॥ १४ ॥
धृत्वा ततो महाबोधिस्थान गत्वा गुणाकरौ ।
बौद्धमार्गपरिज्ञातुर्धर्माचार्यस्य सन्निधौ ॥ १५ ॥
स्थितौ, सोपि विजातीयं धर्माचार्यो विशोध्य च ।
ऊर्द्ध्वभूमौ परिस्थित्वा बौद्धांस्तद्बौद्धशास्त्रकम् ॥ १६ ॥
नित्यं पाठयति व्यक्तं जैनधर्मरतौ च तौ ।
भूत्वाऽज्ञौ मातृकापाठं पठन्तौ गूढमानसौ ॥ १७ ॥
तदाकर्णयतः स्मोच्चैरशेपं बौद्धशासनम् ।
एकसंस्थोऽकलङ्काख्यदेवोऽभूत्तद्विचक्षणः ॥ १८ ॥
निष्कलङ्को द्विसंस्थश्च चित्ते तच्चिन्तयत्परम् ।
एवं काले गलत्येव धर्माचार्यस्य चैकदा ॥ १९ ॥
व्याख्यानं कुर्वतस्तस्य श्रीमज्जैनेन्द्रभाषिते ।
सप्तभङ्गीमहावाक्ये कूटत्वात्संशयोऽजनि ॥ २० ॥
व्याख्यानमथ संवृत्य व्यायामं स गतस्तदा ।
शुद्धं कृत्वाशु तद्वाक्यं धृतवानकलङ्कवाक् ॥ २१ ॥
बौद्धानां गुरुणागत्य दृष्ट्वा वाक्यं सुशोधितम् ।
अस्ति कश्चिज्जिनाधीशशासनाम्भोधिचन्द्रमाः ॥ २२ ॥
अस्माकं मतविध्वंसी बौद्धवेषेण धूर्तकः ।
अस्मच्छास्त्रं पठन्सोऽत्र संशोध्यैवाशु मार्यताम् ॥ २३ ॥

इत्युक्त्वा शोधितास्तेन ते सर्वे शपथादिना ।
पुनः संकारिता जैनबिम्बस्योल्लङ्घनं तथा ॥ २४ ॥
तदाकलङ्कदेवेन चातुर्याद्गुणशालिना ।
प्रतिमोपरि संक्षिप्त्वा सूत्रं संसूत्रवेदिना ॥ २५ ॥
इयं सावरणा मूर्त्तिः कृत्वा संकल्पनं हृदि ।
तस्या उल्लङ्घनं चक्रे ततो जैनमजानता ॥ २६ ॥
कांस्योद्भवानि तेनोच्चैर्भाजनानि बहूनि च ।
गौण्यां निक्षिप्य बौद्धानां शयनस्थानसन्निधौ ॥ २७ ॥
एकैकं स्थापयित्वा च स्वकीयं चरमानुषम् ।
वन्दकं प्रति तान्येव दूरमुद्धृत्य वेगतः ॥ २८ ॥
निक्षिप्तानि ततो रात्रौ विद्युत्पातोपमे रवे ।
समुत्थितेऽकलंकाख्यनिष्कलङ्कौ कलस्वनौ ॥ २९ ॥
सारं पंचनमस्कारं स्मरन्तावुत्थितौ तदा ॥
धृत्वा तौ तत्समीपे च नीत्वाप्यालपित चरैः ॥ ३० ॥
आदेशं देहि देवैतौ धूर्तौ जैनमतोत्तमौ ।
इति श्रुत्वा जगौ सोपि बौद्धेशो दुष्टमानसः ॥ ३१ ॥
धृत्वा सप्तमभूभागे पश्चाद्रात्रौ कुमारकौ ।
मार्यतामिति तौ तत्र नीत्वा च स्थापितौ तकैः ॥ ३२ ॥
निष्कलङ्कस्तदा प्राह भो धीमन्नकलङ्कवाक् ।
अस्माभिर्गुणरत्नानि भ्रातश्चोपार्जितानि वै ॥ ३३ ॥
दर्शनस्योपकारस्तु विहितो नैव भूतले ।
वृथा मरणमायातं तच्छ्रुत्वा ज्येष्ठबान्धवः ॥ ३४ ॥
जगादैवं महाधीरो माविसूरय धीधन ।
उपायो जीवितस्यायं विद्यते कोपि साम्प्रतम् ॥ ३५ ॥

इदं छत्रं करे धृत्वा क्षिप्त्वात्मानं सुयत्नतः ।
गत्वा भूमौ च यास्यावः स्वस्थानं वेगतः सुधीः ॥ ३६ ॥
इत्यालोच्य विधायोच्चैस्तत्सर्वं निर्गतौ च तौ ।
अर्धरात्रे गते यावन्मारणार्थं दुराशयैः ॥ ३७ ॥
अन्वेषितौ तदा नैव दृष्टौ तौ पत्तने ततः ।
वापिकूपतडागादौ संशोध्य प्राप्य ते पुनः ॥ ३८ ॥
अश्वारूढाः सुपापिष्ठाः कष्टाः सम्मारणेच्छया ।
दयावल्लीदवपृष्ठाः पृष्ठतो निर्गतास्तयोः ॥ ३९ ॥
उच्छलद्धूलिमालोक्य ज्ञात्वा तान्प्राणलोलुपान् ।
निष्कलङ्कोऽवदद्धीरो भो भ्रातस्त्वं विचक्षणः ॥ ४० ॥
एकसंस्थो महाप्राज्ञो दर्शनोद्यतनश्रिये ।
एतस्मिन्पद्मिनीखण्डमण्डिते सुसरोवरे ॥ ४१ ॥
संप्रविश्य निजात्मानं रक्षत क्षतकल्मष ।
मार्गे मां वीक्ष्य गच्छन्तं हन्त्वैते यान्तु पापिनः ॥ ४२ ॥
ततस्तद्वचनेनैव सखेदं सोऽकलङ्कवाक् ।
तत्रस्थितः प्रविश्योच्चैः के धृत्वा पद्मिनीदलम् ॥ ४३ ॥
न चक्रे केवलं तेन शरण्यं पद्मपत्रकम् ।
अनन्यशरणीभूतं शासनं च जिनेशिनाम् ॥ ४४ ॥
निष्कलङ्कस्तु नश्यन्सन्पृष्टोऽसौ रजकेन च ।
वस्त्रप्रक्षालनं कर्म कुर्वता गगनोद्गताम् ॥ ४५ ॥
धूलीं विलोक्य भीतेन किमेतदिति सोऽवदत् ।
शत्रुसैन्यं समायाति यन्नरं पश्यति ध्रुवम् ॥ ४६ ॥
तं हन्ति पापकृद्गाढं तेन संनश्यते मया ।
तच्छ्रुत्वा रजकः सोपि सार्धं तेनैव नष्टवान् ॥ ४७ ॥

ततस्ते पापिनो धृत्वा नश्यन्तौ तौ सुनिर्दयम् ।
हत्वा तयोः शिरोयुग्मं समादाय गृहं गताः ॥ ४८ ॥
किं न कुर्वन्ति भो लोके पापाय पापपण्डिताः ।
जिनधर्मविनिर्मुक्ता मिथ्यात्वविषदूषिताः ॥ ४९ ॥
येषां श्रीमज्जिनेन्द्राणां धर्मः शर्मशतप्रदः ।
लेशतोऽपि न हृत्कोशे तेषां का करुणाकथा ॥ ५० ॥
ततोऽकलङ्कदेवोऽसौ विनिर्गत्य सरोवरात् ।
मार्गे गच्छन् जिनेन्द्रोक्ततत्वविन्निश्चलाशयः ॥ ५१ ॥
कलिङ्गविषये रत्नसंचयाख्यं पुरं परम् ।
कैश्चिद्दिनैः परिप्राप्तस्तावद्वक्ष्ये कथान्तरम् ॥ ५२ ॥
तत्र राजा प्रजाऽभीष्टो नाम्ना श्रीहिमशीतलः ।
राज्ञी जिनेन्द्रपादाब्जभृङ्गी मदनसुन्दरी ॥ ५३ ॥
तया श्रीमज्जिनेन्द्राणां स्वयं कारितमन्दिरे ।
फाल्गुने निर्मलाष्टम्यां रथयात्रामहोत्सवे ॥ ५४ ॥
प्रारब्धे जिनधर्मस्य स्वर्गमोक्षप्रदायिनः ।
महाप्रभावनाङ्गाय नाना सत्सम्पदा मुदा ॥ ५५ ॥
सङ्घश्री वन्दकेनोच्चैर्विद्यादर्पेण पापिना ।
रथयात्रा न कर्त्तव्या जिनेन्द्रस्य महीपते ॥ ५६ ॥
जिनस्य शासनाभावादिति प्रोक्त्वा दुरात्मना ।
मुनीनां पत्रकं चापि दत्तं वादप्रकाङ्क्षया ॥ ५७ ॥
ततश्च भूभुजा प्रोक्तं हे प्रिये जैनदर्शनम् ।
समर्थ्येयं प्रकर्त्तव्या यात्रा वै नान्यथा त्वया ॥ ५८ ॥
तच्छ्रुत्वा सा सती राज्ञी भूत्वा चोद्विग्नमानसा ।
श्रीमज्जिनालयं गत्वा पापस्य विलयं तदा ॥ ५९ ॥

नत्वा जगौ मुनीन्द्राणामस्माकं दर्शने बुधाः ।
एतस्य वन्दकस्योच्चैः कोप्यस्ति प्रतिमल्लकः ॥ ६० ॥
जित्वेमं यो महाभव्यो वाञ्छितं मे करोत्यलम् ।
श्रुत्वेति मुनयः प्राहुर्मान्यखेटादिकेषु ते ॥ ६१ ॥
एतस्मादधिकाः सन्ति पण्डिता जिनशासने ।
किन्तु दूरे तदाकर्ण्य सुन्दरीमदनादिका ॥ ६२ ॥
सर्पोस्ति मस्तकोपान्ते योजनानां शते भिषक् ।
इत्युक्त्वा श्रीजिनेन्द्राणां कृत्वा पूजां विशेषतः ॥ ६३ ॥
राजगेहं परित्यज्य प्रविश्य जिनमन्दिरम् ।
सङ्घश्रीदर्पविध्वंसात्पूर्वरीत्या शुभोदयात् ॥ ६४ ॥
यात्रा रथस्य मे पूता भविष्यति महोत्सवैः ।
धर्मप्रभावना चापि तदा मे भोजनादिकम् ॥ ६५ ॥
प्रवृत्तिर्नान्यथा चेति कृत्वा चित्ते सुनिश्चयम्
जिनाग्रे संस्थिता पंच जपन्ती सुनमस्कृतीः ॥ ६६ ॥
कायोत्सर्गेण मेरोर्वा निश्चला सारचूलिका ।
सर्वथा भव्यजन्तूनां जिनभक्तिः फलप्रदा ॥ ६७ ॥
अर्धरात्रे ततस्तस्याः सारपुण्यप्रभावतः ।
चक्रेश्वरी महादेवी विष्टरस्य प्रकम्पनात् ॥ ६८ ॥
समागत्य शुभे श्रीमज्जिनपादाब्जमानसे ।
किंचिन्मा कुरु चोद्वेगमहो मदनसुन्दरि ॥ ६९ ॥
प्रातः सङ्घश्रियोमानमर्दनैकविचक्षणः ।
रथप्रभावनाकारी श्रीमज्जैनागमे चणः ॥ ७० ॥
नाना मनोरथानां ते पूरको दिव्यमूर्तिमान् ।
अत्राऽकलङ्कदेवाख्यस्तव पुण्यात्समेष्यति ॥ ७१ ॥

इत्युक्त्वा सा गता भक्त्या तच्छ्रुत्वा च महीपतेः ।
सा राज्ञी परमानन्दनिर्भराभक्तितत्परा ॥ ७२ ॥
महास्तुतिं जिनेन्द्राणां कृत्वा सद्वाञ्छितप्रदाम् ।
प्रातर्महाभिषेकं च विधायोच्चैस्तथार्चनम् ॥ ७३ ॥
ततोऽकलङ्कदेवस्य समन्वेषणहेतवे ।
चतुर्दिक्षु सती शीघ्रं प्रेषयामास सन्नरान् ॥ ७४ ॥
तन्मध्ये ये गतास्तत्र पूर्वस्यां दिशि पूरुषाः
तैरुद्यानवनेऽशोकवृक्षमूलेऽकलङ्कवाक् ॥ ७५ ॥
कैश्चिच्छात्रैः समायुक्तः कुर्वन्विश्रामकं सुखम् ।
दृष्टोऽसौ सर्वशास्त्रज्ञः पृष्ट्वैकं छात्रकं ततः ॥ ७६ ॥
तन्नामापि समागत्य सर्वं राज्या निवेदितम् ।
ततो राज्ञी महाभूत्या सर्वसङ्घसमन्विता ॥ ७७ ॥
साऽन्नजपानसद्दानसमेता धर्मवत्सला ।
तत्रागत्य लसत्प्रीत्या वन्दितः स बुधोत्तमः ॥ ७८ ॥
तस्य सन्दर्शनात्तुष्टा सा सती शुद्धमानसा ।
पद्मिनीव रवेर्मेधा मुनेर्वा तत्त्वदर्शनात् ॥ ७९ ॥
चन्दनागुरुकर्पूरैर्नानावस्त्रादिभिस्तराम् ।
पूजयामास तं राज्ञी बुधं धर्मानुरागतः ॥ ८० ॥
ततः स प्राह पूतात्मा विद्वज्जनशिरोमणिः ।
भो देवि भवतां क्षेमः सङ्घस्यापि प्रवर्त्तते ॥ ८१ ॥
तं निशम्याश्रुपातं च राज्या कुर्वाणया पुनः ।
स्वामिन्सन्तिष्ठते सङ्घः किन्तु तस्यापमानता ॥ ८२ ॥
वर्तते साम्प्रतं चेति तया प्रोक्त्वा समग्रतः ।
सङ्घश्रीचेष्टितं तस्य सूचितं चारुचेतसः ॥ ८३ ॥

तदाकर्ण्याकलङ्काख्यः कोपतः किल संजगौ ।
कियन्मात्रो वराकोऽयं सङ्घश्रीर्यन्मया समम् ॥ ८४ ॥
वादं कर्त्तुं समर्थो न सुगतोपि मदोद्धतः ।
इति प्रव्यक्तसद्वाक्यैस्तां सन्तोष्य समग्रधीः ॥ ८५ ॥
सङ्घश्रीवन्दकस्योच्चैर्दत्वा पत्रं महोत्सवैः ।
सम्प्राप्तः श्रीजिनेन्द्रस्य मन्दिरं शर्ममन्दिरम् ॥ ८६ ॥
सङ्घश्रिया तदालोक्य पत्रं क्षुभितचेतसः ।
तन्न भिन्नं महापत्रं श्रुत्वा तद्गर्जनाक्रमम् ॥ ८७ ॥
तदाकलङ्कदेवोऽसौ हिमशीतलभूभुजा ।
सम्भ्रमेण समानीय वादं तेनैव कारितः ॥ ८८ ॥
सङ्घश्रिया महावादं तेन सार्धं प्रकुर्वता ।
नाना प्रत्युत्तरैर्दृष्ट्वा तस्य वाग्विभवं नवम् ॥ ८९ ॥
अशक्तिं चात्मनो ज्ञात्वा ये केचिद्बौद्धपण्डिताः ।
देशान्तरे स्थिताः सर्वास्तान्समाहूय गर्वितान् ॥ ९० ॥
पूर्वसिद्धां तथा देवीं ताराभगवतीं निशि ।
तदावतार्य तेनोक्तं समर्थोऽहं न सुन्दरि ॥ ९१ ॥
वादं कर्त्तुमनेनैव सार्धं देवि तया द्रुतम् ।
एष वादेन कर्तव्यो निग्रहस्थानभाजनम् ॥ ९२ ॥
इत्याकर्ण्य तया प्रोक्तं सभायां भूपतेर्मया ।
अन्तःपटे घटे स्थित्वा विवादः क्रियते पुनः ॥ ९३ ॥
ततः प्रभाते भूपाग्रे सङ्घश्रीः कपटेन च ।
अन्तःपटेन कस्यापि मुखं चापश्यता मया ॥ ९४ ॥
विचित्रवाक्यविन्यासैरुपन्यासो विधीयते ।
इत्युक्त्वाऽन्तःपटं दत्वा बुद्धदेवार्चनं तथा ॥ ९५ ॥

तद्देव्याश्चर्चनं कृत्वा चक्रे कुम्भावतारणम् ।
करोति कैतवं मूढो नास्त्येवान्तेनुसिद्धिदम् ॥ ९६ ॥
ततो घटं प्रविश्योच्चैः सा देवी दिव्यवाग्भरैः ।
क्षणोपन्यासकं कर्तुं प्रवृत्ता निजशक्तितः ॥ ९७ ॥
अथाकलङ्कदेवोपि दिव्यध्वानिविराजितः ।
कृत्वोपन्यासकं तस्याः खण्डखण्डं क्षणक्षयम् ॥ ९८ ॥
अनेकान्तमतं पूतं सारतत्वैः समन्वितम् ।
स्वपक्षस्थापकं गाढं परपक्षक्षयप्रदम् ॥ ९९ ॥
तत्समर्थयितुं लग्नः समर्थो भयवर्जितः ।
एवं तयोर्महावादैः षण्मासाः संययुस्तराम् ॥ १०० ॥
तदाकलङ्कऽदेवस्य मानसे निशि चाभवत् ।
चिन्तामानुषमात्रोऽयं वन्दको दासकोपमः ॥ १०१ ॥
एतावन्ति दिनान्येवं मया सार्धं करोत्यरम् ।
वादं किं कारणं चेति सचिन्तश्चतुरोत्तमः ॥ १०२ ॥
स श्रीमानकलङ्काख्यो यावदास्ते विचारवान् ।
तावच्चक्रेश्वरी दैवी समागत्य सुपुण्यतः ॥ १०३ ॥
अहो धीमञ्जिनेन्द्रोक्तसारतत्त्वविदाम्वर ।
अकलङ्क त्वया सार्धं वादं कर्तुं न भूतले ॥ १०४ ॥
समर्थो नरमात्रोऽसौ किन्तु वादं त्वया समम् ।
करोति तारिका देवी दिनान्येतानि धीधन ॥ १०५ ॥
अतः प्रातः समुत्थाय पूर्वोपन्यस्ततद्वचः ।
व्याघुट्य पृच्छ तां तस्या मानभङ्गो भविष्यति ॥ १०६ ॥
इत्युक्त्वा सा गता देवी ततः सोप्यकलङ्कवाक् ।
देवतादर्शनाज्जातपरमानन्दनिर्भरः ॥ १०७ ॥

प्रातर्गत्वा जिनं नत्वा सभायां दिव्यमूर्त्तिभाक् ।
क्रीडार्थं च प्रभावार्थं धर्मस्यैव जिनेशिनः ॥ १०८ ॥
दिनान्येतानि संचक्रे वादोऽनेन समं मया ।
अद्य वादं द्रुतं जित्वा भोजनं क्रियते ध्रुवम् ॥ १०९ ॥
उक्त्वेति स्पष्टसद्वाक्यैर्वादं कर्त्तुं समुद्यतः
उपन्यासं ततस्तस्याः कुर्वत्यास्तेन जल्पितम् ॥ ११० ॥
प्रागुक्तं कीदृशं वाक्यं तदस्मांक प्रकथ्यते ।
तदाकर्ण्याकलङ्कस्य वाक्यं हृत्क्षोभकारणम् ॥ १११ ॥
देवता वचनैकत्वादुत्तरं दातुमक्षमा ।
सूर्योदये निशेवाशु सा गता मानभङ्गतः ॥ ११२ ॥
ततोऽकलङ्कदेवेन समुत्थायप्रकोपतः ।
अन्तःपटं विदार्योच्चैः स्फोटयित्वा च तं घटम् ॥ ११३ ॥
महापादप्रहारेण हत्वा रूपं तु सौगतम्
मानभङ्गं तथा कृत्वा तेषां मिथ्याकुवादिनाम् ॥ ११४ ॥
पुनर्मदनसुन्दर्या सम्प्राप्तानन्दसम्पदः ।
समस्तभव्यलोकानामग्रतः परया मुदा ॥ ११५ ॥
गलगर्जितं विद्यायोच्चैस्तेनोक्तं चेति सोत्सवम् ।
अहो मया वराकोऽयं सङ्घश्रीर्धर्मवर्जितः ॥ ११६ ॥
निर्जितः प्रथमे घस्ने किन्तु दैव्यैतया समम् ।
श्रीमज्जिनेन्द्रचन्द्राणां मतोद्योतनहेतवे ॥ ११७ ॥
संज्ञानोद्योतनार्थं च कृतो वादः स्वलीलया ।
एतदुक्त्वा महाकाव्यं स्वामिना पठितं स्फुटम् ॥ ११८ ॥

" नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्धया मया ।

राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धाघान्सकलान्विजित्य सुगतः पादेन विस्फालितः ॥"
तदा प्रभृति बौद्धास्ते नरेन्द्राद्यैर्निराकृताः ।
त्यक्त्वा देशं द्रुतं नष्टा खद्योता वा दिनागमे ॥ ११९ ॥
एवं श्रीमज्जिनेन्द्राणां दृष्ट्वा ज्ञानप्रभावनाम् ।
हिमशीतलभूपाद्याः सर्वे ते भक्तिभारतः ॥ १२० ॥
जिनधर्मरता भूत्वा त्यक्त्वा मिथ्यामतं द्रुतम् ।
नाना रत्नसुवर्णाद्यैः संस्तोत्रैः शर्मकारिभिः ॥ १२१ ॥
पूजयन्ति स्म तं पूतमकलङ्कं बुधोत्तमम् ।
श्रीमज्जिनेन्द्रसंज्ञानप्रभावात्के न पूजिताः ॥ १२२ ॥
तथा मदनसुन्दर्या महोत्सवशतै रथः ।
विचित्ररचनोपेतो लसत्पट्टांशुकैर्वृतः ॥ १२३ ॥
संरणत्किङ्किणीजालो घण्टाटङ्कारशोभितः ।
त्रैलोक्यपूज्यजैनेन्द्रमहाबिम्बैः पवित्रितः ॥ १२४ ॥
नाना छत्रवितानाद्यैश्चामराद्यैरलङ्कृतः ।
कनत्काञ्चनसद्रत्नमुक्तामालाविराजितः ॥ १२५ ॥
अनेक भव्यलोकानां समन्ताज्जयघोषणैः ।
सम्पतत्कुसुमामोदैः सुगन्धीकृतदिङ्मुखः ॥ १२६ ॥
झल्लरीतालकंसालभेरीभम्भामृदङ्गकैः ।
पठत्पण्डितसन्दोहैश्चारणस्तुतिपाठकैः ॥ १२७ ॥
कामिनीगीतझङ्कारैर्नानानृत्यादिभिर्युतः ।
जङ्गमः पुण्यरत्नानां रोहणाद्रिरिवोद्गतः ॥ १२८ ॥
वस्त्राभरणसन्दोहैर्नाना ताम्बूलदानतः ।
स भव्यानां विभाति स्म पर्यटन्निव सुरद्रुमः ॥ १२९ ॥

वर्ण्यते स रथः केन यस्य दर्शनमात्रतः ।
अनेकदुर्दशां चापि संजाता दर्शनश्रियः ॥ १३० ॥
इत्यादि सम्पदासारै रथः पूर्णमनोरथः ।
सम्यक्त्वचाल तद्राज्या यशोराशिरिवापरः ॥ १३१ ॥
सोऽस्माकं भव्यजीवानां नाना शर्मशतप्रदः ।
नित्यं सम्भावितश्चित्ते दद्यात्सद्दर्शनश्रियम् ॥ १३२ ॥
यथाऽकलङ्कदेवोऽसौ चक्रे ज्ञानप्रभावनाम् ।
अन्येनापि सुभव्येन कर्त्तव्या सा सुखप्रदा ॥ १३३ ॥
स जयति जिनदेवो देवदेवन्द्रवन्द्य—
त्रिभुवनसुखकारी यस्य बोधप्रदीपः ।
गुणगणमणिरुद्रो बोधसिन्धुर्मुनीन्द्रो
दिशतु मम शिवानि श्रीप्रभाचन्द्रदेवः ॥ १३४ ॥

इति कथाकोशे ज्ञानेद्योतिनी श्रीमदकलङ्कदेवस्य कथा समाप्ता ।

३—सनत्कुमारचक्रवर्त्तिनः कथा ।

नत्वा पञ्च गुरून्भक्त्या स्वर्गमोक्षसुखप्रदान् ।
चारित्रद्योतने वच्मि चरित्रं तुर्यचाक्रिणः ॥ १ ॥
अत्रैव भरतक्षेत्रे वीतशोकपुरे प्रभुः ।
अभूदनन्तवीर्याख्यो राज्ञी सीताऽभिधा सती ॥ २ ॥
पुत्रः सनत्कुमारोऽभूत्तयोः सत्पुण्यपाकतः ।
चतुर्थश्चक्रवर्तीशः सम्यग्दृष्टिशिरोमणिः ॥ ३ ॥
षट्खण्डमण्डितां पृथ्वीं संसाध्यैव शुभोदयात् ।
निधानैर्नवभी रत्नैश्चतुर्दशभिरुत्तमैः ॥ ४ ॥

गजैश्चतुरशीत्युक्तलक्षैर्दक्षो विराजितः ।
रथैस्तावत्प्रमाणैश्च नित्यं पूर्णमनोरथैः ॥ ५ ॥
अश्वैरष्टादशोत्कृष्टैः कोटिभिर्भर्मभूषितैः ।
भटैश्चतुरशीत्युक्तकोटिभिः शस्त्रपाणिभिः ॥ ६ ॥
ग्रामैः षण्णवतिप्रोक्तकोटिभिर्धान्यसम्भृतैः ।
स्त्रीणां षण्णवतिप्राप्तसङ्ख्यानैश्च सहस्रकैः ॥ ७ ॥
लसद्रत्नकिरीटाद्यैर्नरेन्द्राणां सहस्रकैः ।
द्वात्रिंशद्गणनोपेतैर्नित्यं सेवाविधायिभिः ॥ ८ ॥
इत्यादिसम्पदासारैर्देवविद्याधरैः श्रितः ।
रूपलावण्यसौभाग्यमहाभाग्यैः समन्वितः ॥ ९ ॥
कुर्वन्राज्यं महाप्राज्यं यावदास्ते विचक्षणः ।
श्रीमज्जिनेन्द्रचन्द्राणां धर्मकर्मपरायणः ॥ १० ॥
तावत्सौधर्मकल्पेशः स्वकीये सदसि स्थितः ।
पुरुषस्य लसद्रूपगुणव्यावर्णनां पराम् ॥ ११ ॥
प्रकुर्वाणः सुरैः पृष्टो देव किं कोपि वर्तते ।
उक्तप्रकाररूपश्रीभरतक्षेत्रके न वा ॥ १२ ॥
इन्द्रेणोक्तं शुभं रूपं यादृशं चक्रवर्त्तिनः ।
सनत्कुमारनाम्नोऽस्ति देवानां नापि तादृशम् ॥ १३ ॥
तच्छ्रुत्वा मणिमालाख्यरत्नचूलौ सुरोत्तमौ ।
तद्रूपं द्रष्टुमायातौ प्रच्छन्नं मज्जनक्षणे ॥ १४ ॥
चक्रिणोरूपमालोक्य सर्वावयवसुन्दरम् ।
वस्त्रभूषादिनिर्मुक्तं तथापि त्रिजगत्प्रियम् ॥ १५ ॥
देवानामपि नास्त्येवं रूपं ताभ्यां विचिन्त्य च ।
शिरःकम्पं विधायेति सिंहद्वारे प्रहर्षतः ॥ १६ ॥

स्वरूपं प्रकटीकृत्य प्रतीहारं प्रतीरितम् ।
भो दौवारिक भूपाग्रे त्वया शीघ्रं निरूप्यते ॥ १७ ॥
दृष्टुकामौ भवद्रूपं स्वर्गाद्देवौ समागतौ ।
तदाकर्ण्य प्रतीहारश्चक्रिणं तन्निवेदयत् ॥ १८ ॥
ततस्तेन विधायोच्चैः शृङ्गारं चक्रवर्तिना ।
स्थित्वा सिंहासने भूत्याऽऽकारितौ तौ सुधाशिनौ ॥ १९ ॥
सभायां तौ समागत्य दृष्ट्वा भूपं समूचतुः ।
हा कष्टं यादृशं रूपं दृष्टं प्रच्छन्नवृत्तितः ॥ २० ॥
आवाभ्यां पूर्वमेवेदं लीलया मज्जनाश्रितम् ।
साम्प्रतं तादृशं नास्ति ततः सर्वमशाश्वतम् ॥ २१ ॥
तच्छ्रुत्वा सेवकैरुक्तं तथा मण्डनकारिणा ।
पूर्वरूपादिदानीं च न किञ्चिद्धीनतामितम् ॥ २२ ॥
अस्माकं प्रतिभातीति श्रुत्वा ताभ्यां च तद्वचः ।
तद्धीनस्य प्रतीत्यर्थं नृपाग्रे जलसम्भृतम् ॥ २३ ॥
कुम्भमानीय सर्वेषां दर्शयित्वा पुनश्च तान् ।
बहिर्निष्कास्य भूपस्य पश्यतः पुरतो घटम् ॥ २४ ॥
तोयबिन्दुमपाकृत्य तस्मात्तृणशलाकया ।
तानाहूय पुनस्तेषां स कुम्भो दर्शितस्तराम् ॥ २५ ॥
कीदृशः प्रागिदानीं च कुम्भोयं कथ्यतामिति ।
सम्पृष्टास्ते जगुश्चैवं पूर्णोयं पूर्ववद्ध्रुवम् ॥ २६ ॥
देवौ ततश्च भो राजन् यथायं जलबिन्दुकः ।
दूरीकृतोपि न ज्ञातस्तथा ते रूपहीनता ॥ २७ ॥
एतैर्न लक्ष्यते चेति कथयित्वा दिवं गतौ ।
ततश्चक्री चमत्कारं दृष्ट्वा चित्ते विचारयन् ॥ २८ ॥

पुत्रमित्रकलत्रादिसम्पदा विविधा तराम् ।
चंचला चपलेवासौ संसारे दुःखसागरे ॥ २९ ॥
बीभत्सु तापकं पूति शरीरमशुचेर्गृहम् ।
का प्रीतिर्विदुषामत्र यत्क्षणार्धे परिक्षयि ॥ ३० ॥
भोगाः पञ्चेन्द्रियोत्पन्ना वञ्चकेभ्योति वञ्चकाः ।
यैर्वञ्चितो जनोयं च पिशाचीव प्रवर्तते ॥ ३१ ॥
मिथ्यात्वग्रसितो जीवो जैनवाक्यामृते हिते ।
न करोति मतिं मूढो ज्वरीव क्षीरशर्करे ॥ ३२ ॥
अद्य हत्वा महामोहं कुर्वेहं स्वात्मनो हितम् ।
इत्यादिकं विचार्योच्चैः सुधीर्वैराग्यतत्परः ॥ ३३ ॥
कृत्वा पूजां जिनेन्द्राणां सर्वसिद्धिप्रदायिनीम् ।
दानं विधाय कारुण्यादथायोग्यं सुखप्रदम् ॥ ३४ ॥
दत्वा देवकुमाराय राज्यं पुत्राय धीधनः ।
त्रिगुप्तमुनिपार्श्वे च दीक्षां जैनीं जगद्धिताम् ॥ ३५ ॥
गृहीत्वा गुरुसद्भक्त्या तपश्चोग्रप्रसंज्ञकम् ।
कुर्वन्पञ्च प्रकारं च चारित्रं प्रतिपालयन् ॥ ३६ ॥
तदा विरुद्धकाहारैस्तस्य सर्वशरीरके ।
अनेकव्याधयो जाताः कण्डूप्रभृतयस्तराम् ॥ ३७ ॥
तथाप्यसौ महासाधुः शरीरेऽत्यन्तनिस्पृहः ।
चिन्तां नैव करोत्युच्चैः कुरुते चोत्तमं तपः ॥ ३८ ॥
तदा सौधर्मकल्पेशः सुधीर्धर्मानुरागतः ।
संस्थितः स्वसभामध्ये चारित्रं पञ्चधा मुदा ॥ ३९ ॥
व्यावर्ण्येश्च देवेन पृष्टो मदनकेतुना ।
देव देव यथा प्रोक्तं चारित्रं भवता तथा ॥ ४० ॥

किं कस्यापि लसदृष्टेः क्षेत्रे भरतसंज्ञके ।
अस्ति वा नास्ति तच्छ्रुत्वा सौधर्मेन्द्रो जगाद च ॥ ४१
सनत्कुमारचक्रेशस्त्यक्त्वा षट्खण्डमण्डिताम् ।
तृणवच्च महीं धीमान्स्वदेहेऽतीव निस्पृहः ॥ ४२ ॥
तच्चरित्रं जगच्चित्रं पञ्चधास्ति जिनोदितम् ।
एतदाकर्ण्य देवोसौ शीघ्रं मदनकेतुवाक् ॥ ४३ ॥
तत्रागत्य महाटव्यामनेकव्याधिसंयुतम् ।
निश्चलं मेरुवद्गाढं सुरासुरनमस्कृतम् ॥ ४४ ॥
दुर्धरं भूरि चारित्रमनुतिष्ठन्तमद्भुतम् ।
समालोक्य मुनीन्द्रं तं पवित्रीकृतभूतलम् ॥ ४५ ॥
सम्प्राप्य परमानन्दं तथा तस्य परीक्षितुम् ।
शरीरे निस्पृहत्वं च वैद्यरूपं विधाय वै ॥ ४६ ॥
स्फेटयित्वा महाव्याधीन्सर्वान्वैद्यशिरोमणिः ।
शीघ्रं दिव्यं करोम्युच्चैः शरीरं रोगवर्जितम् ॥ ४७ ॥
एवं मुहुर्मुहुर्व्यक्तं ब्रुवाणः पुरतो मुनेः ।
इतस्ततश्च सञ्चच्छन्पृष्टोऽसौ मुनिना तदा ॥ ४८ ॥
कस्त्वं किमर्थमत्रैव निर्जने च वने घने ।
पूत्कारं सङ्करोषीति तदाकर्ण्य सुरोऽवदत् ॥ ४९ ॥
वैद्योऽहं भवतां देव निखिलं व्याधिसञ्चयम् ।
स्फेटयित्वा सुवर्णाभशरीरं सङ्करोम्यहम् ॥ ५० ॥
ततश्च स मुनिः प्राह यदि स्फेटयसि ध्रुवम् ।
व्याधिं मे स्फेटय त्वं च शीघ्रं सांसारिकं सुधीः ॥ ५१ ॥
तेनोक्तं भो मुने नाऽहं समर्थस्तन्निवारणे ।
तत्र शूरा भवन्त्येव भवन्तस्तु विचक्षणाः ॥ ५२ ॥

ततः प्रोक्तं मुनीन्द्रेण किं व्याधिस्फेटनेन मे ।
अशाश्वतेऽशुचौ काये निर्गुणे दुर्जनोपमे ॥ ५३ ॥
निष्ठीवनस्य संस्पर्शमात्रेण व्याधिसङ्क्षयः ॥
यत्र शीघ्रं भवत्येव किं कार्यं वैद्यभेषजैः ॥ ५४ ॥
इत्युक्त्वा मुनिना तेन स्वनिष्ठीवनमात्रतः ।
अपनीय महाव्याधिं स्वबाहुर्दर्शितः शुभः ॥ ५५ ॥
दृष्ट्वा स्वर्णशलाकाभं बाहुमेकं मुनेस्तराम् ।
स्वमायामुपसंहृत्य तं प्रणम्य जगाद सः ॥ ५६ ॥
भो स्वामिन्भवतां चित्रं चरित्रं दोषवर्जितम् ।
निस्पृहत्वं शरीरादौ सौधर्मेन्द्रेण वर्णितम् ॥ ५७ ॥
सभायां यादृशं देव महाधर्मानुरागतः ।
तादृशं दृष्टमेवात्र समागत्य मयाऽधुना ॥ ५८ ॥
अतस्त्वं धन्य एवात्र भूतले जन्म ते शुभम् ।
मानुष्यं शर्मदं चेति तं प्रशस्य मुहुर्मुहुः ॥ ५९ ॥
नत्वा भक्तिभरेणोच्चैः स्वर्गं देवो गतस्तदा ।
मुनिः सनत्कुमारोऽसौ महावैराग्यतः पुनः ॥ ६० ॥
पञ्च प्रकारचारित्रं प्रकृष्टोद्योतनादिकम् ।
विधाय क्रमशो धीरः शुक्लध्यानप्रभावतः ॥ ६१ ॥
घातिकर्मक्षयं कृत्वा लोकालोकप्रकाशकम् ।
सम्प्राप्तः केवलज्ञानं देवेन्द्राद्यैः प्रपूजितः ॥ ६२ ॥
सम्बोध्य सकलान्भव्यान्सद्धर्मामृतवर्षणैः ।
शेषकर्मक्षयं कृत्वा प्राप्तवान्मोक्षमक्षयम् ॥ ६३ ॥
सोऽस्माकं केवलज्ञानी स्वर्गमोक्षसुखप्रदः ।
पूजितो वन्दितो नित्यं भूयात्सत्केवलश्रिये ॥ ६४ ॥

यथाऽनेन मुनीन्द्रेण चारित्रोद्योतनं कृतम् ।
तथान्येन सुभव्येन कर्त्तव्यं तद्धि शर्मदम् ॥ ६५ ॥

गच्छे श्रीमति मूलसङ्घतिलके श्रीशारदायाः शुभे
श्रीभट्टारकमल्लिभूषणगुरुश्चारित्रचूडामणिः ।
तच्छिष्यो गुणरत्नरञ्जितमतिर्नित्यं सतां सद्गति—
र्भूयान्मे भवतारको वरमुदे श्रीसिंहनन्दी मुनिः॥ ६६ ॥

इति चारित्रोद्योतिनी श्रीसनत्कुमारचक्रवर्तिनः कथा समाप्ता ।

४–श्रीसमन्तभद्रस्वामिनः कथा ।

नत्वा जिनं जगत्पूज्यं द्योतने दृष्टिबोधयोः ।
श्रीमत्समन्तभद्रस्य चरित्रं रचयाम्यहम् ॥ १ ॥
इहैव दक्षिणस्थायां काञ्च्यां पुर्यां परत्मवित् ।
मुनिः समन्तभद्राख्यो विख्यातो भुवनत्रये ॥ २ ॥
तर्कव्याकरणोत्कृष्टच्छन्दोऽलङ्कृतिकादिभिः ।
अनेकशास्त्रसन्दोहैर्मण्डितो बुधसत्तमः ॥ ३ ॥
दुर्द्धरानेकचारित्ररत्नरत्नाकरो महान् ।
यावदास्ते सुखं धीरस्तावत्तत्कायकेऽभवत् ॥ ४ ॥
असद्वेद्यमहाकर्मोदयाद्दुर्दुःखदायिनः ।
तीव्रकष्टप्रदः कष्टं भस्मकव्याधिसंज्ञकः ॥ ५ ॥
तेन सम्पीडितश्चित्ते चिन्तयत्यैवमञ्जसा ।
व्याधिनानेन सन्तप्ता विद्वान्सोपि वयं भुवि ॥ ६ ॥
दर्शनस्योपकाराय जाता नैव समर्थकाः ।
अतस्तद्व्याधिनाशाय विधिः कश्चिद्विधीयते ॥ ७ ॥

स विधिस्तु भवेन्नाना पक्वान्नाहारसञ्चयैः ।
अन्यैः स्निग्धतरैरन्नैस्तद्दुःखौघप्रशान्तिदः ॥ ८ ॥
तदाहारस्य सम्प्राप्तेरभावादत्र साम्प्रतम् ।
यस्मिन्देशे यथास्थाने येन लिङ्गेन सम्भवेत् ॥ ९ ॥
तथाहारपरिप्राप्तिराश्रयं तं व्रजाम्यहम् ।
विचार्येति परित्यज्य पुरीं काञ्चीं स संयमी ॥ १० ॥
उत्तराभिमुखो गच्छन्पुण्ड्रेन्दुनगरे गतः ।
तत्र वन्दकलोकानां स्थाने च महतीं मुदा ॥ ११ ॥
दानशालां समालोक्य भस्मकव्याधिसङ्क्षयः ।
भविष्यत्यत्र संचित्य धृतवान्बौद्धलिङ्गकम् ॥ १२ ॥
तत्रापि तन्महाव्याधिशान्तिदाहारदुर्विधात् ।
स निर्गत्य पुनस्तस्मादुत्तरापथसम्मुखः ॥ १३ ॥
पर्यटन्नगराण्युच्चैरनेकानि क्षुधाहतः ।
सम्प्राप्तः कतिभिर्घस्त्रैः पुरं दशपुराभिधम् ॥ १४ ॥
तत्र दृष्ट्वा तथा भागवतानामठमुन्नतम् ।
तल्लिङ्गिभिः समाकीर्णं काककीर्णं वनं यथा ॥ १५ ॥
तद्भाक्तिकैः सदा दत्तविशिष्टाहारसञ्चयम् ।
त्यक्त्वा वन्दकलिङ्गं च धृत्वा भागवतं हि तत् ॥ १६ ॥
तत्रैवं भस्मकव्याधिविनाशाहारहानितः ।
ततो निर्गत्य नानोरुदिग्देशादींश्च पर्यटन् ॥ १७ ॥
अन्तः स्फुरितसम्यक्त्वो बहिर्व्याप्तकुलिङ्गकः ।
शोभितोऽसौ महाकान्तिः कर्दमाक्तो मणिर्यथा ॥ १८ ॥
वाणारसीं ततः प्राप्तः कुलघोषैः समन्विताम् ।
योगिलिङ्गं तथा तत्र गृहीत्वा पर्यटन्पुरे ॥ १९ ॥

स योगी लीलया तत्र शिवकोटिमहीभुजा ।
कारितं शिवदेवोरुप्रासादं सम्विलोक्य च ॥ २० ॥
सृष्टाष्टादशसद्भक्षसमूहैश्चारुकैर्युतम् ।
अत्रास्मदीयदुर्व्योधिशान्तिता सम्भविष्यति ॥ २१ ॥
यावदेवं विचार्योच्चैः संस्थितस्तावदेव च ।
कृत्वा देवस्य तैः पूजां भाक्तिकैर्भक्षभेदकैः ॥ २२ ॥
बहिर्निक्षिप्यमाणं च दृष्ट्वा नैवेद्यकं महत् ।
अहो किमत्र कस्यापि सामर्थ्यं नास्ति सोऽवदत् ॥ २३ ॥
यः कोपि देवमत्रेममवतार्य सुभक्तितः ।
राज्ञा सम्प्रेषितं दिव्यमाहारं भोजयत्यलम् ॥ २४ ॥
इत्याकर्ण्य जगुस्तेपि किं सामर्थ्यं तवास्ति च ।
भक्षं भोजयितुं देवमवतार्य यतो भवान् ॥ २५ ॥
वदत्येवं तदाकर्ण्य स जगौ मेस्ति तद्ध्रुवम् ।
ततस्तत्र स्थितैर्लोकैः शीघ्रं राज्ञे निवेदितम् ॥ २६ ॥
योगिनैकेन देवात्र समागत्य महाद्भुतम् ।
त्वदीयदेवसत्पूजाविसर्जनविधौ प्रभो ॥ २७ ॥
बहिर्निक्षिप्यमाणं च नैवेद्यं संविलोक्य तत् ।
प्रोक्तमत्रावतार्याशु देवं दिव्याशनं महत् ॥ २८ ॥
भोजयामीति तच्छ्रुत्वा शिवकोटिमहीपतिः ।
सञ्जातकौतुको दिव्यं नानाहारं घृतादिभिः ॥ २९ ॥
प्रचुरेक्षुरसैर्दुग्धदध्यादिकसमन्वितैः
पूर्णैः कुम्भशतैर्युक्तं सत्प्रपैर्वटकादिभिः ३० ॥
समादाय समागत्य तत्रैवं संजगाद सः ।
भोजयन्तु भवन्तस्तु देवं भो योगिनोऽशनम् ॥ ३१ ॥

एवं करोमि तेनोक्त्वा सर्वं तद्भोज्यसञ्चयम् ।
प्रासादान्तः प्रविश्योच्चैः सर्वान्निष्कास्य तान्बहिः ॥ ३२ ॥
द्वारं दत्वा स्वयं भुक्त्वा कपाटयुगलं पुनः ।
समुद्घाट्य ततः प्रोक्तं भाजनानि बहिस्तराम् ॥ ३३ ॥
निस्सार्यतां ततो जाते महाश्चर्ये स भूपतिः ।
नित्यं नैवेद्यसन्दोहं कारयित्वोत्तरोत्तरम् ॥ ३४ ॥
प्रेषयामास सद्भक्त्या षण्मासेषु गतेषु च ।
संजाते भस्मकव्याधिप्रक्षये तस्य योगिनः ॥ ३५ ॥
आहारे प्रकृतिं प्राप्ते शरीरे शान्तितामिते ।
समस्तभक्षसन्दोहं दृष्ट्वा चोद्धरितं जगुः ॥ ३६ ॥
ततस्तत्र स्थिता लोकाः किं भो योगीन्द्र साम्प्रतम् ।
तथैवोद्ध्रियते सर्वो नाना भक्षसमुच्चयः ॥ ३७ ॥
तेनोक्तं भूपतेर्भक्त्या सन्तृप्तो भगवानयम् ।
स्तोकमेवात्र भुंक्ते च तच्छ्रुत्वा ते जगुर्नृपम् ॥ ३८ ॥
तत्सर्वं भूपतिः सोपि शुष्कपुष्पादिवेष्टितम् ।
धूर्तं माणवकं तस्य चारित्रं वीक्षितुं तराम् ॥ ३९ ॥
तं प्रणालप्रदेशे च स्थापयामास मूढतः ।
द्वारं दत्वा तु योगीन्द्रं भुञ्जानं वीक्ष्य तत्स्वयम् ॥ ४० ॥
छात्रो जगौ नृपस्याग्रे योगी भो देव किं चन ।
देवं न भोजयत्येव किन्तु भुंक्ते स्वयं पुनः ॥ ४१ ॥
तदाकर्ण्य नृपः प्राह कोपेन कलितस्तराम् ।
भो योगिंस्त्वं मृषावादी न किञ्चिद्भोजनादिकम् ॥४२॥
देवं मे भोजयस्येव किन्तु दत्वा कपाटकम् ।
स्वयं त्वं भक्षयत्येव महाधूर्ततरो भवान् ॥ ४३ ॥

नमस्कारं न देवस्य करोषीति कथं पुनः ।
तच्छ्रुत्वा योगिना प्रोक्तं देवस्ते सोढुमक्षमः ॥ ४४ ॥
अस्माकं सुनमस्कारं रागद्वेषमलीमसः ।
राजत्वं राजते नैव राजन्सामान्यके नरे ॥ ४५ ॥
यस्त्वष्टादशदुर्दोषैर्निर्मुक्तो जिनभास्करः ।
केवलज्ञानसत्तेजोलोकालोकप्रकाशकः ॥ ४६ ॥
अस्मदीयं नमस्कारं स सोढुं वर्तते क्षमः ।
तेनाहं न नमस्कारं करोम्यस्मै महीपते ॥ ४७ ॥
यद्यस्मै तं करोम्युच्चैस्तदायं तव देवकः ।
स्फुटत्यैव तदाकर्ण्य नृपः प्राह सकौतुकः ॥ ४८ ॥
स्फुटत्यसौ स्फुटत्यैव कुरु त्वं च नमस्कृतिम् ।
पश्यामस्ते नमस्कारसामर्थ्यं सकलं ध्रुवम् ॥ ४९ ॥
ततो जगाद योगीन्द्रः प्रभाते भवतां पुनः ।
सामर्थ्यं दर्शयिष्यामि मदीयं भो महीपते ॥ ५० ॥
एवमस्त्वीति सम्प्रोक्त्वा राज्ञा तं योगिनं तदा ।
धृत्वा देवगृहे पश्चाद्बहिस्तु बहुयत्नतः ॥ ५१ ॥
खड्गपाणिभटैर्गाढं हस्तिनां च घटादिभिः ।
संरक्षितस्तदा रात्रिप्रहरद्वितये गते ॥ ५२ ॥
मयोक्तं रभसादित्थं न विद्मः किं भविष्यति ।
इत्यादिचिन्तनोपेतः संस्मरञ्जिनपादयोः ॥ ५३ ॥
यावदास्ते स योगीन्द्रस्तावदासनकम्पनात् ।
अम्बिकाशु समागत्य जिनशासनदेवता ॥ ५४ ॥
तं जगाद प्रभो श्रीमज्जिनपादाब्जषट्पद ।
चिन्तां मा कुरु योगीन्द्र यत्प्रोक्तं भवता ध्रुवम् ॥ ५५ ॥

"**स्वयंभुवाभूतहिते–नभूतल**" इति स्फुटम् ।
पदमाद्यं विधायोच्चैः कुर्वतः स्तुतिमुन्नताम् ॥ ५६ ॥
चतुर्विंशतितीर्थेशां शान्तिकोटिविधायिनाम् ।
भविष्यति द्रुतं सर्वं स्फुटिष्यति कुलिङ्गकम् ॥ ५७ ॥
इत्युक्त्वा सा गता देवी जिनभक्तिपरायणा ।
ततः समन्तभद्रोसौ देवतादर्शनात्तराम् ॥ ५८ ॥
सञ्जातपरमानन्दप्रोल्लसद्वदनाम्बुजः ।
चतुर्विंशतितीर्थेशां स्तुतिं कृत्वा सुखं स्थितः ॥ ५९ ॥
प्रभाते च समागत्य राज्ञा कौतुहलाद्द्रुतम् ।
समस्तलोकसन्दोहसंयुतेन महाधिया ॥ ६० ॥
देवद्वारं समुद्घाटय बहिराकारितो हि सः ।
आगच्छन्तं समालोक्य सम्मुखं हृष्टचेतसम् ॥ ६१ ॥
विकाशितमुखाम्भोजभास्करं वा महाद्युतिम् ।
ततश्चेतसि भूपेन चिन्तितं योगिनोधुना ॥ ६२ ॥
मूर्त्तिः सन्दृश्यते दिव्या ध्रुवं निर्वाहयिष्यति ।
आत्मीयं भाषितं चेति संविचार्यैव योगिराट् ॥ ६३ ॥
तेनोच्चैर्भणितः शीघ्रं भो योगीन्द्र कुरु ध्रुवम् ।
त्वं देवस्य नमस्कारं पश्यामो वयमद्भुतम् ॥ ६४ ॥
चतुर्विंशतितीर्थेशां योगीन्द्रेण महास्तुतिः ।
प्रारब्धा भक्तितः कर्तुं शर्मदा दिव्यभाषया ॥ ६५ ॥
तां कुर्वन्नष्टमश्रीमच्चन्द्रप्रभजिनेशिनः ।
तमस्तमोरिव रश्मिभिन्नमिति संस्तुतेः ॥ ६६ ॥
वाक्यं यावत्पठत्येवं स योगी निर्भयो महान् ।
तावत्तल्लिङ्गकं शीघ्रं स्फुटितं च ततस्तराम् ॥ ६७ ॥

निर्गता श्रीजिनेन्द्रस्य प्रतिमा सुचतुर्मुखी ।
संजातः सर्वतस्तत्र जयकोलाहलो महान् ॥ ६८ ॥
समुत्पन्ने महाश्चर्ये भूपादीनां ततो नृपः ।
जगौ योगीन्द्र भो कस्त्वं परमाश्चर्यकारकः ॥ ६९ ॥
महासामर्थ्यसंयुक्तोऽव्यक्तलिंगीति तच्छ्रुतेः ।
स्फुटं काव्यद्वयं चेति योगीन्द्रः समुवाच सः ॥ ७० ॥
"काञ्च्यां नग्नाटकोहं मलमलिनतनुर्लाम्बुशे पाण्डुपिण्डः
पुण्ड्रोन्द्रे शाकभिक्षुर्दशपुरनगरे मृष्टभोजी परिव्राट् ।
वाणारस्यामभूवं शशधरधवलः पाण्डुराङ्गस्तपस्वी ।
राजन्यस्यास्ति शक्तिः स वदतु पुरतो जैननिर्ग्रन्थवादी ॥
पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिन्धुठक्कविषये काञ्चीपुरे वैदिशे ।
प्राप्तोऽहं करहाटकं बहुभटैर्विद्योत्कटैः सङ्कटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितम् ॥"
इत्युक्त्वा कुलघोषस्य त्यक्त्वा लिङ्गं कुलिङ्गिनः ।
जैननिर्ग्रन्थसल्लिङ्गं शिखिपिच्छसमन्वितम् ॥ ७१ ॥
सन्धृत्यैकान्तिनः सर्वान्वादिनो दुर्मदान्वितान् ।
अनेकान्तप्रवादेन निर्जित्यैकहेलया ॥ ७२ ॥
कृत्वा श्रीमज्जिनेन्द्राणां शासनस्य प्रभावनाम् ।
स्वर्मोक्षदायिनीं धीरो भावितीर्थङ्करो गुणी ॥ ७३ ॥
समुद्योतितवान्सारं सम्यग्दर्शनमुत्तमम् ।
कुदेवस्य नमस्काराऽकरणात्कविसत्तमः ॥ ७४ ॥
एकान्तवादिनां भङ्गात्सम्यग्ज्ञानं जिनेशिनः ।
स्वामी समन्तभद्राख्यो द्योतयामास शुद्धधीः ॥ ७५ ॥

एवं दृष्ट्वा महाश्चर्यं लोकानां भूपतेस्तराम् ।
श्रद्धा श्रीमज्जिनेन्द्राणां शासने समभूत्तदा ॥ ७६ ॥
शिवकोटिमहाराजो विवेकोत्कृष्टमानसः ।
चारित्रमोहनीयस्य क्षयोपशमहेतुना ॥ ७७ ॥
महावैराग्यसम्पन्नो राज्यं त्यक्त्वा विचक्षणः ।
जैनीं दीक्षां समादाय शर्मदां गुरुभक्तितः ॥ ७८ ॥
सकलश्रुतसन्दोहमधीत्य क्रमशः सुधीः ।
लोहाचार्यकृतां पूर्वां शुद्धात्माराधनां पराम् ॥ ७९ ॥
सहस्रैश्चतुराशीत्या श्लोकैः संख्यामितां हिताम् ॥
संक्षिप्य ग्रन्थतो मन्दमेधातुच्छायुपोर्वशात् ॥ ८० ॥
अर्थतश्चारिहे लिङ्ग इत्यादिभिरनुत्तरैः ।
चत्वारिंशन्महासूत्रैः सन्मूलाराधनां नवाम् ॥ ८१ ॥
तृतीयार्द्रसहस्रासंख्यां चक्रे जगद्धिताम् ।
सा राधना मुनीन्द्रौ तौ शर्मदाः सन्तु मे सदा ॥ ८२ ॥
सम्यग्दर्शनबोधवृत्तविलसद्रत्नाकरो निर्मलः
कामोद्दामकरीन्द्रपञ्चवदनो विद्यादिनन्दी गुरुः ।
षट्तर्कागमजैनशास्त्रनिपुणः श्रीमूलसङ्घे श्रियं
श्रीभट्टारकमल्लिभूषणगुरुः सूरिः श्रुताब्धिः कियात् ॥ ८३ ॥

इति सम्यग्दर्शनज्ञानोद्योतिनी श्रीसमन्तभद्रस्वामिनः कथा समाप्ता ।

५—श्रीसञ्जयन्तमुनेः कथा ।

श्रीमज्जैनपदाम्भोजयुग्मं नत्वा सुखप्रदम् ।
सञ्जयन्तमुनेर्वच्मि सत्तपोद्योतने कथाम् ॥ १ ॥

जम्बूद्वीपे महामेरोः पश्चिमास्ये विदेहके ।
विषये गन्धमालिन्यां वीतशोकपुरे पुरे ॥ २ ॥
वैजयन्तो महाराजो भव्यश्री नाम तत्प्रिया ।
सञ्जयन्तजयन्ताख्यौ सञ्जातौ सुसुतौ तयोः ॥ ३ ॥
एकदा स महीनाथो विजयन्तोऽतिनिर्मलः ।
विद्युत्पातेन संवीक्ष्य मरणं पट्टहस्तिनः ॥ ४ ॥
महावैराग्यसम्पन्नो पुत्राभ्यां राज्यसम्पदम् ।
ददानो भणितस्ताभ्यां भो पितश्चेदिदं शुभम् ॥ ५ ॥
कथं सन्त्यज्यते राज्यं युष्माभिः सुविक्षणैः ॥
आवाभ्यां न ततस्तात राज्यं तद्गृह्यते सुधीः ॥ ६ ॥
ततो राज्यं बुधैस्त्याज्यं सञ्जयन्तसुताय च ।
वैजयन्ताय दत्वेति गृहीतं सुतपस्त्रिभिः ॥ ७ ॥
विशिष्टं स तपः कुर्वन्पिता सद्ध्यानवह्निना ।
घातिकर्मेन्धनं दग्ध्वा प्राप्तवान्केवलश्रियम् ॥ ८ ॥
केवलज्ञानपूजार्थं सञ्जाते मरुदागमे ।
मुनिर्जयन्तनामासौ संविलोक्य तदा लघुः ॥ ९ ॥
सद्रूपं धरणेन्द्रस्य विभूतिं च मनोहराम् ।
ईदृशं सुतरां रूपं सम्पदा महतीदृशी ॥ १० ॥
तपोमाहात्म्यतो भूयाच्छीघ्रं मे परजन्मनि ।
इत्युत्कटनिदानेन धरणेन्द्रश्चाभवत्ततः ॥ ११ ॥
सञ्जयन्तमुनिश्चापि पक्षमासोपवासकैः ।
क्षुत्पिपासादिभिः क्षीणो महाटव्यां सुनिश्चलः ॥ १२ ॥
स सूर्यप्रतिमायोगसंस्थितो गिरिवत्तराम् ।
तदातस्योपरिप्राप्तो विद्युद्दंष्ट्रो खगाधिपः ॥ १३ ॥

आकाशे स्वविमानस्य स्खलनाद्वीक्ष्य तं मुनिम् ।
ततस्तस्योपसर्गं च चक्रे कोपतो दृढम् ॥ १४ ॥
स मुनिस्तु निजध्यानाचलितो नैव धीरधीः ।
महावायुशतैश्चापि चालितः किं सुराचलः ॥ १५ ॥
ततस्तेनातिकष्टेन मुनिं विद्याप्रभावतः ।
नीत्वा च भरतक्षेत्रे पूर्वदिग्भागसंस्थिते ॥ १६ ॥
क्षिप्त्वा सिंहवतीमुख्यनदीपञ्चकसङ्गमे ।
तद्देशवर्तिनश्चापि सर्वलोकाः सुपापिनः ॥ १७ ॥
आकार्य भणिताः शीघ्रं राक्षसोऽयं महानहो ।
युष्मान्भक्षयितुं प्राप्तो मत्वैवं मार्यतामिति ॥ १८ ॥
तदाकर्ण्य मिलित्वा ते लोकैर्लकुटकादिभिः ।
पाषाणैर्मार्यमाणोपि शत्रुमित्रसमाशयः ॥ १९ ॥
दुष्टोपसर्गकं जित्वा स मुनिः सञ्जयन्तवाक् ।
घातिकर्मक्षयं कृत्वा केवलज्ञानमद्भुतम् ॥ २० ॥
उत्पाद्य शेषकर्माणि हत्वा मोक्षं गतो द्रुतम् ।
ततो निर्वाणपूजार्थं जाते देवागमे तराम् ॥ २१ ॥
यो जयन्तमुनिर्जातो धरणेन्द्रो निदानतः ।
तेनागतेन तं दृष्ट्वा बन्धोः कायं महाक्रुधा ॥ २२ ॥
एभिर्मदीयसद्बन्धोरुपसर्गः कृतो महान् ।
मत्वेति नागपाशेन बद्धा लोकाः सुनिष्ठुरम् ॥ २३ ॥
ततस्तैर्भणितं लोकैर्नजानीमो वयं प्रभो ।
एतत्सर्वमहापापं विद्युदंष्ट्रेण निर्मितम् ॥ २४ ॥
तच्छ्रुत्वा नागपाशेन तं बद्ध्वा पापिनं पुनः ।
सुनिक्षिप्य महाम्भोधौ मारयन्धरणेद्रवाक् ॥ २५ ॥

तदा दिवाकराख्येन देवेन भणितो द्रुतम् ।
किं नागेन्द्र वराकेन मारितेनामुना सुधीः ॥ २६ ॥
चतुर्भवान्तराण्युच्चैर्वैरं पूर्वं प्रवर्तते ।
कारणेन पुनस्तेन मुनेश्चोपद्रवः कृत ॥ २७ ॥
एतदाकर्ण्य नागेन्द्रः प्राहैवं ब्रूहि कारणम् ।
ततो दिवाकरेणोक्तं श्रृणुत्वं भो विचक्षण ॥ २८ ॥
जम्बूद्वीपेऽत्र विख्याते भरतक्षेत्रमध्यगे ।
पुरा सिंहपुरे राजा सिंहसेनोऽभवत्सुधीः ॥ २९ ॥
रामदत्ता महादेवी साध्वी तस्य विचक्षणा ।
मंत्री श्रीभूतिनामाभूत्परेषा वंचनापरः ॥ ३० ॥
पद्मखण्डे पुरे श्रेष्ठी सुमित्रो गुणमण्डितः ।
पुत्रः समुद्रदत्ताख्यो सुमित्राकुक्षिसंभवः ॥ ३१ ॥
वाणिज्येनैकदागत्य तत्र सिंहपुरे महान् ।
वणिक्समुद्रदत्तोऽसौ सत्यशौचपरायणः ॥ ३२ ॥
श्रीभूतिमंत्रिणः पार्श्वे धृत्वा सद्रत्नपञ्चकम् ।
गत्वा समुद्रपारं च तस्मादायाति तत्क्षणे ॥ ३३ ॥
पापतः स्फुटिते यान-पात्रे जातोतिनिर्धनः ।
आगतेन ततस्तेन श्रीभूतिस्तु स याचितः ॥ ३४ ॥
देहि मे पञ्च रत्नानि सत्यघोष दयापर ।
तेन श्रीभूतिना प्रोक्तं लोकानामग्रतस्तदा ॥ ३५ ॥
किं भो पुरा मया प्रोक्तं तत्सत्यं समभूद्वचः ।
मन्येऽहं धननाशेन समागच्छति कोप्ययम् ॥ ३६ ॥
निर्धनो गृहिलो भूत्वा कस्यापि महतस्तराम् ।
करिष्यति वृथा मूढो गले वल्गनकं ध्रुवम् ॥ ३७ ॥

कस्मात्समागतान्यस्य सद्रत्नानि महीतले ।
केन वा लोकितानीति किं न कुर्वन्ति पापिनः ॥ ३८ ॥
ततः समुद्रदत्तोपि मदीयं रत्नपंचकम् ।
श्रीभूतिर्न ददात्येवं सर्वस्मिन्नगरे सुधीः ॥ ३९ ॥
कृत्वा पूत्कारकं नित्यं राजवेश्मसमीपतः ।
पश्चात्पश्चिमरात्रौ च पूत्कारं प्रकरोत्यसौ ॥ ४० ॥
षण्मासेषु गतेष्वेवं राज्या राज्ञे निवेदितम् ।
देवायं गृहिलो न स्यादेक्यवाक्यप्रजल्पनात् ॥ ४१ ॥
एकान्ते च ततो राज्ञा सम्पृष्टो गृहिलो जगौ ।
पूर्ववृत्तान्तकं सर्वं रत्नानां सत्यमेव च ॥ ४२ ॥
ततः परस्परं द्यूते पृष्ट्वा तं रामदत्तया ।
श्रीभूतिं भोजनं पश्चात्साभिज्ञानेन तेन च ॥ ४३ ॥
रत्नार्थं प्रेषिता दासी पार्श्वे श्रीभूतिकस्त्रियः ।
न दत्तानि तया पश्चाज्जित्वा तन्मुद्रिकां शुभाम् ॥ ४४ ॥
प्रेषिता सा पुनर्नैव तया दत्तानि तानि च ।
जित्वा च प्रेषिते यज्ञोपवीते भीतया तया ॥ ४५ ॥
शीघ्रं रत्नानि दत्तानि तान्यादाय तया पुनः ।
भूपतेर्दर्शितान्युच्चैस्ततस्तेन महीभुजा ॥ ४६ ॥
स्वकीयसाररत्नानां मध्ये निक्षिप्य तानि च ।
धृत्वा समुद्रदत्ताग्रे युष्माकं त्वं गृहाण भो ॥ ४७ ॥
इत्युक्ते तेन रत्नानि गृहीतानि निजानि वै ।
न विस्मृतिः सतां क्वापि काले दीर्घतरे गते ॥ ४८ ॥
तदा कोपेन तेनोक्तं भूभुजा स्वाधिकारिणाम् ।
अस्य किं क्रियते ब्रूत महाचोरस्य पापिनः ॥ ४९ ॥

ततोधिकारिभिः प्रोक्तं राजश्रीदण्डविधायिनः ॥
भक्षणं गोमस्योच्चैर्द्वात्रिंशन्मल्लमुष्टयः ॥ ५० ॥
सर्वस्वहरणं दण्डः क्रियते वास्य निश्चयात् ।
श्रीभूतिस्तु महालोभी क्रमादण्डत्रयं कुधीः ॥ ५१ ॥
स्वीकृत्यैव महाकष्टमार्त्तध्यानेन पीडितः ।
मृत्वा तस्य नृपस्याभूद्भाण्डागारे भुजङ्गमः ॥ ५२ ॥
सुधीः समुद्रदत्तस्तु धर्माचार्यमहामुनेः ।
धर्ममाकर्ण्य जैनेन्द्रं गृहीत्वा सुतपस्ततः ॥ ५३ ॥
मृत्वा कालेन तस्यैव सिंहसेनमहीपतेः ।
सिंहचन्द्राभिधो धीमान्पुत्रो जातोतिनिर्मलः ॥ ५४ ॥
एकदा सिंहसेनोसौ भाण्डागारे नृपो गतः ।
श्रीभूतिचरसर्पेण भक्षितो मरणं श्रितः ॥ ५५ ॥
सल्लकीवनमध्ये च हस्ती जातो महान् ध्रुवम् ।
नृपो मृत्वा गजो जातो दुस्सहः कर्मसञ्चयः ॥ ५६ ॥
राज्ञो मरणमालोक्य महाकोपेन मन्त्रतः ।
सुघोपमन्त्रिणाहूय सर्वान्सर्पान्प्रजल्पितम् ॥ ५७ ॥
भो नागा ये तु निर्दोषाः प्रवेशं वह्निकुण्डके ।
कृत्वा स्वस्थानके यान्तु तं कृत्वा ते च निर्गताः ॥ ५८ ॥
श्रीभूतिचरसर्पे च संस्थिते मंत्रिणोदितम् ।
विषं मुञ्चाग्निकुण्डे वा कुरु त्वं रे प्रवेशनम् ॥ ५९ ॥
अगन्धनकुलोद्भूतो नाहं मुञ्चामि तद्विषम् ।
इति क्रूराशयः सोपि कृत्वा वह्निप्रवेशनम् ॥ ६० ॥
मृत्वा कुर्कुटसर्पोऽभूत्पापी तत्सल्लकीवने ।
पापिनां पुनरावर्तो भवत्येवं कुयोनिषु ॥ ६१ ॥

रामदत्ता तदा राज्ञी पत्युर्मरणदुःखिता ।
कनश्र्यार्यिकापार्श्वे तपो धृत्वा सुखं स्थिता ॥ ६२ ॥
सिंहचन्द्रोपि तातस्य मरणेन विरक्तधीः ।
स्वभ्रात्रे पूर्णचन्द्राय राज्यं दत्वा कनीयसे ॥ ६३ ॥
सुव्रताख्यमुनेः पार्श्वे जैनीं दीक्षां गृहीतवान् ।
संजातः सुतपोयोगैर्मनःपर्ययबोधवान् ॥ ६४ ॥
एकदा तं मुनिं दृष्ट्वा चतुर्थज्ञानसंयुतम् ।
रामदत्तार्यिका प्राह भक्त्या नत्वा तपोनिधिम् ॥ ६५ ॥
स्वामिन्धन्योऽत्र मे कुक्षिर्धृतो येन भवान्भृशम् ।
पूर्णचन्द्रस्तु ते भ्राता कदा धर्मं गृहीष्यति ॥ ६६ ॥
तच्छ्रुत्वा स मुनिः प्राह सिंहचंद्रो गुणोज्वलः ।
मातस्त्वं पश्य संसारवैचित्र्यं वच्मि तेऽधुना ॥ ६७ ॥
सिंहसेनो महाराजो दष्टः सर्पेण पापिना ।
स मृत्वा सल्लकीनामवने हस्ती बभूव च ॥ ६८ ॥
स मां वीक्ष्यैकदा धावन्मारणार्थं मया ततः ।
भणितो भो करीन्द्र त्वं सिंहसेनो नृपः पुरा ॥ ६९ ॥
पुत्रोऽहं सिंहचन्द्रस्ते प्राणेभ्यश्चातिवल्लभः ।
इदानीन्तु समायातो मारणार्थं कथं विधिः ॥ ७० ॥
इत्युक्ते स गजेन्द्रोपि भूत्वा जातिस्मरो महान् ।
अश्रुपातं तरां कुर्वन्नत्वा मे पादयोः स्थितः ॥ ७१ ॥
मया पुनस्ततस्तस्य कारयित्वा जिनेशिनः ।
सद्धर्मश्रवणं सारसम्यक्त्वाणुव्रतानि च ॥ ७२ ॥
ग्राहितानि गतः सोपि तान्युच्चैः प्रतिपालयन् ।
गृह्णन्नाहारतोयादिसमस्तं प्रासुकं पुनः ॥ ७३ ॥

क्षीणकायो नदीतीरे निर्मग्नः कर्दमे तदा ।
श्रीभूतिचरसर्पेण कुर्कुटाख्येन मस्तके ॥ ७४ ॥
स्थित्वा संखाद्यमानस्तु कृत्वा सन्यासमुत्तमम् ।
स्मरन्पंचनमस्कारान्सर्वपापक्षयङ्करान् ॥ ७५ ॥
मृत्वा स्वर्गे सहस्रारे देवोऽभूच्छ्रीधराह्वयः ।
नाना सत्सम्पदोपेतः किमन्यद्धर्मतः शुभम् ॥ ७६ ॥
सर्पः सोपि महापापी मृत्वा कष्टशतप्रदे ।
चतुर्थे नरके घोरे पतितः पापकर्मणा ॥ ७७ ॥
हस्तिनस्तस्य सद्दन्तौ तदा मुक्ताफलानि च ।
वनराजेन भिल्लेन गृहीत्वा तानि तेन च ॥ ७८ ॥
दत्तानि धनमित्राख्यसार्थवाहस्य तेन तु ।
पूर्णचंद्रमहीभर्तुरर्पितानि सुभक्तितः ॥ ७९ ॥
पूर्णचन्द्रेण दन्ताभ्यां स्वपल्यङ्कस्य कारिताः ।
पादा मुक्ताफलैर्हारो राज्ञीकण्ठे च कारितः ॥ ८० ॥
एवं संसारवैचित्र्यं पूर्णचन्द्रस्य कथ्यते ।
गत्वा मातस्त्वया सोपि जैनं धर्मं गृहीष्यति ॥ ८१ ॥
ततो नत्वा मुनिं सापि गता भूपस्य मन्दिरम् ।
तां दृष्ट्वा पूर्णचन्द्रश्चोत्थाय पल्यङ्कतो द्रुतम् ॥ ८२ ॥
प्रणम्य मातरं यावत्संस्थितो विनयानतः ।
सा जगौ पुत्र ते तातो दष्टः सर्पेण पापिना ॥ ८३ ॥
स मृत्वात्र गजेन्द्रोभूत्सल्लकीकानने सुधीः ।
सर्पो मृत्वा पुनः सोपि कुर्कुटाख्योहिकोऽभवत् ॥ ८४ ॥
निर्मग्नः कर्दमे हस्ती तेन सर्पेण भक्षितः ।
तद्दन्तौ हस्तिनस्तस्य मुक्ताफलकदम्बकम् ॥ ८५ ॥

अर्पयामास ते राजन्सार्थवाहः सुमक्तितः।
एते पल्यङ्कपादास्ते तद्दन्ताभ्यां विनिर्मिताः ॥ ८६ ॥
हारोयं शोभते राज्ञीकण्ठे ते भूपते तराम्।
ज्ञेयो मुक्ताफलैस्तस्य हस्तिनस्तु विनिर्मितः ॥ ८७ ॥
इत्यादिसर्वसंबन्धं स श्रुत्वा भूपतिस्तराम्।
महोशोकेन सन्तप्तो गिरिर्दावानलेन वा ॥ ८८ ॥
ततः पल्यङ्कपादांस्तान्समालिङ्ग्य प्रमोहतः।
हा तातेति च पूत्कारं पूर्णचन्द्रश्चकार सः ॥ ८९ ॥
अन्तःपुरेण तेनोच्चैः सुजनैश्च तथा जनैः।
कृत्वा संरोदन पश्चाच्चन्दनाक्षतपुष्पकैः ॥ ९० ॥
दन्तमुक्ताफलानां च पूजा कृत्वा ततः परम्।
संस्कारस्तु कृतो लोके किन्न कुर्वन्ति मोहिनः ॥ ९१ ॥
पूर्णचन्द्रस्ततो धीमान्प्रतिपाल्य जिनोदितम्।
सारं श्रावकसद्धर्मं महाशुक्रे सुरोजनि ॥ ९२ ॥
रामदत्ता तपस्तप्त्वा देवस्तत्रैव चाभवत्।
के के नैव गता लोके कालेन कवलीकृताः ॥ ९३ ॥
चतुर्थज्ञानधारी च सिंहचन्द्रो मुनीश्वरः।
शुद्धचारित्रयोगेन प्रान्तं ग्रैवेयकं गतः ॥ ९४ ॥
अथ जम्बूमति द्वीपे भरतस्थे खगाचले।
श्रीसूर्याभपुरे राजा सुरावर्तो विचक्षणः ॥ ९५ ॥
यशोधरा महाराज्ञी रूपलावण्यमण्डिता।
दानपूजालसच्छीलप्रोषधैः प्रविराजिता ॥ ७६ ॥
सिंहसेनचरो योऽसौ गजो मृत्वा दिवं गतः।
तद्गर्भे हि समागत्य रश्मिवेगः सुतोभवत् ॥ ९७ ॥

ततः कैश्चिद्दिनैस्तस्मै रश्मिवेगाय धीमते।
दत्वा राज्यं सुरावर्त्तो राजा जातो मुनीश्वरः॥ ९८॥
अथैकदा महाराजो रश्मिवेगः सुधार्मिकः।
सिद्धकूटजिनागारे वन्दनार्थं गतो मुदा॥ ९९॥
तत्र श्रीहरिचन्द्राख्यं मुनिं दृष्ट्वा जगद्धितम्।
धर्ममाकर्ण्य जैनेन्द्रं तदन्ते सत्तपोऽगृहीत्॥ १००॥
एकदा स तपःक्षीणो रश्मिवेगो महामुनिः।
स्थितो वने गुहामध्ये कायोत्सर्गेण शुद्धधीः॥ १०१॥
तदायं कुर्कुटः सर्पश्चतुर्थं नरकं गतः।
स जातोऽजगरो नाम पापी सर्पस्तु तद्वने॥ १०२॥
तं पूत्कारं प्रकुर्वन्तं दहन्तं काननं महत्।
गुहाभिमुखमागच्छन्तं विलोक्य महाशयुम्॥ १०३॥
सुधीः संन्यासमादाय संस्थितो मुनिसत्तमः।
भक्षितस्तेन दुष्टेन पापिनाजगरेण सः॥ १०४॥
मृत्वा कापिष्टकल्पेऽसौ देवो जातो महर्द्धिकः।
आदित्यप्रभनामा श्री—जिनपादाब्जयो रतः॥ १०५॥
मृत्वासोऽजगरो नागश्चतुर्थं नरकं गतः।
छेदनैर्भेदनैः शूलारोहणाद्यैः कदर्थितः॥ १०६॥
ततः कापिष्टकल्पाच्च सिंहसेनचरः सुरः।
च्युत्वा चक्रपुरे रम्ये चक्रायुधमहीपतिः॥ १०७॥
चित्रमाला महादेवी तयोः पूर्वस्वपुण्यतः।
वज्रायुधो सुतो जातो जैनधर्मधुरन्धरः॥ १०८॥
तस्मै राज्यं समर्प्योच्चैश्चक्रायुधमहाप्रभुः।
जैनीं दीक्षां समादाय संजातो मुनिसत्तमः॥ १०९॥

वज्रायुधोपि सद्राज्यं चिरं भुक्त्वा प्रसन्नधीः ।
एकदा कारणं वीक्ष्य पितुः पार्श्वेऽभवन्मुनिः ॥ ११० ॥
पंकप्रभात्समागत्य स सर्पो रौद्रमानसः ।
संजातो निजपापेन भिल्लो नाम्नातिदारुणः ॥ १११ ॥
प्रयंगुपर्वते सोपि कायोत्सर्गेण संस्थितः ।
वज्रायुधो मुनिस्तेन हतो भिल्लेन बाणतः ॥ ११२ ॥
मुनिः सर्वार्थसिद्धिं च सम्प्राप्तः पुण्यसम्बलः ।
भिल्लो मृत्वा तथा पापी सप्तमं नरकं गतः ॥ ११३ ॥
सर्वार्थसिद्धितश्च्युत्वा वज्रायुधचरः सुरः ।
संजयन्तमुनिर्जातो विख्यातो भुवनत्रये ॥ ११४ ॥
पूर्णचन्द्रः पुरा यस्तु भवैः कैश्चित्सुनिर्मलैः ।
जयन्ताख्यो मुनिर्भूत्वा जातस्त्वं लोभतोहिराट् ॥ ११५ ॥
दीर्घकाल महादुःखं भुक्त्वा सप्तमदुस्तलात् ।
स भिल्लस्तु समागत्य नाना तिर्यक्कुयोनिषु ॥ ११६ ॥
भ्रान्त्वा चैरावते क्षेत्रे भूतादिरमणे वने ।
नदी वेगवती तस्यास्तटे गोश्रृङ्गतापसः ॥ ११७ ।
तत्प्रिया शंखिनी तस्यां जातो हरिणश्रृङ्गवाक् ।
पञ्चाग्निसाधनं कृत्वा मृत्वा जातः खगोप्यसौ ॥ ११८ ॥
विद्युद्दंष्ट्रेति पापिष्टः पूर्ववैरेण तेन च ।
उपसर्गो महांश्चक्रे मुनेरेतस्य दारुणः ॥ ११९ ॥
मुनिश्चासौ विशुद्धात्मा निश्चलो मेरुवत्तराम् ।
संजयन्तो जगत्पूज्यो जित्वा सर्वपरीषहान् ॥ १२० ॥
श्रीमज्जिनेन्द्रचन्द्रोक्तं सत्तपो द्योतनादिकम् ।
कृत्वा मोक्षं सुधीः प्राप्तः संजातोष्टमहागुणी ॥ १२१ ॥

भो नागेन्द्र त्वया धीमन् ज्ञात्वैवं संसृतेः स्थितिम् ।
त्यक्त्वा कोपं वराकोयं मुच्यतां नागपाशतः ॥ १२२ ॥
तच्छ्रुत्वा नागराजोसौ संजगाद महाद्युतिः ।
भो दिवाकरदेवाख्य यद्ययं मुच्यते मया ॥ १२३ ॥
शापोस्य दीयते दर्पविनाशाय दुरात्मनः ।
मा भूत्पुंसां कुले चास्य विद्यासिद्धिः कदाचन ॥ १२४ ॥
किं तु श्रीसंजयन्तस्य प्रतिमाग्रे सुभक्तितः ।
नाना सद्गन्धधूपाद्यैः स्त्रीणां तत्सिद्धिरस्तु वै ॥ १२५ ॥
इत्युक्त्वा तं विमुच्याशु सुधी नागाधिपस्तदा ।
जगाम स्थानकं स्वस्य मुनिभक्तिपरायणः ॥ १२६ ॥
इत्युत्कटतपोलक्ष्मीं भुक्त्वा लक्ष्मीं च शाश्वतीम् ।
संजयन्तमुनिः प्राप्तः सोऽस्माकं सत्सुखं क्रियात् ॥ १२७ ॥
अर्हत्पादसरोजयुग्ममधुलिट् सद्बोधसिन्धुः सुधीः
सच्चारित्रविचित्ररत्ननिचयः श्रीकुन्दकुन्दान्वये ।
श्रीभट्टारकमल्लिभूषणगुरुः संसारनिस्तारकः
कुर्यान्मे वरमङ्गलानि नितरां भव्यैर्जनैः सेवितः ॥ १२८ ॥

इति कथाकोशे सत्तपोद्योतिनी श्रीसंजयन्तमुनेः कथा समाप्ता ।

६–अंजनचोरस्य कथा ।

श्रीसर्वज्ञपदाम्भोजं नत्वा सारसुखप्रदम् ।
निःशङ्कितगुणोद्योते चरित्रं रचयाम्यहम् ॥ १ ॥
अत्रैव भरतक्षेत्रे देशे मगधसंज्ञके ।
श्रेष्ठी राजगृहे नाम्ना नगरे जिनदत्तवाक् ॥ २ ॥

श्रीमज्जिनेन्द्रपादाब्जसेवनैकमधुव्रतः ।
दानपूजाव्रताद्युक्तश्रावकाचारमण्डितः ॥ ३ ॥
एकदाऽसौ चतुर्दश्यां रात्रौ रौद्रे श्मशानके ।
त्रिधा वैराग्यसंयुक्तः कायोत्सर्गेण संस्थितः ॥ ४ ॥
तदामितप्रभो देवो जिनभक्तिपरायणः ।
अन्यो विद्युत्प्रभो देवो मिथ्यादृष्टिमतेक्षणः ॥ ५ ॥
ताभ्यां परस्परं धर्मपरीक्षार्थं महीतले ।
गच्छद्भ्यां तपसा मूढश्चालितो यमदग्निवाक् ॥ ६ ॥
तत्रागत्य श्मशाने च तं दृष्ट्वा श्रेष्ठिनं शुभम् ।
अमितप्रभदेवोऽसौ सजगाद प्रमोदतः ॥ ७ ॥
अहो विद्युत्प्रभोत्कृष्टचारित्रप्रतिपालकाः ।
तिष्ठन्तु मुनयो मेत्र किन्त्वेनं श्रावकोत्तमम् ॥ ८ ॥
चालय त्वं महाध्यानात्सामर्थ्यं वर्तते यदि ।
ततो विद्युत्प्रभाख्येन देवेनातीव दुस्सहः ॥ ९ ॥
तस्योपसर्गकश्चक्रे कृष्णरात्रौ महांस्तदा ।
स धीरश्चलितो नैव सद्दृष्टिर्निजयोगतः ॥ १० ॥
प्रभातसमये जाते ततस्ताभ्यां सुभक्तितः ।
स्वमायामुपसंहृत्य तं प्रशस्य मुहुर्मुहुः ॥ ११ ॥
आकाशगामिनीं विद्यां दत्वा तस्मै सुदृष्टये ।
प्रोक्तमेवं च भो श्रेष्ठिन्सिद्धा विद्या तवाद्भुता ॥ १२ ॥
इयं ते वचनात्पञ्चनमस्कारविधानतः ।
अन्यस्य सुधियश्चापि सुधीः सिद्धा भविष्यति ॥ १३ ॥
ततः सोपि लसद्दृष्टिः श्रेष्ठी विद्याप्रभावतः ।
अकृत्रिमे जिनागारे स्वर्गमोक्षसुखप्रदे ॥ १४ ॥

नित्यं श्रीजिनपूजार्थं महाभक्त्या प्रयाति च।
सोमदत्तेन सम्पृष्टो वटुकेन तदा मुदा ॥ १५ ॥
अहो स्वामिन्भवद्भिस्तु प्रातरुत्थाय नित्यशः।
क गम्यते महाभाग जैनधर्मपरायण ॥ १६ ॥
तच्छ्रुत्वा जिनदत्तोसौ जगौ श्रेष्ठी विशिष्टवाक्।
विद्यालाभस्तु मे जातस्तेनाऽहं भक्तितस्तराम् ॥ १७ ॥
शास्वतेषु जिनेन्द्राणां हेमचैत्यालयेषु च।
नित्यं व्रजामि पूजार्थं महाशर्मविधायिषु ॥ १८ ॥
सोमदत्तस्ततः प्राह विद्यां मे देहि भो सुधीः।
येनाहं भवता सार्धं सद्गन्धकुसुमादिकम् ॥ १९ ॥
गृहीत्वा तत्र चागत्य पूजां श्रीमज्जिनेशिनाम्।
करोमि वन्दनां भक्तिं भवत्पुण्यप्रसादतः ॥ २० ॥
ततः श्रीजिनदत्तेन श्रेष्ठिना तस्य निर्मलः।
दत्तो विद्योपदेशस्तु तत्समादाय सोपि च ॥ २१ ॥
रात्रौ कृष्णचतुर्दश्यां श्मशाने भूरिभीतिदे।
वटद्रोः पूर्वशाखायां शतपादैर्वसूत्तरैः ॥ २२ ॥
अलंकृतं समारोप्य दर्भशिक्यं तथा तरोः।
अधोभागे च शस्त्राणि वह्निज्वालोपमानि च॥ २३ ॥
ऊर्ध्ववक्त्राणि संस्थाप्य कृत्वार्चां पुष्पकादिभिः।
षष्ठोपवाससंयुक्तः स्थित्वा शिक्ये सुखप्रदम् ॥ २४ ॥
सारं पंचमस्कारं प्रोच्चैरुच्चारयंस्ततः।
एकैकं दर्भपाद तं छिन्दंश्छुरिकया पुनः॥ २५॥
अधस्थितं समालोक्य सुतीक्ष्णं शस्त्रसञ्चयम्।
संभीतश्चिन्तयामास सोमदत्तः स्वचेतासि ॥ २६ ॥

यदीदं श्रेष्ठिनो वाक्यमसत्यं भवति ध्रुवम् ।
तदा मे प्राणनाशस्तु संभवत्येव साम्प्रतम् ॥ २७ ॥
इत्यादिसंशयोपेतश्चटनोत्तरणादिकम् ।
करोति स्म स मूढात्मा क्व सिद्धिर्निश्चयं विना ॥ २८ ॥
येषां श्रीमज्जिनेन्द्राणां स्वर्गमोक्षसुखप्रदे ।
वाक्येपि निश्चयो नास्ति तेषां सिद्धिर्न भूतले ॥ २९ ॥
तस्मिन्नेव क्षणे रात्रौ गणिकाञ्जनसुन्दरी ।
चोरमञ्जनकं प्राह शृणु त्वं प्राणवल्लभ ॥ ३० ॥
प्रजापालमहीभर्तुः कनकाख्या प्रियोत्तमा ।
तस्याः कण्ठे मया हारो दृष्टश्चातीव सुन्दरः ॥ ३१ ॥
तं समानीय चेद्धारं ददासि मम साम्प्रतम् ।
भर्त्ता मे त्वं भवस्येव नान्यथेति महाभट ॥ ३२ ॥
तच्छ्रुत्वाञ्जनचोरोसौ तस्यां संसक्तमानसः ।
ततो गत्वा तमादाय हारं रात्रौ स्वबुद्धितः ॥ ३३ ॥
समागच्छंस्तदा ज्ञात्वा हारोद्योतेन कर्करैः ।
कोटपालादिभिर्गाढं ध्रियमाणः सुनिर्दयैः ॥ ३४ ॥
ततो हारं परित्यक्त्वा नष्ट्वागत्य श्मशानके ।
तथाभूतं तमालोक्य सोमदत्तं सुकातरम् ॥ ३५ ॥
पृष्ट्वा सम्बन्धकं तस्मान्मन्त्रमादाय चोत्तमम् ।
शिक्यमारुह्य निःशङ्कस्तेनैवविधिना मुदा ॥ ३६ ॥
वाक्यं मे श्रेष्ठिनो सत्यं प्रमाणं च तदेव हि ।
इत्युक्त्वा संछिनत्ति स्म शिक्यपादानशेषतः ॥ ३७ ॥
एकवारं सुधीः सोपि यावन्नोत्पतीति ध्रुवम् ।
शस्त्रकेषु तदागत्य सा विद्याकाशगामिनी ॥ ३८ ॥

आदेशं देहि देवेति तं धृत्वा भक्तितो जगौ।
ततः संप्राह चोरोसौ परमानन्दनिर्भरः ॥ ३९ ॥
यत्र मेरौ जिनेन्द्राणां प्रतिमाः पूजयन्स्थितः।
श्रेष्ठी सन्तिष्ठते भक्त्या तत्र मां प्रापय ध्रुवम् ॥ ४० ॥
ततस्तया समादाय श्रेष्ठिनः सोप्रतो धृतः।
जैनधर्मप्रसादेन किं शुभं यन्न जायते ॥ ४१ ॥
तं नत्वा भक्तितः प्राह निर्भयोञ्जनसंज्ञकः।
भो श्रेष्ठिंस्त्वत्प्रसादेन प्राप्ता विद्या मया यथा ॥ ४२ ॥
आकाशगामिनी धीर तथा मे करुणार्णव।
संमन्त्रो दीयते येन शीघ्रं सिद्धो भवाम्यहम् ॥ ४३ ॥
परोपकरिणा तेन श्रेष्ठिना गुणशालिना।
चारणस्य मुनेः पार्श्वे जैनीं दीक्षां शिवप्रदाम् ॥ ४४ ॥
ग्राहितः सुतरां सोपि तामुच्चैः प्रतिपालयन्।
क्रमात्कैलासमारूढो लोकालोकप्रकाशकम् ॥ ४५ ॥
केवलज्ञानमुत्पाद्य भक्त्या त्रैलोक्यपूजितः।
शेषकर्मक्षयं कृत्वा प्राप्तवान्मोक्षमक्षयम् ॥ ४६ ॥
निःशंकितगुणेनोच्चैरंजनोपि निरञ्जनः।
संजातस्तु ततः सोपि पालनीयो बुधोत्तमैः ॥ ४७ ॥
सद्रत्नत्रयमण्डितोतिचतुरः श्रीमूलसङ्घाग्रणीः
श्रीभट्टारकमल्लिभूषणगुरुः सद्बोधसिन्धुर्महान्।
तच्छिष्यः कुमताद्रिभेदनपविः श्रीसिंहनन्दीमुनि—
र्जीयाद्भव्यसरोजनिर्मलरविः स्वाचार्यवर्यः सताम् ॥ ४८ ॥

इति कथाकोशे निःशङ्किताङ्गेऽञ्जनचोरस्य कथा समाप्ता।

७–अनन्तमत्याः कथा ।

पादपद्मद्वयं नत्वा शर्मदं भक्तितोऽर्हताम् ।
निष्कांक्षितगुणोद्योते वक्ष्येऽनन्तमतीकथाम् ॥ १ ॥
अङ्गदेशेऽत्र विख्याते चारु चम्पापुरीप्रभुः ।
वसुवर्धननामाभूद्राज्ञी लक्ष्मीमती सती ॥ २ ॥
प्रियदत्तोऽभवच्छ्रेष्ठी परमेष्ठिप्रतीतिवान् ।
तद्भार्याङ्गवती नाम्ना धर्मकर्मविचक्षणा ॥ ३ ॥
तयोः पुत्री द्वयोर्जाता नाम्नानन्तमती सती ।
रूपलावण्यसौभाग्यगुणरत्नाकरीक्षितिः ॥ ४ ॥
एकदा प्रियदत्तेन धर्मकीर्तिमुनीश्वरम् ।
नत्वा नन्दीश्वराष्टम्यां ब्रह्मचर्यं व्रतोत्तमम् ॥ ५ ॥
गृहीत्वाष्टदिनान्युच्चैः क्रीडया ग्राहिता सुता ।
सत्यं सतां विनोदोऽपि भवेत्सन्मार्गसूचकः ॥ ६ ॥
अन्यदा सम्प्रदानस्य कालेऽनन्तमती जगौ ।
दापितं ब्रह्मचर्यं मे त्वया तातेन किं पितः ॥ ७ ॥
तेनोक्तं क्रीडया पुत्रि दापितं ते मया व्रतम् ।
तयोक्तं तात का क्रीडा व्रते धर्मे च शर्मदे ॥ ८ ॥
श्रेष्ठी सुतां पुनः प्राह ननु पुत्रि व्रतं तदा ।
दत्तं तेऽष्टदिनान्येव कुलमन्दिरदीपिके ॥ ९ ॥
तच्छ्रुत्वा सा सुतोवाच पितर्भट्टारकैस्तथा ।
मर्यादा विहिता नैव भवतापि मम व्रते ॥ १० ॥
तत। [illegible]न्तमतीशो[illegible]र्यं व्रतं हितम् ।
नियमस्तु [illegible] परमार्थतः ॥ ११ ॥

जैनशास्त्रार्थसन्दोहे संस्थिताभ्यासतत्परा ॥
अथैकदा निजोद्याने दोलयन्ती स्वलीलया ॥ १२ ॥
चैत्रे सद्यौवनोपेतामुल्लसत्रूपसम्पदम् ।
खगाद्रिदक्षिणश्रेणिकिन्नराख्यः पुराधिराट् ॥ १३ ॥
विद्याधरो स्मरोन्मत्तो नाम्ना कुण्डलमण्डितः ।
सुकेश्याभार्ययोपेतः समागच्छन्नभोङ्गणे ॥ १४ ॥
तां विलोक्य किमेतेन जीवितेनैतया विना ।
संचिन्त्येति गृहे धृत्वा स खगः पुनरागतः ॥ १५ ॥
तां बालिकां समादाय यावद्याति नभस्तले ।
आगच्छन्ती तदावेक्ष्य स्वकान्तां कोपकम्पिताम् ॥ १६ ॥
संभीतः पर्णलघ्व्याख्यविद्यया श्रेष्ठिनः सुताम् ।
महाटव्यां विटः सोपि मुक्तवान् शीलमण्डिताम् ॥ १७ ॥
हा तातेति प्रजल्पन्तीं तां सतीं कानने सदा ।
भीमाख्यभिल्लराजेन दृष्ट्वा नीत्वा स्वपल्लिकाम् ॥ १८ ॥
करोमि त्वां महाराज्ञीं ददामि बहुसम्पदम् ।
मामिच्छेति भणित्वा सा नेच्छन्ती वातिवित्तकम् ॥ १९ ॥
रात्रौ प्रभोक्तुमारब्धा तदा तच्छीलपुण्यतः ।
वनदेवतया तस्य ताडनाद्युपसर्गकः ॥ २० ॥
कृतः काचिदियं देवी महासामर्थ्यसंयुता ।
भिल्लेनेति विचार्योच्चैः सा कन्या कमलेक्षणा ॥ २१ ॥
पुष्पकाख्यमहासार्थवाहकस्य समर्पिता ।
सोपि तद्रूपसंसक्तः प्रोवाच मलिनं वचः ॥ २२ ॥
एतान्याभरणान्युच्चैर्नानासद्वस्त्रसङ्‍ ... जनचोरस्य -
गृहाण तव दासोस्मि मामिच्छेति [illegible]ष्टधीः ॥ २३ ॥

तयोक्तं यादृशं मेस्ति प्रियदत्तः पितापरः ।
तादृशस्त्वमपि भ्रष्ट मावादीः पापदं वचः ॥ २४ ॥
इत्यादिकं स्थिरं वाक्यं समाकर्ण्यैव पापिना ।
सार्थवाहेन चानीयायोध्यायां सुदृढव्रता ॥ २५ ॥
कामसेनाख्यकुट्टिन्याः पापिन्याः सा समर्पिता ।
कः कस्य दीयते दोषो विचित्रा कर्मणां स्थितिः ॥ २६ ॥
वेश्ययापि तयानेकप्रकारैश्चालिता सती ।
मेरोः सचूलिकेवासौ नाचलच्छीलशैलतः ॥ २७ ॥
येषां संसारभीरूणां न्यायोपार्जितवस्त्वपि ।
कदाचित्प्रीतये न स्यात्तन्मतिः किंकुकर्मसु ॥ २८ ॥
तदा तयापि कुट्टिन्या सिंहराजमहीभुजः ।
समर्पिता तथा बाला तस्याः सद्रूपयौवनम् ॥ २९ ॥
संविलोक्य सुलुब्धेन तेन रात्रौ दुरात्मना ।
हठात्सेवितुमारब्धा सा सती भुवनोत्तमा ॥ ३० ॥
तदा तद्व्रतमाहात्म्यात्पुरेदेवतया क्रुधा ।
उपसर्गो महांश्चक्रे तस्य दुष्कर्मणस्ततः ॥ ३१ ॥
निस्सारिता सुभीतेन भूभुजा तेन मन्दिरात् ।
सापि पंचनमस्कारं संस्मरन्ती सुखप्रदम् ॥ ३२ ॥
क्वचिद्देशे स्थिता यावत्तस्याः पुण्यप्रभावतः ।
पद्मश्रीरार्यिका वीक्ष्य तां ज्ञात्वा श्राविकोत्तमाम् ॥ ३३ ॥
दृष्ट्वा तस्याश्चरित्रं च स्वान्तिके परमादरात् ।
स्थापयामास पूतात्मा सतां वृत्तं परार्थकृत् ॥ ३४ ॥
अथानन्तमतीशोकवह्निसन्तप्तमानसः ।
प्रियदत्तो महाश्रेष्ठी गृहान्निर्गत्य पुण्यधीः ॥ ३५ ॥

तद्दुःखहानये कैश्चित्सज्जनैः परिवेष्टितः ।
श्रीमज्जिनेन्द्रसत्तीर्थयात्रां कुर्वन्सखप्रदाम् ॥ ३६ ॥
अयोध्यानगरीं प्राप्य सन्ध्यायां स गुणोज्वलः
तत्रस्थजिनदत्ताख्यश्यालकस्य गृहं गतः ॥ ३७ ॥
तेन श्रीजिनदत्तेन कृत्वा प्राघूर्णकक्रियाम् ।
सुखं पृष्टो जगौ श्रेष्ठी दुःखदं निजवृत्तकम् ॥ ३८ ॥
ततः प्रातः समुत्थाय प्रियदत्तोति धार्मिकः ।
स्नानादिकं विधायोच्चैर्गतो गेहं जिनेशिनाम् ॥ ३९ ॥
तदा कर्त्तुं च सद्भोज्यं चतुष्कं दातुमङ्गणे ।
जिनदत्तस्त्रियाहूता पद्मश्रीक्षान्तिकाश्रिता ॥ ४० ॥
कन्या सापि समागत्य भोज्यं कृत्वामृतोपमम् ।
दत्वांगणे चतुष्कं च प्रीतितो वसतिं गता ॥ ४१ ॥
ततो देवेन्द्रनागेन्द्रनरेन्द्राद्यैः समर्चिताः ।
जिनेन्द्रप्रतिमाः श्रेष्ठी समभ्यर्च्य समागतः ॥ ४२ ॥
तच्चतुष्कं समालोक्य स्मृत्वानन्तमतीं स ताम् ।
अश्रुपातेन संयुक्तो जगाद प्रियदत्तवाक् ॥ ४३ ॥
ययेदं मण्डनं चक्रे सा समानीयतां द्रुतम् ।
ततस्तैः सुजनैस्तस्य सुतामानीय दर्शिता ॥ ४४ ॥
निर्गलच्छोकपानीयपूरपूरितलोचनाम् ।
समालिंग्य सतां श्रेष्ठी प्रोवाच मधुरं वचः ॥ ४५ ॥
भो पुत्रि त्वं महाशीलसलिलक्षालिताखिल ।
पापकर्दमसन्दोहपापिना केन संहृता ॥ ४६ ॥
केनवात्र समानीता शून्यं कृत्वा ममालयम् ।
संपृष्टेति सुता प्राह सर्वं तद्वृत्तकं निजम् ॥ ४७ ॥

तदा श्रीजिनदत्तेन तयोर्मेलापके तराम् ।
चक्रे महोत्सवः पुर्यां सन्तुष्टेन स्वचेतसा ॥ ४८ ॥
प्रियदत्तस्ततः प्राह भो सुते निजमन्दिरम् ।
एहि संगम्यतेस्माभिः सानन्दं सुमनोहरम् ॥ ४९ ॥
सा चोवाच तदा पुत्री दृष्टं तात मयाधुना ।
कष्टं संसारवैचित्र्यं ततो दापय मे तपः ॥ ५० ॥
वल्लीवत्कोमलाङ्गी त्वं जैनी दीक्षा सुदुःसहा ।
कियत्कालं सुते तिष्ठ धर्मध्यानेन मन्दिरे ॥ ५१ ॥
पश्चात्ते वाञ्छितं पुत्रि पुण्यतः सम्भविष्यति ।
इत्यादिकोमलालापैः श्रेष्ठिना गुणशालिना ॥ ५२ ॥
निषेध्यपि तथा पुत्री महावैराग्यमण्डिता ।
पद्मश्रीक्षान्तिका पार्श्वे जैनीं दीक्षां सुखप्रदाम् ॥ ५३ ॥
समादाय लसद्भक्त्या तथानन्तमती दृढम् ।
पक्षमासोपवासादितपः कृत्वा सुदारुणम् ॥ ५४ ॥
सन्यासविधिना मृत्वा स्मरन्ती जिनपङ्कजम् ।
सहस्रारे सुरो जातः प्रोल्लसन्मुकुटादिभिः ॥ ५५ ॥
श्रीमज्जिनेन्द्रचन्द्राणां साभवद्भक्तिभाजनम् ।
नाना सत्सम्पदोपेतः सुपुण्यात्किं न जायते ॥ ५६ ॥
क्रीडामात्रगृहीतशीलममलं सम्पाल्य शर्मप्रदं
नाना रत्नसुवर्णभोगनिचये निष्काङ्क्षितामाश्रिता ।
या सानन्तमती जिनेन्द्रचरणाम्भोजात्तभृङ्गीव्रता—
त्स्वर्गे देवमहर्द्धिकोजनि तरां दद्यात्सतां मङ्गलम् ॥ ५७ ॥

इति श्रीकथाकोशे निष्काङ्क्षिताङ्गेऽनन्तमतीकथा समाप्ता ।

८—उद्दायनराज्ञः कथा ।

नत्वार्हतं जगत्पूज्यं भारतीं गुरुपङ्कजम् ।
वक्ष्ये निर्विचिकित्साङ्गे कथामुद्दायनप्रभोः ॥ १ ॥
इहैव भरतक्षेत्रे देशे कच्छाभिधे शुभे ।
पुरे रौरवके नाम्ना सुधीरुद्दायनप्रभुः ॥ २ ॥
सद्दृष्टिर्जिनदेवानां पादपद्मार्चने रतः ।
दाता भोक्ता विचारज्ञः प्रजानां सुतरां हितः ॥ ३ ॥
तस्य प्रभावती राज्ञी साध्वी पूर्णेन्दुनिर्मला ।
दानपूजाव्रताम्भोभिः प्रक्षालितमनोमला ॥ ४ ॥
निष्कण्टकं महाराज्यं कुर्वन्सद्धर्मतत्परः
यावदास्ते सुखं राजा स पुण्येन तदा मुदा ॥ ५ ॥
धर्मानुरागतः स्वर्गे सौधर्मेन्द्रेण धीमता ।
सभायां सर्वदेवानामग्रतश्चेति भाषितम् ॥ ६ ॥
देवोर्हन्दोषनिर्मुक्तो धर्मश्चेति क्षमादिकः ।
गुरुर्निर्ग्रन्थतायुक्तस्तत्वे श्रद्धार्हते रुचिः ॥ ७ ॥
सा रुचिस्तु जिनेन्द्राणां स्वर्गमोक्षसुखप्रदा ।
धर्मानुरागतस्तीर्थ-यात्राभिः सुमहोत्सवैः ॥ ८ ॥
जिनेन्द्रभवनोद्धारैः प्रतिष्ठाप्रतिमादिभिः ।
साधर्मिकेषु वात्सल्याज्जायते भव्यदेहिनाम् ॥ ९ ॥
शृण्वन्तु सुधियो देवाः सम्यक्त्वं जगदुत्तमम् ।
दुर्गत्यादिक्षयो यस्मात्सम्प्राप्तिः स्वर्गमोक्षयोः ॥ १० ॥
इत्यादिसारसम्यक्त्व-स्फीतिं वर्णयता सता ।
चक्रे निर्विचिकित्साङ्गे तेन तद्भूपतेः स्तुतिः ॥ ११ ॥

तच्छ्रुत्वा वासवाख्यश्च देवो मायामयं द्रुतम् ।
दुष्टकुष्ठव्रणोपेतं धृत्वा रूपं महामुनेः ॥ १२ ॥
मध्याह्ने तत्परीक्षार्थं भिक्षार्थी स समागतः ।
तदोद्दायनभूपालस्तं विलोक्य मुनीश्वरम् ॥ १३ ॥
पतन्तं पीडयाक्रान्तं मक्षिकाजालवेष्टितम् ।
ससम्भ्रमं समुत्थाय तिष्ठ तिष्ठेति सम्वदन् ॥ १४ ॥
प्रतिष्ठाप्य महाभक्त्या पादप्रक्षलनादिभिः ।
प्रासुकं सरसाहारं स तस्मै दत्तवान्मुदा ॥ १५ ॥
स भुक्त्वा विविधाहारं मायया प्रचुरं पुनः ।
महादुर्गन्धसंयुक्तं चकार वमनं मुनिः ॥ १६ ॥
तदा दुर्गन्धतो नष्टाः पार्श्वस्थाः सज्जनाः जनाः ।
प्रतीच्छन्वान्तिकं भूपः सस्त्रीकः संस्थितः सुधीः ॥ १७ ॥
तदा सोपि मुनिर्गाढं प्रभावत्यास्तथोपरि ।
महाकष्टेन दुर्गन्धं छर्दिकं कृतवान्पुनः ॥ १८ ॥
हा मया पापिना दत्तं विरुद्धं मुनयेशनम् ।
महापुण्यैर्विना पात्र-दानसिद्धिर्न भूतले ॥ १९ ॥
यथा चिन्तामणिः कल्प-वृक्षो वा वाञ्छितप्रदः ।
प्राप्यते तुच्छपुण्यैर्न पात्रदानं तथा क्षितौ ॥ २० ॥
इत्यादिकं स भूपालो निन्दां कुर्वन्निजात्मनः ।
स्वच्छतोयं समादाय क्षालनार्थं पुनर्वपुः ॥ २१ ॥
समुत्थितस्तदा सोपि ज्ञात्वा तद्भक्तिमद्भुताम् ।
देवो मायामपाकृत्य संजगाद प्रहर्षतः ॥ २२ ॥
अहो नरेन्द्र सद्दृष्टेर्महादानपतेस्तव ।
गुणो निर्विचिकित्साङ्गे सौधर्मेन्द्रेण वर्णितः ॥ २३ ॥

यादृशोत्र मयागत्य स दृष्टस्तादृशस्तराम्।
अतस्त्वं श्रीजिनेन्द्रोक्त-सारधर्मस्य तत्ववित् ॥ २४ ॥
त्वां विना पाणिपद्माभ्यां मुनेर्वान्तिं सुदुःसहाम्।
समुद्धर्तुं क्षमः कोत्र सम्यग्दृष्टिः शिरोमणिः ॥ २५ ॥
इति स्तुत्वा महीनाथं देवो वासवसंज्ञकः।
प्रोक्त्वा वृत्तान्तकं सर्वं तं समर्च्य दिवं गतः ॥ २६ ॥
अहो पुण्यस्य माहात्म्यं सतां केनात्र वर्ण्यते।
यद्वर्णनं सुराधीशः करोति परमादरात् ॥ २७ ॥
एकदोद्दायनो राजा राज्यं कुर्वन्स्वलीलया।
दानपूजाव्रतायुक्ते जिनधर्मे सुतत्परः ॥ २८ ॥
कियत्यपि गते काले कारणं वीक्ष्य किं चन।
त्रिधा वैराग्यसम्पन्नो दत्वा राज्यं सुताय च ॥ २९ ॥
वर्द्धमानजिनेन्द्रस्य स्वर्गमोक्षप्रदायिनः।
पादपङ्कजयोर्मूले महाभक्त्या सुनिश्चलः ॥ ३० ॥
दीक्षामादाय जैनेन्द्रीं देवेन्द्राद्यैः समर्चिताम्।
प्रतिपाल्य जगत्सारं सुधी रत्नत्रयं मुदा ॥ ३१ ॥
ततो ध्यानाग्निना दग्ध्वा घातिकर्मचतुष्टयम्।
केवलज्ञानमुत्पाद्य सुरासुरनरार्चितः ॥ ३२ ॥
सम्बोध्य सकलान्भव्यान्स्वर्गमोक्षप्रदायकः।
शेषकर्मक्षयं कृत्वा सम्प्राप्तो मोक्षमक्षयम् ॥ ३३ ॥
प्रभावती महादेवी गृहीत्वा सुतपः सती।
मुक्त्वा स्त्रीलिङ्गकं कष्टं ब्रह्मस्वर्गे सुरोभवत् ॥ ३४ ॥
सकलगुणसमुद्रः केवलज्ञानचन्द्रः
पदनमदमरेन्द्रः शर्मदः श्रीजिनेन्द्रः।

स भवतु मम नित्यं सेवितो भक्तिभारै–
गुणगणमणिरुद्रो बोधसिन्धुर्यतीन्द्रः ॥ ३५ ॥

इति कथाकोशे निर्विचिकित्साङ्गे श्रीमदुद्दायनस्य कथा समाप्ता।

९–श्रीरेवतीराज्ञ्याः कथा।

प्रणम्य परया भक्त्या जिनेन्द्रं त्रिजगद्धितम्।
कथाममूढदृष्टेश्च रेवत्या रचयाम्यहम् ॥ १ ॥
अत्रैव विजयार्धस्थ-दक्षिणश्रेणिसंस्थिते।
मेघकूटपुरे राजा नाम्ना चन्द्रप्रभः सुधीः ॥ २ ॥
प्राज्यं राज्यं प्रकुर्वाणश्चैकदा स खगेश्वरः।
चन्द्रशेखरपुत्राय दत्वा राज्यं सुधार्मिकः ॥ ३ ॥
यात्रां कुर्वञ्जिनेन्द्राणां महातीर्थेषु शर्मदाम्।
गत्वा दक्षिणदेशस्थ-मथुरायां स्वपुण्यतः ॥ ४ ॥
गुप्ताचार्यमुनेः पार्श्वे श्रुत्वा धर्मकथास्ततः।
प्रोक्तः परोपकारोत्र महापुण्याय भूतले ॥ ५ ॥
इति ज्ञात्वा तथा तीर्थयात्रार्थं श्रीजिनेशिनाम्।
काश्चिद्विद्या दधानोपि क्षुल्लको भक्तितोऽभवत् ॥ ६ ॥
एकदा तीर्थयात्रार्थमुत्तरां मथुरां प्रति।
गन्तुकामेन तेनोच्चैर्गुरुः पृष्टः प्रणम्य च ॥ ७ ॥
किं कस्य कथ्यते देव भवद्भिः करुणापरैः।
स प्राह परमानन्दाद्गुप्ताचार्यो विचक्षणः ॥ ८ ॥
सुव्रताख्यमुनेर्वाच्या नतिर्मे गुणशालिनः।
धर्मवृद्धिश्च रेवत्याः सम्यक्त्वासक्तचेतसः ॥ ९ ॥

त्रिपृष्टेन तदेवोच्चैराचार्येण प्रजल्पितम् ।
ततश्चन्द्रप्रभः सोपि क्षुल्लको निजचेतसि ॥ १० ॥
भव्यसेनमुनेरेका-दशाङ्गश्रुतधारिणः ।
अन्येषामपि न प्रोक्तं किंचिदत्रास्ति कारणम् ॥ ११ ॥
सम्प्रधार्येति गत्वा च तत्र सुव्रतसन्मुनेः ।
प्रोक्त्वा तद्वन्दनां तस्य तुष्टो वात्सल्यतस्तराम् ॥ १२ ॥
ये कुर्वन्ति सुवात्सल्यं भव्या धर्मानुरागतः ।
साधर्मिकेषु तेषां हि सफलं जन्म भूतले ॥ १३ ॥
ततोसौ क्षुल्लकश्चापि चिनोदेन विशिष्टधीः ।
लिङ्गमात्रमुनेर्भव्य-सेनस्य वसतिं गतः ॥ १४ ॥
तेन विद्याप्रमत्तेन तस्मै सुब्रह्मचारिणे ।
न दत्ता धर्मवृद्धिश्च धिग्गर्वं कष्टकोटिदम् ॥ १५ ॥
यत्र वाक्येपि दारिद्र्यं विवेकविकलात्मनि ।
प्राघूर्णकक्रिया तत्र स्वप्ने स्यादपि दुर्लभा ॥ १६ ॥
सर्वदोषापहं जैनं ज्ञानं तस्य मदेभवत् ।
सत्यं पुण्यविहीनाना-ममृतं च विषायते ॥ १७ ॥
ततस्तस्य परीक्षार्थं बहिर्भूमिं प्रगच्छतः ।
प्रातः कुण्डीं समादाय पृष्ठतश्चलितो व्रती ॥ १८ ॥
मार्गे स्वविद्यया तस्य ब्रह्मचारी गुणोज्वलः ।
कोमलैर्हरितैः स्निग्धैस्तृणाङ्कुरकदम्बकैः ॥ १९ ॥
आच्छादितं महीपीठं दर्शयामास सर्वतः ।
तद्विलोक्य महीपीठं भव्यसेनो विनष्टधीः ॥ २० ॥
एते त्वेकेन्द्रिया जीवाः प्रोक्ताः सन्ति जिनागमे ।
इत्युक्त्वात्रारुचिं कृत्वा गतस्तेषां तदोपरि ॥ २१ ॥

ततः शौचक्षणे सोपि मायया कुण्डिकाजलम् ।
शोषयित्वा जगादैवं भो मुने नात्र विद्यते ॥ २२ ॥
कुण्डिकायां जलं तस्मादेतस्मिंश्च सरोवरे ।
शौचं मृत्तिकया सार्द्धं कुरु त्वं सुमनोहरे ॥ २३ ॥
भवत्वेवं भणित्वेति तत्र शौचं चकार सः ।
किं करोति न मूढात्मा कार्यं मिथ्यात्वदूषितः ॥ २४ ॥
न स्यान्मुक्तिप्रदं ज्ञान-चारित्रं दुर्दृशामपि ।
उद्गतो भास्करश्चापि किं घूकस्य सुखायते ॥ २५ ॥
मिथ्यादृष्टिश्रितं शास्त्रं कुमार्गाय प्रवर्तते ।
तथा मृष्टं भवेत्कष्टं सुदुग्धं तुम्बिकागतम् ? ॥ २६ ॥
इत्यादिकं विचार्योच्चैः स्वचित्ते चतुरोत्तमः ।
मिथ्यादृष्टिं परिज्ञात्वा तं कुमार्गविधायिनम् ॥ २७ ॥
भव्यसेनस्य तस्यैवा-भव्यसेन इति व्रती ।
चक्रे नाम दुराचारात्किं न कष्टं प्रवर्तते ॥ २८ ॥
ततोन्यस्मिन्दिने सोपि ब्रह्मचारी शुचिव्रतः ।
वरुणाख्यमहीनाथ-राज्ञी या रेवती सती ॥ २९ ॥
तस्याश्चापि परीक्षार्थं पूर्वस्यां दिशि मायया ।
पद्मस्थितं चतुर्वक्त्रं महायज्ञोपवीतकम् ॥ ३० ॥
वेदध्वनिसमायुक्तं सुरासुरनमस्कृतम् ।
ब्रह्मणो रूपमादाय संस्थितो निजलीलया ॥ ३१ ॥
तदाकर्ण्य च भूपाल-भव्यसेनादयो जनाः ।
गत्वा तद्वन्दनां चक्रुः प्रमोदेन जडाशयाः ॥ ३२ ॥
तदा वरुणभूपेन प्रेर्यमाणापि रेवती ।
सम्यक्त्वरत्नसंयुक्ता जिनभक्तिपरायणा ॥ ३३ ॥

मोक्षे तथात्मनि ज्ञाने वृत्ते श्रीवृषभेश्वरः।
ब्रह्मा जिनागमे चेति सम्प्रोक्तो न परो नरः॥ ३४ ॥
अयं कोपिमहाधूर्त्तो जनानां चित्तरञ्जकः।
इत्युक्त्वा सा गता नैव तत्र राज्ञी विचक्षणा॥ ३५ ॥
तथान्ये दिवसे सोपि दक्षिणस्यां दिशि व्रती।
गरुडस्थं चतुर्बाहु-शङ्खचक्रगदान्वितम्॥ ३६ ॥
लसत्खड्गेन संयुक्तं सर्वदैत्यभयप्रदम्।
दर्शयामास गूढात्मा वैष्णवं रूपमद्भुतम्॥ ३७ ॥
पश्चिमस्यां दिशि प्रौढं वृषारूढं तथान्यदा।
पार्वतीवदनाम्भोज-समीक्षणसमन्वितम्॥ ३८ ॥
जटाजूटशिरोदेशं लम्बोदरविराजितम्।
रूपं माहेश्वरं तेन दर्शितं च सुरैः स्तुतम्॥ ३९ ॥
ततोन्यस्मिन्दिने धीमा-नुत्तरस्यां दिशि स्फुरत्।
समवादिसृतिस्थं च प्रातिहार्यैर्विभूषितम्॥ ४० ॥
मानस्तंभादिभिर्मिथ्या-दृशां चेतोविडम्बनम्।
सुरासुरनराधीश-समर्चितपदद्वयम्॥ ४१ ॥
निर्ग्रन्थादिगुणोपेतं रूपं तीर्थेशिनः शुभम्।
विद्यया दर्शयामास स क्षुल्लको जगदुत्तमम्॥ ४२ ॥
तदानन्दभरेणोच्चै-र्वरुणाख्यमहीभुजा।
सार्द्धं सर्वजनाः शीघ्रं भव्यसेनादयो गताः॥ ४३ ॥
तद्भक्त्यर्थं तथा पौरैः प्रेर्यमाणापि रेवती।
जगाद त्रिजगत्सार-सम्यक्त्वेन विराजिता॥ ४४ ॥
अहो जिनागमे प्रोक्ताश्चतुर्विंशतिरेव च।
श्रीमत्तीर्थंकरा देवाः सर्वदेवेन्द्रवन्दिताः॥ ४५ ॥

नवैव वासुदेवाश्च रुद्राश्चैकादश स्मृताः ।
ते सर्वे तु यथास्थानं सम्प्राप्ताः स्वगुणैः क्रमात् ॥ ४६ ॥
अतः कोपि समायातो मूढानां मूढताप्रदः ।
जनानां वञ्चने चंचु-रेष पाखण्डमण्डितः ॥ ४७ ॥
इत्युक्त्वा सा स्थिता गेहे राज्ञी सम्यक्त्वशालिनी ।
किं कदा चलिता वातैर्निश्चला मेरुचूलिका ॥ ४८ ॥
ततः क्षुल्लकरूपेण स व्रती मायया पुनः ।
महाव्याधिग्रहग्रस्त-परेयुर्व्रतभूषितः ॥ ४९ ॥
रेवत्या प्राङ्गणे चर्या-वेलायां भोजनाय च ।
आगच्छन्मूर्छयाक्रान्तः स पपात महीतले ॥ ५० ॥
तं विलोक्य तदा राज्ञी रेवती धर्मवत्सला ।
हा हा कारं विधायोचैः शीघ्रमागत्य भक्तितः ॥ ५१ ॥
कृत्वा सचेतनं चारु-शीतवातादिभिस्ततः ।
नयति स्म गृहान्तस्तु महाकारुण्यमण्डिता ॥ ५२ ॥
सा तस्मै प्रासुकाहारं सरसं विधिपूर्वकम् ।
ददौ कारुण्ययुक्तानां युक्तं दाने मतिः सदा ॥ ५३ ॥
भुक्त्वाहारं व्रती सोपि मायया प्रचुरं पुनः ।
चकार वमनं भूरि पूतिगन्धं सुदुस्सहम् ॥ ५४ ॥
अपथ्यं हा मयादत्तं पापिन्या व्रतिनेऽशनम् ।
इत्यात्मनो महानिन्दां कुर्वन्ती रेवती सती ॥ ५५ ॥
दूरीकृत्य तदा वान्तिं भक्त्या निःशङ्कमानसा ।
सुखोष्णतोयमादाय तद्वपुः क्षालनं व्यधात् ॥ ५६ ॥
तदा चन्द्रप्रभो सोपि ब्रह्मचारी दृढव्रतः ।
तस्याः सद्भक्तिमालोक्य सुधीर्हृष्टः स्वचेतसि ॥ ५७ ॥

तां मायामुपसंहृत्य संजगाद लसद्वचः ।
महासन्तोषसन्दोह-दायकः परमादरात् ॥ ५८ ॥
भो देवि त्रिजगत्सार-गुप्ताचार्यस्य मद्गुरोः ।
धर्मवृद्धिः स्फुरत्सिद्धिः पुनातु तव मानसम् ॥ ५९ ॥
पूजा श्रीमज्जिनेन्द्राणां त्वन्नाम्ना या मया कृता ।
धर्मानुरागतः सा ते भूयात्कल्याणदायिनी ॥ ६० ॥
अमूढत्वं त्रिजगत्सारं ससाराम्भोधिपारदम् ।
दृष्टं मया तवागत्य व्यक्तं नाना प्रकारकैः ॥ ६१ ॥
अतस्ते त्रिजगत्पूज्यं सम्यक्त्वं केन वर्ण्यते ।
श्रीमज्जिनेन्द्रचन्द्राणां चरणार्चनकोविदे ॥ ६२ ॥
इत्यादिकं प्रशस्योच्चै-स्तां देवीं गुणशालिनीम् ।
प्रोक्त्वा सर्वं च वृत्तान्तं स्वस्थानं स व्रती गतः : ॥ ६३ ॥
ततो वरुणभूपालः सूनवे शिवकीर्तये ।
दत्वा राज्यं जगद्वन्द्यं तपो धृत्वा जिनोदितम् ॥ ६४ ॥
जातो माहेन्द्रकल्पेसौ देवो दिव्याङ्गभासुरः ।
श्रीमज्जिनेन्द्रपादाब्ज-पूजनेतीव तत्परः॥ ६५ ॥
रेवती च महाराज्ञी जिनेन्द्रवचने रता ।
वैराग्येन समादाय जैनी दीक्षां सुखप्रदाम् ॥ ६६ ॥
क्रमेण तपसा ब्रह्म-स्वर्गे देवो महर्द्धिकः ।
संजातो जैनतीर्थेषु महायात्राविधायकः ॥ ६७ ॥

धर्मे श्रीजिनभाषिते शुचितरे स्वर्मोक्षसौख्यप्रदे
देवेन्द्रैश्च नरेन्द्रखेचरतरैर्भक्त्या निसंसेविते ।
भो भव्याः कुरुत प्रतीतिमतुलां चेदिच्छवः सत्सुखं
त्यक्त्वा सर्वकुमार्गसङ्गमाचिरं श्रीरेवतीवत्तराम् ॥ ६८ ॥

इति कथाकोशेऽमूढदृष्ट्यङ्गे श्रीमद्रेवतीकथा समाप्ता ।

१०—श्रीजिनेन्द्रभक्तस्य कथा।

नत्वा श्रीमज्जिनं भक्त्या स्वर्गमोक्षसुखप्रदम्।
वक्ष्ये जिनेन्द्रभक्तस्य सत्कथां सोपगूहने ॥ १ ॥
सौराष्ट्रविषयेत्रैव सरसे सद्दयान्विते।
श्रीमान्नेमिजिनेन्द्रस्य जन्मना सुपवित्रिते ॥ २ ॥
पुरे पाटलिपुत्राख्ये राजा जातो यशोध्वजः।
तस्य राज्ञी सुसीमाख्या रूपलावण्यमण्डिता ॥ ३ ॥
तयोः पुत्रः सुवीराख्यः सप्तव्यसनतत्परः ॥
संजातः पापतः सोऽपि तस्करोत्करसेवितः ॥ ४ ॥
किं करोति पिता माता कुलं जातिश्च सर्वथा।
भाविदुर्गतिदुःखानां कुले जन्मापि निष्फलम् ॥ ५ ॥
अथास्ति गौडदेशे च तामलिप्ताभिधा पुरी।
यत्र संतिष्ठते लक्ष्मीर्दानपूजायशस्करी ॥ ६ ॥
श्रेष्ठी जिनेन्द्रभक्ताख्यो जिनभक्तिपरायणः।
संजातस्तत्र सद्दृष्टिः श्रावकाचारसच्चणः ॥ ७ ॥
स्वर्मोक्षसस्यदं पूतं जिनोक्तं क्षेत्रसप्तकम्।
तर्पयामास स श्रेष्ठी स्ववित्तजलदोत्करैः ॥ ८ ॥
जिनेन्द्रभवनोद्धार-प्रतिमापुस्तकस्तथा।
सङ्घश्चतुर्विधश्चेति संप्रोक्तं क्षेत्रसप्तकम् ॥ ९ ॥
श्रेष्ठिनो विद्यते तस्य सम्यग्दृष्टेः शिरोमणेः।
सप्तभूम्याश्रितोत्कृष्ट-प्रासादस्योपरिस्थिता ॥ १० ॥
श्रीमत्पार्श्वजिनेन्द्रस्य महायत्नेन रक्षिता।
छत्रत्रयेण संयुक्ता प्रतिमा रत्ननिर्मिता ॥ ११ ॥

तस्याश्छत्रत्रयस्योच्चै-रुपरिप्रस्फुरद्युतिः ।
मणिर्वैडूर्यनामास्ति बहुमूल्यसमन्वितः ॥ १२ ॥
तां वार्त्तां च समाकर्ण्य सुवीरस्तस्कराग्रणीः ।
स्वांस्तस्करान्प्रति प्राह तमानेतुं लसत्प्रभम् ॥ १३ ॥
अहो कोपि समर्थोस्ति तच्छ्रुत्वा सूर्यनामकः ।
चोरो जगाद भो स्वामिन्नहं शक्रस्य मस्तकात् ॥ १४ ॥
आनयामि क्षणार्धेन शिरोरत्नं सुनिर्मलम् ॥
युक्तं ये तु दुराचाराः स्युस्ते दुष्कर्मतत्पराः ॥ १५ ॥
ततोऽसौ सूर्यको धूर्त्तः कपटेन तदाज्ञया ।
धृत्वा क्षुल्लकरूपं च क्लेशतः क्षीणतां गतः ॥ १६ ॥
पर्यटन्नगरग्राम-पत्तनेषु ।निरन्तरम् ।
लोकान्प्रतारयन्नुच्चैः स्फीतिं सन्दर्शयन्निजाम् ॥ १७ ॥
क्रमेण तामलिप्ताख्यां तां पुरीं प्राप्तवांस्ततः ।
श्रुत्वा जिनेन्द्रभक्तोसौ श्रेष्ठी तं वन्दितुं गतः ॥ १८ ॥
दृष्ट्वा तं क्षुल्लकं चापि मायया तपसा कृशम् ।
स्तुत्वा प्रणम्य सद्भक्त्या नयति स्म निजालयम् ॥ १९ ॥
अहो धूर्त्तस्य धूर्त्तत्वं लक्ष्यते केन भूतले ।
यस्य प्रपञ्चतो गाढं विद्वान्सश्चापि वञ्चिताः ॥ २० ॥
ततो विलोक्य चोरोसौ तं मणिं विस्फुरत्प्रभम् ।
सन्तुष्टो स्वर्णकारो वा कनत्काञ्चनवीक्षणात् ॥ २१ ॥
तदासौ श्रेष्ठिना तेन स्थापितः कपटव्रती ।
अनिच्छन्माययाप्युच्चै-रक्षार्थं तत्र भक्तितः ॥ २२ ॥
एकदासौ वणिग्वर्यः पृष्ट्वा तं क्षुल्लकं सुधीः ।
गन्तुं समुद्रयात्रायां पुरबाह्ये स्थितस्तदा ॥ २३ ॥

स तस्करः समालोक्य कुटुम्बं कार्यव्यग्रकम् ।
अर्धरात्रौ समादाय तं मणिं निर्गतो गृहात् ॥ २४ ॥
कोट्टपालैस्तदामार्गे दृष्टोसौ मणितेजसा ।
गृहीतुं च समारब्धो न समर्थः पलायितुम् ॥ २५ ॥
रक्ष रक्षेति संजल्पन् श्रेष्ठिनः शरणं गतः ।
तदा जिनेन्द्रभक्तोसौ श्रुत्वा कोलाहलध्वनिम् ॥ २६ ॥
ज्ञात्वा तं तस्करं धीमान्सम्यग्दृष्टिर्विशाम्पतिः ।
दर्शनोद्वाहनाशार्थे कोट्टपालान् जगाद च ॥ २७ ॥
रे रे मूर्खा भवद्भिस्तु कृतं वाढं विरूपकम् ।
महातपस्विनश्चास्य तस्करत्वं यदीरितम् ॥ २८ ॥
मद्वाक्येन समानीतो मणिश्चैतेन धीमता ।
महाचारित्ररत्नेन नित्यं सम्भावितात्मना ॥ २९ ॥
इत्याकर्ण्य तमानम्य श्रेष्ठिनं गुणशालिनम् ॥
कोट्टपालजनाः शीघ्रं स्वस्थानं ते गतास्ततः ॥ ३० ॥
श्रेष्ठी तस्मात्समादाय तं मणिं तेजसा युतम् ।
एकान्ते तं प्रति प्राह दुराचारसमन्वितम् ॥ ३१ ॥
रे रे नष्ट महाकष्टं धिक्ते पापिष्ठ चेष्टितम् ।
अन्यायेन रतो मूढ दुर्गतिं यास्यसि ध्रुवम् ॥ ३२ ॥
ये कृत्वा पातकं पापाः पोषयन्ति स्वकं भुवि ।
त्यक्त्वा न्यायक्रमं तेषां महादुःखं भवार्णवे ॥ ३३ ॥
कुमार्गकलितो लोकः क्षयं याति न संशयः ।
तीव्रतृष्णातुरः प्राणी त्वादृशः पापपण्डितः ॥ ३४ ॥
इत्यादिदुर्वचोवज्र-पातेनैव निहत्य च ।
चक्रे निष्कासनं तस्य स्वस्थानात्स गुणाकरः ॥ ३५ ॥

एवमन्यो महाभव्यो दुर्जनासक्तलम्पटैः ।
दर्शनस्यागते दोषे कुर्यादाच्छादनं श्रिये ॥ ३६ ॥

विमलतरजिनेन्द्रप्रोक्तमार्गेत्र दोषं
वदति विगतबुद्धिर्यस्तु सोस्ति प्रमत्तः ।
अमृतरससमानं शर्करादुग्धपानं
कटु भवति न किं वा दुष्टपित्तज्वराणाम् ॥ ३७ ॥

इति कथाकोशे उपगूहनाङ्गे जिनेन्द्रभक्तस्य कथा समाप्ता ।

११–श्रीवारिषेणमुनेः कथा ।

श्रीमज्जिनं जगत्पूज्यं नत्वा भक्त्या प्रवक्ष्यहम् ।
सुस्थितिकरणाङ्गे च वारिषेणस्य सत्कथाम् ॥ १ ॥
अथेह मगधादेशे निवेशे सारसम्पदाम् ।
पुरे राजगृहे नाम्ना सद्दृष्टिः श्रेणिकः प्रभुः ॥ २ ॥
तद्राज्ञी चेलना नाम्ना सम्यक्त्वव्रतशालिनी ।
वारिषेणस्तयोः पुत्रः संजातः श्रावकोत्तमः ॥ ३ ॥
एकदासौ चतुर्दश्यां रात्रौ तत्वविदाम्वरः ।
श्मशाने सोपवासश्च कायोत्सर्गेण संस्थितः ॥ ४ ॥
तस्मिन्नेव दिने क्रीडां कर्तुं मगधसुन्दरी ।
विलासिनी वनं प्राप्ता श्रीकीर्त्तेः श्रेष्ठिनो गले ॥ ५ ॥
दृष्ट्वा हारं द्युतिस्फारं निस्सारं जन्म मे भुवि ।
विना हारेण चैतेन सञ्चिन्त्येति गृहं गता ॥ ६ ॥
सुदुःखिता स्थिता यावत्तावद्रात्रौ समागतः ।
विद्युच्चोरस्तदासक्तः संविलोक्य जगाद च ॥ ७ ॥

हे प्रिये त्वं स्थिता कष्टे कस्मात्तद्ब्रूहि कारणम् ।
तयोक्तं श्रेष्ठिनो हारं श्रीकीर्तेर्विलसत्प्रभम् ॥ ८ ॥
समानीय ददास्येव यदि त्वं प्राणवल्लभ ।
अस्ति मे जीवितं भर्त्ता भवस्यत्र च नान्यथा ॥ ९ ॥
तच्छ्रुत्वा तां समुद्धीर्य तस्करः साहसोद्धतः ।
गत्वा रात्रौ गृहीत्वा च तं हारं निजबुद्धितः ॥ १० ॥
मार्गे तत्तेजसा ज्ञात्वा समागच्छंश्च तस्करः ।
कोट्टपालैस्तथा धर्तुं प्रारब्धो गृहरक्षकैः ॥ ११ ॥
तदा पलायितुं तेभ्यो न समर्थः स पापधीः ।
वारिषेणकुमाराग्रे तं धृत्वाऽदृश्यतां गतः ॥ १२ ॥
दृष्ट्वा ते तं तथाभूतं कोट्टपालादयो जगुः ।
नृपस्याग्रे कुमारोऽयं तस्करश्चेति भो प्रभो ॥ १३ ॥
तच्छ्रुत्वा श्रेणिको भूपो महाकोपेन कम्पितः ।
पश्य भो पापिनश्चास्य दुश्चरित्रं दुरात्मनः ॥ १४॥
क्व श्मशाने महाध्यानं वञ्चनं क्व च कष्टदम् ।
लोकानां किं न कुर्वन्ति वञ्चने ये तु चञ्चवः ॥ १५ ॥
यौवराज्ये मया प्राज्ये स्थापनीयो महोत्सवैः ।
स चेदीदृग्विधः पुत्रः किं नु कष्टमतः परम् ॥ १६ ॥
इत्युक्त्वासौ कुमारस्य मस्तकच्छेदनाय वै ।
आदेशं दत्तवांस्तूर्णं तेषां दुष्कर्मकारिणाम् ॥ १७॥
नृपादेशात्समादाय श्मशाने मिलितास्ततः ।
चण्डालाश्चण्डकर्माण-श्चोराणां प्राणहारिणः ॥ १८ ॥
तदैकेन गले तस्य वारिषेणस्य पापिना ।
गृहीतुं मस्तके क्षिप्तस्तीक्ष्णः खड्गः स्फुरद्युतिः ॥ १९ ॥

तदा तत्पुण्यमाहात्म्यात्स खड्गः संपतन्नपि ।
पश्यत्सु सर्वलोकेषु पुष्पमाला बभूव च ॥ २० ॥
अहो पुण्येन तीव्राग्निर्जलत्वं याति भूतले ।
समुद्रः स्थलतामेति दुर्विषं च सुधायते ॥ २१ ॥
शत्रुर्मित्रत्वमाप्नोति विपदा सम्पदायते ।
तस्मात्सुखैषिणो भव्याः पुण्यं कुर्वन्तु निर्मलम् ॥ २२ ॥
पुण्यं श्रीमज्जिनेन्द्राणां पादपद्मद्वयार्चनम् ।
पात्रदानं तथा शील-रक्षणं सोपवासकम् ॥ २३ ॥
तदाश्चर्यं समालोक्य सन्तुष्टास्ते सुरासुराः ।
अहो पुण्यमहोपुण्यं कुर्वन्तश्चेति संस्तवम् ॥ २४ ॥
भ्रमद्भृङ्गसमाकीर्णां सुगन्धीकृतदिङ्मुखाम् ।
तस्योपरि महाभक्त्या पुष्पवृष्टिं प्रचक्रिरे ॥ २५ ॥
पौरा ये तु महाशूराः परमानन्दनिर्भराः ।
साधु भो वारिषेणात्र चरित्रं ते मनोहरम् ॥ २६ ॥
त्वं हि श्रीमज्जिनेन्द्राणां पादपङ्कजषट्पदः ।
श्रावकाचारशुद्धात्मा जिनधर्मविचक्षणः ॥ २७ ॥
इत्यादिभिः शुभैर्वाक्यैर्महाधर्मानुरागतः ।
चक्रुस्ते संस्तुतिं तस्य सुपुण्यात्किं न जायते ॥ २८ ॥
श्रेणिकोपि महाराजः श्रुत्वा तद्वृत्तमद्भुतम् ।
पश्चात्तापेन सन्तप्तो हा मया किं कृतं वृथा ॥ २९ ॥
ये कुर्वन्ति जडात्मानः कार्यं लोकेऽविचार्य च ।
ते सीदन्ति महान्तोपि मादृशा दुःखसागरे ॥ ३० ॥
इत्यालोच्य समागत्य श्मशाने भूरिभीतिदे ।
अहो पुत्र मयाज्ञान-शून्येनात्र विनिर्मितम् ॥ ३१ ॥

यत्र त्वया महावीर क्षम्यतामिति वाग्भरैः ।
तं पुत्रं विनियोपेतं सत्क्षमां नयति स्म सः ॥ ३२ ॥
चन्दनं घृष्यमाणं च दह्यमानो यथागुरुः ।
न याति विक्रियां साधुः पीडितोपि तथापरैः ॥ ३३ ॥
ततो लब्धभयो विद्यु-चौरश्चागत्य भूपतिम् ।
नत्वा जगाद वृत्तान्तं स्वकीयं सुभटः स्फुटम् ॥ ३४ ॥
इदं मे चेष्टितं देव वेश्यासक्तस्य पापिनः ।
वारिषेणस्तु पुत्रस्ते शुद्धात्मा श्रावकोत्तमः ॥ ३५ ॥
तदा श्रीश्रेणिकः प्राह स्वपुत्रं प्रति सादरम् ।
आगच्छ पुत्र गच्छावः स्वगेहं सम्पदाभृतम् ॥ ३६ ॥
तेनोक्तं भो मया तात दृष्टं संसारचेष्टितम् ।
अतो मे श्रीजिनेन्द्राणां शरणं चरणद्वयम् ॥ ३७ ॥
भोक्तव्यं पाणिपात्रेण कर्त्तव्यं स्वात्मनो हितम् ।
गन्तव्यं च वने नित्यं स्थातव्यं मुनिमार्गतः ॥ ३८ ॥
इत्युक्त्वा वारिषेणोसौ संविरक्तो भवादितः ।
सूरदेवमुनेः पार्श्वे जैनीं दीक्षां गृहीतवान् ॥ ३९ ॥
ततोसौ श्रीजिनेन्द्रोक्त-महाचारित्रतत्परः ।
कुर्वन्विहारमत्युच्चैर्भव्यान्सम्बोधयन्मुनिः ॥ ४० ॥
ग्रामं पलासकूटाख्यं संप्राप्तश्चैकदा सुधीः ।
श्रेणिकस्य महीभर्तु-र्मन्त्री तत्रास्ति भूतिवाक् ॥ ४१ ॥
तत्पुत्रः पुष्पडालाख्यो दानपूजापरायणः ।
दृष्ट्वा चर्यार्थमायातं तं मुनिं गुणशालिनम् ॥ ४२ ॥
ससंभ्रमं समुत्थाय तिष्ठ तिष्ठेति सम्वदन् ।
संस्थाप्य नवभिः पुण्यैः सप्तभिः स्वगुणैर्युतः ॥ ४३ ॥

प्रासुकं सरसाहारं भक्तितः परया मुदा ।
स तस्मै दत्तवान्दाता सुपात्राय सुखप्रदम् ॥ ४४ ॥
पुष्पडालस्ततो राज-पुत्रत्वाद्बालमित्रतः ।
भक्तितश्च तथा सार्धं मुनिना तेन गच्छता ॥ ४५ ॥
सोमिल्यां स्वस्त्रियं पृष्ट्वा सोनुव्रजनहेतवे ।
स्तोकमार्गे समादाय कुण्डिकां निर्गतो गृहात् ॥ ४६ ॥
पश्चादागन्तुकामोसौ मंत्रिपुत्रो जगौ पथि ।
पश्य देव पुरावाभ्यां क्रीडितं सरसीह च ॥ ४७ ॥
सच्छायः सफलस्तुङ्गो जनानां सौख्यदायकः ।
सुराजेव विभात्युच्चै-रयं चाम्रतरुः पुरः ॥ ४८ ॥
यत्रावाभ्यां समागत्य पूर्वं क्रीडा विनिर्मिता ।
शोभतेयं महीदेशो विस्तीर्णो वा सतां मनः ॥ ४९ ॥
इत्यादिकं मुहुश्चिह्नं दर्शयन्प्रणमन्पुनः ।
तच्चित्तं जानताप्युच्चैः स्वामिना तेन सादरम् ॥ ५० ॥
धृत्वा करे सुवैराग्यं नीत्वा सत्तत्ववाग्भरैः ।
कृत्वा धर्मश्रुतिं जैनीं दीक्षां संग्राहितः सखा ॥ ५१ ॥
पठन्नपि महाशास्त्रं पालयन्नपि संयमम् ।
सोमिल्यां भामिनीं काणीं स्मरत्येव नवव्रती ॥ ५२ ॥
धिक्कामं धिङ्महामोहं धिङ्भोगान्यैस्तु वञ्चितः ।
सन्मार्गेपि स्थितो जन्तुर्न जानाति निजं हितम ॥ ५३ ॥
ततो द्वादशवर्षाणि तत्तपःसिद्धिहेतवे ।
गुरुस्तं कारयामास तीर्थयात्रां निजैः सह ॥ ५४ ॥
एकदा तौ मुनी श्रीमद्वर्धमानजिनेशिनः ।
समवादिसृतिं प्राप्तौ चक्रतुर्जिनवन्दनाम् ॥ ५५ ॥

तत्रस्थैर्जिनसद्भक्त्या सद्गन्धर्वसुधाशिभिः ।
गीयमानमिदं पद्यं शृणोति स्म लघुव्रती ॥ ५६ ॥
"मइल कुचेली दुम्मणी णाहे पवसियएण ।
कह जीवेसइ धणियघर वज्झंते विरहेण ॥"
तच्छ्रुत्वा पुष्पडालोसौ मुनिः कामाग्निपीडितः ।
सोमिल्यासक्तचेतस्कश्चक्रे चित्तं व्रतोन्मुखम् ॥ ५७ ॥
वारिषेणो मुनिर्ज्ञात्वा मानसं तस्य तादृशम् ।
चचाल स्वपुरीं नीत्वा तं स्थितीकरणाय च ॥ ५८ ॥
तमागच्छन्तमालोक्य मुनीन्द्रं शिष्यसंयुतम् ।
चारित्राच्चलितः किं वा पुत्रोऽयं चेलना सती ॥ ५९ ॥
सञ्चिन्त्य मानसे चेति परीक्षार्थं तदा ददौ ।
सरागवीतरागे द्वे आसने तस्य भाक्तितः ॥ ६० ॥
वीतरागासने धीमान्सस्थितो वारिषेणवाक् ।
मुनीन्द्रो न तपत्येव सतां भ्रान्तिः क्रियाविधौ ॥ ६१ ॥
तदामृतरसस्वादु-हारिभिर्वचनोत्करैः ।
मातरं तोषयामास यतीन्द्रो विनयान्विताम् ॥ ६२ ॥
ततः प्राह मुनिर्मातर्मदीयान्तःपुरं परम् ।
आनीयतामिति श्रुत्वा सा सती चेलना तदा ॥ ६३ ॥
द्वात्रिंशद्गणनोपेतास्तद्भार्या रूपमण्डिताः ।
सालङ्काराः समानीय दर्शयामास सद्गुणाः ॥ ६४ ॥
कृत्वा नतिं ततस्तास्तु संस्थिताः सुयथाक्रमम् ।
गुरुः शिष्यं प्रति प्राह सावधानः प्रमादिनम् ॥ ६५ ॥
यौवराज्यमिदं प्राज्यमेता मे सारसम्पदः ।
सर्वं गृहाण चेत्तुभ्यं रोचते भो मुने ध्रुवम् ॥ ६६ ॥

तच्छ्रुत्वा पुष्पडालोसौ मुनिर्लज्जाभरान्वितः।
समुत्थाय गुरोपाद-द्वयं नत्वा जगाद च ॥ ६७ ॥
धन्यस्त्वं भो मुने स्वामिन्हतलोभमहाग्रहः।
श्रीमज्जिनेन्द्रचन्द्रोक्त-सारतत्वविदाम्वर ॥ ६८ ॥
ये कुर्वन्ति महान्तोत्र मुक्त्वैताः सारसम्पदः।
त्वादृशाः सुतपस्तेषां किं लोके यच्च दुर्लभम् ॥ ६९ ॥
सत्यं जन्मान्धकोहं च गृहीत्वा यत्तपोमणिम्।
अक्ष्णा काणीं तु सोमिल्यां नात्यजन्निजचेतसः ॥ ७० ॥
त्वया द्वादशवर्षाणि तपश्चक्रे सुनिर्मलम्।
मया मूर्खेण तत्रैव तत्कृतं शल्यकश्मलम् ॥ ७१ ॥
अतोपराधिनो मे च प्रायश्चित्तं प्रदीयताम्।
भवद्भिः करुणासारैर्यतो पापक्षयो भवेत् ॥ ७२ ॥
तदासौ वारिषेणश्च मुनीन्द्रो निश्चलव्रतः।
संजगाद वचो धीमान्परमानन्ददायकम् ॥ ७३ ॥
अहो धीर महादुःखं मा कुरु त्वं स्वचेतसि।
दुष्टकर्मवशाज्जीवो विद्वान् क्वापि च मुह्यति ॥ ७४ ॥
इत्युक्त्वा तं समुद्धीर्य प्रायश्चित्तं यथागमम्।
दत्वा तत्तपसश्चेति सुस्थितीकरणं व्यधात् ॥ ७५ ॥
पुष्पडालस्ततो धीमान्गुरुवाक्यप्रसादतः।
महावैराग्यभावेन तपश्चक्रे सुदुःसहम् ॥ ७६ ॥
इत्थं चान्येन कर्त्तव्यं सुस्थितीकरणं श्रिये।
केनापि कारणेनात्र पततो धर्मपर्वतात् ॥ ७७ ॥
येत्र भव्याः प्रकुर्वन्ति सुस्थितीकरणं परम्।
स्वर्मोक्षफलदस्तैश्च सिञ्चितो धर्मपादपः ॥ ७८ ॥

शरीरसम्पदादीना-मस्थिराणां क्वचिद्भवेत् ।
रक्षणं शर्मदं धर्मे का कथा शर्मकोटिदे ॥ ७९ ॥
एवं ज्ञात्वा समुत्सृज्य प्रमादं दुःखकारणम् ।
कार्यं तद्धि महाभव्यैः संसाराम्भोधितारणम् ॥ ८० ॥
श्रीमज्जैनपदाब्जयुग्ममधुलिट् श्रीवारिषेणो मुनि–
र्दत्वा तस्य मुनेस्तपोद्रिपततो हस्तावलम्बं दृढम् ।
ज्ञानध्यानरतः प्रसिद्धमहिमा प्राप्तो वनं निर्मलं
दद्यान्मे भवतारकः स भगवान्नित्यं सुखं मङ्गलम् ॥ ८१ ॥
इति कथाकोशे स्थितिकरणाङ्गे श्रीवारिषेणमुनेः कथा समाप्ता ।

१२–श्रीविष्णुकुमारमुनेः कथा ।

श्रीजिनं भारतीं साधु-पादद्वैतं सुखप्रदम् ।
नत्वा विष्णुकुमारस्य वात्सल्याङ्गे कथां ब्रुवे ॥ १ ॥
अथेह भारते क्षेत्रेवन्तिदेशे महापुरि ।
उज्जयिन्यां प्रभुर्जातः श्रीवर्मा श्रीमतिप्रियः ॥ २ ॥
न्यायशास्त्रविचारज्ञो धार्मिको वैरिमर्दकः ।
प्रजानां पालने दक्षो दुष्टानां निग्रहे क्षमः ॥ ३ ॥
बलिर्बृहस्पतिस्तस्य प्रल्हादो नमुचिस्तथा ।
चत्वारो मन्त्रिणश्चेति संजाता धर्मशत्रवः ॥ ४ ॥
शोभते स्म स भूपालोऽधार्मिकैस्तैर्निसेवितः ।
पन्नगैर्वेष्टितो दुष्टैर्यथा चन्दनपादपः ॥ ५ ॥
एकदाकम्पनाचार्यो लसत्संज्ञानलोचनः ।
प्रसिञ्चन्भव्यसस्यौघान्स्ववाक्यामृतवर्षणैः ॥ ६ ॥
मुनीनां कामशत्रूणां संयुक्तः सप्तभिः शतैः ।
समागत्य तदुद्याने संस्थितः सुरपूजितः ॥ ७ ॥

वारितो गुरुणा तेन स्वसंघो विनयान्वितः ।
आगते भूमिपादौ च भवद्भिर्भो यतीश्वराः ॥ ८ ॥
सार्धं केनापि कर्त्तव्यं जल्पनं नैव साम्प्रतम् ।
अन्यथा सर्वसंघस्य विनाशोद्य भविष्यति ॥ ९ ॥
तदाकर्ण्य गुरोर्वाक्यं लोकद्वयहितप्रदम् ।
मौनेन संस्थितास्तेपि मुनयो ध्यानमानसाः ॥ १० ॥
शिष्यास्तेत्र प्रशस्यन्ते ये कुर्वन्ति गुरोर्वचः ।
प्रीतितो विनयोपेता भवन्त्यन्ये कुपुत्रवत् ॥ ११ ॥
तदा पौराः समादाय पूजाद्रव्यं मनोहरम् ।
निर्गता वन्दनाभक्त्या तेषामानन्दनिर्भराः ॥ १२ ॥
स्वप्रसादस्थितो राजा श्रीवर्मा वीक्ष्य ताञ्जगौ ।
अकालेपि क यात्येष पौरः पुष्पादिसंयुतः ॥ १३ ॥
तच्छ्रुत्वा मंत्रिणः प्राहुर्दुष्टास्ते भूपतिं प्रति ।
देवोद्याने समायाता नित्यं नग्ना दिगम्बराः ॥ १४ ॥
तत्र प्रयाति लोकोयं तदाकर्ण्य नृपोवदत् ।
तान्द्रष्टुं वयमप्युच्चै-र्गच्छामः कौतुकीमयान् ॥ १५ ॥
इत्युक्त्वा मंत्रिभिः सार्धं गत्वा तत्र महीपतिः ।
तान्विलोक्य महाध्यान-सम्पन्नान्हृष्टमानसः ॥ १६ ॥
प्रत्येकं भक्तितस्तेषां स चक्रे वन्दनां मुदा ।
केनापि मुनिना नैव दत्तमाशीर्वचस्तदा ॥ १७ ॥
महाध्यानेन तिष्ठन्ति निस्पृहा मुनयस्तराम् ।
स कुर्वन्संस्तुतिं चेति व्याघुट्य चलितो नृपः ॥ १८ ॥
तदा ते पापिनः प्राहुर्मंत्रिणो द्वेषिणः सताम् ।
एते देव किमप्यत्र वक्तुं जानन्ति नैव च ॥ १९ ॥

ततो मौनं समादाय संस्थिताः कपटेन हि ।
हास्यं कृत्वेति तेनैव निर्गता भूभुजा समम् ॥ २० ॥
इन्द्रप्रतीन्द्रनागेन्द्रै-र्वन्दितानां मुनीशिनाम् ।
निन्दां कुर्वन्ति ये सत्यं दुर्जना भाषणोपमाः ॥ २१ ॥
ततो: मार्गे समालोक्य चर्या कृत्वा मुनीश्वरम् ।
आगच्छन्तं जगुस्तेपि श्रुतसागरसंज्ञकम् ॥ २२ ॥
बलीवर्दः समायाति पूर्णकुक्षिस्तु नूतनः ॥
तदाकर्ण्य मुनीन्द्रेण ज्ञात्वा वादोद्धतांश्च तान् ॥ २३ ॥
स्याद्वादवादिना तेन द्विजास्ते ज्ञानगर्विताः ।
निर्जिता भूपसान्निध्ये वाक्कल्लोलभरैर्निजैः ॥ २४ ॥
एकेन तेन सर्वेपि निर्जिताश्चेति नाद्भुतम् ।
एको हि तिमिरश्रेणि-प्रक्षये भास्करः प्रभुः ॥ २५ ॥
समागत्य गुरोः पार्श्वे स्ववृत्तान्तं जगौ हि सः ।
तच्छ्रुत्वा च गुरुः प्राह हा कृतं भो विरूपकम् ॥ २६ ॥
हतस्त्वया स्वहस्तेन संघोयं शर्मदः सताम् ।
वादस्थाने त्वमेकाकी गत्वा रात्रौ यदि ध्रुवम् ॥ २७ ॥
कायोत्सर्गेण सद्ध्यानं करोषि परमार्थतः ।
संघस्य जीवितं ते च विशुद्धिः संभवेत्तदा ॥ २८ ॥
स धीरो मेरुवद्गाढं मुनिः श्रीश्रुतसागरः ।
श्रुत्वेति संघरक्षार्थं गत्वा तत्र तथा स्थितः ॥ २९ ॥
तदा ते विप्रकाः सर्वे मानभङ्गेन लज्जिताः ।
मुनीमां मारणार्थं च रात्रौ गेहाद्विनिर्गताः ॥ ३० ॥
मार्गे तं मुनिमालोक्य कायोत्सर्गेण संस्थितम् ।
येनास्माकं कृतो मान-भङ्गः सोयं तु हन्यते ॥ ३१ ॥

इत्यालोच्य मुनेस्तस्य वधार्थं दुष्टमानसाः ।
खड्गानुत्थापयामासुश्चत्वारश्चैकवारतः ॥ ३२ ॥
तदा तत्पुण्यमाहात्म्यात्प्रकम्पितनिजासना ।
तथैव स्तंभयामास मंत्रिणः पुरदेवता ॥ ३३ ॥
प्रभातसमये श्रुत्वा लोकेभ्यो भूपतिस्तदा ।
मंत्रिणां दुश्चरित्रं तत्संदृष्ट्वा कीलितांश्च तान् ॥ ३४ ॥
बाधा निरपराधानां येत्र कुर्वन्ति पापिनः ।
प्रयान्ति नरकं घोरं दुस्सहं ते दुराशयाः ॥ ३५ ॥
सामान्यजन्तुहन्तॄणां मुखं द्रष्टुं न युज्यते ।
किं पुनस्त्रिजगत्पूज्य-मुनिपीडाविधायिनाम् ॥ ३६ ॥
इत्युक्त्वा कुलमंत्रित्वाद्विप्रत्वाच्च न मारिताः ।
कोपेन कारयित्वाशु गर्दभारोहणं च तान् ॥ ३७ ॥
देशान्निर्घाटयामास श्रीवर्मा न्यायशास्त्रवित् ।
युक्तं पापप्रयुक्तानां जनानामीदृशी गतिः ॥ ३८ ॥
तं प्रभावं समालोक्य सर्वे भव्यजनास्तदा ।
संचक्रुः परमानन्दै-र्जयकोलाहलध्वनिम् ॥ ३९ ॥
अथास्ति हस्तिनागाख्ये पुरे राजा सुधार्मिकः ।
महापद्मो गतच्छद्मा राज्ञी लक्ष्मीमती सती ॥ ४० ॥
बभूवतुस्तयोः पुत्रौ पद्मो विष्णुश्च शर्मदौ ।
एकदा स महापद्मो राजा राजीवलोचनः ॥ ४१ ॥
त्रिधा वैराग्यमासाद्य जिनपादाब्जयो रतः ।
दत्वा राज्यं सुधीर्ज्येष्ठ-पुत्राय परमार्थतः ॥ ४२ ।
श्रुतसागरचन्द्राख्यं मुनिं नत्वा जगद्धितम् ।
सार्धं विष्णुकुमारेण जैनीं दीक्षां गृहीतवान् ॥ ४३ ॥

श्रीमद्विष्णुकुमारोसौ मुनिः सद्ध्यानतत्परः ।
कुर्वंस्तपो जिनेन्द्रोक्तं संजातो विक्रयर्द्धिवाक् ॥ ४४ ॥
तदा पद्ममहीभर्तुः सद्राज्यं कुर्वतः सुखम् ।
विप्रास्ते तु समागत्य संजाता मंत्रिणः पुनः ॥ ४५ ॥
अन्यदा दुर्बलं वीक्ष्य पद्मराजानमब्रवीत् ।
बलिः किं देव दौर्बल्य-कारणं च प्रभुर्जगौ ॥ ४६ ॥
अस्ति कुंभपुरे राजा नाम्ना सिंहबलो महान् ।
दुष्टो दुर्गबलेनासौ मद्देशं हन्ति दारुणः ॥ ४७ ॥
ततो नृपाज्ञया सोपि बलिर्मंत्री स्वबुद्धितः ।
गत्वा दुर्गाश्रयं भङ्क्त्वा गृहीत्वा च महारिपुम् ॥ ४८ ॥
आगत्य नृपतिं प्राह सोयं सिंहबलः प्रभो ।
इत्याकर्ण्य जगौ राजा पद्माख्यो हृष्टमानसः ॥ ४९ ॥
प्रार्थय त्वं वरं धीर यत्तुभ्यं रोचते तराम् ।
तेनोक्तं प्रार्थयिष्यामि तदा मे दीयतां विभो ॥ ५० ॥
अथैकदा समागत्य मुनिवृन्दैः समन्वितः ।
सुधीरकम्पनाचार्यो भव्यौघान्प्रतिबोधयन् ॥ ५१ ॥
संस्थितः पुरबाह्येसौ पौरास्तत्र महोत्सवैः ।
तान्वन्दितुं गताः सर्वे पूजाद्रव्यैः प्रमोदतः ॥ ५२ ॥
तदाकर्ण्य द्विजास्तेपि चक्रुश्चिन्तां स्वचेतसि ।
एतेषां भाक्तिको राजा भीत्वा मंत्रं विधाय च ॥ ५३ ॥
बलिः प्राह ततो भूपं दीयतां मे प्रभो वरम् ।
राज्यं सप्तदिनान्येव भवद्भिः सत्यसंयुतैः ॥ ५४ ॥
ततोसौ पद्मभूपालो वंचितस्तैः कुमंत्रिभिः ।
दत्वा राज्यं निजं तस्मै स्वयं वान्तःपुरे स्थितः ॥ ५५ ॥

तैस्तदा राज्यमादाय कपटेन शठद्विजैः ।
मुनीनां मारणार्थं च वृत्या संवेष्ट्य तान्पुनः ॥ ५६ ॥
कारयित्वा तृणैः काष्ठैः पापिष्ठैः मण्डपं ततः ।
वेदवाक्यैः समारब्धो यज्ञकः पशुघातकः ॥ ५७ ॥
तदा छागोद्भवैर्धूमै-रुत्थितैः खर्परादिभिः ।
पीडिताः मुनयस्तेपि सन्यासं द्विविधं दृढम् ॥ ५८ ॥
गृहीत्वा संस्थिताश्चित्ते स्मरन्तः परमात्मनः ।
शत्रुमित्रसमाः सर्वे निश्चला मेरुवत्तराम् ॥ ५९ ॥
मिथिलायामथ ज्ञानी श्रुतसागरचन्द्रवाक् ।
मुनीन्द्रो व्योम्नि नक्षत्रं श्रवणं श्रमणोत्तमः ॥ ६० ॥
कम्पमानं समालोक्यं हाहाकारं विधाय च ।
उपसर्गो मुनीन्द्राणां वर्तते महतां महान् ॥ ६१ ॥
इति प्राह तदाकर्ण्य पृष्टोसौ क्षुल्लकेन च ।
पुष्पदन्तेन भो देव कुत्र केषां गुरुर्जगौ ॥ ६२ ॥
हस्तिनागपुरेकम्प-नाचार्यादिमुनीशिनाम् ।
उपसर्गं कथं देव संक्षयं याति धीधन ॥ ६३ ॥
गुरुर्जगाद भो वत्स भूमिभूषणपर्वते ।
मुनिर्विष्णुकुमारोस्ति विक्रियर्द्धिप्रमण्डितः ॥ ६४ ॥
स त निवारयत्येव मुनीनामुपसर्गकम् ।
तच्छ्रुत्वा क्षुल्लको गत्वा सर्वं तस्य मुनेर्जगौ ॥ ६५ ॥
ततो विष्णुकुमारेण विक्रियर्द्धिर्ममास्ति च ।
संचिन्त्येति परिक्षार्थं हस्तः स्वस्य प्रसारितः ॥ ६६ ॥
तदासौ भूधरं भित्वा समुद्रे पतितः करः ।
विक्रियर्द्धिं ततो ज्ञात्वा मुनिः सद्धर्मवत्सलः ॥ ६७ ॥

गत्वा नागपुरं पद्मं भूपतिं प्रति चोक्तवान् ।
अहो भ्रातस्त्वया कष्टं किमारब्धं मुनीशिनाम् ॥ ६८ ॥
अस्मत्कुले पुरा केन निर्मितं नैव चेदृशम् ।
मुनीनामुपसर्गं रे कथं कारयसि त्वकम् ॥ ६९ ॥
शिष्टानां पालनं दुष्ट-निग्रहं यः करोत्यहो ।
कथ्यते स महीनाथो न पुनर्मुनिघातकः ॥ ७० ॥
साधूनामत्र सन्तापो कष्टदो भवति ध्रुवम् ।
सुष्ठु तप्तं यथा तोयं दहत्यङ्गं न संशयः ॥ ७१ ॥
कुरु त्वं शान्तिमेतेषां यावत्ते नागतापदा ।
तदाकर्ण्य प्रभुः प्राह किं करोमि महामुने ॥ ७२ ॥
मया सप्त दिनान्यत्र स्वराज्यं बलिमंत्रिणे ।
दत्तं ततो भवानेव युक्तमुच्चैः करोतु च ॥ ७३ ॥
किं कथ्यते मया तत्र भवतां कार्यशालिनाम् ।
प्रोल्लसद्भास्करे भाति किं दीपेनाल्पतेजसा ॥ ७४ ॥
ततो विष्णुमुनिः सोपि विक्रयर्द्धिप्रभावतः ।
वामनब्राह्मणस्योच्चै-रूपमादाय लीलया ॥ ७५ ॥
कुर्वन्वेदध्वनिं गत्वा यज्ञस्थाने स्थितस्तदा ।
बलिस्तं वीक्ष्य सन्तुष्टः प्रोवाच वचनं शुभम् ॥ ७६ ॥
यत्तुभ्यं रोचते विप्र तन्मया दीयते वद ।
स प्राह वेदवेदाङ्ग-पारगो वामनो द्विजः ॥ ७७ ॥
देहि भो भूपते मह्यं भूमेः पादत्रयं मुदा ।
किं त्वया याचितं विप्र बहु प्रार्थय वाञ्छितम् ॥ ७८ ॥
लोकैः प्रेर्यमाणोपि याचते स्म तदेव सः ।
दानेनैतेन भो देव पूर्यतामिति साम्प्रतम् ॥ ७९ ॥

तदा बलिः प्रभुर्विप्र त्वं गृहाण निजेच्छया ।
भूमेः पादत्रयं चेति दत्तवांस्तत्करे जलम् ॥ ८० ॥
ततः कोपेन तेनोच्चै-रेकः पादः सुराचले ।
द्वितीयश्चरणो दत्तो मानुषोत्तरपर्वते ॥ ८१ ॥
तृतीयश्चरणश्चेति विना स्थानं न चालितः ।
आकाशे तु तदा क्षोभः सजातो भुवनत्रये ॥ ८२ ॥
कम्पिताः पर्वताः सर्वे ससमुद्राः सभूमयः ।
प्रापुः संघट्टनं व्योम्नि विमानाश्चकिताः सुराः ॥ ८३ ॥
क्षम्यतां क्षम्यतां देव भीत्वा चेति सुरासुराः ।
समागत्य बलिं बध्वा पूजयन्ति स्म तत्क्रमौ ॥ ८४ ॥
भक्त्या तदा मुनीन्द्राणामुपसर्गं विशिष्टधीः ॥
शीघ्रं निवारयामास मुनिर्विष्णुकुमारवाक् ॥ ८५ ॥
स पद्मोपि महाराजो भयादागत्य वेगतः ।
विष्णोर्मुनेस्तथा तेषां पतितश्चरणद्वये ॥ ८६ ॥
मंत्रिणश्चेति चत्वारो मुक्त्वा दुष्टाशयं तदा ।
विष्णोरकम्पनाचार्य-मुनीनां पादपद्मयोः ॥ ८७ ॥
नत्वा सद्भावतस्त्यक्त्वा कष्टं मिथ्यामतं द्रुतम् ।
संजाताः श्रावकाः सर्वे जैनधर्मपरायणाः ॥ ८८ ॥
तथा विष्णुकुमारस्य पादपूजार्थमद्भुतम् ।
दत्तं वीणात्रयं देवैर्लोकानां शर्मदायकम् ॥ ८९ ॥
एवं भव्यात्मना भक्त्या मुन्यादीनां सुखप्रदम् ।
वात्सल्यं सर्वथा कार्यं स्वर्गमोक्षसुखश्रिये ॥ ९० ॥
इत्थं श्रीजिनपादपङ्कजरतो धर्मानुरागान्वितः
कृत्वा श्रीमुनिपुंगवेषु नितरां वात्सल्यमुद्यन्मतिः ।

सम्प्राप्तः स्वपदं प्रमोदकलितः श्रीविष्णुनामा मुनि —
भूयान्मे भवसिन्धुतारणपरः सन्मोक्षसौख्यश्रिये ॥ ९१ ॥
इति कथाकोशे वात्सल्याङ्गे विष्णुकुमारमुनेः कथा समाप्ता॥

१३—श्रीवज्रकुमारमुनेः कथा ।

प्रणम्य परमात्मानं श्रीजिनं त्रिजगद्गुरुम् ।
वक्ष्ये प्रभावनाङ्गेहं कथां वज्रकुमारजाम् ॥ १ ॥
हस्तिनागपुरे रम्ये बलनाम्नो महीपतेः ।
पुरोहितोभवत्तस्य गरुडाख्यो विचक्षणः ॥ २ ॥
तत्पुत्रः सोमदत्तोभून्नाना शास्त्रसरित्पतेः ।
पारगः परमानन्द-दायकः सज्जनादिषु ॥ ३ ॥
अहिच्छत्रपुरं गत्वा त्वेकदासौ विशालधीः ।
सुभूतिं मातुलं प्राह भो माम विनयान्वितः ॥ ४ ॥
राजानं दुर्मुखाख्यं मे दर्शय त्वं कृपापरः ।
गर्वितेन प्रभुस्तेन दर्शितो नैव तस्य सः ॥ ५ ॥
ततोसौ गृहिलो भूत्वा सभायां भूपतेः स्वयम् ।
गत्वाशीर्वचनं तस्मै दत्वा पुण्यप्रभावतः ॥ ६ ॥
नाना शास्त्रप्रवीणत्वं स्वं प्रकाश्यैकहेलया ।
प्राप्तो मंत्रिपदं दिव्यं स्वशक्तिः शर्मदायिनी ॥ ७ ॥
तथाभूतं तमालोक्य सोमदत्तं स मातुलः ।
सुभूतिर्विधिना तस्मै यज्ञदत्तां सुतां ददौ ॥ ८ ॥
एकदा यज्ञदत्ताया गर्भिण्याया हृदोऽभवत् ।
आम्रपक्वफलास्वादे प्रावृषि स्त्रीस्वभावतः ॥ ९ ॥

तान्यालोकितुं विप्रो गतश्चाम्रवनं तदा ।
अकालेपि सुधीरोत्र किं करोति न साहसम् ॥ १० ॥
तत्रान्वेषयता तेन सहकारद्रुमेषु च ।
एकोह्याम्रतरुर्दृष्टः सुमित्रमुनिना श्रितः ॥ ११ ॥
नाना फलौघसम्पन्नो महद्भिः सेवितो महान् ।
शोभते स्म तरुः सोपि जैनधर्म इवापरः ॥ १२ ॥
प्रभावोयं मुनेरस्य द्विजो ज्ञात्वेति चेतसि ।
तान्यादाय फलान्युच्चैः प्रेषयामास योषितः ॥ १३ ॥
स्वयं स्थित्वा मुनेः पाद-मूलेसौ भक्तिनिर्भरः ।
नत्वा त त्रिजगत्पूतं पृष्टवान्सोमदत्तवाक् ॥ १४ ॥
भो मुने करुणासिन्धो सारं किं भुवनत्रये ।
तदहं श्रोतुमिच्छामि श्रीमतां मुखपद्मतः ॥ १५ ॥
तच्छ्रुत्वा मुनिनाथोसौ सुमित्राख्योवदत्तराम् ।
श्रीमज्जिनेन्द्रचन्द्रोक्त-धर्म एव विचक्षण ॥ १६ ॥
सोपि वत्स द्विधा प्रोक्तः स्वर्गमोक्षसुखप्रदः ।
मुनिश्रावकभेदेन भवभ्रमणनाशकः ॥ १७ ॥
तत्राद्यो दशधा धर्मो मुनीनां गुणशालिनां ।
रत्नत्रयादिभिश्चैव जिनेन्द्रैः परिकीर्तितः ॥ १८ ॥
दानपूजादिभिः शील-प्रोषधैश्च शुभश्रिये ।
भवेत्परोपकाराद्यैः श्रावकाणां वृषोत्तमः ॥ १९ ॥
इत्यादिधर्मसद्भावं श्रुत्वा श्रीमुनिभाषितम् ।
महावैराग्यसम्पन्नो नत्वा तं मुनिनायकम् ॥ २० ॥
दीक्षामादाय जैनेन्द्रीं सर्वपापप्रणाशिनीम् ॥
आगमाम्भोधिसत्पारं प्राप्तोसौ गुरुभक्तितः ॥ २१ ॥

ततो नाभिगिरिं गत्वा सोमदत्तो महामुनिः ।
स्थित्वा तापनयोगेन सद्ध्याने संश्रितः सुधीः ॥ २२ ॥
अथातो यज्ञदत्ता सा ब्राह्मणी सुषुवे सुतम् ।
दिव्यं शर्माकरं पूज्यं सुकाव्यं वा सतां मतिः ॥ २३ ॥
एकदा सा समाकर्ण्य भर्तृवृत्तान्तमद्भुतम् ।
बन्धूनामग्रतो गत्वा जगादाश्रुविलोचना ॥ २४ ॥
बन्धुवर्यैः समं गत्वा ततो नाभिगिरिं द्रुतम् ।
दृष्ट्वा तापनयोगेन संस्थितं मुनिसत्तमम् ॥ २५ ॥
महाकोपेन सन्तप्ता यज्ञदत्ता जगाद च ।
रे रे दुष्ट त्वया कष्टं परिणीता कथं यतः ॥ २६ ॥
मां विमुच्य तपःप्रीत्या संस्थितोसिं शिलोच्चये ।
अतस्ते त्वं गृहाणेमं पुत्रं पालय साम्प्रतम् ॥ २७ ॥
इत्युक्त्वा निष्ठुरं वाक्यं तं पुत्रं निर्दयाशया ।
धृत्वा तत्पादयोरग्रे कोपतः स्वगृहं गता ॥ २८ ॥
सिंहव्याघ्रसमाकीर्णे पर्वते तत्र निर्दया ।
त्यक्त्वा बालं गता सेत्थं किं न कुर्वन्ति योषितः ॥ २९ ॥
अत्रान्तरेमरावत्या नगर्याश्च खगाधिपः ।
श्रीदिवाकरदेवाख्यः कुटुम्बकलहे सति ॥ ३० ॥
स पुरंदरदेवेन लघुभ्रात्रा महायुधि ।
राज्यान्निर्घाटितो ज्येष्टः सकलत्रो विषण्णधीः ॥ ३१ ॥
ततो विमानमारुह्य जैनीं यात्रां सुखप्रदाम् ।
नाना तीर्थेषु संकर्तुं निर्गतो दुर्गतिच्छिदम् ॥ ३२ ॥
पर्यटंश्च नभोभागे नाभिपर्वतसंस्थितम् ।
दृष्ट्वा तं मुनिमायातो वन्दितुं भक्तिनिर्भरः ॥ ३३ ॥

तत्र बालं विलोक्योच्चैः प्रस्फुरत्कान्तिमद्भुतम् ।
मुनीन्द्रपादपद्माग्रे विकसन्मुखपङ्कजम् ॥ ३४ ॥
ज्ञात्वा तं पुण्यसंयुक्तं समाहूय प्रहर्षतः ।
दत्तवान्निजभार्यायै गृहाणेति सुतं प्रिये ॥ ३५ ॥
संविलोक्य करौ तस्य वज्रचिह्नादिशोभितौ ।
नाम्ना वज्रकुमारोय-मित्युक्त्वा तौ गृहं गतौ ॥ ३६ ॥
स्वमात्रापि विमुक्तोसौ लालितः खेचरस्त्रिया ।
प्रकृष्टपूर्वपुण्यानां न हि कष्टं जगत्त्रये ॥ ३७ ॥
तथासौ स्वगुणैः सार्द्धं वृद्धिं सम्प्राप्तवान्सुधीः ।
कुर्वन्सर्वजनानन्दं द्वितीयेन्दुरिवामलः ॥ ३८ ॥
कनकाख्यपुरे राजा नाम्ना विमलवाहनः ।
स बालस्य भवत्येव तस्य कृत्रिममातुलः ॥ ३९ ॥
तत्समीपे कुमारोसौ नाना शास्त्रमहार्णवम् ।
तरति स्म यथा सर्वे खेचरा विस्मयं गताः ॥ ४० ॥
अथैकदा खगाधीशः सुधीर्गरुडवेगवाक् ।
तद्भार्याङ्गवती नाम्नी सती तद्गुणमण्डिता ॥ ४१ ॥
तयोः पवनवेगाख्या पुत्री सद्रूपशालिनी ।
ह्रीमन्तपर्वते पूते विद्यां प्रज्ञप्तिमद्भुताम् ॥ ४२ ॥
साधयन्ती स्थिता यावद्वद्‌र्याः कण्टकेन च ।
पवनान्दोलितेनोच्चैर्विद्धा सा लोचने सती ॥ ४३ ॥
पीडया चलचित्तायास्तस्या विद्या न सिद्ध्यति ।
पुण्याद्वज्रकुमारोसौ लीलया तत्र चागतः ॥ ४४ ॥
तां विलोक्य तथाभूतां लोचनाच्चतुरोत्तमः ।
दूरीचकार यत्नेन कण्टकं दुर्जनोपमम् ॥ ४५ ॥

ततस्तस्यास्तरां स्वस्थ-चित्ताया मंत्रयोगतः ।
सिद्धा प्रज्ञप्तिका विद्या कार्यकोटिविधायिनी ॥ ४६ ॥
सा जगाद ततः कन्या त्वत्प्रसादेन मे ध्रुवम् ।
सिद्धा विद्येति भो धीर परमानन्ददायिनी ॥ ४७ ॥
अतस्त्वमेव मे भर्त्ता कार्यसिद्धिविधायकः ।
नान्यः परो नरः कोपि निर्गुणः सगुणोऽथवा ॥ ४८ ॥
ततो गरुडवेगोसौ तत्पिता विधिपूर्वकम् ।
तस्मै वज्रकुमाराय तां सुतां दत्तवान्मुदा ॥ ४९ ॥
अथ वज्रकुमारोसौ तां विद्यां स्वस्त्रियो द्रुतम् ।
समादाय महासैन्यं विधाय परमादरात् ॥ ५० ॥
श्रीदिवाकरदेवेन समं गत्वामरावतीम् ।
संग्रामेण ततो जित्वा तं पुरंदरदेवकम् ॥ ५१ ॥
तं दिवाकरदेवं च धर्मतातं महोत्सवैः ।
तद्राज्ये स्थापयामास सुपुत्रः कुलदीपकः ॥ ५२ ॥
एकदा भूपतेः पत्नी जयश्रीः प्राह कोपतः ।
स्वपुत्रराज्यसन्देहदाष्ट्वा तन्मान्यतां तराम् ॥ ५३ ॥
अन्येन जनितश्चान्यं संतापयति दुष्टधीः ।
कुपुत्रोसौ महाकष्टं स्त्रीबुद्धिर्नैव निश्चला ॥ ५४ ॥
तदा वज्रकुमारोसौ श्रुत्वा मातुः कटुश्रुतिम् ।
प्रोवाच वचनं तातं प्रतीत्थं भो खगेश्वर ॥ ५५ ॥
अहं कस्य सुतो देव तदाकर्ण्य प्रभुर्जगौ ।
किं भो पुत्र मतिभ्रंसोभवत्ते येन साम्प्रतम् ॥ ५६ ॥
महादुःखप्रदं वाक्यं वदस्येव मनोहरम् ।
सोपि प्राह सुधीस्तात वद त्वं सत्यमेव च ॥ ५७ ॥

अन्यथा भोजनादौ मे प्रवृत्तिर्नैव भूपते।
सतां चित्ते यदा यातं तत्कथं केन वार्यते ॥ ५८ ॥
विद्याधरप्रभु: प्राह ततो वृत्तान्तमादित :।
सत्यमेवाग्रहेणात्र शक्यते छादितुं न हि ॥ ५९ ॥
तं निशम्य कुमारोसौ स्ववृत्तान्तं विरक्तवान् ।
ततौ विमानमारुह्य वन्दितुं तं मुनीश्वरम् ॥ ६० ॥
तातादिबन्धुभिः सार्द्धं मथुरानिकटस्थिताम् ।
क्षत्रियाख्यगुहां प्राप्तो यत्रास्ते स महामुनिः ॥ ६१ ॥
इन्द्रचन्द्रनरेन्द्राद्यैः समर्चितपदद्वयम्।
सोमदत्तमुनि दृष्ट्वा सन्तुष्टास्ते स्वचेतसि ॥ ६२ ॥
त्रिः परीत्य समभ्यर्च्य नत्वा तं भक्तितो मुनिम्।
संस्थितेषु सुखं तत्र सर्वलोकेषु लीलया ॥ ६३ ॥
सोमदत्तगुरोरग्रे महाधर्मानुरागतः ।
स दिवाकरदेवश्च स्ववृत्तान्तं पुनर्जगौ ॥ ६४ ॥
तदा वज्रकुमारेण प्रोक्तं भो तात शुद्धधीः ।
आदेशं देहि येनाहं करोमि सुतपो ध्रुवम् । ६५ ॥
खगेशः प्राह भो पुत्र त्वत्सहायेन साम्प्रतम् ।
युक्तं मेत्र तप कर्तुं त्वं गृहाणेति मे श्रियम् ॥ ६६ ॥
इत्यादिमधुरैर्वाक्यै-र्निषिद्धोपि महीभुजा ।
युक्त्या सम्बोध्य तानुच्चै-र्मुनिर्जातः स धीरधीः ॥ ६७ ॥
तपो धृत्वा कुमारोसौ कन्दर्पकरिकेसरी ।
श्रीमज्जैनमताम्भोधौ जातः पूर्णेन्दुरद्भुतम् ॥ ६८ ॥
अत्रान्तरे कथां वक्ष्ये शृण्वन्तु सुधियो जनाः ॥
पूतिगन्धाभिधो राजा मथुरायां प्रवर्त्तते ॥ ६९ ॥

नस्योर्विला महाराज्ञी सम्यग्दृष्टिशिरोमणिः ।
नित्यं श्रीमज्जिनेन्द्राणां चरणार्चनकोविदा ॥ ७० ॥
धर्मप्रभावनायां च संसक्ता श्रीजिनेशिनाम् ।
नन्दीश्वरमहापर्व-दिनान्यष्टौ प्रमोदतः ॥ ७१ ॥
वर्षे प्रति त्रिवारांश्च महासंघेन संयुता ।
श्रीजिनेन्द्ररथोत्साहं कारयत्येव शर्मदम् ॥ ७२ ॥
तत्रैव नगरे श्रेष्ठी जातः सागरदत्तवाक् ।
भार्या समुद्रदत्ताख्या तयोः पुत्री बभूव च ॥ ७३ ॥
पापतः सा दरिद्राख्या दुःखदारिद्र्यकारिणी ।
मृते सागरदत्ताख्ये बन्धुवर्गे क्षयं गते ॥ ७४ ॥
दरिद्रा जीविता कष्टं परोच्छिष्टाऽशनैरपि ।
दानपूजागुणैः हीनः प्राणी स्याद्दुःखभाजनम् ॥ ७५ ॥
तदा तत्पुरमायातौ चर्यार्थं मुनिनायकौ ।
नन्दनाख्यो मुनिर्ज्येष्ठो द्वितीयश्चाभिनन्दनः ॥ ७६ ॥
तामुच्छिष्टाशनं बालां भक्षयन्तीं विलोक्य च ।
लघुः प्राह मुनिर्ज्येष्ठं हासौ कष्टेन जीवति ॥ ७७ ॥
इत्याकर्ण्य मुनीन्द्रोऽसौ नन्दनो ज्ञानलोचनः ।
अभिनन्दननामानं प्रोवाच मधुरं वचः ॥ ७८ ॥
अहो कन्या दरिद्रासौ पूतिगन्धमहीपतेः ।
अस्य पट्टमहाराज्ञी भविष्यति सुवल्लभा ॥ ७९ ॥
तदाकर्ण्य च भिक्षार्थं भ्रमता तत्र पत्तने ।
धर्मश्रीवन्दकेनोच्चै-र्नान्यथा मुनिभाषितम् ॥ ८० ॥
संचिन्त्येति दरिद्रासौ नाना मृष्टाशनादिभिः ।
नीत्वा शीघ्रं निजस्थानं पोषिता बहुयत्नतः ॥ ८१ ॥

एकदा यौवनारम्भे चैत्रमासे स्वलीलया ।
विलोक्यान्दोलयन्तीं तां दैवयोगान्महीपतिः ॥ ८२ ॥
कामान्धः पूतिगन्धोसौ तद्रूपासक्तमानसः ।
मंत्रिणं प्रेषयामास तदर्थे वन्दिकान्तिकम् ॥ ८३ ॥
गत्वा ते मंत्रिणः प्राहुर्भो वन्दक महीभुजे ।
दत्वा कन्यामिमां पूतां सुखीभव धनादिभिः ॥ ८४ ॥
तेनोक्तं बौद्धधर्मं मे करोति यदि भूपतिः ।
तदासौ दीयते कन्या मया तस्मै गुणोज्वला ॥ ८५ ॥
तत्स्वीकृत्य ततो भूपो दरिद्रां परिणीतवान् ।
कामी कामाग्निसन्तप्तः किं करोति न पातकम् ॥ ८६ ॥
दरिद्रा बुद्धदासीति स्वं प्रकाश्याभिधानकम् ।
प्राप्य राज्ञीपदं बौद्ध-कुधर्मे तत्पराभवत् ॥ ८७ ॥
युक्तं श्रीमज्जिनेन्द्राणां धर्मः शर्मकरो भुवि ।
प्राप्यते नाल्पपुण्यैश्च निधानं वा भवान्धकैः ॥ ८८ ॥
अथ श्रीफाल्गुणे मासि नन्दीश्वरमहोत्सवे ।
महापूजाविधाने च रथं काञ्चननिर्मितम् ॥ ८९ ॥
लसन्तं पट्टकूलाद्यैः किंकिणीजालशोभितम् ।
नाना रत्नाञ्चितं चारु-छत्रत्रयविराजितम् ॥ ९० ॥
घण्टाटंकारसंयुक्तं वीज्यमानं सुचामरैः ।
सनाथं जिनबिम्बेन पूजितं सज्जनोत्तकरैः ॥ ९१ ॥
प्रोल्लसत्पुष्पमालाभिः सुगन्धीकृतदिङ्मुखम् ।
इत्यादिबहुशोभाढ्यमुर्विलाया विलोक्य तम् ॥ ९२ ॥
बुद्धदासी नृपं प्राह क्षोभं गत्वा स्वमानसे ।
भो नरेन्द्र रथो मेत्र पूर्वं भ्रमतु पत्तने ॥ ९३ ॥

तदाकर्ण्य तदासक्तो नृपः प्राह भवत्विति ।
मोहान्धा नैव जानन्ति गोक्षीरार्कपयोन्तरम् ॥ ९४ ॥
उर्विला च महाराज्ञी जिनपादाब्जयो रता ।
पत्तने प्रथमं मे वै यदा भ्रमति सद्रथः ॥ ९५ ॥
तदाहारप्रवृत्तिर्मे प्रतिज्ञामिति मानसे ।
कृत्वा शीघ्रं तदा गत्वा क्षत्रियाख्यां गुहां सती ॥ ९६ ॥
सोमदत्तमुनिं नत्वा भक्तितो धर्मवत्सला ।
तथा वज्रकुमाराख्यं प्रणम्य मुनिसत्तमम् ॥ ९७ ॥
अहो मुने जिनेन्द्राणां सद्धर्माम्बुधिचन्द्रमाः ।
त्वमेव शरणं मेस्ति मिथ्यात्वध्वान्तभास्करः ॥ ९८ ॥
इति स्तुत्वा महाभक्त्या जगाद निजवृत्तकम् ।
संस्थिता तत्पदांभोज-मूले यावद्गुणोज्वला ॥ ९९ ॥
तौ दिवाकरदेवाद्यास्तदा विद्याधरेशिनः ।
तं वन्दितुं समायाता मुनीन्द्रौ पुण्यपाकतः ॥ १०० ॥
तदा वज्रकुमारेण मुनीन्द्रेण लसद्धिया ।
प्रोक्तं भो भूपते शीघ्रं भवद्भिर्धर्मवत्सलैः ॥ १०१ ॥
उर्विलाया महाराज्याः सम्यग्दृष्टिशिरोमणेः ।
यात्रा रथस्य जैनेंद्री कर्त्तव्या परमादरात् ॥ १०२ ॥
तच्छ्रुत्वा ते मुनेर्वाक्यं सर्वविद्याधरा द्रुतम् ।
तौ प्रणम्य मुनी भक्त्या सम्प्राप्ता मथुरापुरीम् ॥ १०३ ॥
स्वयं ते श्रीजिनेन्द्राणां धर्मकर्मपरायणाः ।
किं पुनः प्रेरितास्तेन मुनीन्द्रेण सुकर्मणि ॥ १०४ ॥
तत्र कोपेन ते प्रोच्चैर्बुद्धदास्या रथं भटान् ।
चूर्णीकृत्य समं तस्या महागर्वेण वेगतः ॥ १०५ ॥

उर्विलाया महादेव्या जिनधर्मासचेतसः ।
संचक्रे परमानन्दा-द्रथयात्रामहोत्सवम् ॥ १०६ ॥
नदत्सु सर्ववादित्र-प्रकारेषु समंततः ।
स्तुवत्सु भव्यलोकेषु चारणेषु पठत्सु च ॥ १०७ ॥
समन्ताज्जयघोषेषु पुष्पवृष्टियुतेषु च ।
नाना नृत्यविनोदेषु कामिनीगीतहारिषु ॥ १०८ ॥
दीयमानेषु दानेषु प्रोल्लसत्प्रमदेषु च ।
अनेकभव्यलोकानां वर्द्धमानेषु सुदृष्टिषु ॥ १०९ ॥
जिनेन्द्रप्रतिमोपेतः सर्वसंघैरलंकृतः ।
संचचाल महाभूत्या रथः पूर्णमनोरथः ॥ ११० ॥
उर्विलाया महादेव्याः सर्वेषां भव्यदेहिनाम् ।
संजातः परमानन्दः स केनात्र प्रवर्ण्यते ॥ १११ ॥
जैनधर्मस्य ते सर्वे सविलोक्य प्रभावनाम् ।
राजा पूतिमुखो भक्त्या बुद्धदासी तथापरे ॥ ११२ ॥
त्यक्त्वा मिथ्यामतं शीघ्रं वान्तिवद्दुःखकारणम् ।
जैनधर्मे जगत्पूज्ये संजाता नितरां रताः ॥ ११३ ॥
एवं वज्रकुमारोसौ मुनीन्द्रो धर्मवत्सलः ।
कारयामास संप्रीत्या जैनधर्मप्रभावनाम् ॥ ११४ ॥
अन्यैश्चापि महाभव्यैः स्वर्गमोक्षप्रदायिनी ।
प्रभावना जिनेन्द्रोक्ते धर्मे कार्या जगद्धिता ॥ ११५ ॥
नाना यात्राप्रतिष्ठाभि-र्गरिष्ठाभिर्विशिष्टधीः ।
जैनशासनमुद्दिश्य यः करोति प्रभावनाम् ॥ ११६ ॥
धर्मानुरागतो धीमान्सम्यग्दृष्टिः शिरोमणिः ।
स भवेन्निजगत्पूज्यः स्वर्गमोक्षसुखाधिपः ॥ ११७ ॥

स श्रीवज्रकुमारोत्र जिनधर्मे सुवत्सलः ।
नित्यं जैनमते कुर्यान्मतिं मे मुनिनायकः ॥ ११८ ॥

गच्छे श्रीमति मूलसंघतिलके श्रीशारदायाः शुभे
श्रीभट्टारकमल्लिभूषणगुरुः सूरिः श्रुताब्धिः सुधीः ।
सम्यग्दर्शनबोधवृत्तविलसद्रत्नाकरोनिर्मलो
दद्यान्मे वरमंगलानि नितरां भक्त्या समाराधितः ॥११९॥

इति कथाकोशे प्रभावनाङ्गे वज्रकुमारमुनेः कथा समाप्ता ।

१४—नागदत्तमुनेः कथा ।

नत्वा पंच गुरून्भक्त्या पंचमीगतिनायकान् ।
नागदत्तमुनेश्चारु चरित्रं रचयाम्यहम् ॥ १ ॥
देशेत्र मगधे ख्याते रम्ये राजगृहे पुरे ।
प्रजापालो महाराजः प्रजापालनतत्परः ॥ २ ॥
धार्मिको न्यायशास्त्रज्ञो जिनभक्तिपरायणः ।
तद्राज्ञी प्रियधर्माख्या दानपूजाप्रसन्नधीः ॥ ३ ॥
तयोर्बभूवतुः पुत्रौ विख्यातौ गुणशालिनौ ।
ज्येष्ठोसौ प्रियधर्माख्यो द्वितीयः प्रियमित्रवाक् ॥ ४ ॥
एकदा राजपुत्रौ तौ दीक्षां जैनीं समाश्रितौ ।
तपः कृत्वाच्युते स्वर्गे देवौ जातौ महर्द्धिकौ ॥ ५ ॥
ज्ञात्वा पूर्वभवं तत्र प्रशस्य जिनशासनम् ।
कुर्वाणौ जैनसद्भक्तिं संस्थितौ सुखतश्च तौ ॥ ६ ॥
धर्मानुरागतस्तत्र प्रतिज्ञेति तयोरभूत् ।
आवयोर्द्वयोर्मध्ये पूर्वं याति नृजन्मताम् ॥ ७ ॥

स्वर्गस्थितेन देवेन स सम्बोध्य जिनेशिनः ।
दीक्षां संग्राहितव्यश्च भवभ्रमणनाशिनीम् ॥ ८ ॥
नगर्यामुज्जयिन्यां च नागधर्मो महीपतिः ।
नागदत्ता महाराज्ञी रूपलावण्यमण्डिता ॥ ९ ॥
प्रियदत्तसुरस्तस्यां स्वर्गादागत्य शुद्धधीः ।
नागदत्तः सुतो जातः नागक्रीडाविचक्षणः ॥ १० ॥
एकदा प्रियधर्मोसौ देवो वाचातिनिश्चलः ।
भूत्वा गारुडिको धृत्वा सर्पयुग्मं करण्डके ॥ ११ ॥
उज्जयिन्यां समागत्य तस्य सम्बोधनाय च ।
सर्पक्रीडाविधौ चंचु-रहं चेति परिभ्रमन् ॥ १२ ॥
तदासौ नागदत्तेन राजपुत्रेण गर्विणा ।
धृतः प्रोक्तं च भो नाग-पालक प्रस्फुरद्विषम् ॥ १३ ॥
त्वदीयं सर्पकं मुञ्च तेन क्रीडां करोम्यहम् ।
तदा गारुडिकः प्राह राजपुत्रैः समं मया ॥ १४ ॥
विवादः क्रियते नैव रुष्टो राजा यदि ध्रुवम् ।
तदा मां मारयत्येव समाकर्ण्य नृपात्मजः ॥ १५ ॥
नीत्वा तं भूपतेरग्रे दापयित्वाभयं वचः ।
एकं भुजंगमं तस्य क्रीडया जयति स्म सः ॥ १६ ॥
ततो हृष्टेन तेनोक्तं नागदत्तेन तं प्रति ।
मुञ्च मुञ्च द्वितीयं च सर्पं भो मन्त्रवादिक ॥ १७ ॥
तेनोक्तं देव सर्पोयं महादुष्टः प्रवर्तते ।
दैवात्खादति चेदस्य प्रतीकारो न विद्यते ॥ १८ ॥
नागदत्तस्ततो रुष्ट्वा वराकोयं करोति किम् ।
मंत्रतंत्रप्रवीणस्य ममेति वचनं जगौ ॥ १९ ॥

ततस्तेन नृपादींश्च कृत्वा तान्साक्षिणः पुनः ।
विमुक्तः कालसर्पेश्च तेनासौ भक्षितः पुमान् ॥ २० ॥
तदा तद्विषमाहात्म्यान्नागदत्तो महीतले ।
पपात निश्चलो भूत्वा मोहान्धो वा भवाम्बुधौ ॥ २१ ॥
राज्ञाप्याकारिताः सर्वे तदा ते मन्त्रवादिनः ।
तैरुक्तं कालदष्टोयं भो स्वामिन्नैव जीवति ॥ २२ ॥
महाचिन्तातुरेणोच्चै-र्नागधर्ममहीभुजा ।
अहो वादिन्यदि त्वं च करोष्येतं सचेतनः ॥ २३ ॥
अर्धराज्यं तदा तुभ्यं दीयतेत्र मया ध्रुवम् ।
इत्युक्त्वा तेन तस्यैव स्वपुत्रीसौ समर्पितः ॥ २४ ॥
स वादी प्राह भो नाथ कालसर्पेण भक्षितः ।
जीवत्यत्र यदा जैनीं दीक्षां गृह्णाति निर्मलाम् ॥ २५ ॥
भूत्वा सचेतनश्चेति ममादेशोस्ति भूपते ।
एवमस्त्विति भूभर्त्ता संजगाद प्रमोदतः ॥ २६ ॥
तदा चोत्थापयामास मंत्रवादी नृपात्मजम् ।
मिथ्यामार्गविषक्रान्तं प्राणिनां वा गुरुर्महान् ॥ २७ ॥
सावधानस्ततो भूत्वा नागदत्तो विचक्षणः ।
श्रुत्वा नृपादितः सर्वां तां प्रतिज्ञां प्रसन्नधीः ॥ २८ ॥
मुनेर्यमधरस्योच्चैः पादमूले सुभक्तितः ।
दीक्षां जग्राह जैनेन्द्रीं सुरेन्द्रैः परिपूजिताम् ॥ २९ ॥
प्रियधर्मचरो देवः प्रकटीभूय भक्तिभाक् ।
नत्वा तं पूर्ववृत्तान्तं कथयित्वा दिवं गतः ॥ ३० ॥
ततः परमवैराग्यान्नागदत्तो मुनीश्वरः ।
विशुद्धचरणोपेतो जिनकल्पी बभूव च ॥ ३१ ॥

सुधीः श्रीमज्जिनेन्द्राणां नाना तीर्थेषु शर्मदाम् ।
यात्रां जिनेन्द्रसद्भक्तिं कुर्वाणः परया मुदा ॥ ३२ ॥
एकदासौ महाटव्या-मागच्छन्मुनिसत्तमः ।
सूरदत्ताश्रितैश्चौरै रुद्धमार्गो दुराशयैः ॥ ३३ ॥
अस्मानसौ मुनिर्गत्वा लोकानां कथयिष्यति ।
भीत्वेति धर्त्तुमारब्धो महालुण्टाकपण्डितैः ॥ ३४ ॥
सूरदत्तस्तत प्राह चोराणामग्रणीर्महान् ।
अहो परमचारित्रो वीतरागोयमद्भुतम् ॥ ३५ ॥
पश्यन्नपि प्रभुर्धीमान्नैव पश्यति किंचन ।
न किंचित्कथयिष्यत्येष केषांचिद्धीरमानसः ॥ ३६ ॥
अतोसौ मुच्यतां शीघ्रं मा भयं कुरुत ध्रुवम् ।
तदाकर्ण्य भटैस्तैश्च विमुक्तो मुनिनायकः ॥ ३७ ॥
अत्रान्तरे मुनेस्तस्य माता या नागदत्तिका ।
नागश्रियं निजां पुत्रीं समादाय विभूतिभिः ॥ ३८ ॥
वत्सदेशेत्र कोशाम्ब्यां जिनदत्तमहीपतेः ।
पुत्राय जिनदत्ताया जिनपालाय धीमते ॥ ३९ ॥
तां दातुं बहुभिः सार-सम्पदाभिः समन्विता ।
सा गच्छन्ती तदामार्गे सुजनैः परिमण्डिताः ॥ ४० ॥
सम्मुखं नागदत्तं तं मुनीन्द्रं वीक्ष्य भक्तितः ।
नत्वा प्राह मुने मार्गो विशुद्धोस्ति नवैति च ॥ ४१ ॥
मौनं कृत्वा मुनिः सोपि निर्गतो मोहवर्जितः ।
शत्रुमित्रसमानश्च महाचारित्रमण्डितः ॥ ४२ ॥
नागदत्ता तथा चोरैर्धृत्वा सर्वधनादिकम् ।
गृहीत्वा सूरदत्तस्य सपुत्री सा समर्पिता ॥ ४३ ॥

तदा तस्करनाथोसौ सूरदत्तो जगाद च ।
चोराणमग्रतः किं भो भवद्भिः सम्विलोकितम् ॥ ४४ ॥
औदासीन्यं मुनीन्द्रस्य निस्पृहस्यास्य सर्वथा ।
एतया वन्दितश्चापि पृष्टश्चापि सुभक्तितः ॥ ४५ ॥
एतेषां भाक्तिकानां च नास्मद्वार्त्तां जगौ मुनिः ।
धीरो वीरोतिगंभीरो जिनतत्वविदाम्वरः ॥ ४६ ॥
इत्याकर्ण्य ततः प्राह नागदत्ता प्रकोपतः ।
देहि भो सूरदत्त त्वं छुरिकामतिदारुणाम् ॥ ४७ ॥
कुक्षिं विदारयामीति यत्रायं नवमासकान् ।
निष्ठुरः स्थापितः कष्टैः कुपुत्रो मोहवर्जितः ॥ ४८ ॥
तच्छ्रुत्वा सूरदत्तोसौ महावैराग्यमातवान् ।
या माता मुनिनाथस्य सा त्वं माता ममापि च ॥ ४९ ॥
इत्युक्त्वा तां प्रणम्योच्चैर्दत्वा सर्वधनं पुनः ।
संविसर्ज्य तथागत्य सूराणामग्रणीर्द्रुतम् ॥ ५० ॥
नागदत्तमुनेः पाद-पद्मद्वेतं प्रणम्य च ।
स्तुत्वा तं परया प्रीत्या मुनीन्द्रं गुणशालिनम् ॥ ५१ ॥
दीक्षामादाय जैनेन्द्री तत्समीपे सुखप्रदाम् ।
क्रमात्सद्दर्शनज्ञान-चारित्रैर्जिनभाषितैः ॥ ५२ ॥
घातिकर्मक्षयं कृत्वा लोकालोकप्रकाशकम् ।
केवलज्ञानमुत्पाद्य देवेन्द्राद्यैः प्रपूजितः ॥ ५३ ॥
सम्बोध्य सकलान्भव्यान्स्वर्गमोक्षप्रदायकः ।
शेषकर्मक्षयं कृत्वा प्राप्तवान्मोक्षमक्षयम् ॥ ५४ ॥

सकलगुणसमुद्रः सर्वदेवेन्द्रवन्द्य–
त्रिभुवनजननेत्रोत्कृष्टनीलोत्पलेन्दुः ।

सृजतु मम शिवानि श्रीजिनः सूरदत्तो
भवतु च भवशान्त्यै नागदत्तो मुनीन्द्रः ॥ ५५ ॥

इति कथाकोशे नागदत्तमुनेः कथा समाप्ता।

१५—कुसङ्गोद्भवदोषस्य कथा।

श्रीसर्वज्ञं नमस्कृत्य सर्वसत्वहितप्रदम्।
वक्ष्ये दुस्सङ्गदोषस्य कथां दुस्सङ्गहानये॥ १ ॥
वत्सदेशेत्र विख्याते कोशाम्बीपत्तने शुभे।
राजाभूद्धनपालाख्यो दुष्टानां मानमर्दकः ॥ २ ॥
चतुर्वेदपुराणादि-सर्वशास्त्रविचक्षणः।
पुरोहितो भवत्तस्य शिवभूतिर्द्विजोत्तमः॥ ३ ॥
तत्रैव कल्पपालश्च पूर्णचन्द्रो धनैर्युतः।
मणिभद्रा प्रिया तस्य सुमित्राख्या सुता भवत्॥ ४ ॥
कदाचित्पूर्णचन्द्रोसौ सुमित्राया विवाहके।
भोजयित्वाखिलं लोकं युक्तितो वरभोजनैः॥ ५ ॥
आमंत्रितश्च मित्रत्वाच्छिवभूतिः पुरोहितः।
तेनोक्तं मित्र शूद्रान्न-मस्माकं नैव कल्पते॥ ६ ॥
कल्पपालः पुनः प्राह पवित्रोद्यानके सुधीः।
निष्पादितं महाविप्रैर्भोजनं क्रियतामिति ॥ ७ ॥
एवमस्त्विति तेनोक्तं ब्राह्मणेन तदाग्रहात्।
तद्दानं हि प्रधानं स्याल्लोके यद्विनयान्वितम्॥ ८ ॥
ततोसौ पूर्णचन्द्रश्च विप्रहस्तेन भोजनम्।
उद्याने कारयामास रसैः षड्भिः समन्वितम्॥ ९ ॥

तत्रैकतो वने पूर्ण-चन्द्रं तं बन्धुभिर्युतम् ।
अन्यपार्श्वे द्विजं तं च पिबन्तं दुग्धशर्कराम् ॥ १० ॥
कैश्चिल्लोकैः समालोक्य धनपालमहीपतेः ।
प्रोक्तं देव कृतं मद्य-पानं ते शिवभूतिना ॥ ११ ॥
इत्याकर्ण्य महीनाथस्तमाहूय द्विजोत्तमम् ।
पृष्टवांश्च द्विजः प्राह कृतं नैव मया प्रभो ॥ १२ ॥
परीक्षार्थं ततो राज्ञा शिवभूतिः पुरोहितः ।
कारितो वमनं विप्रो वेदवेदाङ्गपारगः ॥ १३ ॥
स्वभावतोतिदुर्गन्धे कृते तस्मिंश्च वान्तिके ।
महाकोपेन सन्तप्तो धनपालो धराधिपः ॥ १४ ॥
निर्भर्त्स्य निष्ठुरैर्वाक्यैः शिवभूतिं सुकष्टतः ।
देशान्निर्घाटयामास कुसङ्गः कष्टदो ध्रुवम् ॥ १५ ॥
अतो भव्यैः परित्यज्य कुसुङ्गं सर्वनिन्दितम् ।
सङ्गतिः सुजनानां च कर्त्तव्या परमादरात् ॥ १६ ॥

श्रीमज्जैनपदाब्जयुग्मरसिकैर्भव्यालिभिः साधुभिः
कर्तव्या सह सङ्गतिः सुनितरां त्यक्त्वा कुसगं बुधैः ।
सम्मानं धनधान्यमुन्नतिपदं प्रीतिं सतां सर्वदा
या लोके च करोति सङ्गतिरसौ सा मे क्रियान्मङ्गलम्॥१७॥

इति कथाकोशे कुसुङ्गोद्भवदोषस्य कथा समाप्ता ।

१६–पवित्रहृदयबालकस्य कथा।

बालो विलोक्यते यादृक्तादृशं वदति ध्रुवम् ।
नत्वा जिनं प्रवक्ष्यामि तत्कथां बुद्धये नृणाम् ॥ १ ॥

कोशाम्बीनगरे राजा जयपालो विचक्षणः ।
श्रेष्ठी सागरदत्ताख्यो धनाढ्यो धर्मवत्सलः ॥ २ ॥
भार्या सागरदत्ताभूत्तयोः पुत्रो बभूव च ।
नाम्ना समुद्रदत्तोसौ रूपलावण्यमण्डितः ॥ ३ ॥
तत्रैव नगरे जातो गोपायनवणिक्कुधीः ।
सप्तव्यसनसंसक्तः पापतो धनवर्जितः ॥ ४ ॥
तस्य सोमाभवद्भार्या तयोः पुत्रश्च सोमकः ।
संजातो वत्सरैः कैश्चित्क्रमेण प्रौढबालकः ॥ ५ ॥
तौ द्वौ स्वलीलया बालौ बालक्रीडां परस्परम् ।
नित्यं समुददत्ताख्य-सोमकौ कुरुतः स्म च ॥ ६ ॥
एकदा धनलोभेन पापी गोपायनो वणिक् ।
बालं समुद्रदत्ताख्यं सर्वाभरणभूषितम् ॥ ७ ॥
पश्यतः सोमकस्याग्रे मारयित्वा स्वगेहके ।
गृहीत्वाभरणान्याशु गर्त्तायां क्षिप्तवान्कुधीः ॥ ८ ॥
तदा सागरदत्ताद्यैस्तत्कुटुम्बैः सुदुःखितैः ।
कष्टतोपि न दृष्टोसौ पुण्यहीने यथा सुखम् ॥ ९ ॥
ततः पुत्रमपश्यन्ती सती सागरदत्तिका ।
क्व रे समुद्रदत्तोसौ सोमकं प्रति संजगौ ॥ १० ॥
सोमकः प्राह बालत्वाद्गर्त्तायां तव पुत्रकः ।
तिष्ठतीति, नवेत्त्येव बालकः किंचिदप्यहो ॥ ११ ॥
पापी पापं करोत्येव प्रच्छन्नापि पापतः ।
तत्प्रसिद्धं भवत्येव कष्टकोटिप्रदायकम् ॥ १२ ॥
तत्र सागरदत्ता सा मृतं पुत्रं विलोक्य तम् ।
भर्तुः सागरदत्तस्य जगौ वार्ता सुदुःखदाम् ॥ १३ ॥

तेनोक्तं यमदण्डाख्य-कोट्टपालस्य तेन च।
भूपतेस्तेन कोपेन चक्रे तन्निगृहं भृशम् ॥ १४ ॥
इति ज्ञात्वा बुधैर्नित्यं त्यक्त्वा पापं सुखःखदम्।
धर्मः श्रीमज्जिनेन्द्रोक्तः सेवनीयः सुखप्रदः ॥ १५ ॥
बालो वेत्ति हिताहितं न विकलो लोकेत्र कामातुर—
स्तारुण्ये गतयौवने च नितरां प्राणी जरापीडितः।
मध्यस्थोपि कुटुम्बदुर्भरतृषाक्रान्तः कदा स्वस्थता
दैवात्प्राप्य जिनेन्द्रशासनमसौ भव्योस्तु धर्माशयः १६

इति कथाकोशे पवित्रहृदयबालकस्य कथा समाप्ता।

१७—धनदत्तराज्ञः कथा।

नत्वा श्रीमज्जिनाधीशं सुराधीशैः समर्चितम्।
धनदत्तमहीभर्तुः सत्कथां कथयाम्यहम् ॥ १ ॥
अन्धदेशेत्र विख्याते धान्यादिकनकेपुरे।
धनदत्ताभिधो राजा सद्दृष्टिर्धर्मवत्सलः ॥ २ ॥
संघश्रीवन्दकस्तस्य मंत्री मिथ्यामताश्रितः।
एवं राज्यं करोति स्म धर्मकर्मपरो नृपः ॥ ३ ॥
एकदा धनदत्ताख्या-संघश्रीभ्यां स्वलीलया।
ताभ्यां मंत्रप्रकुर्वद्भ्यां प्रासादस्योपरि क्षितौ ॥ ४ ॥
काले पराह्णके तत्र समालोक्य नभस्तले।
मुनीन्द्रौ चारणौ चित्ते चमत्कारविधायिनौ ॥ ५ ॥
ससम्भ्रमं समुत्थाय कृत्वा तद्वन्दनां मुदा।
स्वान्तिके तौ समानीतौ साधुसङ्गः सतां प्रियः ॥ ६ ॥

तदा तस्य महीभर्तुर्वचनेन विचक्षणौ ।
श्रीमज्जिनेन्द्रसद्धर्म–व्याख्यानं संविधाय तौ ॥ ७ ॥
संघश्रीवन्दकं कृत्वा श्रावकं परमादरात् ।
स्वस्थानं जग्मतुः पूतौ मुनीन्द्रौ गुणशालिनौ ॥ ८ ॥
बुद्धश्रीवन्दकं सोपि संघश्रीः स्वगुरुं सदा ।
त्रिसन्ध्यं वन्दितुं याति पुरा मिथ्यात्वमोहितः ॥ ९ ॥
तस्मिन्दिने गतो नैत्र वन्दनासमये ततः ।
बुद्धश्रिया समाहूय स नीतो निजपार्श्वकम् ॥ १० ॥
नमस्कारमकुर्वन्सन्पृष्टोसौ वन्दकेन च ।
न प्रणामं करोषीति कथं रे साम्प्रतं मम ॥ ११ ॥
मंत्रिणा मुनिवृत्तान्ते कथिते सुमनोहरे ।
वन्दकेन तदा प्रोक्तं पापिना पलभक्षिणा ॥ १२ ॥
हा हा त्वं वञ्चितोसीति सन्ति नैवात्र चारणाः ।
मुनयो गगने मूढ गम्यते किं निराश्रये ॥ १३ ॥
राजा ते कपटी लोके दर्शयामास साम्प्रतम् ।
इन्द्रजालं महाभ्रान्ति मा गास्त्वं बुद्धभाक्तिकः ॥ १४ ॥
एवं मिथ्यात्वमानीतो वारितो नितरामसौ ।
प्रभाते त्वं च मा गच्छ भूपतेः सदसि ध्रुवम् ॥ १५ ॥
गत्वापि तत्र मावादी मया दृष्टौ मुनी इति ।
संघश्रीस्तत्समाकर्ण्य श्रावकत्वमपाकरोत् ॥ १६ ॥
स्वयं ये पापिनो लोके परं कुर्वन्ति पापिनम् ।
यथा सन्तप्तमानोसौ दहत्यग्निर्न संशयः ॥ १७ ॥
धनदत्तो महीभर्त्ता सम्यग्दृष्टिशिरोमणिः ।
प्रभाते स्वसभामध्ये महाधर्मानुरागतः ॥ १८ ॥

सामन्तादिमहाभव्य-लोकानामग्रतः सुधीः ।
चक्रे चारणयोगीन्द्र-समागमकथां शुभाम् ॥ १९ ॥
विश्वासहेतवे तत्र समाहूय च मंत्रिणम् ।
अहो मंत्रिन्नृपः प्राह कीदृशौ तौ मुनीश्वरौ ॥ २० ॥
तनोक्तं निन्दकेनेति वन्दकेन सुपापिना ।
नैव दृष्टं किमप्यत्र मया भो चारणादिकम् ॥ २१ ॥
तदा संघाश्रियस्तस्य महापापप्रभावतः ।
कष्टतः स्फुटिते नेत्रे तत्क्षणादुष्टचेतसः ॥ २२ ॥
प्रभावो जिनधर्मस्य सूर्यस्येव जगत्त्रये ।
नैव संछाद्यते केन घूकप्रायेण पापिना ॥ २३ ॥
जैनधर्मं प्रशस्योच्चैः सर्वे ते भूमिपादयः ।
संजाताः श्रावकाचार—चञ्चवो भक्तिनिर्भराः ॥ २४ ॥

इत्थं श्रीजिनशासनेऽतिविमले देवेन्द्रचन्द्रार्चिते
ज्ञात्वा भव्यजनैः प्रभावमतुलं स्वर्गापवर्गप्रदे ।
त्यक्त्वा भ्रांतिमतीवशर्मनिलये कार्या मतिर्निर्मला
धर्मे श्रीजिनभाषितेत्र नितरां सर्वेष्टसंसाधिनी ॥ २५ ॥

इति कथाकोशे धनदत्तराज्ञः कथा समाप्ता ।

१८—ब्रह्मदत्तस्य कथा ।

प्रणम्य परया भक्त्या जिनेन्द्रं जगदर्चितम् ।
ब्रह्मदत्तकथां वक्ष्ये सतां सद्बोधहेतवे ॥ १ ॥
कांपिल्यनगरेत्रैव राजा ब्रह्मरथः सुधीः ।
राज्ञी रूपगुणोपेता रामिल्या प्राणवल्लभा ॥ २ ॥

तयोर्द्वादशचक्रेशो ब्रह्मदत्तोभवत्सुतः ।
षट्खण्डमंडितां पृथ्वीं संसाध्य सुखतः स्थितः ॥ ३ ॥
एकदा सूपकारश्च तस्मै विजयसेनवाक् ।
भोजनावसरे तप्तं पायसं दत्तवांस्ततः ॥ ४ ॥
उष्णत्वात्तेन तद्भोक्तु-मसमर्थेन चक्रिणा ।
तेनैव पायसेनाशु क्रोधान्धेन कुबुद्धिना ॥ ५ ॥
मस्तके दाहयित्वा च सूपकारः स मारितः ।
धिक्कोपं प्राणिनां लोके कष्टकोटिविधायकम् ॥ ६ ॥
ततो विजयसेनोसौ सूपकारः सुदुःखितः ।
मृत्वा क्षारसमुद्रस्थे रत्नद्वीपे सुविस्तृते ॥ ७ ॥
भूत्वा व्यन्तरदेवश्च विभंगज्ञानचक्षुषा ।
ज्ञात्वा पूर्वभवं कष्टं महाकोपेन कम्पितः ॥ ८ ॥
परिव्राजकरूपेण पूर्ववैरेण संयुतः ।
कदल्यादिमहामिष्ट-फलान्यादाय वेगतः ॥ ९ ॥
तत्रागत्य ततस्तस्मै ब्रह्मदत्ताय दत्तवान् ।
स जिह्वालम्पटश्चक्री भक्षित्वा सुफलानि च ॥ १० ॥
सन्तुष्टः पृष्टवानित्थं परिव्राजक भो वद ।
ईदृशानि फलान्युच्चैः कुत्र सन्ति प्रियाणि च ॥ ११ ॥
तच्छ्रुत्वा सोपि संप्राह समुद्रे भो नरेश्वर ।
मदीयमठसान्निध्ये वाटिकायां बहून्यलम् ॥ १२ ॥
तदाकर्ण्य नृपस्तत्र गन्तुकामोभवत्तराम् ।
शुभाशुभं न जानाति हा कष्टं लम्पटः पुमान् ॥ १३ ॥
अन्तःपुरादिसंयुक्तं नीत्वा तं तेन सागरे ।
मारणार्थं समारब्धस्तथोच्चैरुपसर्गकः ॥ १४ ॥

तदा पञ्चनमस्कारं स्मरन्तं चक्रवर्तिनम् ॥
देवो मारयितुं तत्र न समर्थो बभूव च ॥ १५ ॥
ततोसौ प्रकटो भूत्वा देवो दुष्टाशयोवदत् ।
रे रे दुष्ट त्वया कष्टं मारितोहं पुरा किल ॥ १६ ॥
अतोहं मारयामि त्वां साम्प्रतं बहु दुःखतः ।
यदि त्वं नास्ति जैनेन्द्र-शासनं भुवनत्रये ॥ १७ ॥
भणित्वेति प्रशस्योच्चैः स्ववाक्यैः परदर्शनम् ।
लिखित्वा च जले पञ्च-नमस्कारपदानि च ॥ १८ ॥
विनाशयसि पादेन त्वां मुञ्चामि तदा ध्रुवम् ।
ब्रह्मदत्तस्ततो मिथ्या-दृष्टिश्चक्रे तदीरितम् ॥ १९ ॥
मारितः सिन्धुमध्येसौ व्यन्तरेण सुवैरिणा ।
सप्तमं नरकं प्राप्तो मिथ्यात्वं कष्टकोटिदम् ॥ २० ॥
यस्य चित्ते न विश्वासो धर्मे श्रीजिनभाषिते ।
तस्य किं कुशलं लोके महादुष्कर्मकारिणः ॥ २१ ॥
मिथ्यात्वेन समं किंचिन्निन्द्यं न भुवनत्रये ।
यतोसौ चक्रवर्त्ती च सप्तमं नरकं गतः ॥ २२ ॥
तस्माद्दूरतरस्त्यक्त्वा मिथ्यात्वं वान्ति बुधाः ।
स्वर्मोक्षसाधने हेतुं सम्यक्त्वं भावयन्तु वै ॥ २३ ॥
देवोर्हन्भुवनत्रयेत्र नितरां दोषौघसङ्गोज्झितो
देवेन्द्रार्कनरेन्द्रखेचरशतैर्भक्त्या सदाभ्यर्चितः ।
तद्वाक्यं भवसागरप्रवहणप्रायं महाशर्मदं
नित्यं चेतसि भावितं च भवतां कुर्याद्वरं मङ्गलम् ॥२४॥

इति कथाकोशे ब्रह्मदत्तचक्रिणः कथा समाप्ता ।

१९–श्रीश्रेणिकनृपस्य कथा ।

नत्वा जिनं जगत्पूज्यं केवलज्ञानलोचनम् ।
वक्ष्ये श्रीश्रेणिकस्योच्चैः सत्कथां श्रेयसे नृणाम् ॥ १ ॥
देशेत्र मगधे ख्याते पुरे राजगृहे परे ।
राजा श्रीश्रेणिकस्तत्र राजविद्याविराजितः ॥ २ ॥
तद्राज्ञी चेलिनी नाम्नी सम्यग्दृष्टिर्विचक्षणा ।
श्रीमज्जिनेन्द्रपादाब्ज-पूजनैपकरायणा ॥ ३ ॥
एकदा श्रेणिकेनोक्तं श्रृणु त्वं देवि वच्म्यहम् ।
सर्वधर्मप्रधानोयं विष्णुधर्मोत्र वर्त्तते ॥ ४ ॥
अतस्त्वया रतिः कार्या तत्रैवाशु सुखप्रदे ।
तदाकर्ण्य प्रभोर्वाक्यं जैनतत्वेषु निश्चला ॥ ५ ॥
चेलना विनयोपेता संजगाद प्रियं वचः ।
भो देव विष्णुभक्तानां भोजनं दीयते मया ॥ ६ ॥
अथैकदा समाहूय भोजनार्थं स्वमण्डपे ।
गौरवात्स्थापयामास सर्वान्भागवतान्सती ॥ ७ ॥
तत्र ते कपटोपेताः शठा ध्यानेन संस्थिताः ।
पृष्टास्तया भवन्तोत्र किं कुर्वन्ति तपस्विनः ॥ ८ ॥
इत्याकर्ण्य जगुस्तेपि त्यक्त्वा देहं मलैर्भृतम् ।
जीवं विष्णुपदं नीत्वा तिष्ठामो देवि सौख्यतः ॥ ९ ॥
ततस्तया महादेव्या चेलिन्या सोपि मण्डपः ।
प्रज्वालितोग्निना नष्टाः कष्टास्ते वायसा यथा ॥ १० ॥
राज्ञा रुष्टेन सा प्रोक्ता भक्तिर्नास्ति यदि ध्रुवम् ।
किं ते मारयितुं चैतान्युक्तं कष्टात्तपस्विनः ॥ ११ ॥

तयोक्तं देव भो त्यक्त्वा कुत्सितं स्ववपुर्द्रुतम् ।
एते विष्णुपदं प्राप्ताः सारसौख्यसमन्वितम् ॥ १२ ॥
नित्यं तत्रैव तिष्ठन्ति किमत्रागमनेन च ।
इति ज्ञात्वोपकाराय मयेदं निर्मितं प्रभो ॥ १३ ॥
अस्त्येव मम वाक्यस्य निश्चयार्थं महीपते ।
सदृष्टान्तकथां वक्ष्ये श्रूयतां परमादरात् ॥ १४ ॥
"वत्सदेशे सुविख्याते कोशाम्बीपत्तने प्रभुः ।
प्रजापालो महाराज्यं करोति स्म स्वलीलया ॥ १५ ॥
श्रेष्ठी सागरदत्ताख्यो वसुमत्या स्त्रिया युतः ।
तत्रैव च समुद्रादि दत्तः श्रेष्ठी परोभवत् ॥ १६ ॥
भार्या समुद्रदत्ताख्या श्रेष्ठिनोश्च तयोर्द्वयोः ।
महास्नेहवशादुच्चै-र्वाचा बन्धोभवद्ध्रुवम् ॥ १७ ॥
आवयोः पुत्रपुत्र्यौ यौ संजायेते परस्परम् ।
तयोर्विवाहः कर्त्तव्यो यस्मात्प्रीतिर्भवेत्सदा ॥ १८ ॥
ततः सागरदत्तस्य वसुमत्यां सुतोभवत् ।
तिष्ठति स्म गृहे चेति वसुमित्रो महाद्भुतम् ॥ १९ ॥
तथा समुद्रदत्तस्य नागदत्ता सुताजनि ।
तस्यां समुद्रदत्तायां रूपलावण्यमण्डिता ॥ २० ॥
वसुमित्रेण तेनोच्चैः परिणीता क्रमेण सा ।
नैव वाचा चलत्वं च सतां कष्टशतैरपि ॥ २१ ॥
ततश्च वसुमित्रोसौ निशायां निजलीलया ।
धृत्वा पिट्टारके शीघ्रं नित्यं सर्पशरीरकम् ॥ २२ ॥
भूत्वा दिव्यनरो नाग-दत्तया सह सौख्यतः ।
भुंक्ते भोगान्मनोभीष्टान्विचित्रा संसृतेः स्थितिः ॥ २३ ॥

एकदा यौवनाक्रान्तां नागदत्तां विलोक्य च ।
जगौ समुद्रदत्ता सा पुत्री स्नेहेन दुःखिता ॥ २४ ॥
हा विधेश्चेष्टितं कष्टं कीदृशी मे सुतोत्तमा ।
वरश्च कीदृशो जातो भीतिकारी भुजङ्गमः ॥ २५ ॥
तच्छ्रुत्वा नागदत्तासौ भो मातर्माविसूरय ।
समुद्रीर्येति वृत्तान्तं स्वभर्तुः संजगाद च ॥ २६ ॥
तदाकर्ण्य समुद्रादिदत्ता गत्वा सुतागृहम् ।
रात्रौ पिट्टारके मुक्त्वा सर्पदेहं सुनिन्दितम् ॥ २७ ॥
धृत्वा मनुष्यसद्रूपं वसुमित्रे च निर्गते ।
सा प्रच्छन्नं तदा भस्मी-चक्रे पिट्टारकं सती ॥ २८ ॥
दाहिते च तदा तस्मिन्वसुमित्रो गुणोज्वलः ।
भुञ्जानो विविधान्भोगान्सदासौ पुरुषः स्थितः ॥ २९ ॥
तथैते देव तिष्ठन्ति विष्णुलोके निरन्तरम् ।
एतदर्थं मयारब्धो देहदाहस्तपस्विनाम् ॥ ३० ॥ ''
तन्निशम्य महीनाथः श्रेणिकश्चेलनोदितम् ।
समर्थो नोत्तर दातुं कोपान्मौनेन संस्थितः ॥ ३१ ॥
अथैकदा नृपाधीशो गतः पापर्द्धिहेतवे ।
तत्रातापनयोगस्थं यशोधरमहामुनिम् ॥ ३२ ॥
समालोक्य महाकोपान्ममेमं विघ्नकारिणम् ।
मारयामीति संचिन्त्य मुक्तवान्कुक्कुरान्वृथा ॥ ३३ ॥
गत्वा पञ्चशतान्युच्चैः कुक्कुरास्तेपि निष्ठुराः ।
यशोधरमुनेस्तस्य तपोमाहात्म्ययोगतः ॥ ३४ ॥
कृत्वा प्रदक्षिणां पाद-मूले तस्थुः सुभक्तितः ।
क्रोधान्धेन पुनस्तेन बाणा मुक्ताः सुदारुणाः ॥ ३५ ॥

तेपि बाणा बभूवुश्च पुष्पमालाः सुनिर्मलाः ।
प्रभावो मुनिनाथस्य महान्केनात्र वर्ण्यते ॥ ३६ ॥
तस्मिन्काले महीपालः सप्तमं नरकं प्रति ।
त्रयस्त्रिंशत्समुद्रायुर्बन्धं चक्रे सुकष्टदम् ॥ ३७ ॥
ततः प्रभावमालोक्य मुनेः पादाम्बुजद्वयम् ।
प्रणम्य परया भक्त्या त्यक्त्वा दुष्टाशयं नृपः ॥ ३८ ॥
पुण्येन पूर्णयोगोसौ यशोधरमहामुनिः ।
तत्वं जगाद जैनेन्द्रं सुरेन्द्राद्यैः प्रपूजितम् ॥ ३९ ॥
तच्छ्रुत्वोपशमं सार-सम्यक्त्वं संगृहीतवान् ।
तदायुश्चतुराशीति-गुणवर्षसहस्रकम् ॥ ४० ॥
संचक्रे प्रथमे शीघ्रं नरके प्रस्तरादिमे ।
किं न स्याद्भव्यमुख्यानां शुभं सद्दर्शनागमे ॥ ४१ ॥
ततः पादान्तिके चित्र-गुप्तनाम महामुनेः ।
क्षयोपशमिकं प्राप्य सम्यक्त्वं भक्तिनिर्भरः ॥ ४२ ॥
वर्द्धमानजिनेन्द्रस्य पादमूले जगद्गुरोः ।
गृहीत्वा शुद्धसम्यक्त्वं क्षायिकं मुक्तिदायकम् ॥ ४३ ॥
स्वीचक्रे तीर्थकृन्नाम त्रैलोक्येशैः समर्चितम् ।
तस्माच्छ्रेणिको भूपस्तीर्थेशः संभविष्यति ॥ ४४ ॥

स जयति जिनदेवः केवलज्ञानदीपः
सकलसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यः ।
यदुदितवरवाक्यैर्भावितैः स्वच्छचित्ते
भवति विमललक्ष्मीनायकोसौ मनुष्यः ॥ ४५ ॥

इति कथाकोशे श्रीश्रेणिकनृपस्य कथा समाप्ता ।

२०—पद्मरथस्य कथा ।

श्रीजिनं त्रिजगन्नाथैः समर्चितपदद्वयम् ।
नत्वा पद्मरथस्योच्चै-र्जिनभक्तिकथोच्यते ॥ १ ॥
देशेत्र मागधे रम्ये मिथिलायां महापुरि ।
राजा पद्मरथो जातो विख्यातो मुग्धमानसः ॥ २ ॥
एकदासौ महाटव्यां पापर्द्ध्यै भूपतिर्गतः ।
दृष्ट्वैकं शशकं पृष्टे तस्याश्वं वाहयदद्भुतम् ॥ ३ ॥
भूत्वैकाकी वने काल-गुहां प्राप्तः स्वपुण्यतः ।
तत्र दीप्ततपोयोगा-द्विस्फुरत्कान्तिमद्भुतम् ॥ ४ ॥
सुधर्ममुनिमालोक्य रत्नत्रयविराजितम् ।
शान्तो बभूव सन्तप्तो लोहपिण्डो यथाम्भसा ॥ ५ ॥
तुरंगादवतीर्याशु तं प्रणम्य महामुदा ।
धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समर्चितम् ॥ ६ ॥
सम्यक्त्वाणुव्रतान्युच्चैः समादाय सुभक्तितः ।
सन्तुष्टः पृष्टवानित्थं सुधीः पद्मरथो नृपः ॥ ७ ॥
भो मुने भुवनाधार-जैनधर्माम्बुधौ विधो ।
वक्तृत्वादिगुणोपेत-स्त्वादृशः पुरुषोत्तमः ॥ ८ ॥
किं कोपि वर्तते क्वापि परो वा नेति धीधन ।
सन्देहो मानसे मेस्ति ब्रूहि त्वं करुणापर ॥ ९ ॥
तच्छ्रुत्वा स मुनिः प्राह सुधर्मो जैनतत्ववित् ।
शृणु त्वं भो महीनाथ चम्पायां विबुधार्चितः ॥ १० ॥
तीर्थकृद्वासुपूज्योस्ति द्वादशो भवशर्मदः ।
स कोटिभास्करोत्कृष्ट-कान्तिसन्दोहसाधिकः ॥ ११ ॥

तस्य श्रीवासुपूज्यस्य ज्ञानदीप्तिगुणोदये ।
अन्तरं मे तरां चास्ति मेरुसर्षपयोरिव ॥ १२ ॥
तदाकर्ण्य मुनेर्वाक्यं धर्मप्रीतिविधायकम् ।
तत्पादवन्दनाभक्त्यै संजातः सोत्सवो नृपः ॥ १३ ॥
यावच्चचाल सद्भूत्या प्रभाते प्रीतिनिर्भरः ।
यावद्धन्वन्तरिर्नाम्ना सुधीर्विश्वानुलोमवाक् ॥ १४ ॥
तौ सखायौ सुरौ भूत्वा समागत्य महीतले ।
तस्य भक्तेः परीक्षार्थं मार्गे सङ्गच्छतो मुदा ॥ १५ ॥
दर्शयामासतुः कष्टं कालसर्पं तिरोगतम् ।
मायया छत्रभंगं च पुरो दाहादिकं पुनः ॥ १६ ॥
वातोद्भूतमहाधूली-पाषाणपतनादिकम् ।
अकालेपि महावृष्टिं निमग्नं कर्दमे द्विपम् ॥ १७ ॥
मन्त्र्यादिभिस्तदा वार्य-माणोपि बहुधा नृपः ।
अमङ्गलशते जाते गम्यते नैव भूपते ॥ १८ ॥
नमः श्रीवासुपूज्याय भणित्वेति प्रसन्नधीः ।
कर्दमे प्रेरयामास भक्तिमान्निजकुंजरम् ॥ १९ ॥
तथाभूतं तमालोक्य जिन भक्तिभरान्वितम् ।
स्वमायामुपसंहृत्य संप्रशस्य सुरोत्तमौ ॥ २० ॥
सर्वरोगापहं हारं भेरीं योजननादिनीम् ।
धर्मानुरागतस्तस्मै दत्वा स्वस्थानकं गतौ ॥ २१ ॥
यस्य चित्ते जिनेन्द्राणां भक्तिः सन्तिष्ठते सदा ।
सिध्यन्ति सर्वकार्याणि तस्य नैवात्र संशयः ॥ २२
ततो पद्मरथो राजा प्रहृष्टहृदयाम्बुजः ।
गत्वा चम्पापुरीं तत्र दृष्ट्वा त्रैलोक्यमङ्गलम् ॥ २३ ॥

समवादिसृतौ संस्थं प्रातिहार्यादिभूषितम् ।
सुरासुरनराधीश-समर्चितपदद्वयम् ॥ २४ ॥
केवलज्ञाननिर्णीत-विश्वतत्वोपदेशकम् ।
अनन्तभवसम्बद्ध-महामिथ्यात्वनाशकम् ॥ २५ ॥
वासुपूज्यजिनाधीशं समभ्यर्च्य सुभक्तितः ।
स्तुत्वा स्तोत्रैस्तथा नत्वा श्रुत्वा तत्वं जिनोदितम् ॥ २६ ॥
दीक्षामादाय जैनेन्द्रीं पादमूले जिनेशिनः ।
संजातो गणभृच्चारु-चतुर्ज्ञानविराजितः ॥ २७ ॥
अतो भव्यैः सदा कार्या जिनभक्तिः सुशर्मदा ।
त्यक्त्वा मिथ्यामतं शीघ्रं स्वर्गमोक्षसुखाप्तये ॥ २८ ॥
यथा पद्मरथो राजा जिनभक्तिपरोभवत् ।
अन्यैश्चापि महाभव्यै-र्भवितव्यं तथा श्रिये ॥ २९ ॥
यद्भक्तिर्भुवनत्रयेत्र नितरां निर्वाणसंसाधिनी
सामान्येन सुरेन्द्रखेचरनराधीशादिशर्मप्रदा ।
स श्रीमान्मुनिपुंगवः शुचितरः सत्केवलोद्योतको
दद्यात्सारसुखं समस्तजगतो पूज्यः सतां सेवितः ॥ ३० ॥

इति कथाकोशे जिनभक्तपद्मरथस्य कथा समाप्ता ।

२१–पञ्चनमस्कारमंत्रप्रभावकथा ।

नत्वा पंच गुरून्भक्त्या पञ्चमीगतिसिद्धये ।
कथा पञ्चनमस्कार-फलस्योच्चैर्निगद्यते ॥ १ ॥
अंगदेशे सुविख्याते चम्पायां चारुलोचनः ।
प्रतापनिर्जिताराति-र्जातो राजा नृवाहनः ॥ २ ॥

श्रेष्ठि वृषभदासाख्यो-ऽर्हद्दासी मानसप्रियः ।
श्रीजिनेन्द्रपदाम्भोज-सेवनैकलसत्क्रियः ॥ ३ ॥
श्रेष्ठिनस्तस्य गोपालः कदाचित्पुण्ययोगतः ।
स्वेच्छया गृहमागच्छन्नरण्ये भुवनोत्तमम् ॥ ४ ॥
दृष्ट्वा चारणयोगीन्द्रं यथा स्तिमितमद्भुतम् ।
अभ्रावकाशिनं शीत-काले तीव्रे शिलास्थितम् ॥ ५ ॥
अहो कथं मुनीन्द्रोसौ वस्त्रादिपरिवर्जितः ।
शिलापीठे स्थितो रात्रिं कष्टतो गमयिष्यति ॥ ६ ॥
संचिन्त्येति गृहं गत्वा मुनिं स्मृत्वा सुमानसे ।
तथा पश्चिमरात्रौ च गृहीत्वा महिषीः पुनः ॥ ७ ॥
तत्रागत्य समालोक्य तं मुनिं ध्यानसंस्थितम् ।
तच्छरीरे महाशीतं तुषारं पतितं द्रुतम् ॥ ८ ॥
स्फेटयित्वा स्वहस्तेन मुनेः पादादिमर्दनम् ।
कृत्वा स्वास्थ्यं निधायोच्चैः पुण्यभागी बभूव च ॥ ९ ॥
प्रभातेसौ महाध्यान-मुपसंहृत्य धीधनः ।
अयमासन्नभव्योस्ति मत्वेति मुनिनायकः ॥ १० ॥

" **णमो अरिहंताणं** "

इति दत्वा महामंत्रं तस्मै स्वर्मोक्षदायकम् ।
तमेवाशु समुच्चार्य नभोभागे स्वयं गतः ॥ ११ ॥
गोपालस्य तदा तस्य तन्मंत्रस्योपरि स्थिरा ।
संजाता महती श्रद्धा सैव लोके सुखप्रदा ॥ १२ ॥
ततोसौ सर्वकार्येषु गोपालः परमादरात् ।
पूर्वमेव महामंत्रं तमुच्चरति सुस्फुटम् ॥ १३ ॥
एकदा श्रेष्ठिना तेन पठन्मंत्रं स गोपकः ।
किं रे करोषि चापस्यं वारितश्चेति धीमता ॥ १४ ॥

तेनोक्ते पूर्ववृत्तान्ते श्रेष्ठी सन्तुष्टमानसः ।
संजगाद त्वमेवात्र धन्यो गोप महीतले ॥ १५ ॥
येन दृष्टौ मुनीन्द्रस्य पादौ त्रैलोक्यपूजितौ ।
भवन्ति भुवने सन्तः सत्यं धर्मानुरागिणः ॥ १६ ॥
अथैकदा महिष्योस्य वह्निक्षेत्रं प्रभक्षितुम् ।
गंगानदीं समुत्तीर्य निर्गता निजलीलया ॥ १७ ॥
ता निवर्तयितुं सोपि महिषीर्गोपकस्तदा ।
तं सुमंत्रं समुच्चार्य नद्यां झंपां प्रदत्तवान् ॥ १८ ॥
तत्रादृश्योरुकाष्टेन विद्धोसौ जठरे तदा ।
प्रच्छन्नदुर्जनेनेव तीक्ष्णेन प्राणहारिणा ॥ १९ ॥
मृत्वा निदानतस्तस्य श्रेष्ठिनस्तनयोभवत् ।
अर्हद्दास्याः शुभे गर्भे पुण्यान्नाम्ना सुदर्शनः ॥ २० ॥
रूपलावण्यसौभाग्य-धनधान्यसमन्वितः ।
संजातः कृतपुण्यानां किमप्यत्र न दुर्लभम् ॥ २१ ॥
ततः सागरदत्तस्य पुत्रीं नाम्ना मनोरमाम् ।
जातां सागरसेनायां युक्त्यासौ परणीतवान् ॥ २२ ॥
एकदासौ महाश्रेष्ठी सुधीर्वृषभदत्तवाक् ।
त्रिधा वैराग्यमासाद्य धृत्वा तं स्वपदे सुतम् ॥ २३ ॥
मुनेः समाधिगुप्तस्य पादमूले सुभक्तितः ।
दीक्षामादाय जैनेन्द्रीं मुनिर्जातो विचक्षणः ॥ २४ ॥
तदा सुदर्शनो धीमान्प्राप्य श्रेष्ठीपदं महत् ।
राजादिपूजितो जातः सुप्रसिद्धो बभूव च ॥ २५ ॥
नित्यं श्रीमज्जिनेन्द्रोक्त-श्रावकाचारतत्परः ।
दानपूजास्वशीलादि-धर्मकर्मपरोऽभवत् ॥ २६ ॥

कदाचिद्भूभुजा सार्द्धं वनक्रीडनहेतवे ।
गतोसौ निजसंभूत्या श्रेष्ठी सर्वगुणान्वितः ॥ २७ ॥
तं दृष्ट्वा श्रेष्ठिनं तत्र निधानं रूप सम्पदः ।
तद्राज्ञी विव्हलीभूया-ऽभयाख्या प्राह धात्रिकाम् ॥ २८ ॥
कोयं भो धात्रिके धीमान्नरकोटिशिरोमणिः ।
तयोक्तं देवि विख्यातो राजश्रेष्ठी सुदर्शनः ॥ २९ ॥
तच्छ्रुत्वा सावदद्राज्ञी यद्यमुं पुरुषोत्तमम् ।
त्वं ददासि समानीय तदाजीवाम्यहं ध्रुवम् ॥ ३० ॥
धात्री जगाद भो देवि करिष्यामि तवेप्सितम् ।
अवश्यं दुष्टनारीभिर्निन्दितं क्रियते न किम् ॥ ३१ ॥
स श्रीसुदर्शनः श्रेष्ठी विशिष्टश्रावकव्रती ।
अष्टम्याश्चचतुर्दश्यां रात्रौ भीमे श्मशानके ॥ ३२ ॥
स्थित्वा वैराग्यभावेन योगं गृह्णाति शुद्धधीः ।
तन्मत्वा धात्रिका सापि पापकर्मविचक्षणा ॥ ३३ ॥
कुंभकारगृहं गत्वा मृत्तिकापुत्तलं तदा ।
नरप्रमाणकं शीघ्रं कारयित्वा सुवाससा ॥ ३४ ॥
वेष्टयित्वा समादाय राज्ञीपार्श्वे चचाल सा ।
किमेतद्धात्रिके ब्रूहि धृतेति द्वारपालकैः ॥ ३५ ॥
कोटिल्येन तया तत्र क्षिप्त्वा पुत्तलकं क्षितौ ।
भग्नमालोक्य कोपेन प्रोक्तं धात्र्या सुधूर्तया ॥ ३६ ॥
रे रे दुष्टाः सुपापिष्ठा भवद्भिर्निन्दितं कृतम् ।
राज्या नरव्रतं चास्ति पूजयित्वा सुपुत्तलम् ॥ ३७ ॥
पश्चात्तया च कर्तव्यं भोजनं नान्यथा ध्रुवम् ।
अतः प्रभाते मार्यन्ते भवन्तोऽन्यायकारिणः ॥ ३८ ॥

तदा भीत्वा जगुस्तेपि भो मातस्त्वं क्षमां कुरु ।
कदाचित्कोपि नैव त्वां वारयत्यत्र सर्वथा ॥ ३९ ॥
एवं सर्वान्वशीकृत्य धात्री तान्द्वारपालकान् ।
अष्टम्याश्च तथा रात्रौ गत्वा घोरे श्मशानके ॥ ४० ॥
कायोत्सर्गस्थितं दृष्ट्वा श्रेष्ठिनं तं सुदर्शनम् ।
राज्ञ्याः समर्पयामास तत्रानीय प्रयत्नतः ॥ ४१ ॥
आलिङ्गनादिविज्ञानैः सा राज्ञी कामपीडिता ।
नानोपसर्गकं चक्रेऽभयाख्या तस्य धीमतः ॥ ४२ ॥
सः श्रेष्ठी मेरुवद्धीरो गंभीरो जलधेस्तराम् ।
श्रीमज्जैनेन्द्रपादाब्ज-सेवनैकमधुव्रतः ॥ ४३ ॥
एतस्मादुपसर्गान्मे यदि शान्तिर्भविष्यति ।
पाणिपात्रे तदाहारं करिष्यामि सुनिश्चयात् ॥ ४४ ॥
इति प्रतिज्ञामादाय संस्थितः काष्ठवत्तराम् ।
सन्तः कष्टशतैश्चापि चारित्रान्न चलत्यलम् ॥ ४५ ॥
असमर्था तदा भूत्वा राज्ञी तच्छीलखण्डने ।
संविदार्य नखैर्देहं स्वकीयं दुष्टमानसा ॥ ४६ ॥
इदं मे श्रेष्ठिना चक्रे सा चकारेति पूत्कृतिम् ।
किं न कुर्वन्ति पापिन्यो निन्द्यं दुष्टस्त्रियो भुवि ॥ ४७ ॥
तदाकर्ण्य महीनाथो महाकोपेन कम्पितः ।
नीत्वा श्मशानके श्रेष्ठिं मार्यतामिति चोक्तवान् ॥ ४८ ।
ततो राजभटैः सोपि समानीतः श्मशानके ।
तत्रैकेन गले तस्य खड्गो मुक्तो दुरात्मना ॥ ४९ ॥
तदा तच्छीलमाहात्म्यात्स खड्गः सम्पतन्नपि ।
पुष्पमालाभवत्कण्ठे सुगन्धीकृतदिङ्मुखा ॥ ५० ॥

जय त्वं त्रिजगत्पूज्य-जिनपादाब्जषट्पद ।
विशिष्टधीरहो श्रेष्ठिन् श्रावकाचारकोविद ॥ ५१ ॥
इत्यादिभिः शुभैर्वाक्यैः पुष्पवृष्ट्यादिभिस्तराम् ।
देवास्तं पूजयन्ति स्म लसद्धर्मानुरागतः ॥ ५२ ॥
अहो पुण्यवतां पुंसां कष्टं चापि सुखायते ।
तस्माद्भव्यैः प्रयत्नेन कार्यं पुण्यं जिनोदितम् ॥ ५३ ॥
पुण्यं श्रीमज्जिनेन्द्राणां भक्त्या यच्चर्चनं सदा ।
पात्रदानं तथा शीलं सोपवासादिकं मतम् ॥ ५४ ॥
श्रुत्वा तद्वृत्तमाहात्म्यं श्रेष्ठिनो भुवनोत्तमम् ।
राज्ञा लोकैः समागत्य सत्क्षमां कारितः सुधीः ॥ ५५ ॥
ततः सुदर्शनः श्रेष्ठी संसारादेर्विरक्तवान् ।
दत्वा श्रेष्ठिपदं शीघ्रं सुकान्ताख्यसुताय च ॥ ५६ ॥
नत्वा मुनिं जगत्पूतं भक्त्या विमलवाहनम् ।
दीक्षामादाय जैनेन्द्रीं मुनिर्भूत्वातिनिर्मलः ॥ ५७ ॥
दर्शनज्ञानचारित्र-तपोत्यागैः सुशर्मदम् ।
केवलज्ञानमुत्पाद्य देवेन्द्राद्यैः समर्चितः ॥ ५८ ॥
भव्यान्सम्बोध्य पूतात्मा स्वर्गमोक्षसुखप्रदः ।
निराबाधसुखोपेतां मुक्तिं संप्राप्तवान्सुधीः ॥ ५९ ॥
इत्थं ज्ञात्वा महाभव्यैः कर्तव्यः परया मुदा ।
सारपञ्चनमस्कार-विश्वासः शर्मदः सताम् ॥ ६० ॥

स जयति जिनचन्द्रः केवलज्ञानकान्ति-
मुदितसकलभव्योत्कृष्टनेत्रोत्पलौघः ।
असुरसुरनरेन्द्रैः खेचरेंद्रैः सुभक्त्या
श्रुतजलधिमुनीद्रैः सेवितः शर्मदाता ॥ ६१ ॥

इति कथाकोशे पंचनमस्कारप्रभावकथा समाप्ता ।

२२—श्रीयममुनेः कथा ।

श्रीजिनं भारतीं साधुं प्रणम्य परया मुदा ।
खण्डश्लोकैः कथा जाता कथ्यते सा सुखप्रदा ॥ १ ॥
उड्देशेत्र विख्याते धर्माख्यनगरे वरे ।
जातो राजा यमो धीमान्सर्वशास्त्रविचक्षणः ॥ २ ॥
तद्राज्ञी धनवत्याख्या गर्दभाख्यः सुतस्तयोः ।
सुताभूत्कोणिका नाम्ना रूपलावण्यमण्डिता ॥ ३ ॥
तस्यैव यमभूपस्य पुत्राः पञ्चशतानि च ।
अन्यराज्ञीषु संजाता जैनधर्मधुरन्धराः ॥ ४ ॥
दीर्घनामाभवन्मंत्री मंत्रकर्मपरायणः ।
एवं राज्यं प्रकुर्वाणः स राजा सुखतः स्थितः ॥ ५ ॥
नैमित्तिकेन सम्प्रोक्तमेकदा तस्य भूपतेः ।
यः कोणिकापतिर्भावी स भावी सर्वभूमिपः ॥ ६ ॥
तच्छ्रुत्वा स यमो राजा तां पुत्रीं भूरियत्नतः ।
प्रच्छन्नं पालयामास सुधीर्भूमिगृहे सदा ॥ ७ ॥
एकदा नगरे तत्र मुनिपञ्चशतैर्युतः ।
महामुनिः समायातः सुधर्माख्यो जगद्धितः ॥ ८ ॥
वन्दनार्थं तदा सर्वे पूजाद्रव्येण संयुताः ।
प्रचेलुः परया भक्त्या पौराः सन्तुष्टमानसाः ॥ ९ ॥
तान् गच्छतो जनान् वीक्ष्य स भूपो ज्ञानगर्वतः ।
कुर्वन्निन्दां मुनीन्द्राणां तत्रैव गतवांस्तदा ॥ १० ॥
निन्दया ज्ञानगर्वाच्च तत्कालं तस्य भूपतेः ।
सर्वबोधक्षयो जातो लक्ष्मीर्वा पापकर्मणा ॥ ११ ॥

ततोष्टधा महाकष्टं गर्वे दुःखशतप्रदम् ।
ज्ञानविज्ञानमिच्छन्तो न कुर्युर्भव्यदेहिनः ॥ १२ ॥
निर्मदोसौ ततो भूत्वा गजो वा दन्तवर्जितः ।
नत्वा मुनीन्महाभक्त्या संस्थितस्तत्र भूपतिः ॥ १३ ॥
धर्ममाकर्ण्य जैनेन्द्रं द्विधा शर्मप्रदायकम् ।
त्रिधा वैराग्यसम्पन्नो यमो भूत्वा स्वमानसे ॥ १४ ॥
गर्दभाख्यस्वपुत्राय राज्यं दत्वा सुनिश्चलः ।
युक्तैः पञ्चशतैः पुत्रैर्मुनिर्भक्त्या बभूव सः ॥ १५ ॥
तत्पुत्रास्ते तदा सर्वे जाताः सर्वश्रुतैर्युताः ।
मुनेः पञ्चनमस्कार-मात्रं नायाति तस्य तु ॥ १६ ॥
ततो लज्जापरो भूत्वा गुरुं पृष्ट्वा सुभक्तितः ।
यमो मुनिर्जिनेन्द्राणां तीर्थयात्रासु निर्गतः ॥१७ ॥
तत्रैकाकी मुनिः सोपि कुर्वन्यात्रां सुखप्रदाम् ।
एकदा च महामार्गे गच्छन्स्वेच्छाशयो मुदा ॥ १८ ॥
दृष्ट्वा रथं नरोपेतं नीयमानं च गर्दभैः ।
भक्षणार्थं यवक्षेत्रं हरितं प्रति लोलुपैः ॥ १९ ॥
रथोपरिस्थितेनोच्चैर्ध्रियमाणं च कष्टतः ।
खण्डश्लोकं तदा चक्रे किंचिद्बुद्धेः प्रसादतः ॥ २० ॥

"कट्टसि पुण णिक्खेवसि रे गद्दहा जवं पेच्छसि खादितुं ।"

तथैकदा सुधीर्मार्गे बालक्रीडां प्रकुर्वताम् ।
लीलया लोकपुत्राणां बिलेऽगात्काष्ठकोणिका ॥ २१ ॥
तां कोणिकामपश्यन्तो जातास्ते व्यग्रमानसाः ।
तान् विलोक्य मुनिः सोपि खण्डं श्लोकं चकार सः ॥ २२ ॥

"अण्णत्थ किं पलोवह तुम्हे पत्थणिबुद्धि
या छिद्दे अत्थई कोणिआ।"

एकदा पद्मिनीपत्र-छन्नदुःसर्पसम्मुखम् ।
भीत्या गच्छन्तमालोक्य मण्डूकं च यमोवदत् ॥ २३ ॥

" अह्मादो णत्थि भयं दीहादो दीसदे भयं तुम्हे । "

एतैः खण्डैस्त्रिभिः श्लोकैः स मुनिर्नित्यमेव च ।
स्वाध्यायं श्रीजिनेन्द्राणां वन्दनादिकमद्भुतम् ॥ २४ ॥
कुर्वंस्तीर्थेषु शुद्धात्मा महाधर्मानुरागतः ।
गत्वा धर्मपुरोद्याने कायोत्सर्गेण संस्थितः ॥ २५ ॥
तमायातं समाकर्ण्य गर्दभो दीर्घकश्च तौ ।
राज्यं गृहीतुमायातो यमोयमिति भीवशौ ॥ २६ ॥
अर्धरात्रौ मुनेस्तस्य मारणार्थं दुराशयौ ।
तत्रागत्य वने शस्त्रो-पेतौ तत्पृष्टतः स्थितौ ॥ २७ ॥
धिक्राज्यं धिङ्मूर्खत्वं कातरत्वं च धिक्नराम् ।
निस्पृहाच्च मुनेर्येन शङ्का राज्येभवत्तयोः ॥ २८ ॥
तदा गर्दभदीर्घौ च मुनेर्हत्याभयं गतौ ।
खङ्गस्याकर्षणं कष्टं चक्रतुस्तु पुनः पुनः ॥ २९ ॥
तस्मिन्नेव क्षणे तेन स्वाध्यायं गृह्णता मुदा ।
श्लोकार्धं पठितं पूर्वं यमेन मुनिनेति च ॥ ३० ॥

"कट्टासि पुण णिक्खेवासि रे गद्दहा अवं पेच्छसि खादिदुं"

तच्छ्रुत्वा गर्दभेनोक्तं मंत्रिणं प्रति भो सुधीः ।
आवां द्वौ लक्षितौ दुष्टौ मुनीन्द्रेण महाधिया ॥ ३१ ॥
पठिते द्वितीयार्धे च गर्दभो हि पुनर्जगौ ।
अहो दीर्घ मुनीन्द्रोसौ राज्यार्थं नागतो ध्रुवम् ॥ ३२ ॥

कोणिका भगिनी मे च या स्थिता भूमिसद्गृहे ।
महास्नेहेन तां वक्तुं समायातो विचक्षणः ॥ ३३ ॥
तृतीयार्द्धं मुनिः प्राह तच्छ्रुत्वा गर्दभेन वै ।
स्वचित्ते चिन्तितं चेति दुष्टोयं दीर्घकः कुधीः ॥ ३४ ॥
मां हंतुमिच्छति क्रूरस्तद्वृत्तं स्नेहतो मम ।
बुद्धिं दातुं समायातः पिता मे मुनिसत्तमः ॥ ३५ ॥
ततस्तौ परया भक्त्या त्यक्त्वा दुष्टाशयं द्रुतम् ।
तं प्रणम्यं मुनिं पूतं शुद्धचारित्रमण्डितम् ॥ ३६ ॥
धर्ममाकर्ण्य जैनेन्द्रं स्वर्गमोक्षप्रदायकम् ।
तुष्टौ गर्दभदीर्घौ च संजातौ श्रावकोत्तमौ ॥ ३७ ॥
ततो यमो मुनीन्द्रोसौ महावैराग्यमण्डितः ।
जिनोक्तैः शुद्धचारित्रैर्जातः सप्तर्द्धिसंयुतः ॥ ३८ ॥
यतोसौ ज्ञानलेशेन संजातो गुणभाजनम् ।
यतो भव्यैः सदाराध्यं जैनं ज्ञानं जगद्धितम् ॥ ३९ ॥

स्तोकं ज्ञानमपि प्रसिद्धमहिमा भक्त्या समाराध्य च
जातोसौ मुनिसत्तमो गुणनिधिः सप्तर्द्धियुक्तो महान् ।
ज्ञात्वेत्थं त्रिजगत्प्रपूज्यजिनपैः प्रोक्तं सुशर्मप्रदं
ज्ञानं निर्वृतिसाधनं शुचितरं सन्तः श्रयन्तु श्रिये ॥४०॥

इति कथाकोशे यममुनेः कथा समाप्ता ।

२३–श्रीदृढसूर्यस्य कथा ।

नत्वा जिनं जगत्पूज्यं लोकालोकप्रकाशकम् ।
वक्ष्येहं दृढसूर्यस्य वृत्तं विश्वासदायकम् ॥ १ ॥

उज्जयिन्यां महाराजो नगर्यां धनपालवाक् ।
तद्राज्ञी धनवत्याख्या सैकदा निजलीलया ॥ २ ॥
वसन्ततौं वनं प्राप्ता क्रीडार्थं सुजनैर्वृता ।
तत्र तस्या गले हारं धनवत्या मनोहरम् ॥ ३ ॥
दृष्ट्वा वसन्तसेनाख्या गणिका धनलम्पटा ।
किं हारेण विनानेन जीवितं निष्फलं मम ॥ ४ ॥
सञ्चिन्त्येति गृहं गत्वा संस्थिता दुःखमानसा ।
तदा रात्रौ समागत्य चोरोसौ दृढसूर्यकः ॥ ५ ॥
तां जगाद तदासक्तः किं प्रिये दुःखतः स्थिता ।
तयोक्तं चेत्समानीय राज्ञीहारं ददासि मे ॥ ६ ॥
तदा जीवाम्यहं धीर नान्यथा त्वं च मे प्रियः ।
तच्छ्रुत्वा दृढसूर्योसौ तां समुद्धीर्य वल्लभाम् ॥ ७ ॥
राजगेहं प्रविश्योच्चैर्गृहीत्वा हारमुत्तमम् ।
निशायां निर्गतः शीघ्र कि न कुर्वन्ति लम्पटाः ॥ ८ ॥
हारोद्योतेन चोरोसौ यमपाशेन संधृतः ।
कष्टतः कोट्टपालेन शूले प्रोतो नृपाज्ञया ॥ ९ ॥
प्रभाते धनदत्ताख्यं संगच्छन्तं जिनालये ।
दृष्ट्वा कण्ठगतः प्राणस्तस्करः श्रेष्ठिनं जगौ ॥ १० ॥
त्वं दयालुर्महाधीर जिनपादाब्जषट्पद ।
महातृषातुरस्योच्चैस्तोयं देहि मम द्रुतम् ॥ ११ ॥
श्रेष्ठी तस्योपकारार्थं संजगादेति शुद्धधीः ।
वर्षैर्द्वादशभिर्दत्ता विद्या मे गुरुणा मुदा ॥ १२ ॥
जलार्थं गच्छतः सा मे विस्मृतिं याति साम्प्रतम् ।
तां धृत्वा यत्नतो विद्या-मागताय ददासि चेत् ॥ १३ ॥

तदा तोयं समानीय मया तुभ्यं प्रदीयते ।
एवं करोमि तेनोक्ते स श्रेष्ठी धर्मतत्ववित् ॥ १४ ॥
तस्मै पञ्चनमस्कारं स्वर्गमोक्षसुखप्रदम् ।
कथयित्वा गतो धीमान्सर्वेषां हितकारकः ॥ १५ ॥
स चोरो दृढसूर्यश्च श्रेष्ठिवाक्येषु निश्चलः ।
तं मंत्रं त्रिगजत्पूतं स्मरन्नुचारयन्नपि ॥ १६ ॥
मृत्वा सौधर्मकल्पेभू-देवो नानर्द्धिमण्डितः ।
अहो पञ्चनमस्कारैर्जायते किं न देहिनाम् ॥ १७ ॥
तदा केनापि सम्प्रोक्तं दुर्जनेन महीपतेः ।
भो देव धनदत्ताख्यः श्रेष्ठी तेन्यायकारकः ॥ १८ ॥
गत्वा चोरसमीपं च मंत्रं तेन समं व्यधात् ।
अतोस्य मन्दिरे तस्य धनं तिष्ठति निश्चितम् ॥ १९ ॥
धिग्दुर्जनं दुराचारं वृथा प्राणप्रहारिणम् ।
सर्वलोकहितानां च सतां यो वक्ति दुर्वचः ॥ २० ॥
तच्छ्रुत्वा धनपालाख्यः स भूपः कोपकम्पितः ।
बन्धनार्थं गृहे तस्य प्रेषयामास किङ्करान् ॥ २१ ॥
तस्मिन्नेव क्षणे सोपि देवो ज्ञात्वावधीक्षणात् ।
श्रेष्ठिनो गृहरक्षार्थं शीघ्रमागत्य भक्तितः ॥ २२ ॥
द्वारपालः स्वयं भूत्वा संस्थितो यष्टिमंडितः ।
तद्गृहं विशतः क्रूरान्वारयामास किंकरान् ॥ २३ ॥
कुर्वन्तश्च हठं तत्र भटास्ते दुष्टमानसाः ।
मायया मारिताः सर्वे तदानेन स्वशक्तितः ॥ २४ ॥
तत्समाकर्ण्य भूपेन प्रेषिताः बहवो भटाः ।
तेन तेपि तथा सर्वे मारिताः क्षणतस्तराम् ॥ २५ ॥

तदा रुष्टो महीनाथस्तत्रायातो बलान्वितः ।
एकेन तेन तच्छीघ्रं बलं सर्वे तथा हतम् ॥ २६ ॥
नष्टो राजा भयग्रस्तो देवेन भणितस्त्विति ।
श्रेष्ठिनः शरणं यासि तदा ते जीवितं ध्रुवम् ॥ २७ ॥
ततो राजा जिनेन्द्राणां मन्दिरे शर्ममन्दिरे ।
रक्ष रक्षेति संजल्पन् श्रेष्ठिनः शरणं गतः ॥ २८ ॥
श्रेष्ठी तदा विशिष्टात्मा संजगाद सुरं प्रति ।
कस्त्वं धीर किमर्थं च त्वयेदं निर्मितं वद ॥ २९ ॥
दृढसूर्यचरो देवः श्रेष्ठिनं तं प्रणम्य च ।
स्वरूपं प्रकटीकृत्य प्रोवाच मधुरं वचः ॥ ३० ॥
अहो श्रेष्ठिन् जिनाधीश-चरणार्चनकोविद ।
अहं चोरो महापापी दृढसूर्याभिधानकः ॥ ३१ ॥
त्वत्प्रसादेन भो स्वामिन्स्वर्गे सौधर्मसंज्ञके ।
देवो महर्द्धिको जातो ज्ञात्वा पूर्वभवं सुधीः ॥ ३२ ॥
महोपकारिणस्तेत्र रक्षार्थं च समागतः ।
मयेदं सेवकेनोच्चैः कार्यं सर्वं विनिर्मितम् ॥ ३३ ॥
एवं प्रोक्त्वा महाभक्त्या श्रेष्ठिनं गुणशालिनम् ।
रत्नादिभिः समभ्यर्च्य स देवः स्वर्गमाप्तवान् ॥ ३४ ॥
स श्रेष्ठी धनदत्ताख्यो जिनभक्तिपरायणः ।
पूजितश्च नरेन्द्राद्यैर्धार्मिकः कैर्न पूज्यते ॥ ३४ ॥

सर्वे ते धनपालभूपतिमुखा दृष्ट्वा प्रभावं शुभं
श्रीमत्पञ्चनमस्कृतेश्च नितरां सन्तुष्टसच्चेतसः ।
श्रीमज्जैनविशुद्धशासनरता जाताः सुभक्त्या श्रिये
भव्यैश्चापि परैर्जिनेन्द्रकथिते धर्मेत्र कार्या मतिः ॥२९॥

इति कथाकोशे दृढसूर्यचोरस्य कथा समाप्ता ।

२४–यमपालचाण्डालस्य कथा ।

प्रणम्य श्रीजिनाधीशं शर्मदं धर्महेतवे ।
मातङ्गः पूजितो देवैस्तच्चरित्रं सतां ब्रुवे ॥ १ ॥
बाणारस्या महापुर्यां राजाभूत्पाकशासनः ।
एकदासौ निजे देशे पीडां श्रुत्वातिदारुणाम् ॥ २ ॥
शान्त्यर्थं कार्त्तिके मासे शुक्ले नन्दीश्वरोत्सवे ।
अष्टम्यादिदिनान्यष्टौ जीवामारिप्रघोषणाम् ॥ ३ ॥
दापयामास भूभर्ता प्रजानां हितकारकः ।
तदा श्रेष्ठिसुतः पापी सप्तव्यसनतत्परः ॥ ४ ॥
धर्मनामा महोद्याने राजकीयं च मेढ्कम् ।
हत्वा प्रच्छन्नतः शीघ्रं भक्षयित्वा च तत्पलम् ॥ ५ ॥
तदस्थीनि च गर्तायां निक्षिप्य गतवान्कुधीः ।
व्यसनेन युतो जीवः सत्यं पापपरो भवेत् ॥ ६॥
मेढ्कादर्शने तत्र पाकशासनभूभुजा ।
सर्वत्र स्वपुरीमध्ये चराः शीघ्रं निरूपिताः ॥ ७ ॥
उद्यानपालको रात्रौ तदा गेहे स्वकामिनीम् ।
जगौ मेढ्कवृत्तान्तं श्रेष्ठिपुत्रेण निर्मितम् ॥ ८ ॥
तां वार्तां च समाकर्ण्य चरः प्राह महीपतिम् ।
स राजा यमदण्डाख्यं कोट्टपालं क्रुधावदत् ॥ ९ ॥
धर्मकः श्रेष्ठिनः पुत्रः पापी धर्मपराङ्मुखः ।
कोट्टपाल त्वया शूला-रोहणं कार्यतामिति ॥ १० ॥
कोट्टपालेन तं नीत्वा शूलाभ्यर्णे च धर्मकम् ।
मातंगो यमपालाख्यः समाहूतः स्वकिंकरैः ॥ ११ ॥

सर्वौषधिमुनेः पार्श्वे मातङ्गेनैकदा मुदा ।
धर्ममाकर्ण्य जैनेन्द्रं लोकद्वयसुखप्रदम् ॥ १२ ॥
चतुर्दशीदिने जीवं मारयामि न सर्वथा ।
एतद्व्रतं जगत्पूतं गृहीतं वर्तते पुरा ॥१३ ॥
यतश्चागच्छतो वीक्ष्य कोट्टपालस्य किंकरान् ।
मातंगो व्रतरक्षार्थं संजगाद स्वकामिनीम् ॥ १४ ॥
प्रिये ग्रामं गतश्चेति वद त्वं किंकरान्प्रति ।
इति प्रोक्त्वा द्रुतं गेह-कोणेसौ संस्थितः सुधीः ॥ १५ ॥
सा मातंगी तदा प्राह गतो ग्रामं मम प्रियः ।
तच्छ्रुत्वा सुभटैरुक्तं हा पापी दैववञ्चितः ॥ १६ ॥
अद्यैवाभरणोपेत-श्रेष्ठिपुत्रस्य मारणे ।
गतो ग्रामं तदाकर्ण्य मातंग्या स्वर्णलोभतः ॥ १७ ॥
गतो ग्राममिति व्यक्तं पूत्कुर्वत्या च मायया ।
हस्तस्य संज्ञया शीघ्रं मातंगो दर्शितस्तया ॥ १८ ॥
स्त्रीणां स्वभावतो माया किं पुनर्लोभकारणे ।
प्रज्वलन्नपि दुर्वह्निः किं वाते वाति दारुणे ॥ १९ ॥
गृहान्निःसारितः सोपि चाण्डालः सुवचो जगौ ।
प्राणत्यागेपि जीवोद्य मार्यते न मया ध्रुवम् ॥ २० ॥
राजाग्रेपि भटैर्नीतो मातंगो धीरमानसः ।
जीवघाते चतुर्दश्या नियमोस्ति मम प्रभो ॥ २१ ॥
मारयामि हि ततो नैव जीवमद्यैवमब्रवीत् ।
यस्य धर्मे सुविश्वासः क्वापि भीतिं न स याति सः ॥ २२ ॥
श्रेष्ठिपुत्रमहादोषात्ततो रुष्टेन भूभुजा ।
क्षिप्येते द्वावपि प्रोक्तं शिशुमारह्रदे द्रुतम् ॥ २३ ॥

ततस्तौ कोट्टपालेन यमदण्डेन तेन च ।
निक्षिप्तौ द्वावपि क्रूरैर्जन्तुभिः संकुले ह्रदे ॥ २४ ॥
धर्महीनः स धर्माख्यो भक्षितः शिशुमारकैः ।
मातंगो यमपालोसौ निश्चलो व्रतरक्षणे ॥ २५ ॥
तदा तद्व्रतमाहात्म्यात्महाधर्मानुरागतः ।
सिंहासने समारोप्य देवताभिः शुभैर्जलैः ॥ २६ ॥
अभिषिच्य प्रहर्षेण दिव्यवस्त्रादिभिः सुधीः ।
नाना रत्नसुवर्णाद्यैः पूजितः परमादरात् ॥ २७ ॥
तं प्रभावं समालोक्य राजाद्यैः परया मुदा ।
अभ्यर्चितः स मातंगो यमपालो गुणोज्वलः ॥ २८ ॥
इत्थं ज्ञात्वा महाभव्यैः स्वर्गमोक्षसुखप्रदे ।
धर्मे श्रीमज्जिनेन्द्रोक्ते मतिः कार्या सदा मुदा ॥ २९ ॥
चाण्डालोपि व्रतोपेतः पूजितो देवतादिभिः ।
तस्मादन्यैर्न विप्राद्यैर्जातिगर्वो विधीयते ॥ ३० ॥
मातंगो यमपालको गुणरतैर्देवादिभिः पूजितो
नाना वस्त्रसुवर्णरत्नविकसत्पुष्पोत्करैः सादरम् ।
यद्धर्मस्य हि लेशतोपि भुवने स श्रीजिनः संक्रिया—
द्भक्त्या देवनिकायपूजितपदद्वन्दो महाश्रेयसे ॥ ३१ ॥

इति कथाकोशे यमपालचाण्डालस्य कथा समाप्ता ।

समाप्तः प्रथमो भागः ।

सुशीला ।

जैनसमाजको इस उपन्यासका परिचय देनेकी जरूरत नहीं है। जैनी पाठकोंको सबसे पहले इसी उपन्यासने उपन्यास पढ़नेका चसका लगाया है। इसमें कथाका सन्दर्भ, कुतूहल और आकांक्षा बढ़ानेवाला है। भाषा शुद्ध सरल और रचना सुन्दर, रसमयी है। इसके पढ़नेमें आपको सभी रसोंका स्वाद मिलेगा। साथ ही जैनधर्मके गूढ़ तत्त्वोंका रहस्य, जिसका अन्यत्र मिलना दुर्लभ है—इसके अनेक अध्यायोंमें भरा हुआ है। वहाँ आपको ऐसा मालूम होगा कि हम जैनधर्मका कोई तात्त्विक ग्रन्थ पढ़ रहे है। इस कारण जो लोग उपान्यासोंसे नाक भोंह सिकोड़नेवाले है, वे भी इस ग्रन्थको पढ़कर सन्तुष्ट होंगे। सदाचार और सत्प्रवृत्तियोंकी शिक्षापर लेखकने बहुत ध्यान रक्खा है।

पहली आवृत्ति समाप्त हो जानेके कारण अब यह दूसरी बार छपाया गया है। मूल्य पहलेसे कम अर्थात् एक रुपया रक्खा गया है। इससे जो मुनाफा होगा वह जैनमित्र की सहायतामें लगेगा। शीघ्रही मंगाइए।

मिलनेका पताः—

मैनेजर " जैनमित्र "

हीराबाग, गिरगांव—**बम्बई.**

जैनमित्र कार्यालयकी पुस्तकें।

गृहस्थधर्म—ब्रह्मचारी शीतलप्रशादजी कृत सजिल्द 　 १=)

जैनधर्मका महत्त्व—अन्यधर्मी प्रसिद्ध २ विद्वानों द्वारा जैनधर्मपर दिये हुए व्याख्यानोंका संग्रह .... ॥)

ज्ञानदर्पण—आध्यात्मिक रस—पूर्ण कविता .... ।)

विद्वद्रत्नमाला—स्वामी समन्तभद्र, जिनसेन, गुणभद्र आदि आचार्योंके जीवनचरित्र .... ॥=)

अनुभवानन्द—अध्यात्मिक ग्रन्थ .... ॥)

जैनजगदुत्पत्ति ....)॥

जिनेन्द्रमतदर्पण—प्रथम भाग—जैनमतकी-प्राचीनताके प्रमाणोंका संग्रह .... -)

सुशीला उपन्यास—स्याद्वादवारिधि पं० गोपालदासजी बरैया लिखित—सादी जिल्द ... १)

कपड़ेकी पक्की जिल्द .... १।)

मिलनेका पताः—

मैनेजर " जैनमित्र "

हीराबाग, गिरगांव—**बम्बई.**

आराधना-कथाकोशः ।

[द्वितीयखण्डम् ।]

रचयिता—

ब्रह्मचारी श्रीमन्नेमिदत्तः ।

सम्पादक —

उदयलालः काशलीवालः ।

श्रीवीतरागाय नमः

आराधना-कथाकोशः।

(द्वितीयखण्डम्)

२५–मृगसेनधीवरस्य कथा।

नत्वा श्रीमज्जिनं भक्त्या केवलज्ञानलोचनम् ।
वक्ष्येऽहिंसाफलप्राप्त-धीवरस्य कथानकम् ॥ १ ॥
जयत्वत्रार्हती वाणी सर्वसन्देहहारिणी ।
प्राणिनां प्राणवत्प्रीत्या सेविता शर्मकारिणी ॥ २ ॥
सन्तु मे गुरवो नित्यं मानसे बोधसिन्धवः ।
घोरसंसारवाराशे-र्भव्यानां यत्र सेतवः ॥ ३ ॥
इत्यर्हद्भारतीसाधु-पादस्मरणमंगलम् ।
कृत्वा करोमि कर्मारि-शान्तये सत्कथामहम् ॥ ४ ॥
या हिंसा सर्वजन्तूनां नामतोपि भयप्रदा ।
सा त्रेधा त्यज्यते सद्भिर्हिंसा सांकल्पिकी सदा ॥ ५ ॥
पितृर्थं देवतार्थं वा शान्त्यर्थं वात्र निर्मिता ।
शर्मणे न भवेद्धिंसा किन्तु दुष्कर्मणे मता ॥ ६ ॥
शृण्वन्तु सुधियो भव्या भवभ्रमणनाशनम् ।
अहिंसाव्रतमाहात्म्यं श्रेयसे शर्मकारणम् ॥ ७ ॥

अवन्तिविषये रम्ये सम्पदासारसंभृते ।
शिरीषग्रामवास्तव्यो धीवरो मृगसेनवाक् ॥ ८ ॥
स्कन्धावलम्बितस्फार-पापकृद्गलजालकः ।
गच्छन्सिप्रां नदीं मत्स्यान्समानेतुं कदाचन ॥ ९ ॥
मार्गे भूपादिभिर्भव्यैः समर्चितपदद्वयम् ।
इन्द्रनागेन्द्रचन्द्रार्क-सेवनीयं मुनीश्वरम् ॥ १० ॥
श्रीमज्जिनेन्द्रचन्द्रोक्त-स्याद्वादनयकोविदम् ।
सर्वजन्तून्समुद्धर्तुं बद्धकक्षं भटोत्तमम् ॥ ११ ॥
धर्मोपदेशपीयूष-सन्तर्पितजगत्त्रयम् ।
स्ववाक्यकिरणैर्ध्वस्त-मिथ्यात्वतिमिरोत्करम् ॥ १२ ॥
दिगम्बरं महारत्न-त्रयालंकृतविग्रहम् ।
दृष्ट्वा यशोधरं नाम तारहारयशोभरम् ॥ १३ ॥
आसन्नसुकृतोत्संगो दूरं त्यक्त्वा गलादिकम् ।
चक्रे दीर्घतरं भक्त्या प्रणामं तत्पदाम्बुजे ॥ १४ ॥
अहो महामुने स्वामिन् कामद्विपमृगाधिप ।
केनचिद्व्रतदानेन जनोयमनुगृह्यताम् ॥ १५ ॥
इत्युक्त्वा संस्थितो प्यग्रे विनयानम्रमस्तकः ।
तदा यशोधरः स्वामी स्वचित्ते संविचारयन् ॥ १६ ॥
कथं हो हिंसकस्यास्य मनोवृत्तिर्व्रतेऽभवत् ।
युक्तं स्यात्प्राणिनां भावि-शुभाशुभनिभं मनः ॥ १७ ॥
प्रयुक्तावधिबोधेन ज्ञात्वा तुच्छायुषं च तम् ।
संजगाद दयायुक्तो भो सुधीरद्य वासरे ॥ १८ ॥

आदौ जाले समायातो मीनः सन्त्यज्यते त्वया ।
जीवन्नेव महाभाग पालनीयं हि मद्वचः ॥ १९ ॥
यावत्स्वकीयहस्तेन मारितप्राणिजंगलम् ।
नैव प्राप्नोषि तावत्ते तन्निवृत्तिश्च सर्वथा ॥ २० ॥
तथा पञ्चनमस्कार-मंत्रोयं त्रिजगद्धितः ।
सुस्थितेन त्वया ध्येयो दुःस्थितेनाथवा सुधीः ॥ २१ ॥
इति श्रुत्वा मुनेर्वाक्यं स्वर्गमोक्षसुखप्रदम् ।
मत्स्यबन्धोपि सन्तुष्टः सर्वं स्वीकृतवान्भृशम् ॥ २२ ॥
ये कुर्वन्ति गुरोर्वाक्यं प्रमाणं भक्तिनिर्भराः ।
तेषां स्वर्गापवर्गोत्थं सौख्यमायाति लीलया ॥ २३ ॥
तं नत्वा मृगसेनोसौ गत्वा सिप्रां नदीं द्रुतम् ।
मुक्त्वा जालं समासाद्य महामत्स्यं व्रतस्मृतेः ॥ २४ ॥
अहो मे सर्वदा पाप-कर्मणे मत्स्यघातिने ।
दैवयोगाद्व्रतं दत्तं गुरुणा शर्मकारिणा ॥ २५ ॥
तस्मादयं न हन्तव्यो मयेति व्रतशुद्धधीः ।
सारिणस्तस्य चिह्नाय कर्णे चीरीं स्ववाससः ॥ २६ ॥
बध्वा नद्यां तमत्याक्षीन्निर्विघ्नं हि सतां व्रतम् ।
भवेदामृत्युपर्यन्तं सारसम्पद्विधायकम् ॥ २७ ॥
पुनस्तत्तीरणीतीरे दूरं गत्वा स्वकर्मकृत् ।
लब्ध्वा तमेव पाठीनं सोमुचद्व्रावसिद्धतिः ॥ २८ ॥
एवं तस्मिन्महामत्स्ये मोहजालोपमे तते ।
जाले लग्ने विमुक्ते च पञ्चशो व्रतरक्षणात् ॥ २९ ॥

तदाऽस्तं भुवनोद्भासी भास्करो गतवान्भृशम् ।
निर्गुणाः सगुणाश्चापि के के नास्तं गताः क्षितौ ॥ ३० ॥
ततोसौ मृगसेनस्तु स्वव्रते प्रीतमानसः ।
संस्मरन्स्वगुरोर्वाक्यं चचाल स्वगृहं प्रति ॥ ३१ ॥
आगच्छन्तं तमालोक्य रिक्तं ज्ञात्वा च कारणम् ।
घंटाख्या यमघंटा वा कुपिता तस्य कामिनी ॥ ३२ ॥
रे रे मूढ कथं रिक्तः समायातोसि मद्गृहे ।
भक्ष्यते किं दृषच्चेति जल्पंती निष्ठुरं वचः ॥ ३३ ॥
कुटीरान्तः प्रविश्याशु दत्वा द्वारं दृढं स्थिता ।
सत्यं सामान्यनारीणां लाभे लाभे पतिः प्रियः ॥ ३४ ॥
तदासौ धीवरो बाह्ये स्मरन्पंच नमस्कृतीः ।
उच्छीर्षके निधायोच्चै-र्जीर्णकाष्ठं च सुप्तवान् ॥ ३५ ॥
रात्रौ तस्माद्विनिर्गत्य दुर्जनेनैव पापिना ।
दष्टः सर्पेण निर्मुक्तः प्राणैर्दशभिरुत्सुकैः ॥ ३६ ॥
प्रातःकाले तमःकाले दृष्ट्वा तं घण्टया मृतः ।
पश्चात्तापं तदा कृत्वा रुदित्वा च पुनः पुनः ॥ ३७ ॥
यदेवास्य व्रतं पूतं तदेवं स्यान्ममापि च ।
अयं जन्मान्तरे भर्त्ता भूयान्मे मानसप्रियः ॥ ३८ ॥
कृत्वा निदानकं चेति सार्द्धं तेनैव साहसात् ।
संचक्रे चतुरैर्निंद्यं तया वह्निप्रवेशनम् ॥ ३९ ॥
अथास्त्येव विशालायां पुर्यां विश्वंभरः प्रभुः ।
राज्ञ्या विश्वगुणाख्याया-श्चित्तरत्नमलिम्लुचः ॥ ४० ॥

श्रेष्ठी श्रीगुणपालाख्यः परमेष्ठिप्रसन्नधीः ।
धनश्रीः श्रेष्ठिनी तस्याः सुबन्धुस्तनुजा शुभा ॥ ४१ ॥
तस्या धनश्रियश्चैव गर्भे पूर्वस्वपुण्यतः ।
मृगसेनः समागत्य संस्थितो गुणमाण्डितः ॥ ४२ ॥
तदा विश्वंभरो राजा विटसंगप्रणष्टधीः ।
नर्मभर्माख्यसचिव-सूनवे नर्मधर्मणे ॥ ४३ ॥
श्रेष्ठिनं गुणपालं तं सुतां याचितवान् भृशम् ।
सुबन्धुं बन्धुराकारां कुलोद्योतनदीपिकाम् ॥ ४४ ॥
अहो नष्टधिया राज्या याचितोहं भयाकुलः ॥
चेद्ददामि सुतां निंद्य-कर्मणे नर्मधर्मणे ॥ ४५ ॥
कुलक्रमक्षयो लोकेऽ-पवादस्तु भवेन्मम ।
नो चेत्सर्वस्वनाशः स्यात्प्राणापायोपि, मानसे ॥ ४६ ॥
इत्याकलय्य स श्रेष्ठी श्रीदत्तस्य वणिक्पतेः ।
स्वमित्रस्य गृहे धृत्वा गर्भिणीं निजकामिनीम् ॥ ४७ ॥
स्वापतेयं सुतां चापि गृहीत्वा गूढवृत्तितः ।
कोशाम्बीविषयं प्राप्तो देशत्यागो हि दुर्जनात् ॥ ४८ ॥
अत्रान्तरे मुनी पूतौ श्रीदत्तावाससन्निधौ ।
वासिनोपासकेनोच्चैः समायातौ स्वमन्दिरे ॥ ४९ ॥
शिवादिगुप्तमुन्यादि-गुप्तौ सद्वृत्तमण्डितौ ।
यथाविधि प्रतीक्ष्याशु ताभ्यां दत्वा शुभश्रिये ॥ ५० ॥
अन्नदानं जगत्सारं नाना सम्पद्विधायकम् ।
दुःखदारिद्रयनिर्नाशि स्वीचक्रे पुण्यमद्भुतम् ॥ ५१ ॥

ततस्तत्प्राङ्गणे वीक्ष्य मुनिगुप्तो धनश्रियम् ।
पतिस्वपुत्रिकासार-कुटुम्बविरहाश्रितम् ॥ ९२ ॥
परावासनिवासोत्थ-महादुःखेन दुःखिताम् ।
अलंकारविनिर्मुक्तां दुष्कृतिं कुकवेरिव ॥ ९३ ॥
गर्भभारभराक्रान्तां दुर्व्यवस्थां समाश्रिताम् ।
ज्येष्ठं मुनीश्वरं प्राह पश्यतां भो महामुने: ॥ ९४ ॥
कोपि कष्टप्रदः पुत्रः कुक्षिमस्याः समाश्रितः ।
येनासौ दृश्यते नारी वराकी च मलीमसा ॥ ९५ ॥
तच्छ्रुत्वा शिवगुप्तोसौ मुनीन्द्रो ज्ञानलोचनः ।
श्रीमज्जिनेन्द्रचन्द्रोक्त-सप्ततत्वविशारदः ॥ ९६ ॥
संजगौ मुनिगुप्त त्वं मैवं ब्रूहि वृथा वचः ।
यद्यपि श्रेष्ठिनीदृक्च दुःखिता दृश्यते सती ॥ ९७ ॥
गतेषु कतिचिद्दुःख-वासरेषु शुभोदयात् ।
अस्याः पुत्रः पवित्रात्मा जिनधर्मधुरंधरः ॥ ९८ ॥
राजश्रेष्ठिपदाधीशो विश्वंभरमहीपतेः ।
कन्यापतिर्वणिग्वृन्द-सेवितः संभविष्यति ॥ ९९ ॥
तन्निशम्य निजावास-कोष्ठस्थो दुष्टमानसः ।
श्रीदत्तो हन्तुकामोऽभू-त्तदातद्धाविबालके ॥ ६० ॥
तिष्ठति स्म गृहे चैव स पापी बकवत्तराम् ।
कारणेन विना वैरी दुर्जनः सुजनो भवेत् ॥ ६१ ॥
धनश्रीः श्रेष्ठिनी प्राप्य प्रसूतिदिवसं सती ।
सासूत तनयं साक्षात्पुण्यपुंजमिवापरम् ॥ ६२ ॥

प्रसूतिदुःखतो मूर्च्छां संगतां तां धनश्रियम् ।
ज्ञात्वा श्रीदत्तकः पापी स्वचित्ते कृतचिन्तनः ॥ ६३ ॥
वह्निवद्बालकोप्येष स्वाश्रयक्षयकारकः ।
इत्यालोच्य मृतो जातो बालको जरतीजनैः ॥ ६४ ॥
कृत्वोद्घोषं समाकार्य चाण्डालं चण्डकर्मकृत् ।
बालं तस्यार्पयामास वधार्थी स वणिक्कुधीः॥ ६५ ॥
शत्रुजोपि न हन्तव्यो बालकः किं पुनर्वृथा ।
हा कष्टं किं न कुर्वन्ति दुर्जनाः फणिनो यथा ॥ ६६ ॥
मातंगोपि तमादाय गत्वैकान्ते लसत्प्रभम् ।
तदाकारं समालोक्य शर्मकोटिविधायकम् ॥ ६७ ॥
संजातकरुणासार-सुधासंपूरिताशयः ।
तत्रार्भकं सुखं धृत्वा स्वयं च गतवान् गृहम् ॥ ६८ ॥
श्रीदत्तकस्य तस्यैव भगिन्याः पतिरुत्तमः ।
इन्द्रदत्तो वणिग्वर्यो विक्रयाय विनिर्गतः ॥ ६९ ॥
गोष्टीने च समायातः श्रुत्वा गोपालजल्पनैः ।
चन्द्रकान्तोत्पलोत्पीठे गोवत्साद्यैश्च सेविते ॥ ७० ॥
सुखासीनं समालोक्य बालं वा बालभास्करम् ।
नीत्वा पुत्रविहीनत्वात्पुत्रबुद्ध्या प्रहर्षतः ॥ ७१ ॥
हे राधे गूढगर्भोत्यं पुत्रं ते त्वं गृहाण वै ।
इत्युक्त्वा निजभार्यायै राधायै परमादरात् ॥ ७२ ॥
दत्वा स्तनंधयोत्पत्तेः संचक्रेसौ महोत्सवम् ।
प्राणिनां पूर्वपुण्याना-मापदा सम्पदायते ॥ ७३ ॥

श्रीदत्तेन तमाकर्ण्य वृत्तान्तं दुष्टचेतसा ।
तत्रागत्येन्द्रदत्तस्य गेहे भो स्नेहवत्सल ॥ ७४ ॥
भागिनेयोयमत्यन्त-भाग्यभाग् मन्दिरे मम ।
वर्धतामिति कूटोक्त्या नीतोसौ भगिनीयुतः ॥ ७५ ॥
अहो दुष्टाशयः प्राणी चित्तेऽन्यद्वचनेऽन्यथा ।
कायेनान्यत्करोत्येव परेषां वंचनं महत् ॥ ७६ ॥
पूर्ववद्धन्तुकामोसौ तं शिशुं शुभलक्षणम् ।
अन्तावसायिने शीघ्रं ददौ निर्दयमानसः ॥ ७७ ॥
गृहीत्वा श्वपचः सोपि बालकं भुवनोत्तमम् ।
तद्रूपसम्पदां वीक्ष्य सञ्जातः सदयो भृशम् ॥ ७८ ॥
क्वचित्स गह्वरे देशे प्रोल्लसद्द्रुमसंकुले ।
सत्तोयतीरणीतीरे तं निधाय गतो गृहम् ॥ ७९ ॥
गुणपालसुतः सोपि पुरोपार्जितपुण्यतः ।
तत्रायाताभिरानन्द-ध्वनिभिर्धेनुभिस्तराम् ॥ ८० ॥
तद्वीक्षणात्क्षरत्क्षीर-स्तनीभिरुपसेवितः ।
धात्रिकाभिरिव प्रीत्या स्थितो वा जननीकरे ॥ ८१ ॥
गोपालकैस्तथाभूतं दृष्ट्वा तं लीलया स्थितम् ।
सन्ध्याकाले समायातैः प्रोल्लसन्मुखपंकजम् ॥ ८२ ॥
सर्वगोष्टप्रधानाय गोविन्दाय प्रवेगतः ।
महाविस्मयतां प्राप्तैः प्रोक्तं तद्बालचेष्टितम् ॥ ८३ ॥
गोपालाधिपतिः सोपि गोविन्दस्तं सुतेच्छया ।
समानीय सुनन्दायाः स्वकान्तायाः समर्प्य च ॥ ८४ ॥

धनकीर्त्तिरिति व्यक्तं कृत्वा नामास्य संभ्रमात् ।
पालयामास यत्नेन प्रोल्लसत्प्रीतिमण्डितः ॥ ८५ ॥
सोपि गोपाङ्गनानेत्र-नीलोत्पलसुधाकरः ।
सर्वलक्षणसम्पूर्णो जनयन्प्रीतिमद्भुताम् ॥ ८६ ॥
रूपेण कामदेवो वा कान्त्या वा मृगलाञ्छनः ।
तेजसा नूतनार्को वा वृद्धिं प्राप गुणैः सह ॥ ८७ ॥
आज्यार्थमेकदा तेन तत्रायातेन दुर्धिया ।
श्रीदत्तेन तमालोक्य ज्ञात्वा तद्वृत्तकं महत् ॥ ८८ ॥
प्रोक्तं गोविन्द मद्गेहे कार्यमस्त्येव सत्वरम् ।
इम लेखं करे दत्वा प्रेषणीयोयमङ्गजः ॥ ८९ ॥
गोविन्दः प्राह शुद्धात्मा भो श्रेष्ठिन्नेवमस्तु च ।
अहो दुष्टस्य दुष्टत्वं लक्ष्यते केन वेगतः ॥ ९० ॥
पापिना लिखितस्तेन लेखं पुत्रमहाबल ।
अस्मत्कुलद्रुमध्वंसी-ज्वलत्कालानलोप्ययम् ॥ ९१ ॥
हन्तव्यो ब्रह्मपुत्रेण मद्वाक्यैर्मुसलेन वा ।
तं गृहीत्वा कुमारोपि धनकीर्त्तिर्गुणोज्वलः ॥ ९२ ॥
कण्ठालंकारसान्निध्ये बध्वा लेखं भटाग्रणीः ।
तातश्रेष्ठिनिर्देशेन निःशंकश्चलितो मुदा ॥ ९३ ॥
उज्जयिन्यां प्रवेशेसौ प्राप्तश्चाम्रमहावनम् ।
मार्गश्रमविनाशाय सुप्तो वृक्षतले सुखम् ॥ ९४ ॥
अत्रान्तरे समायाता तद्वने सपरिच्छदा ।
नाना प्रसूनसन्दोह-चुण्टने प्रीतिमानसा ॥ ९५ ॥

भूरिविद्याविनोदाढ्याऽनंगसेनाभिधानिका ।
पण्याङ्गनाम्रवृक्षस्य मूले सुप्तं निरीक्ष्य तम् ॥ ९६ ॥
पूर्वजन्मोपकारेण जातस्नेहा महादरात् ।
शनैर्लेखं समादाय ज्ञात्वा तच्छ्रेष्ठिचेष्टितम् ॥ ९७ ॥
तान्यक्षराण्युपायेन परामृश्य विचक्षणा ।
तस्मिन्नेव तदा पत्रे लोचनाञ्जनभाजनात् ॥ ९८ ॥
गृहीतकज्जलेनोच्चै-र्वल्लीनिर्यासशालिना ।
संलिखित्वेति मद्भार्यो मन्यते मां यदि प्रियम् ॥ ९९ ॥
पुत्रो महाबलश्चापि चेन्मां जानाति तातकम् ।
तदा सर्वप्रकारेण कन्यास्मै धनकीर्त्तये ॥ १०० ॥
शाखासप्तकपर्यन्तं शोधिताय महात्मने ।
ममापेक्षां विना शीघ्रं दानमानादिपूर्वकम् ॥ १०१ ॥
दातव्या श्रीमतिश्चेति पूर्ववत्पत्रमुत्तमम् ।
कण्ठे तस्य निबध्योच्चै-र्जीवितं वा हि सागमत् ॥ १०२ ॥
ततः श्रीधनकीर्त्तिस्तु चिरेणोत्थाय शुद्धधीः ।
श्रीदत्तस्य गृहं गत्वा दत्वा लेखं तयोर्द्वयोः ॥ १०३ ॥
मातृपुत्रकयोः शीघ्रं श्रीमत्या वल्लभोभवत् ।
संभवेत्कृतपुण्यानां महापायेपि सत्सुखम् ॥ १०४ ॥
तां वार्ता च समाकर्ण्य श्रीदत्तो व्यग्रमानसः ।
प्रत्यागत्य पुरीबाह्ये चण्डिकामन्दिरे पुनः ॥ १०५ ॥
संकेतपुरुषं धृत्वा तद्वधाय दुराशयः ।
समागत्य गृहं प्राह प्रच्छन्नं तनुजापतिम् ॥ १०६ ॥

धनकीर्त्ते शृणु व्यक्तं मदीयेप्यस्ति वंशके ।
आचारोयं सुधी रात्रि-मुखे कात्यायनीगृहे ॥ १०७ ॥
गृहीत्वा माषनिर्माणं कीरकाकबलिं द्रुतम् ।
संछाद्य रक्तवस्त्रेण पुत्रीकान्तेन सादरम् ॥ १०८ ॥
हस्तस्थकंकणेनोच्चै-र्गन्तव्यं सर्वशान्तये ।
तच्छ्रुत्वा धनकीर्त्तिस्तु यथादेशस्तथास्तु वै ॥ १०९ ॥
गदित्वेति समादाय तं बलिं भद्रमानसः ।
निर्गतस्तु पुरीबाह्ये दृष्टोसौ शालकेन च ॥ ११० ॥
महाबलेन पृष्टस्तु हंहो त्वं यासि कुत्रचित् ।
एकाकी तमसि व्याप्ते तन्निशम्य जगाद सः ॥ १११ ॥
महाबल बलिं दातुं दुर्गायै गम्यते मया ।
मातुलस्य निदेशेन तदाकर्ण्य महाबलः ॥ ११२ ॥
प्राहैवं तत्र गच्छामि याहि त्वं निजमन्दिरम् ।
तातो रोशिष्यति व्यक्तं सर्वं जानेऽहकं तदा ॥ ११३ ॥
इत्युच्चैस्तन्निषिद्धोसौ धनकीर्त्तिः स्वपुण्यतः ।
निर्विघ्नं गृहमायातः स च प्राप्तो यमालयम् ॥ ११४ ॥
पूर्वपुण्येन जन्तूनां कालवह्निर्जलायते ।
स्थलायते समुद्रोपि शत्रुर्मित्रायते भृशम् ॥ ११५ ॥
हालाहलं सुधाभावं यात्यापत्सम्पदा भवेत् ।
विघ्ना नश्यन्ति निःशेषा महाभीत्येव सत्वरम् ॥ ११६ ॥
तस्मात्पुण्यं बुधैः कार्यं स्वर्मोक्षसुखबीजकम् ।
श्रीमज्जिनेन्द्रचन्द्रोक्तं सर्वदुःखौघनाशकम् ॥ ११७ ॥

तत्सुपुण्यं जिनेन्द्रार्चा महाभक्तिभरान्विता ।
पात्रदानं व्रतं शीलं सोपवासं क्रियादिकम् ॥ ११८ ॥
पुत्रशोकाकुलः श्रेष्ठी श्रीदत्तो धर्मवर्जितः ।
एकान्ते कामिनीं प्राह विशाखां प्रति हे प्रिये ॥ ११९ ॥
अस्मद्वंशतरुच्छेदी हन्यतेऽयं कथं खलः ।
नाना पापपरित्यक्तो व्यक्तो वैरी गृहे स्थितः ॥ १२० ॥
श्रेष्ठिन्यालपितं श्रेष्ठिन्वृद्धत्वान्नैव वेत्सि च ।
तस्मात्तूष्णी समास्व त्वं कुर्वेहं वाञ्छितं तव ॥ १२१ ॥
इत्याभाष्य परेद्युश्च विषं संचार्य मोदकान् ।
कृत्वा तां तनुजां प्राह विशाखा पापमण्डिता ॥ १२२ ॥
श्रीमते भो सुते ये च चन्द्रकान्तिवदुज्ज्वलाः ।
ते मोदकाः स्वकान्ताय श्यामवर्णास्तु ये ध्रुवम् ॥ १२३ ॥
दीयन्ते त्वया मुग्धे स्वताताय गुणोज्वले ।
इत्युक्त्वा श्रेष्ठिनी शीघ्रं गता स्नानाय सा नदीम् ॥ १२४ ॥
सा पुत्री श्रीमतिश्चेति यच्छुभं भुवनत्रये ।
तद्द्वयं स्वपितुर्भक्त्या किं पती रागकारणम् ॥ १२५ ॥
अज्ञातमातृदुश्चेष्टा संविचार्येति मोदकान् ।
विपर्ययेण दत्ते स्म विचित्रा कर्मणां गतिः ॥ १२६ ॥
तद्भक्षणात्तदा श्रेष्ठी श्रीदत्तो मृत्युमाप्तवान् ।
दुष्कर्मकारिणां लोके कुतः श्रेयो भवत्यहो ॥ १२७ ॥
सा विशाखा समागत्य नाथशून्यं निजालयम् ।
दृष्ट्वा शोकं विधायोच्चै रुदित्वा च सुतां जगौ ॥ १२८ ॥

हे सुते तव तातेन मयापि क्रूरचेतसा ।
स्वान्वयक्षयकारीति सर्वं दुश्चेष्टितं वृथा ॥ १२९ ॥
पूर्णे बाहुप्रलापेन स्वकान्तेन समं सुखम् ।
तिष्ठ त्वमेव गेहेस्मिञ्छक्रेणेव शची यथा ॥ १३० ॥
इत्याशीर्वचनं दत्वा तं समासाद्य मोदकम् ।
प्राप्ता यमालयं सापि दुर्धियामीदृशी गतिः ॥ १३१ ॥
परेषां येत्र कुर्वन्ति विघ्नं दुष्टाशयाः खलाः ।
ते स्वयं विघ्नमासाद्य पश्चाद्यान्त्येव दुर्गतिम् ॥ १३२ ॥
ततः श्रीधनकीर्त्तिस्तु पूर्वपुण्यप्रभावतः ।
उल्लंघितमहाघोर-पंचापत्सुखतः स्थितः ॥ १३३ ॥
एकदा शुभयोगेन विश्वंभरमहीभुजा ।
महोत्सवशतैस्तस्मै दत्वा कन्यां निजां शुभाम् ॥ १३४ ॥
नाना रत्नादिमन्दोहैः पूजितो धनकीर्त्तिवाक् ।
महाश्रेष्ठिपदे शीघ्रं स्थापितो जयघोषणैः ॥ १३५ ॥
अहो भव्या न कर्त्तव्य-माश्चर्यं भुवनत्रये ।
जैनधर्मप्रसादेन किं शुभं यन्न जायते ॥ १३६ ॥
तत्प्रतापं समाकर्ण्य स श्रेष्ठी गुणपालवाक् ।
कोशाम्बीदेशतः शीघ्र-मुज्जयिन्यां समागतः ॥ १३७ ॥
एवं श्रीधनकीर्त्तिस्तु प्राप्ततातादिसंगमः ।
सुस्थितो निजपुण्येन सम्पदासारमण्डितः ॥ १३८ ॥
भुञ्जानो विविधान्भोगान्सुधीः पञ्चेन्द्रियोचितान् ।
धर्मशर्माकरे जैने सावधानो विचक्षणः ॥ १३९ ॥

श्रीजिनेन्द्रपदाम्भोजं नित्यं भक्त्या समर्चयन् ।
ज्ञानविज्ञानसम्पन्नः पात्रदानेषु तत्परः ॥ १४० ॥
नित्यं परोपकारादि-सत्कर्मस्थितिमाचरत् ।
बहुालापेन किं कार्यं यत्फलं सुकृतोदयात् ॥ १४१ ॥
तत्तत्सर्वं समासाद्य पूर्वपुण्यप्रभावतः ।
अन्वभूत्सुचिरं सौख्यं जगच्चेतोनुरञ्जयन् ॥ १४२ ॥
अथैकदा महाश्रेष्ठी गुणपालो गुणोज्ज्वलः ।
सुधीः श्रीधनकीर्त्यादि-पुत्रमित्रादिसंयुतः ॥ १४३ ॥
दर्शनार्थं समायाता-नंगसेनायुतोपि च ।
श्रीयशोध्वजनामानं मुनीन्द्रं त्रिजगद्धितम् ॥ १४४ ॥
अभिवन्द्य महाभक्त्या प्रीत्याप्रच्छच्च तं गुरुम् ।
स्वामिन्ननेन पुत्रेण पुण्यं श्रीधनकीर्त्तिना ॥ १४५ ॥
किं पुरोपार्जितं येन बालत्वेपि महानसौ ।
नाना दुष्टोपसर्गौघं हेलया जयति स्म च ॥ १४६ ॥
कीर्त्तिमान्सारलक्ष्मीशः संजातः सारसौख्यभाक् ।
महाविज्ञानसम्पन्नो दाता भोक्ता दयापरः ॥ १४७ ॥
तत्सर्वं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ।
तदा यशोध्वजः स्वामी चतुर्ज्ञानविराजितः ॥ १४८ ॥
स जगौ करुणासिन्धुः श्रूयतां भो वणिक्पते ।
अवन्तिविषये पूर्वं शिरीषग्रामवासकः ॥ १४९ ॥
मृगादिसेनको मत्स्य-बन्धकः किल त्वेकदा ।
यशोधरमुनेर्वाक्या-देकस्मिन्वासरे मुदा ॥ १५० ॥

अहिंसाव्रतमाराध्य जातोसौ धनकीर्त्तिभाक् ।
महाभव्यो जगत्सार-सम्पदाप्रमदापतिः ॥ १९१ ॥
या घण्टा कामिनी पूर्वं निदानवशवर्त्तिनी ।
सा श्रीमती प्रिया जाता सती सद्गुणमण्डिता ॥ १९२ ॥
पञ्चकृत्वो विमुक्तस्तु यो मत्स्यः स क्रमेण वै ।
अभूदनंगसेनेयं परोपकृतितत्परा ॥ १९३ ॥
एतत्सर्वमहिंसायाः फलं श्रेष्ठिन् विजृंभते ।
जैनधर्मेण जन्तूनां किं न स्याद्भुवनत्रये ॥ १९४ ॥
इत्याकर्ण्य मुनेर्वाक्यं स्वर्गमोक्षसुखप्रदम् ।
श्रीमज्जिनेन्द्रसद्धर्मे बभुवुस्ते तरां रताः ॥ १९५ ॥
श्रुत्वा भवान्तरं श्रीमान् धनकीर्त्तिः प्रसन्नधीः ।
श्रीमती कामिनी सापि गणिकानंगसेनिका ॥ १९६ ॥
त्रयो जातिस्मृतिं प्राप्य त्रिधा वैराग्यमाश्रिताः ।
धर्मं धर्मफलं ज्ञात्वा संजातास्तुष्टमानसाः ॥ १९७ ॥
तस्यैव सद्गुरोः पाद-मूले सेवापरायणः ।
श्रेष्ठी श्रीधनकीर्त्तिस्तु कीर्त्त्या व्याप्तजगत्त्रयः ॥ १९८ ॥
केशपाशं समुन्मूल्य मोहपाशमिवापरम् ।
दीक्षामादाय जैनेन्द्रीं जगत्तापनिवारिणीम् ॥ १९९ ॥
निर्मलं सुतपस्तप्त्वा भव्यान्सम्बोध्य युक्तितः ।
श्रीमज्जिनेन्द्रचन्द्रोक्त-धर्मे कृत्वा प्रभावनाम् ॥ २०० ॥
रत्नत्रयं समाराध्य संन्यासविधिना सुधीः ।
सर्वार्थसिद्धिसत्सौख्यं प्राप्तवान्मविकेवली ॥ २०१ ॥

अन्यग्रन्थे—

पञ्चकृत्वः किलैकस्य मत्स्यस्याहिंसनात्पुरा ।
अभूत्पञ्चापदोतीत्य धनकीर्तिः पतिः श्रियः ॥

श्रीमतिस्तु तथानंग-सेनासौ भोगानिस्पृहे ।
यथायोग्यं समादाय दीक्षां दुःखौघनाशिनीम् ॥ १६२ ॥
स्वस्वभावानुसारेण स्वर्गलोकं समाश्रिते ।
आराध्य शासनं जैनं प्रापुः के के न सत्सुखम् ॥ १६३ ॥
इत्थं श्रीजिनसूत्रतो विरचिताहिंसाकथा शर्मणे
संक्षेपेण मयाल्पबुद्धिवशिना धर्मानुरागेण च ।
नाना सारसुखप्रमोदजननी विघ्नौघनिर्नाशिनी
भव्यानां भवशान्तये भवतु वै संभाविता मानसे ॥१६४॥
जातः श्रीमति मूलसंघतिलके श्रीकुन्दकुन्दान्वये
श्रीभट्टारकमल्लिभूषणगुरुः सद्बोधिसिन्धुर्महान् ।
तच्छिष्यः मरमार्थपंडितनुतः श्रीसिंहनन्दीमुनि-
र्भव्यानां भवतारकोतिचतुरः सूरिश्चिरं नन्दतु ॥ १६५ ॥

इति कथाकोशेऽहिंसाव्रते मृगसेनधीवरस्य कथा समाप्ता ।

२६–वसुनृपस्य कथा ।

नत्वा जिनं जगद्बन्धुं सुरासुरसमर्चितम् ।
वक्ष्ये सत्यवचोदोषे चरित्रं वसुभूपतेः ॥ १ ॥

नगर्यां स्वस्तिकावत्यां राजा विश्वावसुः सुधीः ।
तद्राज्ञी श्रीमती तस्यां वसुनामा सुतोभवत् ॥ २ ॥
तत्र क्षीरकदम्बाख्यः क्षीरवन्निर्मलाशयः ।
उपाध्यायो महाधीमान् विप्रवंशशिरोमणिः ॥ ३ ॥
श्रीजिनेन्द्रपदाम्भोज-महापूजाविधायकः ।
जैनहोमक्रियामंत्रै-र्भव्यानां शान्तिदायकः ॥ ४ ॥
तद्भार्या स्वस्तिमत्याख्या तयोः पुत्रश्च पर्वतः ।
पापी दुष्कर्मकर्त्ताभू-द्विचित्रा संसृतेः स्थितिः ॥ ५ ॥
एको वैदेशिको विप्रो नारदो निर्मदो महान् ।
जिनेन्द्रपादपद्मेषु चञ्चरीकोतिनिश्चलः ॥ ६ ॥
स वसुः पर्वतः सोपि नारदश्च गुणोज्वलः ।
त्रयः क्षीरकदम्बस्य पार्श्वे शास्त्रं पठन्ति ते ॥ ७ ॥
वसुनारदनामानौ सञ्जातौ शास्त्रकोविदौ ।
पर्वतस्य स्वपापेन शास्त्रं नायाति निर्मलम् ॥ ८ ॥
एकदा स्वपतिं प्राह कोपात्स्वस्तिमती प्रिया ।
स्वपुत्रं भो त्वकं नैव व्यक्तं पाठयसीति च ॥ ९ ॥
प्रोक्तं क्षीरकदम्बेन पुत्रस्ते मूढमानसः ।
किञ्चिन्न वेत्ति पापात्मा मया किं क्रियते प्रिये ॥ १० ॥
विश्वासार्थं ततस्तेन त्रयश्छात्राः स्वबुद्धितः ।
प्रोक्ता भो पुत्रका यूयं शीघ्रमेतैः कपर्दकैः ॥ ११ ॥
भक्षयित्वापणं गत्वा चणकांश्च कपर्दकान् ।
समादाय स्वचातुर्यात्समागच्छथ मन्दिरम् ॥ १२ ॥

ततस्ते तान्समादाय निर्गता गुरुवाक्यतः ।
गत्वापणं स निर्बुद्धिः पर्वतस्तैः कपर्दकैः ॥ १३ ॥
चणाकान्भक्षयित्वा च रिक्तः स्वगृहमागतः ।
अहो पुण्यं विना जन्तोः क्व बुद्धिः प्रीतिदायिनी ॥ १४ ॥
तौ द्वौ विचक्षणौ गत्वा बहुस्थानेषु तान्मुदा ।
अर्थव्याजेन भुक्त्वोच्चै-रागतौ सकपर्दकौ ॥ १५ ॥
तथा पिष्टमयांश्छागान्दत्वा तेन त्रयोपि ते ।
यत्र कोपि न भो पुत्राः पश्यत्येषां च तत्र वै ॥ १६ ॥
कर्णच्छेदो विधातव्यः प्रोक्त्वेति प्रेषिताः पुनः ।
ततस्ते गुरुवाक्येन तान्गृहीत्वा विनिर्ययुः ॥ १७ ॥
पर्वतस्तु क्वचिद्देशे तत्कृत्वा गृहमागतः ।
गत्वा सर्वत्र तौ द्वौ च वनादौ निजमानसे ॥ १८ ॥
अहो सर्वे प्रपश्यन्ति चन्द्रार्कगृहतारकाः ।
व्यन्तराश्चामरा धीराः पक्षिणः पशवस्तथा ॥ १९ ॥
ज्ञानिनो मुनयश्चापि वार्यते तत्तु केन च ।
इति ज्ञात्वा न तत्कृत्वा गृहीत्वा तौ तथैव च ॥ २० ॥
समागत्य गृहं भक्त्या नत्वा क्षीरकदम्बकम् ।
स्ववृत्तं प्राहतुः सर्वं बुद्धिः कर्मानुसारिणी ॥ २१ ॥
उपाध्यायस्तदावीक्ष्य चातुरीं छात्रयोस्तयोः ।
जगौ स्वास्तिमतीं भार्यां दृष्टं रे सर्वचेष्टितम् ॥ २२ ॥
एकदा तेन विप्रेण स वसुः कृतदोषकः ।
यष्ट्या संकुट्यमानस्तु स्वस्तिमत्या सुरक्षितः ॥ २३ ॥

तस्यै तेन वरो दत्तस्तयोक्तं पुत्र मे यदा ।
कार्यं भविष्यति व्यक्तं तदायं दीयते त्वया ॥ २४ ॥
अथैकदा सुधीः क्षीर-कदम्बोसौ विचक्षणः ।
सेव्यमानस्त्रिभिच्छात्रै-रटव्यां पठने गतः ॥ २५ ॥
तत्र ते स्वच्छभूभागे चत्वारो निजलीलया ।
बृहदारण्यकं शास्त्रं पठन्ति स्म प्रयुक्तितः ॥ २६ ॥
तत्रैकस्मिन्प्रदेशे तु महान्तौ चारणौ मुनी ।
स्वस्वाध्यायं गृहीतुं च संस्थितौ भुवनोत्तमौ ॥ २७ ॥
तान्दृष्ट्वा लघुना प्रोक्तं मुनिना विनयेन भो ।
पश्य स्वामिन्कथं चैते संपठन्ति शुचि क्षितौ ॥ २८ ॥
तच्छ्रुत्वा स गुरुः प्राह मुनीन्द्रो ज्ञानलोचनः ।
एतेषु द्वौ प्रवर्त्तेते स्वपुण्यादूर्द्धगामिनौ ॥ २९ ॥
द्वौ नरौ निजपापेन निन्द्यौ नरकगामिनौ ।
स्यात्स्वकर्मवशाज्जन्तुः सुखदुःखैकभाजनम् ॥ ३० ॥
मुनेर्वाक्यं समाकर्ण्य सुधीः क्षीरकदम्बवाक् ।
छात्रान्गृहं विसृज्याशु स्वयं नत्वा मुनीश्वरम् ॥ ३१ ॥
पृष्टवान्भो मुने ब्रूहि जैनतत्वविदांवर ।
कौ भाविसुखिनौ देव कौ द्वौ संभाविनारकौ ॥ ३२ ॥
ततोसौ मदनद्वेषी संजगाद महामुनिः ।
सुधीर्विप्रकुलाधीश त्वं जिनेन्द्रप्रभक्तिमान् ॥ ३३ ॥
नारदश्चोर्द्धगामी स्यात्स्वपुण्योत्करसम्भवः ।
द्वौ छात्रौ ते ध्रुवं भावि-नारकौ वसुपर्वतौ ॥ ३४ ॥

तत्समाकर्ण्य विप्रोसौ नत्वा मुनिपदद्वयम् ।
पुत्रखेदात्सखेदस्तु चिन्तयन्निजचेतसि ॥ ३५ ॥
काले कल्पशते चापि नान्यथा मुनिभाषितम् ।
ततः स्वगृहमायातः सर्वशास्त्रविचक्षणः ॥ ३६ ॥
एकदा स महाराजः सुधीर्विश्वावसुस्तराम् ।
वसुं राज्ये समारोप्य सम्प्राप्तः सुतपोवनम् ॥ ३७ ॥
तदा राज्यं प्रकुर्वाणो वसुश्चैकदिने मुदा ।
क्रीडां कर्तुं वनं गत्वा तत्राकाशाच्च पक्षिणः ॥ ३८ ॥
प्रस्खल्य पतितान्वीक्ष्य विस्मयाक्रान्तमानसः ।
अत्रास्ति कारणं किञ्चि-दिति ज्ञात्वा स्वचेतसि ॥ ३९ ॥
मुक्त्वा बाणं परीक्षार्थं तत्प्रदेशं प्रति ध्रुवम् ।
तथा तं स्खलितं दृष्ट्वा गत्वा तत्र स्वयं पुनः ॥ ४० ॥
मत्वा प्रभुः करस्पर्शा-दाकाशस्फटिकोद्भवम् ।
महास्तंभं तमानीय स्वगेहं गूढवृत्तितः ॥ ४१ ॥
तेन स्तंभेन निर्माप्य महापादचतुष्टयम् ।
सिंहासनं समारुह्य स्वयं लोके स धूर्तकः ॥ ४२ ॥
सत्यवाक्यप्रभावेन वसोः सिंहासनं महत् ।
आकाशे संस्थितं चेति कृत्वा स्फीर्तिं प्रपञ्चतः ॥ ४३ ॥
सेव्यमानो जनैर्नित्यं संस्थितः कपटाश्रितः ।
जन्तुर्मायारतो मूढः किंः करोति न वञ्चनम् ॥ ४४ ॥
अथ क्षीरकदम्बोसौ सद्दृष्टिर्जिनभक्तिभाक् ।
विरक्तः संसृतेर्भूत्वा मुनिर्जातो गुणोज्ज्वलः ॥ ४५ ॥

तपः कृत्वा जिनेन्द्रोक्तं स्वर्गमोक्षसुखप्रदम् ।
प्रान्ते विधाय संन्यासं स्वर्गलोकं सुधीर्ययौ ॥ ४६ ॥
पर्वतस्तु पितुः स्थाने स्थित्वा छात्रान्स्वबुद्धितः ।
शास्त्रं पाठयति स्मोच्चैः स्ववृत्तिस्थितिहेतवे ॥ ४७ ॥
नारदोपि सुधीः श्रीम-ज्जिनपादाब्जषट्पदः ।
तदा देशान्तरं प्राप्तो लीलया शुद्धमानसः ॥ ४८ ॥
ततो भूरि दिनैः सोपि नारदः सर्वशास्त्रवित् ।
पर्वतस्य समीपं तु समायातो विनोदतः ॥ ४९ ॥
तत्प्रस्तावे दुरात्मासौ पर्वतः पापमण्डितः ।
अजैर्यष्टव्यमित्येत-द्वाक्ये शास्त्रे समागते ॥ ५० ॥
अजैश्छागैः प्रयष्टव्यं व्याख्यानं कृतवानिति ।
तच्छ्रुत्वा नारदेनोक्त-मजैर्धान्यैस्त्रिवार्षिकैः ॥ ५१ ॥
उपाध्यायेन सम्प्रोक्तं तदस्माकमिति स्फुटम् ।
त्वया किं लपितं मूढ महापापविधायकम् ॥ ५२ ॥
पापात्मा पर्वतः प्राह यष्टव्यं छागकैर्ध्रुवम् ।
अहो जानन्नपि प्राणी वक्त्येवं भाविदुर्गतिः ॥ ५३ ॥
तौ विवादे तदा कृत्वा जिह्वाच्छेदस्थितिं ध्रुवम् ।
वचः प्रमाणीकृत्योच्चैः संस्थितौ वसुभूपतेः ॥ ५४ ॥
तदा स्वस्तिमती प्राह पर्वतं रे दुराशयम् ।
विरूपकं त्वया चक्रे व्याख्यानं पापकारणम् ॥ ५५ ॥
पिता ते जैनधर्मज्ञो नित्यं पूतैस्त्रिवार्षिकैः ।
धान्यैरेव करोति स्म यज्ञं पुण्याशयः सुधीः ॥ ५६ ॥

इत्यादिकं कुधा प्रोक्त्वा पुनः पुत्रस्य मोहतः ।
ब्राह्मणी सा द्रुतं गत्वा वसोः पार्श्वं जगाद च ॥ ५७ ॥
देहि मे तं वरं देव प्रस्तावश्चाद्य विद्यते ।
त्वया प्रमाणीकर्त्तव्यं पर्वतस्य वचः स्फुटम् ॥ ५८ ॥
स्वयं पापीजनश्चैवं सपापान्कुरुते परान् ।
विषेपेतो यथा सर्पः करोति सविषाञ्जनान् ॥ ५९ ॥
प्रभाते च तयोर्वादे पापात्मा वसुभूपतिः ।
उपाध्यायोदितं वाक्यं जानन्नपि हृदि स्फुटम् ॥ ६० ॥
पर्वतस्य वचः सत्यं सम्प्रोक्त्वेति क्षितौ तदा ।
कष्टादाकण्ठपर्यन्तं प्रविष्टो विष्टरान्वितः ॥ ६१ ॥
नारदः प्राह भो भूप यथार्थं गुरुभाषितम् ।
अद्यापि च द्रुतं ब्रूहि मागास्त्वं दुर्गतिं वृथा ॥ ६२ ॥
इत्युच्चैर्भणितः सोपि वसुभूपः स्वपापतः ।
पर्वतोक्तं भवेत्सत्यं प्रोक्त्वा भूमिं तरां श्रितः ॥ ६३ ॥
ततो मृत्वातिकष्टेन सप्तमं नरकं गतः ।
पापिनां दुष्टचित्ताना-मीदृशी कुमतिर्भवेत् ॥ ६४ ॥
तस्मात्प्राणक्षये चापि कष्टकोटिविधायकम् ।
असत्यवचनं सद्भिर्न वाच्यं शुभमिच्छुभिः ॥ ६५ ॥
तदा तं पर्वतं दुष्टं बहिः कृत्वा खरादिभिः ।
नारदः पूजितः सर्वैः सज्जनैर्भक्तिभारतः ॥ ६६ ॥
नारदोपि सुधीस्तत्र जैनधर्मधुरन्धरः ।
सर्वशास्त्रप्रवीणोसौ सारधर्मोपदेशतः ॥ ६७ ॥

राज्यं गिरितटाख्याया नगर्याः प्राप्य पुण्यतः ।
दीर्घकालं सुखं भुक्त्वा दानपूजाव्रतान्वितः ॥ ६८ ॥
प्रान्ते वैराग्यभावेन जैनीं दीक्षां सुखप्रदाम् ।
समादाय मुनिर्भूत्वा भव्यान्सम्बोध्य शुद्धधीः ॥ ६९ ॥
स्वयं रत्नत्रयं पूतं समाराध्य विचक्षणः ।
कृत्वा सारतपः स्वामी जिनपादाब्जभक्तिमान् ॥ ७० ॥
प्राप्तः सर्वार्थसिद्धिं हि प्रोल्लसच्छर्मदायिनीम् ।
जैनधर्मप्रसादेन किं न स्याद्भव्यदेहिनाम् ॥ ७१ ॥
जित्वा सर्वकुवादिनो दृढतरः श्रीनारदो निर्मदः
श्रीमत्सारजिनेन्द्रशासनमहासिन्धोर्लसच्चन्द्रमाः ।
धृत्वा सारतपः प्रसिद्धमहिमा सर्वार्थसिद्धिं श्रितः
स श्रीमान्द्विजवंशमण्डनमणिः कुर्यात्सतां मंगलम् ॥ ७२ ॥

इति कथाकोशेऽनृतदोषाख्याने वसुराज्ञः कथा समाप्ता ।

२७–श्रीभूतेःकथा ।

श्रीजिनं शर्मदं नत्वा सुरासुरसमर्चितम् ।
स्तेयदोषोद्भवं वृत्तं वक्ष्ये श्रीभूतिसंश्रितम् ॥ १ ॥
सुधीः सिंहपुरे राजा सिंहसेनोतिधार्मिकः ।
रामदत्ता महाराज्ञी सर्वकार्यविचक्षणा ॥ २ ॥
अभूत्पुरोहितस्तस्य श्रीभूतिः सोपि विप्रकः ।
सत्यवक्ताहमित्युच्चैः स्वस्कीर्तिं मायया व्यधात् ॥ ३ ॥

पद्मखंडपुरे चाथ सुमित्राख्यो वणिग्वरः ।
पुत्रः समुद्रदत्तोस्य सुमित्राकुक्षिसंभवः ॥ ४ ॥
वाणिज्येनैकदासौ च सुधीः सिंहपुरं गतः ।
तत्र श्रीभूतिविप्रस्य पार्श्वे सद्रत्नपञ्चकम् ॥ ५ ॥
धृत्वा समुद्रदत्तोगा-द्रत्नद्वीपं, धनार्जनम्– ।
कृत्वा यावत्समायाति समुद्रे पापकर्मतः ॥ ६ ॥
याने संस्फुटिते मृत्युं सम्प्राप्ता बहवो जनाः ।
अहो पुण्यं विना लोके कार्यसिद्धिर्न देहिनाम् ॥ ७ ॥
कष्टात्समुद्रदत्तोसौ प्राप्य सिंहपुरं परम् ।
पार्श्वे श्रीभूतिविप्रस्य रत्नार्थी निर्धनो गतः ॥ ८ ॥
आगच्छन्तं तमालोक्य दूरतो दुष्टमानसः ।
लोकानामग्रतो पापी श्रीभूतिर्लोभसंचयः ॥ ९ ॥
शृण्वन्त्वंहो अयं कोपि श्रूयते भग्नयानकः ।
धनक्षयात्समायाति भूत्वा च ग्रहिलस्तराम् ॥ १० ॥
मन्येहं मां वृथा नत्वा महादुःखेन पीडितः ।
संयाचिष्यति रत्नानी-त्युक्त्वासौ ब्राह्मणः स्थितः ॥ ११ ॥
तदा समुद्रदत्तोसौ तं प्रणम्य जगाद च ।
देहि मे पञ्च रत्नानि श्रीभूते ब्राह्मणोत्तम ॥ १२ ॥
इत्याकर्ण्य तदा तेन किं भो लोका मयोदितम् ।
सत्यं जातमिति प्रोक्त्वा ग्रहिलोयं बहिः कृतः ॥ १३ ॥
ये पापिनो भवन्त्यत्र परेषां धनलम्पटाः ।
ते दुष्टा निन्दितं कर्म किं न कुर्वन्ति लोभतः ॥ १४ ॥

ततो वणिग्वरः सोपि वञ्चितस्तेन पापिना ।
न दत्ते पञ्च रत्नानि श्रीभूतिर्मे द्विजः कुधीः ॥ १५ ॥
सर्वत्र नगरीमध्ये कृत्वेत्याक्रोशकं सदा ।
तथा पश्चिमरात्रौ च राजमन्दिरसन्निधौ ॥ १६ ॥
पूत्कारं संकरोत्येवं षण्मासेषु गतेषु च ।
रामदत्ता तदा राज्ञी सिंहसेनं नृपं जगौ ॥ १७ ॥
नायं देव ग्रहग्रस्तो नित्यमेवैकवाक्यतः ।
इत्युक्त्वा च ततो द्यूते तया राज्या स्वबुद्धितः ॥ १८ ॥
पृष्टः पुरोहितश्चेति ब्रूहि भो द्विजसत्तम ।
अद्यः किं भोजनं भुक्तं भवद्भिः सोशनं जगौ ॥ १९ ॥
साभिज्ञानेन तेनोच्चैः श्रीभूतिस्त्रीसमीपके ।
धात्री निपुणमत्याख्या प्रेषिता रत्नहेतवे ॥ २० ॥
नैव दत्तानि रत्नानि तया श्रीभूतिभार्यया ।
रामदत्ता ततो राज्ञी द्यूते जित्वा प्रपञ्चतः ॥ २१ ॥
पुनः संप्रेषयामास तन्नामाङ्कितमुद्रिकाम् ।
ब्राह्मणी सा तदा नैव ददौ रत्नानि लोभतः ॥ २२ ॥
पुनर्यज्ञोपवीतेन धात्र्या संयाचिता सती ।
सा तस्यै तानि रत्नानि संददाति स्म भीतितः ॥ २३ ॥
ततो राज्या स्वनाथस्य दर्शितानि तया मुदा ।
तेन श्रीसिंहसेनेन रत्नान्यादाय धीमता ॥ २४ ॥
क्षिप्त्वा स्वकीयरत्नानां मध्येसौ भणितो वणिक् ।
यानि ते त्वं गृहाणेति तानि भो ग्रहिल ध्रुवम् ॥ २५ ॥

ततो समुद्रदत्तोसौ स्वरत्नान्येव शुद्धधीः ।
संजग्राह सतां चित्ते परद्रव्यं विषोपमम् ॥ २६ ॥

सिंहसेनो महीनाथस्तदा सन्तुष्टमानसः ।
तस्मै वणिग्वरायोच्चै-र्दिव्यं श्रेष्ठिपदं ददौ ॥ २७ ॥

ततो भूपेन रुष्टेन पृष्टा धर्माधिकारिणः ।
ब्रूत भो रत्नचोरस्य किं कार्यं चास्य पापिनः ॥ २८ ॥

तैरुक्तं देव दण्डोस्य महादोषविधायिनः ।
सर्वस्वहरणं मल्ल-त्रिंशत्सन्मुष्टयोथवा ॥ २९ ॥

कांस्यपात्रत्रयापूर्ण-नवगोमयभक्षणम् ।
इति त्रिविधदण्डेन दण्डितः पुररक्षकैः ॥ ३० ॥

आर्त्तध्यानेन मृत्वासौ श्रीभूतिः पापपण्डितः ।
कष्टतो दुर्गतिं प्राप विप्रको धनलम्पटः ॥ ३१ ॥

इति ज्ञात्वा महाभव्यैः स्तेयत्वं कष्टकोटिदम् ।
त्यक्त्वा श्रीमज्जिनेन्द्रोक्ते धर्मे कार्या मतिः सदा ॥ ३२ ॥

असुरसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यो
जिनपतिरिह भक्त्या सर्वसन्देहहर्त्ता ।
तदुदितवरवाणी सारसौख्यस्य खानि-
र्दिशतु मम शिवानि श्रीप्रभाचन्द्रदेवः ॥ ३३ ॥

इति कथाकोशे स्तेयदोषस्य श्रीभूतिकथा समाप्ता ।

२८-नीली-कथा ।

अथ श्रीजिननाथस्य नत्वा पादद्वयं हितम् ।
चतुर्थाणुव्रताख्यानं वक्ष्ये नीलीसमाश्रितम् ॥ १ ॥
क्षेत्रेस्मिन्भारते पूते लाटदेशे मनोहरे ।
श्रीमत्सर्वज्ञनाथोक्त-धर्मकार्यैरनुत्तरे ॥ २ ॥
पत्तने भृगुकच्छाख्ये सर्ववस्तुशतैर्भृते ।
राजाभूद्वसुपालाख्यो सावधानः प्रजाहिते ॥ ३ ॥
श्रेष्ठी श्रीजिनदत्तोभू-द्रविणसन्दोहसुन्दरः ।
श्रीमज्जिनेन्द्रचन्द्राणां चरणार्चनतत्परः ॥ ४ ॥
तत्प्रिया जिनदत्ताख्या साध्वी सद्दानमण्डिता ।
नीली नाम्नी तयोः पुत्री मुनीनामिव शीलता ॥ ५ ॥
तत्रैवान्यो वाणिग्जातो मिथ्यादृष्टिर्विनष्टधीः ।
नाम्ना समुद्रदत्तोस्य भार्या सागरदत्तिका ॥ ६ ॥
पुत्रः सागरदत्तोभू-देकदा जिनमन्दिरे ।
महापूजाविधौ नीलीं सर्वाभरणभूषिताम् ॥ ७ ॥
कायोत्सर्गस्थितां दिव्यां तां विलोक्य सुनिर्मलाम् ।
जगौ सागरदत्तोसौ विह्वलीभूतमानसः ॥ ८ ॥
किमेषा देवता काचित्किमेषा नागकन्यका ।
किमेषा खेचरीचारु-रूपसौन्दर्यमण्डिता ॥ ९ ॥
तच्छ्रुत्वा तस्य मित्रेण प्रियदत्तेन जल्पितम् ।
जिनदत्तमहाश्रेष्ठि-पुत्रीयं कुलदीपिका ॥ १० ॥

तदाकर्ण्य तदासक्तो भूत्वैषा प्राप्यते कथम् ।
इति चिन्ताग्रहग्रस्तो जातोसौ दुर्बलस्तराम् ॥ ११ ॥
हरिर्लक्ष्म्या हरो देवो गंगया जडरूपया ।
उर्वश्या खण्डितो ब्रह्मा हता कामेन के न च ॥ १२ ॥
ततः समुद्रदत्तेन ज्ञात्वा पुत्रस्य वेदनाम् ।
प्रोक्तं भो पुत्र जैनोयं जिनदत्तो विचक्षणः ॥ १३ ॥
मुक्त्वा जैनं निजां पुत्रीं न ददात्येव कस्यचित् ।
इत्युक्त्वा श्रावकौ भूत्वा तदा तौ कपटोक्तिभिः ॥ १४ ॥
कन्यामादाय तां नीलीं नीलोत्पलदलेक्षणाम् ।
कल्याणविधिना जातौ पुनर्बुद्धकुधर्मकौ ॥ १५ ॥
युक्तं पापप्रयुक्तानां सद्धर्मे किं स्थिरा मतिः ।
सुप्रसिद्धमिदं नैव श्वोदरे पायसस्थितिः ॥ १६ ॥
तथा तैर्बुद्धभक्तैश्च नील्यास्तातस्य मन्दिरे ।
निषिद्धं गमनं दुष्टैः किं न कुर्वन्ति पापिनः ॥ १७ ॥
इत्येवं वञ्चने जाते जिनदत्तो वदत्यसौ ।
कूपादौ पतिता पुत्री नीता मे वा यमेन च ॥ १८ ॥
संगतिर्दुर्जनानां हि शोकं यच्छति दारुणम् ।
अधः स्थितोपि वन्हिः स्या-दूर्द्धं कालुष्यकारणम् ॥ १९ ॥
सा नीली निजनाथस्य भूत्वा प्राणप्रिया तदा ।
जिनधर्मं प्रकुर्वाणा स्थिता भिन्नगृहे मुदा ॥ २० ॥
नित्यं श्रीमज्जिनेन्द्राणां पूजां कल्याणदायिनीम् ।
पात्रदानं व्रतं शीलं सोपवासं सुनिर्मलम् ॥ २१ ॥

साधर्मिकेषु वात्सल्यं शर्मदं शल्यवर्जितम् ।
इत्यादिधर्मसद्भावं पालयामास भक्तितः ॥ २२ ॥
एकदा श्वसुरेणैव संविचार्य स्वमानसे ।
संसर्गाद्दर्शनाद्धर्म-श्रुतेर्वा बुद्धभक्तिका ॥ २३ ॥
भविष्यतीति सा प्रोक्ता नीली पुत्रि गुणोज्वले ।
ज्ञानिनां वन्दकानां त्वं भोजनं देहि नो मतात् ॥ २४ ॥
ततस्तया समाहूय वन्दकान्कृतदंभकान् ।
तत्पादत्राणखण्डानि कृत्वा मृष्टानि सद्रमैः ॥ २५ ॥
तेषां भोक्तुं प्रदत्तानि तैः कृत्वा भोजनं मुदा ।
गच्छद्भिश्चेति पृष्टं क्व पादत्राणे तयोदिते ॥ २६ ॥
भवन्तस्त्वेव जानन्ति ज्ञानिनो यतयो भुवि ।
ज्ञानं नास्ति यदि व्यक्त्यै कुर्वन्तु वमनं द्रुतम् ॥ २७ ॥
वर्त्तेते भवतां तुन्दे तत्सुस्वादुविलोभिनाम् ।
कृते तैर्वमने दृष्टस्तत्खण्डानां समूहकः ॥ २८ ॥
बौद्धानां मानभङ्गेन तदा श्वशुरवर्गके ।
रुष्टे सागरदत्तस्य भगिन्यादिभिरर्जितम् ॥ २९ ॥
महापापं वृथा दत्वा तस्याः शीलस्य दूषणम् ।
पापिनां न भयं चित्ते साधूनां दोषभाषणे ॥ ३० ॥
असत्यदोषके तस्मिन्प्रसिद्धे सा गुणोज्वला ।
दोषोच्छेदे ममाहार-प्रवृत्तिर्नान्यथेति च ॥ ३१ ॥
संन्यासं श्रीजिनस्याग्रे गृहीत्वा द्विविधं स्थिता ।
कायोत्सर्गेण मेरोर्वा चूलिका चारुनिश्चला ॥ ३२ ॥

सत्यं सतां सुखे दुःखे प्रध्वस्तापत्सहस्रकः ।
शरणं श्रीजिनस्त्वेव नित्यं शक्रैः समर्चितः ॥ ३३ ॥
ततस्तच्छीलमाहात्म्यात्क्षुभिता पुरदेवता ।
ससंभ्रमं समागत्य तत्समीपं जगौ निशि ॥ ३४ ॥
सती शिरोमणे मैवं कुरु प्राणविसर्जनम् ।
अहं राज्ञः प्रधानानां प्रजानां स्वप्नमद्भुतम् ॥ ३५ ॥
ददामीति नगर्याश्च प्रतोल्यः सकला ध्रुवम् ।
महासती यदा वाम-पादसंस्पर्शनं मुदा ॥ ३६ ॥
करिष्यति तदोद्‌घाटं यास्यन्त्येताः प्रवेगतः ।
त्वं पादेन प्रतोलीनां कुर्याः संस्पर्शनं शुभे ॥ ३७ ॥
इत्युक्त्वा स्वप्नकं दत्वा राजादीनां सुनिश्चलम् ।
कीलित्वा सा प्रतोलीस्ता गतादृश्यं सुराङ्गना ॥ ३८ ॥
प्रभाते कीलिता दृष्ट्वा प्रतोलीर्भूमिपादिभिः ।
स्मृत्वा तं रात्रिजं स्वप्नं सर्वैस्तत्पुरयोषिताम् ॥ ३९ ॥
कारितश्चरणैर्घातः प्रतोलीनां तथापि सा ।
नोद्‌घाटिता कयाप्येका नाल्पपुण्यैर्यशोर्ज्यते ॥ ४० ॥
पश्चादुत्क्षिप्य नीता सा नीली सच्छीलशालिनी ।
तया स्वपादसंस्पर्शात्सर्वाश्चोद्‌घाटिता हि ताः ॥ ४१ ॥
शलाकया यथा वैद्यः करोत्युद्‌घाटनं दृशाम् ।
तथा नीली स्वपादेन प्रतोल्युद्‌घाटनं व्यधात् ॥ ४२ ॥
तदा स्वशीलमाहात्म्य-प्रहर्षितजगज्जना ।
सा नीली वस्तुसन्दोहै-र्नरेन्द्राद्यैः समर्चिता ॥ ४३ ॥

जय त्वं जिननाथस्य चरणाम्भोजषट्पदी ।
भो मातस्तव शीलस्य माहात्म्यं केन वर्ण्यते ॥ ४४ ॥
इत्यादिभिः शुभैर्वाक्यैः सा सती शीलमण्डिता ।
सर्वैर्धर्मानुरागेण संस्तुता सज्जनैर्मुदा ॥ ४५ ॥
स जयति जिनदेवः सर्वदेवेन्द्रवन्द्यो
विमलतरगिरो वै यस्य विश्वोपकाराः ।
तदुदितवरशीलं पालितं शर्ममूलं
दिशतु शुचिजनानां स्वर्गमोक्षोरुलक्ष्मीम् ॥ ४६ ॥

इति कथाकोशे शीलप्रभाववर्णने नीलीश्राविकाकथा समाप्ता ।

२९–कडारपिङ्गस्य कथा ।

नत्वार्हतं जगत्पूतं भारतीगुरुपङ्कजम् ।
वक्ष्ये कडारपिङ्गस्या-ब्रह्मदोषं कथानकम् ॥ १ ॥
कांपिल्यनगरे राजा नरसिंहो विचक्षणः ।
प्राज्यं राज्यं करोत्युच्चै-र्धर्मैकर्मपरायणः ॥ २ ॥
तन्मंत्री सुमतिर्नाम्ना धनश्रीः प्राणवल्लभा ।
तयोः कडारपिङ्गाख्यः पुत्रो जातोतिलम्पटः ॥ ३ ॥
तत्रैव नगरे श्रेष्ठी संजातोत्यन्तधार्मिकः ।
सुधीः कुबेरदत्ताख्यो दानपूजाविराजितः ॥ ४ ॥
तस्य भार्याभवत्सार-पूर्वपुण्येन संयुता ।
प्रियंगुसुन्दरी नाम्ना साध्वी सद्रूपमण्डिता ॥ ५ ॥

एकदा तां समालोक्य श्रेष्ठिनीं गुणशालिनीम् ।
कुधीः कडारपिङ्गोसौ संजातो विकलाशयः ॥ ६ ॥
गत्वा गृहं स्थितो याव-द्धनश्रीः प्राह तं प्रति ।
अहो पुत्र त्वकं कस्माद् दृश्यते दुर्मनास्तराम् ॥ ७ ॥
तेनोक्तं श्रेष्ठिभार्यासौ प्राप्यतेत्र मया यदि ।
तदा मे जीवितं मात-र्नान्यथेति सुनिश्चितः ॥ ८ ॥
धिक्कामान्धजनाँल्लोके लज्जाभयविवर्जितान् ।
यतः कामी न जानाति कार्याकार्यं शुभाशुभम् ॥ ९ ॥
तया धनश्रिया प्रोक्तं स्वभर्तुः सुमतेस्तदा ।
निजपुत्रमहादुःखं परस्त्रीदर्शनोद्भवम् ॥ १० ॥
तच्छ्रुत्वा सुमतिर्मंत्री पापात्मा कपटेन सः ।
नरसिंहमहीनाथं संजगाविति दुष्टधीः ॥ ११ ॥
अहो महीपते रत्न-द्वीपे किंजल्कपक्षिणः ।
तिष्ठन्ति बहवो देव भवद्भिः श्रूयतां प्रभो ॥ १२ ॥
तत्प्रभावान्महाव्याधि-दुर्भिक्षमरणादयः ।
शत्रुचक्रं तथा चोराः प्रभवन्ति न निश्चयात् ॥ १३ ॥
ततः कुबेरदत्तोसौ श्रेष्ठी कार्यविचक्षणः ।
तं पक्षिणं समानेतुं प्रेषणीयो न संशयः ॥ १४ ॥
तत्समाकर्ण्य भूभर्त्ता तमानेतुं सुमुग्धधीः ।
श्रेष्ठिनं प्रेषयामास राजानो मंत्रिणां वशाः ॥ १५ ॥
तदा श्रेष्ठी विशुद्धात्मा गृहमागत्य वेगतः ।
प्रयाणं स्वस्य भार्यायै संजगाद महाद्भुतम् ॥ १६ ॥

प्रियंगुसुन्दरी प्राह भो स्वामिन्वञ्चितोसि च ।
पापी कडारपिंगो मे महाशीलस्य खण्डनम् ॥ १७ ॥
कर्त्तुं समीहते तस्मा-त्तवेदं गमनं ध्रुवम् ।
क्वापि स्त्रियो भवन्त्युच्चैः स्वप्रियादतिचञ्चवः ॥ १८ ॥
श्रेष्ठी कुबेरदत्तोसौ समाकर्ण्य प्रियोदितम् ।
शुभे दिने विसृज्योच्चै-र्जलयानं सुबुद्धिमान् ॥ १९ ॥
स्वयं व्याघुट्य गेहे च प्रच्छन्नं संस्थितो द्रुतम् ।
लोकदुस्संगतेः क्वापि सन्तोसन्तो भवन्त्यमी ॥ २० ॥
तदा कडारपिङ्गोसौ श्रेष्ठिनीरूपलम्पटः ।
कुधीस्तद्गृहमायातो मदनोन्मत्तमानसः ॥ २१ ॥
ततो वर्चोगृहे सापि पल्यंकं रज्जुवर्जितम् ।
छादितं शुभ्रवस्त्रेण स्थापयामास सुन्दरी ॥ २२ ॥
यावत्तत्रोपविष्टोसौ शठो विष्टागृहे तदा ।
पतितो मंत्रिणः पुत्रो नारको नरके यथा ॥ २३ ॥
षण्मासेषु गतेषूच्चै-रागते जलयानके ।
नाना पक्षिमहापक्षान्कृत्वा तस्य शरीरके ॥ २४ ॥
विधाय तन्मुखं कृष्णं कृत्वा हस्तादिबन्धनम् ।
धृत्वा पंजरके कष्टं मंत्रिपुत्रं कुकर्मगम् ॥ २५ ॥
पक्षी कुबेरदत्तेन श्रेष्ठिना गुणशालिना ।
समानीतो महाद्वीपा-दिति क्षोभं गते जने ॥ २६ ॥
दुष्टं कडारपिङ्गाख्यं नीत्वा श्रेष्ठी नृपान्तिकम् ।
देव किंजल्कपक्षी ते समानीतोयमद्भुतः ॥ २७ ॥

इति हास्यं विधायोच्चैः पूर्ववृत्तान्तमुक्तवान् ।
तच्छ्रुत्वा नरसिंहेन महाकोपेन भूभुजा ॥ २८ ॥
गर्दभारोहणं कृत्वा दण्डितो मंत्रिपुत्रकः ।
मृत्वा कडारपिंगोसौ दुर्ध्यानान्नरकं गतः ॥ २९ ॥
परस्त्रीलम्पटो जन्तु-र्दुर्गतिं याति निश्चयात् ।
तस्मात्सदा परस्त्रीणां त्यागः कार्यो बुधोत्तमैः ॥ ३० ॥
ये भव्या श्रीजिनेन्द्रोक्तं शीले शर्मशतप्रदे ।
महायत्नं प्रकुर्वन्ति ते पूज्यन्ते पदे पदे ॥ ३१ ॥
शीलं श्रीजिनभाषितं शुचितरं देवेन्द्रवृन्दैः स्तुतं
नाना शर्ममहाप्रमोदजनकं स्वर्गापवर्गप्रदम् ।
ये भव्याः प्रतिपालयन्ति नितरां त्रेधा जगन्मोहनं
भुक्त्वा ते त्रिदशादिसौख्यमतुलं मुक्तेर्लभन्ते सुखम् ॥३२॥

इति कथाकोशे ब्रह्मचर्यदोषोद्भवकडारपिङ्गस्य कथा समाप्ता ।

३०–देवरतिराज्ञः कथा ।

नत्वा जिनं जगत्पूज्यं केवलज्ञानलोचनम् ।
कथा देवरतेर्वच्मि विनितापत्तनेशिनः ॥ १ ॥
अयोध्यां नगरे राजा जातो देवरतिर्महान् ।
रक्ता नाम्नी महाराज्ञी रूपसौभाग्यशालिनी ॥ २ ॥
स भूपतिः सदा तस्या-मासक्तः कामलम्पटः ।
शत्रुभिः पीडितश्चापि राज्यचिन्तां करोति न ॥ ३ ॥

मुक्त्वा धर्मार्थनामानौ पदार्थौ नीतिवर्जितः ।
भुंक्ते भोगान्कुधीर्योत्र स स्याद्दुःखैकभाजनम् ॥ ४ ॥
मंत्रिभिश्चैकदा पुत्रं जयसेनाभिधानकम् ।
राज्ये धृत्वा तया सार्द्धं देशान्निर्घाटितः प्रभुः ॥ ५ ॥
तदा देवरतिः सोपि रक्तया सह भूपतिः ।
महाटव्यां समायातो धिक्कामं नीतिवर्जितम् ॥ ६ ॥
तत्र क्षुधामहाक्लेश-पीडितायाः स्वयोषितः ।
स्वोरुमांसं सुसंस्कृत्य दत्तवान्मोहवञ्चितः ॥ ७ ॥
तथा तस्यास्तृषाक्रान्त-चेतसो मूढमानसः ।
बाहुरक्तं महौषध्या जलं कृत्वा च सन्ददौ ॥ ८ ॥
यमुनायास्तटं प्राप्य रक्तां धृत्वा तरोस्तले ।
भोजनं च समानेतुं ग्राममध्ये नृपो गतः ॥ ९ ॥
सापि तत्र समालोक्य वाटिकासेवनोद्यतम् ।
वार्यन्त्रं खेटयन्तं च पंगुं सद्गानसंयुतम् ॥ १० ॥
तस्मिन्नासक्तचित्ताभू-द्रक्ता तं प्राह पापिनी ।
अहो पंगो त्वकं शीघ्रं मामिच्छेति प्रभो स्वयम् ॥ ११ ॥
तेनोक्तं पंगुना मुग्धे त्वदीयप्राणनाथतः ।
अहं चित्ते बिभेमीति महाभटशिरोमणेः ॥ १२ ॥
सावोचन्मारयामीति तं प्रियं मा भयं कुरु ।
दुराचाराश्रिता लोके किं न कुर्वन्ति योषितः ॥ १३ ॥
गृहीत्वा भोजनं तत्र समायाते महीपतौ ।
रोदनं कर्त्तुमारब्धं तया कौटिल्यभावतः ॥ १४ ॥

नृपः प्राह प्रिये कस्मा-त्त्वं करोषीति रोदनम् ।
सा जगौ देव रक्ताख्या रिक्ताहं पापकर्मतः ॥ १५ ॥
अद्य किं क्रियते प्राप्ते तवायुर्ग्रन्थिवासरे ।
जन्तोः पुण्यं विना घोरे मज्जनं शोकसागरे ॥ १६ ॥
इत्याकर्ण्य तदासक्तः संजगाद महीपतिः ।
किं शोकेन प्रिये सर्वं त्वयैव मम पूर्यते ॥ १७ ॥
तथाप्याचारमात्रं च करोमीति प्रजल्प्य सा ।
तंत्रीगुंफितपुष्पौघै-र्बन्धित्वा स्वपतिं गले ॥ १८ ॥
यमुनाख्यमहानद्यां क्षिप्त्वा तं दुष्टमानसा ।
पंगुना सह दुष्कर्म-कुर्वती संस्थिता तदा ॥ १९ ॥
अथ देवरतिर्भूपः कथंचित्कर्मयोगतः ।
मंगलाख्यपुरं प्राप्य श्रान्तो नद्याः प्रवाहतः ॥ २० ॥
सुप्तस्तत्र बहिर्देशे वृक्षमूले सुखप्रदे ।
जन्तूनां जैनधर्मे वा महाभ्युदयकारणे ॥ २१ ॥
तत्र श्रीवर्द्धनो राजा विपुत्रो मृत्युमाप्तवान् ।
मंत्रिभिर्भणितेनोच्चै-र्विधिना पट्टहस्तिना ॥ २२ ॥
पूर्णकुंभेन संस्नाप्य स भूपः पुण्ययोगतः ।
नीत्वा पुरं तदा राज्ये स्थापितः सन्महोत्सवैः ॥ २३ ॥
पूर्वपुण्येन जन्तूना-मापदा सम्पदायते ।
तस्माच्छ्रीमज्जिनेन्द्रोक्तं पुण्यं कुर्वन्तु भो बुधाः ॥ २४ ॥
पुण्यं श्रीजिनपादार्चा पुण्यं सत्पात्रदानतः ।
पुण्यं पुण्यव्रतादुक्तं पुण्यं सत्प्रोषधादिभिः ॥ २५ ॥

तदा देवरतिर्भूपः स्थितो राज्ये सुखप्रदे ।
गुणोपेतस्त्रियश्चापि मुखाब्जं नैव पश्यति ॥ २६ ॥
दुर्जनैर्वंचितो धत्ते विश्वासं नैव सज्जने ।
संतप्तपयसा दग्धो भुंक्ते फूत्कृत्य सद्दधि ॥ २७ ॥
तथा दानं ददात्युच्चैः सर्वेभ्योसौ यशस्करम् ।
पंगूनां न ददात्येव भूपतिः किञ्चिदप्यथ ॥ २८ ॥
सा रक्ता पापिनी पंगुं तं कृत्वा चोल्लके तदा ।
अयं मे प्राणनाथोस्ति दत्तस्तातादिभिस्तराम् ॥ २९ ॥
इत्याद्यसत्यवाग्जालै-र्लोकानामग्रतो मुदा ।
स्वसतीत्वं प्रकाश्योच्चैः पर्यटन्ती पुरादिषु ॥ ३० ॥
भिक्षां सर्वत्र कुर्वाणा मंगलाख्यपुरं ययौ ।
तत्र तां वीक्ष्य पौरास्ते प्रापुराश्चर्यकं महत् ॥ ३१ ॥
येन स्त्रीणां चरित्रेण ब्रह्माद्या वंचिता भुवि ।
का कथा तत्र लोकानां वञ्चने मुग्धतेचसाम् ॥ ३२ ॥
राजद्वारे तथा प्राप्तौ तौ गायन्तौ मनोहरम् ।
प्रतीहारस्तदा प्राह भूपतिं परमादरात् ॥ ३३ ॥
अहो स्वामिन्महाश्चर्यं सिंहद्वारे कलस्वनौ ।
सतीपंगू समायातौ दृष्टव्यौ धार्मिकैर्जनैः ॥ ३४ ॥
इत्याकर्ण्य प्रभुः सोपि जनानामाग्रहेण च ।
अन्तःपटं विधायोच्चै-स्तौ समाहूय लम्पटौ ॥ ३५ ॥
प्रियावाक्यं समाकर्ण्य ज्ञात्वा तां च स्वकामिनीम् ।
अहो सती समायाता मया ज्ञातेयमद्भुता ॥ ३६ ॥

इत्युक्त्वा तां प्रचार्योच्चैः पापिनीं शीलवर्जिताम् ।
त्रिधा वैराग्यसम्पन्नः सुधीर्देवरतः प्रभुः ॥ ३७ ॥
तस्यैव जयसेनाख्य-स्वपुत्रस्य महोत्सवैः ।
राज्यलक्ष्मीं समर्प्याशु जिनानभ्यर्च्य भक्तितः ॥ ३८ ॥
दीक्षां यमधराचार्य-पार्श्वे शर्मशतप्रदाम् ।
समादाय मुनिर्भूत्वा पूतात्मा भव्यतारकः ॥ ३९ ॥
कृत्वा तपो जिनेन्द्रोक्तं लोकद्वयसुखप्रदम् ।
स्वर्गे देवोभवत्काले महाज्ञानर्द्धिमण्डितः ॥ ४० ॥
दृष्ट्वा स्त्रीचरितं समस्तजगतां निन्द्यं सदा वञ्चकं
ज्ञात्वा संसृतिदेहभोगमखिलं शक्रस्य चापोपमम् ।
नाम्ना देवरतिप्रभुर्जिनपतेर्दीक्षां समादाय यः
संजातो मुनिसत्तमो गुणनिधिर्नित्यं स मेशं क्रियात् ॥४१॥

इति कथाकोशे देवरतिराज्ञः कथा समाप्ता

३१—गोपवती-कथा ।

सर्वसौख्यप्रदं नत्वा श्रीजिनं जगदर्चितम् ।
वैराग्याय सतां वक्ष्ये वृत्तं गोपवतीश्रितम् ॥ १ ॥
पलासग्रामवास्तव्यो नाम्ना सिंहबलो नरः ।
भार्या गोपवती तस्य संजाता दुष्टमानसा ॥ २ ॥
एकदा पद्मिनीखेट-ग्रामं गत्वा निजेच्छया ।
प्रच्छन्नं स्वस्त्रियो गाढं सुधीः सिंहबलो मुदा ॥ ३ ॥

तत्रस्थसिंहसेनाख्य-ग्रामकूटस्य पुत्रिकाम् ।
सुभद्रां रूपलावण्य-मण्डितां परणीतवान् ॥ ४ ॥
तच्छ्रुत्वा पापिनी सापि महाकोपाग्निकम्पिता ।
गत्वा गोपवती तत्र तद्गृहं सम्प्रविश्य च ॥ ५ ॥
मातृकाग्रे प्रसुप्तायाः सुभद्रायाश्च मस्तकम् ।
गृहीत्वा गृहमायाता सपत्नी पापकारिणी ॥ ६ ॥
प्रातःकाले सुभद्राया रुण्डं दृष्ट्वा भयानकम् ।
सोपि सिंहबलो दुःखी समायातो निजं गृहम् ॥ ७ ॥
तदा गोपवती तस्य स्वनाथस्यातिसंभ्रमम् ।
आगतस्वागतं कृत्वा सा ददाति स्म भोजनम् ॥ ८ ॥
तदुद्वेगात्तदा तस्मै रोचते नैव भोजनम् ।
महादुःखाश्रितस्यात्र का प्रीतिर्भोजनादिषु ॥ ९ ॥
ततस्तया सुपापिन्या गोपवत्या प्रकोपतः ।
सुभद्राया मुखं पश्य यतस्ते रोचतेशनम् ॥ १० ॥
इत्युक्त्वा मस्तकं तच्च क्षिप्तं तद्भाजने तदा ।
तद्दृष्ट्वा भयभीतोसौ राक्षसीयं भयानका ॥ ११ ॥
इति ज्ञात्वा द्रुतं चित्ते नश्यन्सिंहबलो भटः ।
कुन्तेन मारितः कष्टं पापिन्या दुष्टयोषिता ॥ १२ ॥
मत्वा स्त्रीचरितं चेति स्वचित्ते चतुरोत्तमैः ।
विश्वासो नैव कर्तव्यो दुष्टस्त्रीणां कदाचन ॥ १३ ॥
स जयति जिनदेवो देवदेवेन्द्रवन्द्यो
मदनमदकरीन्द्रध्वंसने यो मृगेन्द्रः ।

तव भवभयहर्त्ता स्वर्गमोक्षप्रकर्त्ता
शिवयुवतिसुभर्त्ता शान्तये शान्तिदाता ॥ १४ ॥

इति कथाकोशे गोपवती-कथा समाप्ता ।

३२—वीरवती-कथा ।

नत्वार्हतं जगन्मित्रं पवित्रं मुक्तिशर्मदम् ।
वक्ष्ये वीरवतीवृत्तं सतां वैराग्यकारणम् ॥ १ ॥
पुरे राजगृहे श्रेष्ठी धनमित्रो धनैर्युतः ।
धारिणी श्रेष्ठिनी तस्य तयोर्दत्तोभवत्सुतः ॥ २ ॥
तथा भूमिगृहे नाम्ना नगरे सम्पदाभृते ।
आनन्दमित्रवत्योश्च पुत्री वीरवती मता ॥ ३ ॥
तां कन्यां कुलजाचारैः स दत्तः परणीतवान् ।
सम्बन्धो विधिना बद्धो धीमता केन वार्यते ॥ ४ ॥
तत्रैव नगरे चोरः प्रचण्डोगारनामकः ।
रक्ता वीरवती तस्मिन्सा जाता पापकर्मणि ॥ ५ ॥
एकदासौ सुधीर्दत्तो रत्नद्वीपं मनोहरम् ।
गत्वोपार्ज्य धनं भूरि वासरैर्बहुभिर्मुदा ॥ ६ ॥
आगच्छन्स्वसुरावासं भार्यां संसक्तमानसः ।
महाटव्यां सहस्रादि-भटचोरेण वीक्षितः ॥ ७ ॥
तदा कौतूहलात्सोपि तस्करस्तस्य पृष्ठतः ।
द्रष्टुं तच्चेष्टितं मूढं तत्पुरं च समागतः ॥ ८ ॥

मन्दिरे श्वसुरस्योच्चै-रागतस्य तदा द्रुतम् ।
भार्या तातादिभिस्तस्य कृता प्राघूर्णिकक्रिया ॥ ९ ॥
तस्मिन्नेव दिने पापी चोरो गारकसंज्ञकः ।
धृत्वा स कोट्टपालाद्यैः शूले प्रोतः सुकष्टतः ॥ १० ॥
रात्रौ वीरवती सापि सुप्तं त्यक्त्वा च दत्तकम् ।
चचाल तस्कराभ्यर्णे खङ्गं कृत्वा करे खरम् ॥ ११ ॥
सहस्रभटचोरोपि द्रष्टुं तस्याश्चरित्रकम् ।
पृष्ठतश्चलितो गूढं चोराः केचिद्विनोदिनः ॥ १२ ॥
ज्ञात्वा तत्पादसंचारं तया खड्गेन दुष्टया ।
छिन्ना चोराङ्गुलिश्छिन्नो वटप्रारोहकोपि च ॥ १३ ॥
शूलाभ्यर्णे गता यावत्स चोरो गारकोऽवदत् ।
हे प्रिये म्रियमाणं मां समालिंग्य, मम द्रुतम् ॥ १४ ॥
स्वताम्बूलं मुखेनोच्चै-स्त्वं देहीति सुखप्रदम् ।
धिक्कामं मरणं प्राप्तो यतो वाञ्छति भोगकम् ॥ १५ ॥
ततस्तस्याः सुपापिन्याः कृत्वा मृतकसञ्चयम् ।
तस्योपरि चटित्वा च ताम्बूलं स्वमुखस्थितम् ॥ १६ ॥
ददत्याः पापतस्तस्मै तस्मिन्काले शवोच्चये ।
पतिते म्रियमाणेना-धरश्चोरेण खण्डितः ॥ १७ ॥
तस्यैव तस्करस्यास्ये सोधरः संस्थितस्तदा ।
गृढं वीरवती वक्त्रं वस्त्रेणाच्छाद्य वेगतः ॥ १८ ॥
ततो गेहं समागत्य सा दत्तस्य समीपके ।
अनेनैतत्कृतं चेति चक्रे पूत्कारमुच्चकैः ॥ १९ ॥

पापिनी लम्पटा योषि-त्स्वकुलक्षयकारिणी ।
किं करोति न दुष्कर्म कष्टकोटिविधायकम् ॥ २० ॥
मार्यमाणो ततो दत्तो राज्ञा रुष्टेन कष्टतः ।
सहस्रभटचोरेण तदीयं पापचेष्टितम् ॥ २१ ॥
सर्वं प्रोक्त्वा नृपस्याग्रे रक्षितः शुभयोगतः ।
लोके पुण्यवतां पुंसां सर्वे कुर्वन्ति रक्षणम् ॥ २२ ॥
इत्थं ज्ञात्वा बुधैश्चित्ते कुस्त्रीवृत्तं सुदारुणम् !
कार्यं कष्टकराणां हि विषयाणां विचारणम् ॥ २३ ॥
धन्यास्ते मुनयो जिनेन्द्रकथितैः शीलव्रतैर्मण्डिताः
कामक्रूरकरीन्द्रदुर्जयघटावित्रासकण्ठीरवाः ।
ज्ञानध्यानरता विरक्तहृदया भव्याब्जसद्भास्कराः
संसारार्णवतारणेतिचतुराः कुर्युः सतां मंगलम् ॥ २४ ॥

इति कथाकोशे वीरवतीकथा समाप्ता ।

२३—सुरतभूपस्य कथा ।

इन्द्रनागेन्द्रचन्द्रार्कैः समर्चितपदद्वयम् ।
भक्त्या नत्वा जिनं वक्ष्ये वृत्तं सुरतभूपतेः ॥ १ ॥
अयोध्यानगरे राजा सुरताख्यो महानभूत् ।
सती नाम्नी महादेवी योषित्पञ्चशताग्रणीः ॥ २ ॥
स तस्यां भूपतिर्नित्यं भोगासक्तैकमानसः ।
प्रतीहारं प्रति प्राह भो त्वया द्वारपालक ॥ ३ ॥

समायाते महाराज-कार्ये च मुनिसत्तमे ।
स्तवनीयं मम व्यक्तं नान्यत्किञ्चित्कदाचन ॥ ४ ॥
इत्युक्त्वान्तःपुरं शीघ्रं प्रविश्य परया मुदा ।
भुंजानो विविधान्भोगान्संस्थितो तृप्तिकारकान् ॥ ५ ॥
एकदा पुण्ययोगेन मन्दिरे तस्य भूपतेः ।
दमदत्तो धर्मरुचिर्मुनी मासोपवासिनौ ॥ ६ ॥
चर्यार्थं तौ समायातौ दृष्ट्वासौ द्वारपालकः ।
कुर्वन्तं तिलकं सत्या वक्त्राब्जे मण्डिते तराम् ॥ ७ ॥
नत्वा तं सुरतं भूपं संजगौ भो महीपते ।
समायातौ मुनीन्द्रौ द्वौ सुरेन्द्रार्चितपङ्कजौ ॥ ८ ॥
इत्याकर्ण्य प्रभुः सोपि हे प्रिये तिलकस्तव ।
यावच्छुष्यति नैवात्र तावद्भक्त्या मुनीन्द्रयोः ॥ ९ ॥
आहारं कारयित्वोच्चै-रागमिष्यामि सत्वरम् ।
प्रोक्त्वेति सुरतो धीमान्स्थापयित्वा मुनीश्वरौ ॥ १० ॥
नव पुण्यैः समायुक्तं ताभ्यामाहारमुत्तमम् ।
ददौ भक्त्या गुणैर्युक्तो भूरिशर्माकरं परम् ॥ ११ ॥
दानपूजाव्रतोपेतः शोभते श्रावकोत्तमः ।
तैर्विहीनो नरो नैव भाति वा निष्फलो द्रुमः ॥ १२ ॥
तस्माद्दानं त्रिधा पात्रे पूजां श्रीमज्जिनेशिनः ।
स्वव्रतं शर्मणे शक्त्या संभजन्तु सदा बुधाः ॥ १३ ॥
तस्मिन्काले सती सापि मुनिं निन्दोरुपापतः ।
उदंचरमहाकुष्ट-कष्टराशिप्रपीडिता ॥ १४ ॥

वरं हालाहलं भुक्त-मेकजन्मभयप्रदम् ।
नैव निन्दा मुनीन्द्राणां जन्मकोटिषु कष्टदा ॥ १५ ॥
ये नित्यं व्रतशीलाद्यै-र्मण्डिता मुनिनायकाः ।
सन्मार्गदीपका प्राया-स्ते निन्द्यन्ते कथं भुवि ॥ १६ ॥
गुरुर्दीपो गुरुर्बन्धु-र्गुरुः संसारतारकः ।
तस्मात्सर्वप्रयत्नेन समाराध्यो गुरुर्बुधैः ॥ १७ ॥
ततो राजा तदासक्तो समागत्य तदन्तिकम् ।
तस्याः शरीरमालोक्य कुष्टकाल्याग्निपीडितम् ॥ १८ ॥
संसारदेहभोगेषु विरक्तः सुरतः सुधीः ।
दीक्षामादाय जैनेन्द्रीं मुनिर्जातो जगद्धितः ॥ १९ ॥
सापि मृत्वा सती नाम्नी दीर्घसंसारमाश्रिता ।
स्वकीयपुण्यपापस्य फलं भुंक्ते जनो ध्रुवम् ॥ २० ॥
मत्वेति संसृतिचरित्रविचित्रमुच्चैः
श्रीमज्जिनेन्द्रकथिते भुवि सारधर्मे ।
स्वर्गापवर्गसुखसाधनहेतुभूते
कार्या मतिर्बुधजनैः सततं सुखाप्त्यै ॥ २१ ॥

इति कथाकोशे श्रीसुरतराज्ञः कथा समाप्ता ।

३४-विषयलुब्धसंसारिजीवस्य कथा ।

श्रीसर्वज्ञं प्रणम्योच्चैः संसाराम्भोधितारणम् ।
वक्ष्ये संसारिजीवस्य वृत्तं स्तोकेन दारुणम् ॥ १ ॥

महाटव्यां नरः कोपि भीतो व्याघ्राद्भयानकात् ।
अन्धकूपे स्थितस्तत्र तृणस्तम्बे विलम्बितः ॥ २ ॥
तथा व्याघ्राहतोत्तुङ्ग-कूपवृक्षप्रकम्पनात् ।
प्रोच्छलन्मधुकक्रूर-मक्षिकाभिः प्रपीडितः ॥ ३ ॥
स्तम्बमूलेऽशितश्वेत-मूषकाभ्यां निरन्तरम् ।
छेद्यमानोप्यधोभागे चतुस्सर्पेषु सत्सु च ॥ ४ ॥
इत्यादिभूरिकष्टेषु स मूढो नष्टमानसः ।
प्राप्तास्यमधुबिन्दुश्च तदेवं वाञ्छति स्फुटम् ॥ ५ ॥
अत्रान्तरे समागत्य जगौ कश्चित्खगो हि तम् ।
आगच्छ भो नभोयाने तिष्ठ त्वं शर्मदायिनि ॥ ६ ॥
तदाकर्ण्य कुधीः सोपि कूपस्थो लम्पटोऽवदत् ।
मधुबिन्दुः समायाति यावन्मे मधुरो मुखे ॥ ७ ॥
भव त्वं सुस्थिरस्ताव-दित्याकर्ण्य खगो गतः ।
विषयैर्वञ्चितो जीवो न कदाचिद्धिते रतः ॥ ८ ॥
यथासौ पुरुषः कूपे संस्थितो मधुलम्पटः ।
समाहूतः खगेनापि न वेत्ति स्म निजं हितम् ॥ ९ ॥
तथासौ विषयासक्तः प्राणी संसारकूपके ।
कालव्याघ्रादिभिर्नित्यं पीडितोपि प्रकष्टतः ॥ १० ॥
बोधितो गुरुभिश्चापि लोकद्वयसुखप्रदैः ।
सन्मार्गं नैव जानाति पापतो भाविदुर्गतिः ॥ ११ ॥
इत्थं कष्टशतप्रदानचतुरे संसारघोरार्णवे
ज्ञात्वा वै विषयान् विषान्नसदृशान्तान्दुर्जनानान्वा भुवि ।

श्रीमत्सारजिनेन्द्रदेवगदितो धर्मः सुशर्मप्रद-
श्चित्ते निश्चलभावतो बुधजनैराराधनीयः सदा ॥ १२ ॥

इति कथाकोशे विषयलुब्धसंसारिजीवस्य कथा समाप्ता।

२५—चारुदत्तश्रेष्ठिनः कथा।

श्रीजिनेन्द्रपदाम्भोज-युग्मं नत्वा सुरार्चितम्।
श्रेष्ठिनश्चारुदत्तस्य चरित्रं रचयाम्यहम् ॥ १ ॥
चम्पाख्ये नगरे राजा शूरसेनो महानभूत्।
भानुनामाभवच्छ्रेष्ठी सुभद्रा श्रेष्ठिनी प्रिया ॥ २ ॥
पुत्रार्थिनी कुदेवानां सा करोति स्म सेवनम्।
श्रेष्ठिनी न सुतं लेभे नास्ति सिद्धिः कुदेवतः ॥ ३ ॥
एकदा श्रीजिनेन्द्राणां मन्दिरे शर्ममन्दिरे।
नत्वा चारणयोगीन्द्रं सा सुभद्रा जगाद च ॥ ४ ॥
ब्रूहि भो भगवन्मेत्र तपोलक्ष्मीर्भविष्यति।
नैवं वेति समाकर्ण्य मुनीन्द्रो ज्ञानलोचनः ॥ ५ ॥
ज्ञात्वा तस्या मनोभावं जगौ भो पुत्रि साम्प्रतम्।
मिथ्यादेवस्य सेवां च कृत्वा सम्यक्त्वहानिताम् ॥ ६ ॥
मा कुरु त्वं, महान्पुत्रः सत्यं तेत्र भविष्यति।
तच्छ्रुत्वा सा मुनिं नत्वा प्रहर्षेण गृहं गता ॥ ७ ॥
ततस्तस्याः प्रकुर्वन्त्या सद्धर्मं श्रीजिनोदितम्।
कैश्चिद्दिनैः सुतो जात-श्चारुदत्तो गुणोज्ज्वलः ॥ ८ ॥

नाना महोत्सवैर्नित्यं स वृद्धिं प्राप सद्गुणैः ।
जीवानां कृतपुण्यानां माङ्गल्यं च दिने दिने ॥ ९ ॥
सर्वार्थमातुलस्योच्चैः पुत्रीं मित्रवती सतीम् ।
आग्रहेण कुटुम्बस्य स धीमान्परिणीतवान् ॥ १० ॥
तथाप्यसौ विरक्तः सन् चारुदत्तो विचक्षणः ।
कामसेवां विशुद्धात्मा न करोति कदाचन ॥ ११ ॥
तदा स्वपुत्रस्य मोहेन संगतिं गणिकादिभिः ।
सुभद्रा कारयामास तस्योच्चैर्लम्पटैर्जनैः ॥ १२ ॥
ततोसौ चारुदत्तश्च कुसंगाप्तप्रदोषतः ।
मांसादिकेपि संसक्तः कुसंगः पापकारणम् ॥ १३ ॥
तथा द्वादशवर्षेषु षोडशस्वर्णकोटयः ।
वसन्तसेनया सार्द्धं भक्षितस्तेन वेश्यया ॥ १४ ॥
एकदा चारुदत्तस्य भार्यायाश्च समागतम् ।
दृष्ट्वाभरणसन्दोहं कुट्टिनी स्वसुतां जगौ ॥ १५ ॥
अहो पुत्रि त्वया शीघ्र-मिमं त्यत्वा धनोज्झितम् ।
अन्यस्मिन्सधने पुंसि प्रीतिः कार्या च सम्पदे ॥ १६ ॥
इत्याकर्ण्य तया सोपि वसन्तादिकसेनया ।
त्यक्तः धनप्रिया लोके वेश्या नैव स्थिरस्थितिः ॥ १७ ॥
ततश्च चारुदत्तोसौ वञ्चितो भोगतस्करैः ।
स्वभार्यायाः समादाय तदाभरणसञ्चयम् ॥ १८ ॥
उलूखाख्यस्थदेशस्थ-मुशिरावर्त्तपत्तनम् ।
मातुलेन समं गत्वा तस्मात्कर्पासकं मुदा ॥ १९ ॥

गृहीत्वा तामलिप्ताख्यां पुरीं प्रति चचाल च ।
महाटव्यां स कर्पासो दग्धो दावाग्निना तदा ॥ २० ॥
अहो पुण्यं विना जन्तो-र्नोद्यमो सिद्धिदो भवेत् ।
तस्मात्पुण्यं जिनेन्द्रोक्तं कर्त्तव्यं धीधनैः सदा ॥ २१ ॥
आपृच्छ्य मातुलं तस्मा-दुद्वेगात्पीडिताशयः ।
नाम्ना समुद्रदत्तस्य कस्यचिज्जलयानके ॥ २२ ॥
स्थित्वासौ पवनद्वीपं गत्वा लक्ष्मीकृते ततः ।
धनं चोपार्ज्य कष्टेन समागच्छन्यदा तदा ॥ २३ ॥
पापतः स्फुटितः पोतो हा कष्टं पापचेष्टितम् ।
एवं सप्तसु वारेषु यानेषु स्फुटितेषु च ॥ २४ ॥
किञ्चित्पुण्यात्समासाद्य फलकं गुरुवाक्यवत् ।
समुत्तीर्य समुद्रं स प्राप्तो राजगृहं परम् ॥ २५ ॥
तत्रैको विष्णुमित्राख्यः परिव्राजककः कुधीः ।
चारुदत्तं समालोक्य दुष्टात्मा संजगाविति ॥ २६ ॥
भो पुत्रत्वं समागच्छ भीमाटव्यां प्रवर्त्तते ।
नितम्बे पर्वतस्योच्चै-र्महाधेनुरसोधिकम् ॥ २७ ॥
तुभ्यं ददामि तं पूतं येन दारिद्यसञ्चयः ।
क्षयं याति तवेदानीं तदाकर्ण्य वणिक्सुतः ॥ २८ ॥
चारुदत्तो वदत्तात कुरु त्वेवं मम ध्रुवम् ।
धनाशालम्पटा लोके दुर्जनैः के न वञ्चिताः ॥ २९ ॥
ततस्तेन गिरिं नीत्वा नितम्बस्थितकूपकम् ।
तत्करे तुम्बकं दत्वा वरत्राबद्धसिक्यके ॥ ३० ॥

धृत्वा प्रवेशितः सोपि रसं गृह्णन्निजेच्छया ।
तत्रस्थितेन चैकेन निषिद्धश्चारुदत्तकः ॥ ३१ ॥
ततः प्राह सुधीः कस्त्वं सोपि कूपस्थितोऽवदत् ।
उज्जयिन्यां महापुर्यां धनदत्तोहकं वणिक् ॥ ३२ ॥
गत्वा च सिंहलद्वीपं तस्माद्व्याघुटितोम्बुधौ ।
भग्ने याने धनैर्हीनः परिव्राजककेन तु ॥ ३३ ॥
वञ्चित्वानेन दुष्टेन गृहीत्वा रसतुम्बकम् ॥
कर्त्तित्वा वरत्रां च निक्षिप्तः कूपकेऽशुभात् ॥ ३४ ॥
रसेन भक्षिताः प्राणाः साम्प्रतं यान्ति मे ध्रुवम् ।
इत्याकर्ण्य जगौ सोपि रसोस्मै किं न दीयते ॥ ३५ ॥
कूपस्थोपि जगावेवं यद्यस्मै स न दीयते ।
तदा पाषाणकैरेष चोपसर्गं करिष्यति ॥ ३६ ॥
तच्छ्रुत्वा चारुदत्तश्च सुधीर्बुद्धिप्रपञ्चतः ।
तस्मै पापात्मने दत्वा तुम्बकं रससंभृतम् ॥ ३७ ॥
धृत्वा द्वितीयवेलायां सिक्ये पाषाणकं पुनः ।
दत्वा तस्मै स्वयं तत्र कूपेसौ यत्नतः स्थितः ॥ ३८ ॥
स परिव्राजकश्चापि समाकृष्य वरत्रिकाम् ।
कर्त्तित्वा रसमादाय पापिष्ठः स्वगृहं गतः ॥ ३९ ॥
ततोऽसौ चारुदत्तेन कूपस्थो भणितो मुदा ।
त्वया मे जीवितं दत्तं तवेदानीं ददाम्यहम् ॥ ४० ॥
सुगतेः साधनोपायं जिनेन्द्रैः परिकीर्त्तितम् ।
इत्युत्वा च तथा तस्मै स्वर्गमोक्षसुखप्रदान् ॥ ४१ ॥

सारपञ्चनमस्कारान्संन्यासेन समन्वितान् ।
दत्वा तेन पुनः पृष्टो भक्त्यासौ कूपसंस्थितः ॥ ४२ ॥
कोपि निःसरणोपायो वर्त्तते ब्रूहि मे सुधीः ।
तन्निशम्य स च प्राह श्रृणु त्वं भो विचक्षण ॥ ४३ ॥
अद्य पीत्वा रसं गोधा गता प्रातः समेष्यति ।
पुच्छं तस्या गृहीत्वा त्वं गच्छ स्वेच्छाशयः स्वयम्॥ ४४ ॥
इति श्रुत्वा प्रभातेसौ चारुदत्तो गुणोज्वलः ।
तथा निर्गत्य कूपाच्च गतोटव्यां सुधीरधीः ॥ ४५ ॥
महाटवीं परित्यज्य ततो गच्छन्निजेच्छया ।
दृष्टोसौ रुद्रदत्ताख्य-मातुलेन मनोहरः ॥ ४६ ॥
चारुदत्त समागच्छ रत्नद्वीपं सुखप्रदम् ।
शीघ्रमावां प्रगच्छाव-स्तेनासो भणितो मुदा ॥ ४७ ॥
गन्तुकामौ ततस्तौ द्वौ रत्नद्वीपं धनाशया ।
छागपृष्ठं समारुह्य चलितौ छागमार्गतः ॥ ४८ ॥
पर्वतोपरि गत्वामौ रुद्रदत्तोवदत्तदा ।
पापी रौद्राशयश्चेति श्रृणु त्वं चारुदत्त भो ॥ ४९ ॥
हत्वा छागौ परावृत्य चर्मसं स्थीयतेत्र च ।
भेरुण्डपक्षिणौ शीघ्रं समागत्य पलाशया ॥ ५० ॥
आवां चंच्वा समादाय रत्नद्वीपं प्रयाप्यतः ।
इत्युच्चैः प्रेरितश्चापि तेनासौ करुणापरः ॥ ५१ ॥
चारुदत्तो निजं छागं नैव मारयति स्म च ।
न कुर्वन्ति दुराचारं सन्तः कस्मादपि ध्रुवम् ॥ ५२ ॥

सोपि छागस्ततस्तेन रुद्रदत्तेन मारितः ।
ये दुष्टा निर्दयास्तेत्र किं न कुर्वन्ति पातकम् ॥ ९३ ॥
चारुदत्तस्तदा तस्मै छागायोचैः सुखप्रदान् ।
सारपञ्चनमस्कारान्संन्यासं च प्रदत्तवान् ॥ ९४ ॥
धर्मिणो येत्र वर्तन्ते ज्ञातश्रीजिनसद्गिरः ।
नित्यं परोपकाराय सन्ति ते परमार्थतः ॥ ९५ ॥
छागयोश्चर्मभस्त्रायां तौ प्रविश्य स्थितौ ततः ।
रत्नद्वीपात्समागत्य तदा भेरुण्डपक्षिणौ ॥ ९६ ॥
तौ समादाय चञ्चुभ्यां रत्नद्वीपं विनिर्गतौ ।
द्वयोर्भेरुण्डयोर्युद्धे नभोभागे स्त्रपापतः ॥ ९७ ॥
दुष्टात्मा रुद्रदत्तोऽसौ समुद्रे पतितस्तदा ।
मृत्वा च दुर्गतिं प्राप क भवेत्पापिनां शुभम् ॥ ९८ ॥
चारुदत्ताश्रितां भस्त्रां रत्नद्वीपे मनोहरे ।
रत्नचूलगिरिं नीत्वा भेरुण्डस्तां विदार्य च ॥ ९९ ॥
चारुदत्तं समालोक्य भीत्वा पक्षी स नष्टवान् ।
लोके पुण्यवतां पुंसां दुष्टाश्चापि हितंकराः ॥ ६० ॥
तत्रातापेन योगस्थं रत्नचूलगिरौ मुनिम् ।
दृष्ट्वा तत्पादयोर्लग्न-श्चारुदत्तोतिभक्तितः ॥ ६१ ॥
पूर्णयोगस्तदा प्राह मुनीन्द्रः शुद्धमानसः ।
अस्ति भो कुशलं चारु-दत्त ते गुणमण्डित ॥ ६२ ॥
तदाकर्ण्य मुनेर्वाक्यं सन्तुष्टश्चारुदत्तवाक् ।
क भो मुने त्वया दृष्टः सेवकश्चेत्यहं जगौ ॥ ६३ ॥

तच्छ्रुत्वा स मुनिः प्राह शृणु त्वं भानुनन्दन ।
अमिताख्यो महाविद्या-धरोहं चैकदा मुदा ॥ ६४ ॥
चम्पायां कदलीवृक्ष-वने शोभासमन्विते ।
क्रीडां कर्त्तुं गतो धीर वसन्तप्रियया युतः ॥ ६५ ॥
धूमसिंहखगः पापी तत्रागत्य दुराशयः ।
वसन्तश्रियमालोक्य महाकन्दर्पपीडितः ॥ ६६ ॥
कीलित्वा मां छलेनोच्चैः पादपे निजविद्यया ।
तां समादाय मे भार्यां नभोभागे गतो द्रुतम् ॥ ६७ ॥
तस्मिन्नेव क्षणे वत्स मम पुण्यप्रभावतः ।
क्रीडितुं त्वमपि प्राप्तः मूत्रोत्कृष्टदयानिधिः ॥ ६८ ॥
त्वां विलोक्य मया प्रोक्तं तस्मिन्मे करके सुधीः ।
तिस्रश्चौषधयः सन्ति दुष्टविद्याक्षयप्रदाः ॥ ६९ ॥
ताः पिष्ट्वा त्वं प्रयत्नेन देहि मे वपुषि ध्रुवम् ।
भवाम्युत्कीलितो येन भो मित्रेति गुणाकरः ॥ ७० ॥
तासु त्वया प्रदत्तासु ममाङ्गे भूरियत्नतः ।
निःशल्योहमभूवं हि प्राणी वा सद्गुरोर्मतात् ॥ ७१ ॥
ततः कैलासनामानं गत्वाहं वेगतो गिरिम् ।
धूमसिंहं खगं जित्वा गृहीत्वा कामिनीं निजाम् ॥ ७२ ॥
पश्चादागत्य भक्त्या त्वं भणितोसि मया मुदा ।
वरं प्रार्थय भो मित्र मनोभीष्टमिति स्फुटम् ॥ ७३ ॥
त्वया प्रोक्तं न मे कार्यं वरेणेति महाधिया ।
कृत्वा परोकारं हि सन्तो वाञ्छन्ति किं धनम् ॥ ७४ ॥

ततोहं दक्षिणश्रेण्यां शिवमन्दिरपत्तने ।
राज्यं भुक्त्वा कियत्कालं नाना भोगैः समन्वितम् ॥ ७५ ॥
त्रिधा वैराग्यमासाद्य क्षिप्त्वा राज्यं सुपुत्रयोः ।
नाम्ना सिंहयशश्चारु-वराहग्रीवसंज्ञयोः ॥ ७६ ॥
जैनीं दीक्षां समादाय भवभ्रमणनाशिनीम् ।
चारणर्द्धिमुनिर्भूत्वा करोम्यत्र महातपः ॥ ७७ ॥
इत्यादिकं मुनिप्रोक्तं श्रुत्वासौ परमादरात् ।
चारुदत्तः सुधीस्तुष्टो यावत्तत्र सुखस्थितः ॥ ७८ ॥
अत्रान्तरे समायातौ वन्दनार्थं खगाधिपौ ।
स्वपुत्रौ प्रति योगीन्द्र-श्चारुदत्तकथां जगौ ॥ ७९ ॥
तस्मिंश्चापि क्षणे छाग-चरदेवेन धीमता ।
तत्रागत्य प्रणामश्च चारुदत्ताङ्घ्रिके कृतः ॥ ८० ॥
तेनोक्तं चारुदत्तेन नैव युक्तं सुरोत्तम ।
कर्त्तुं मे ते नमस्कारं विद्यमाने महामुनौ ॥ ८१ ॥
तच्छ्रुत्वा स सुरः प्राह शृणु त्वं भो सुधीः पुरा ।
पापिना रुद्रदत्तेन मारितायाजकाय मे ॥ ८२ ॥
संन्यासपूर्वकं दत्ता त्वया पञ्चनमस्कृतिः ।
तत्प्रभावेन सौधर्मे देवो जातोहमद्भुतः ॥ ८३ ॥
तस्मात्त्वमेव मे स्वामिन्गुरुः सन्मार्गदर्शकः ।
इत्युक्त्वा स ततो देवो महाधर्मानुरागतः ॥ ८४ ॥
वस्त्राभरणसन्दोहै-श्चारुदत्तं गुणोज्वलम् ।
समभ्यर्च्य पुनर्नत्वा स्वर्गलोकं गतो मुदा ॥ ८५ ॥

परोपकारिणो लोके सन्ति ये बुधसत्तमाः ।
कैः सुराद्यैर्न पूज्यन्ते महाभक्तिभरैश्च ते ॥ ८६ ॥
ततः सिंहयशाः सोपि वराहग्रीवसंज्ञकः ।
विद्याधरेशिनौ तौ द्वौ नत्वा तं मुनिनायकम् ॥ ८७ ॥
चारुदत्तवणिक्पुत्रं नाना रत्नादिभिर्युतम् ।
नीत्वा चम्पापुरीं भूत्या भक्त्या संस्थाप्य सौख्यतः ॥ ८८ ॥
तं प्रणम्य समापृच्छ्य स्वस्थानं जग्मतुः सुखम् ।
अहो पुण्येन जीवानां किं न जायेत भूतले ॥ ८९ ॥
तस्माच्छ्रीमज्जिनेन्द्रोक्तः सद्धर्मोसौ चतुर्विधः ।
दानपूजाव्रतैः शीलैः पालनीयो बुधैः श्रिये ॥ ९० ॥
भानुः श्रेष्ठी सुभद्रा सा चारुदत्तागमे तदा ।
अन्ये चम्पापुरीलोकाः प्रीतिं प्राप्ता महाद्भुताम् ॥ ९१ ॥
चारुदत्तः सुधीश्चापि भुक्त्वा भोगान्स्वपुण्यतः ।
समाराध्य जिनेन्द्रोक्तं धर्मशर्माकरं चिरम् ॥ ९२ ॥
ततो वैराग्यमासाद्य सुन्दराख्यसुनाय च ।
दत्वा श्रेष्ठिपदं पूतं दीक्षां जैनेश्वरीं श्रितः ॥ ९३ ॥
संन्यासविधिना कालं कृत्वासौ शल्यवर्जितः ।
स्वर्गलोकं समासाद्य देवो जातो महर्द्धिकः ॥ ९४ ॥
तत्र भोगान्सुभुञ्जानः स्वर्गलोकसमुद्भवान् ।
कुर्वन्यात्रां जिनेन्द्राणां महास्वर्णाचलादिषु ॥ ९५ ॥
साक्षात्तीर्थकरानुच्चैः केवलज्ञानलोचनान् ।
चारुदत्तचरो देवः समभ्यर्चत्सुभक्तितः ॥ ९६ ॥

शृण्वन् जैनेश्वरीं वाणी-माप्तेभ्यः शर्मदायिनीम् ।
इत्यादिधर्मसंसक्तः स देवः सुखतःस्थितः ॥ ९७ ॥
श्रीमत्सारसुरेन्द्रचन्द्रनिकरैर्नागेन्द्रसत्खेचरैः
षट्खण्डाधिपभूचरैश्च नितरां भक्त्या सदाभ्यर्चितम् ।
धर्मं श्रीजिनभाषितं शुचितरं स्वर्गापवर्गप्रदं
नित्यं सारसुखाय शर्मनिलयं सन्तः श्रयन्त्वञ्जसा ॥ ९८ ॥

इति कथाकोशे चारुदत्तकथा समाप्ता ।

३६–पाराशरकथा ।

नत्वा श्रीमज्जिनं देवं ज्ञातुं चान्यमतं सताम् ।
वक्ष्ये पाराशरस्याहं कुमुनेर्लौकिकी कथा ॥ १ ॥
हस्तिनागपुरे पूर्वं गंगादिभटधीवरः ।
एकदासौ महामत्स्यं धृत्वा जालेन पापधीः ॥ २ ॥
तां निहन्ति यदा ताव-त्तस्याः कुक्षेर्विनिर्गता ।
कन्यासद्रूपसंयुक्ता महादुर्गन्धविग्रहा ॥ ३ ॥
तेन सत्यवतीत्युक्त्वा पोषिता धीवरेण च ।
हा कष्टं दुर्दृशां शास्त्रं सर्वमेतदसत्यकम् ॥ ४ ॥
गंगातीरे च तां कन्यां सनावं सोपि धीवरः ।
धृत्वा गंगभटो गेहं गतश्चैकदिने मुदा ॥ ५ ॥
ततो ग्राम्यमुनिस्तत्र नाम्ना पाराशरः कुधीः ।
मार्गश्रान्तः समागत्य नद्यास्तीरे निजेच्छया ॥ ६ ॥

गन्तुं नदीं समुत्तीर्य तां जगाद सुकन्यकाम् ।
एहि मां नय भो कन्ये नद्याः पारं मनोहरम् ॥ ७ ॥
तयागत्य तदा शीघ्रं नौ मध्येसौ धृतः सुखम् ।
नीयमानः पुनः प्राह दृष्ट्वा तद्रूपमद्भुतम् ॥ ८ ॥
मामिच्छेति समाकर्ण्य कन्या सत्यवती जगौ ।
दुर्जातिर्दुष्टगन्धाहं कथं स्पर्शं करोमि ते ॥ ९ ॥
त्वं तपस्वी सदा गंगा-नदीस्नानविधायकः ।
शापानुग्रहसंयुक्तो बिभेमीति स्वचेतसि ॥ १० ॥
ततस्तस्याश्च दुर्गन्धं स्फेटयित्वा स्वविद्यया ।
सुगन्धकुसुमामोदं स चक्रे तच्छरीरकम् ॥ ११ ॥
तया प्रोक्तमहो स्वामिँल्लोकाः पश्यन्ति सर्वतः ।
तदासौ धूमरीं कृत्वा नौ मध्ये कामलम्पटः ॥ १२ ॥
द्वीपं तत्र विधायोच्चैः परिणीय च तां पुनः ।
कामसेवां तया सार्द्धं यावत्पाराशरो व्यधात् ॥ १३ ॥
तत्क्षणे पञ्चकूर्चादि-जटायज्ञोपवीतभीक् ।
व्यासनामाऽभवत्पुत्रः पितुश्चक्रेभिवादनम् ॥ १४ ॥
लौकिकं लपितं चेति मत्तचेष्टा समानकम् ।
कस्य चित्ते समायाति सदृष्टेर्ज्ञानचक्षुषः ॥ १५ ॥
इत्थं मत्तजनप्रजल्पितमिमं भक्त्या कुवादीरितं
विद्वद्भिर्जिनतत्वसारनिपुणैः सार्द्धं सदा संगतिम् ।
कृत्वा श्रीजिनधर्मकर्मणि रता भूत्वा स्वयं भक्तितो
नित्यं शास्त्रमहाशुभे शुचिमतिं कुर्वन्तु सन्तः श्रिये ॥ १६ ॥

इति कथाकोशे पाराशरस्य लौकिकी कथा समाप्ता ।

३७—सात्यकिरुद्रयोः कथा।

श्रीजिनं केवलज्ञान-लोचनं सम्प्रणम्य च।
वक्ष्येहं पूर्वसूत्रेण कथां सात्यकिरुद्रयोः॥ १॥
गन्धारविषये रम्ये महेश्वरपुरेभवत्।
राजा सत्यन्धरस्तस्य राज्ञी सत्यवती मता॥ २॥
तयोः सात्यकिनामाभूत्पुत्रो राजकलान्वितः।
राजविद्यां विना राजा राजते नैव भूतले॥ ३॥
सिन्धुदेशे विशालाख्य-पत्तने चेटको नृपः।
श्रीमज्जिनेन्द्रपादाब्ज-सेवनैकमधुव्रतः॥ ४॥
तस्य राज्ञी सुभद्राऽभूत्सती व्रतमतल्लिका।
पुत्र्यस्तयोः समुत्पन्नाः सप्त सद्रूपमण्डिताः॥ ५॥
तासामाद्याभवत्पुत्री पवित्रा प्रियकारिणी।
मृगावती द्वितीया च तृतीया सुप्रभा मता॥ ६॥
प्रभावती चतुर्थी च पञ्चमी चेलिनी शुभा।
ज्येष्ठा षष्ठी बुधैः प्रोक्ता सप्तमी चन्दना सती॥ ७॥
अथाभयकुमारेण श्रेणिकाय महीभुजे।
चेलिन्या भूमिमार्गेण प्रच्छन्नं नीयमानया॥ ८॥
सा ज्येष्ठाभरणव्याजाद्वञ्चिता दुःखिता सती।
यशस्वत्यर्यिकापार्श्वे दीक्षां जग्राह भक्तितः॥ ९॥
सात्यकेस्तस्य सा ज्येष्ठा पूर्वं दत्तास्ति वाक्यतः।
तस्या दीक्षां समाकर्ण्य सात्यकिस्तु विरक्तधीः॥ १०॥
मुनेः समाधिगुप्तस्य नत्वा पादद्वयं मुदा।
जिनदीक्षां समादाय सोपि जातो मुनिस्तदा॥ ११॥

एकदा वर्द्धमानस्य श्रीमत्तीर्थकरेशिनः ।
वन्दनार्थं प्रगच्छन्त्यो यशस्वत्ययिकादयः ॥ १२ ॥
महाटव्यामकालोत्थ-वृष्ट्या ताः पीडितास्तराम् ।
इतस्ततो गताः कष्टं प्रावृट्काले हि दुःसहः ॥ १३ ॥
जेष्ठा कालगुहामध्य संप्रविश्य स्ववासमः ।
चक्रे निपीडनं चित्त मत्वैकान्तं निजेच्छया ॥ १४ ॥
अन्धकारे स्थितस्तत्र सात्यकिः स मुनिस्तदा ।
तां दृष्ट्वा विह्वलीभूत-मानसोजनि पापतः ॥ १५ ॥
तद्वपुर्वन्हिना मूढः स्वकीयं शीलरत्नकम् ।
भस्मीचकार हा कष्टं कामान्धः किं करोति न ॥ १६ ॥
ततस्तदिङ्गितैर्ज्ञात्वा यशस्वन्यर्यिका सती ।
नीत्वा तां चेलिनीपार्श्वे स्थापयामास शुद्धधीः ॥ १७ ॥
प्रच्छन्न च तया ज्येष्ठा चेलिन्या स्वगृहे धृता ।
सद्दृष्टयः प्रकुर्वन्ति दर्शनच्छादनं महत् ॥ १८ ॥
सा ज्येष्ठा नवभिर्मासैः प्रसूता तनुजं ततः ।
चेलिन्यास्तनुजो जातः श्रेणिकेनेति घोषितम् ॥ १९ ॥
कैश्चिद्दिनैरसौ सार्द्धं वृद्धिं प्राप दुराशयैः ।
यो वृक्षो मूलतो नष्टस्तत्फले क्वात्र मिष्टता ॥ २० ॥
एकदा रौद्रभावेन मारयत्परपुत्रकान् ।
चेलिन्या रुष्टया सोपि रुद्रनामेति जल्पितः ॥ २१ ॥
तथैकदा कृतेऽन्याये चेलिनी प्राह कोपतः ।
अन्येन जनितोप्ययं सन्तापयति पापधीः ॥ २२ ॥

तच्छ्रुत्वा रुद्रकश्चित्ते किमप्यत्रास्ति कारणम् ।
विचार्येति नृपं प्राह को मे तातो महाग्रहात् ॥ २३ ॥
ततः कष्टेन तेनोक्तं समाकर्ण्य स्ववृत्तकम् ।
गत्वा सात्यकिसान्निध्ये रुद्रो दीक्षां गृहीतवान् ॥ २४ ॥
ततश्चैकादशाङ्गानि दशपूर्वमहाश्रुतम् ।
तस्योचैः पठतः शास्त्र-प्रभावेण समागता ॥ २५ ॥
विद्याः पञ्चशतान्याशु महत्यश्च तथा पराः ।
लघ्व्यः सप्तशतान्येव विद्याः सिद्धा मनोहराः ॥ २६ ॥
लोभतः सोपि ता विद्याः स्वीचक्रे रुद्रकस्तदा ।
श्रेयसे न भवेल्लोभो भाविसौख्यक्षयंकरः ॥ २७ ॥
रुद्रस्ताभिश्च विद्याभि-र्गोकर्णगिरिमस्तके ।
महातापनयोगस्थं सात्यकिं तं मुनीश्वरम् ॥ २८ ॥
वन्दितुं ये समायान्ति भक्ता भव्यमतल्लिकाः ।
सिंहव्याघ्रादिरूपेण दुष्टस्तांस्त्रासयते तराम् ॥ २९ ॥
तदाकर्ण्य तकं प्राह सात्यकिर्मुनिसत्तमः ।
अहो रुद्र वृथा चेष्टां मा कुरु त्वं प्रकष्टदाम् ॥ ३० ॥
स्त्रीनिमित्तात्तपोभङ्गः संभविष्यति ते कुधीः ।
इत्याकर्ण्य गुरोर्वाक्यं स रुद्रो दुष्टमानसः ॥ ३१ ॥
चेष्टां न मुञ्चति स्मोच्चै-स्तां करोति स्म पापतः ।
मानसे नैव तिष्ठन्ति पापिनां सद्गुरोर्गिरः ॥ ३२ ॥
ततः कैलासनामानं पर्वतं सुमनोहरम् ।
गत्वा तापनयोगेन स्थितोसौ मुनिमर्कटः ॥ ३३ ॥

अथेह विजयार्द्धे च दक्षिणश्रेणिसंस्थितम् ।
पुरं मेघनिबद्धाख्यं मेघादिनिचयं पुनः ॥ ३४ ॥
तथा मेघनिदानं च तेषु राजा महानभूत् ।
कनकादिरथो नाम्ना राज्ञी तस्य मनोहरा ॥ ३५ ॥
तयोः पुत्रौ समुत्पन्नौ देवदारुर्द्वितीयकः ।
विद्युज्जिह्वो महाविद्या-रूपसौभाग्यमण्डितौ ॥ ३६ ॥
एकदा स महाराज-स्त्रिधा वैराग्ययोगतः ।
देवदारुसुपुत्राय राज्यं दत्वा प्रमोदतः ॥ ३७ ॥
दीक्षां गणधराख्यस्य मुनेः पार्श्वे विकल्मषः ।
समादाय मुनिर्जातो भव्यसन्दोहतारकः ॥ ३८ ॥
कैश्चिद्दिनैस्ततः सोपि देवदारुखगाधिपः ।
निर्घाटितो लघुभात्रा विद्युज्जिह्वेन लोभिना ॥ ३९ ॥
तस्मात्कैलासमागत्य संस्थितो मानभंगतः ।
कुटुम्बकलहेनात्र नष्टाः के के न भूतले ॥ ४० ॥
तस्याष्टौ च महाकन्याः प्रोल्लसद्रूपसम्पदाः ।
वाप्यां स्नातुं समायान्ता यत्रास्ते रुद्रको मुनिः ॥ ४१ ॥
यावद्वापी तटे धृत्वा वस्त्राभरणसंञ्चयम् ।
कन्यास्तोयं प्रविष्टास्ताः स्नानं कर्त्तुं निजेच्छया ॥ ४२ ॥
तदा तद्रूपसंसक्तः स रुद्रः स्मरपीडितः ।
विद्यया चोरयामास तासां वस्त्रादिकं कुधीः ॥ ४३ ॥
ततस्ताभिः समागत्य व्याकुलाभिः स्वेतसि ।
पृष्टः सोपि मुनिः स्वामिन्नस्माकं केन सहृतः ॥ ४४ ॥

वस्त्रालंकारसन्दोहो ब्रूहि भो नाथ वेगतः ।
आपदायां कुतो लज्जा प्राणिनां पापकर्मतः ॥ ४५ ॥
तेनोक्तं यदि मां यूय-मिच्छथेति सुनिश्चितम् ।
तदाहं दर्शयाम्युच्चै-र्युस्माकं सर्ववस्तुकम् ॥ ४६ ॥
ताभिरुक्तं यदास्माकं पिता तुभ्यं ददाति नः ।
त्वामिच्छामस्तदा सत्यं वाक्यमेतत्कुलस्त्रियः ॥ ४७ ॥
इत्युक्ते तेन तत्सर्वं तासामेव समर्पितम् ।
ताभिस्ततो गृहं गत्वा स्वपितुस्तं निरूपितम् ॥ ४८ ॥
तदाकर्ण्य ततस्तेन देवदारुखगेशिना ।
प्रधानः प्रेषितः शीघ्रं तत्समीपेषु कार्यवित् ॥ ४९ ॥
विद्युज्जिह्वं खगं हत्वा राज्यं मे त्रिपुरोद्भवम् ।
त्वं ददासि तदा तुभ्यं दीयन्ते सर्वकन्यकाः ॥ ५० ॥
इति श्रुत्वा प्रधानोक्तं सर्वमेवं करोम्यहम् ।
अंगीचकार तद्रुद्रः कामी किं न करोत्यघम् ॥ ५१ ॥
तदातेन खगेन्द्रेण नीतोसौ स्वगृहं मुदा ।
किं करोति न राज्यार्थं राज्यभ्रष्टो महीपतिः ॥ ५२ ॥
ततो रौद्रेण रुद्रेण स्वविद्यानां प्रभावतः ।
विजयार्द्धगिरिं गत्वा हत्वा तं दुष्टमानसम् ॥ ५३ ॥
विद्युज्जिह्वं खगाधीशं त्रिपुरेषु तदा द्रुतम् ।
देवदारुर्नृपो राज्ये स्थापितः सन्महोत्सवैः ॥ ५४ ॥
ततस्तेन महाभूत्या विद्याधरमहीभुजा ।
तस्मै रुद्राय ताः कन्या दत्ताश्चान्यास्तु भूरिशः ॥ ५५ ॥

तदा तस्य महातीव्र-कामसेवावशं गताः ।
अन्येषां भूभुजां कन्याः शतशश्च क्षयं ययुः ॥ ५६ ॥
ततौसौ पार्वतीख्यातां परिणीय गुणोज्वलाम् ।
संजातः कामभोगेषु सन्तुष्टो रुद्रको महान् ॥ ५७ ॥
दुरात्मना ततस्तेन सर्वे भूपादयस्तराम् ।
पीडिताः स्वस्य विद्याभि-दुष्टात्मा कस्य शान्तये ॥ ५८ ॥
ततस्तस्याश्च पार्वत्या-स्तातायैर्दुःखतो भृशम् ।
कामसेवाक्षणे तस्य विद्यास्तिष्ठन्ति दूरतः ॥ ५९ ॥
इति ज्ञात्वा स संभोग-समये क्रूरमानसः ।
सस्त्रीको मारितः कष्टं पापिनां सुहृदोरयः ॥ ६० ॥
तदा तस्य महाविद्याः स्वनाथमरणक्षणे ।
प्रजानां पीडनं चक्रु-र्नाना व्याधिशतैस्तराम् ॥ ६१ ॥
ततो ज्ञानिमुनेर्वाक्यात्कस्यचित्ते पुनर्जनाः ।
एकवारं स्वशान्त्यर्थं कृत्वा लिङ्ग क्षमां जगुः ॥ ६२ ॥
इदं तस्मान्महामूढो गड्डरीणां प्रवाहवत् ।
देवत्वं मानसे ज्ञात्वा मानयन्ति स्म दुर्दशः ॥ ६३ ॥
देवोर्हन्दोषनिर्मुक्तो देवेन्द्राद्यैः प्रपूजितः ।
केवलज्ञानसाम्राज्यो नान्यो रागादिदूषितः ॥ ६४ ॥
सकलभुवननाथैः पूजितो भक्तिभारैः
विमलतरगुणौघः केवलज्ञानचन्द्रः ।
निखिलसुखसुदाता सर्वसन्तापहर्त्ता
स जयतु जगदेकः श्रीजिनो मे प्रशान्त्यै ॥ ६५ ॥

इति कथाकोशे सात्यकिरुद्रयोः कथा समाप्ता ।

३८–ब्रह्मणः कथा ।

नत्वा जिनं जगत्पूज्य-माद्यब्रह्माणमद्भुतम् ।
ब्रह्मेति देवपुत्रोसौ वक्ष्येहं लौकिकीं कथाम् ॥ १ ॥
एवं मूढाः प्रजल्पन्ति ब्रह्मासावेकदामुदा ।
इन्द्रादीनां पदं जित्वा सर्वोत्कृष्टो भवाम्यहम् ॥ २ ॥
इत्यास्थया महाटव्या-मूर्द्धबाहुः प्रकष्टतः ।
देवताद्धेचतुर्वर्ष-सहस्राणि महातपः ॥ ३ ॥
कुर्वन्नेकपदेनोच्चै-र्भुञ्जानः पवनं स्थितः ।
तपःशक्त्या तदेन्द्रादे-र्जातमासनकम्पनम् ॥ ४ ॥
इन्द्रनागेन्द्ररुद्राद्याः स्वराजक्षयभीतितः ।
अप्सरोरूपमादाय कृत्वा देवीं तिलोत्तमाम् ॥ ५ ॥
नाना गन्धर्वसद्गान-पेटकाद्यैः समन्विताम् ।
तत्पार्श्वे प्रेषयामासुः सत्तपःक्षयहेतवे ॥ ६ ॥
सापि स्वर्गात्समागत्य तत्समीपे सुरांगना ।
हावैर्भावैर्विलासाद्यैः संचक्रे नर्त्तनं महत् ॥ ७ ॥
सोपि तद्रूपसंसक्तो भूत्वा ब्रह्मा स्वमानसे ।
प्रोत्फुल्ललोचनस्तां च पश्यति स्म स्मरोहतः ॥ ८ ॥
तच्चित्तं सा परिज्ञात्वा विद्धं कन्दर्पसायकैः ।
ब्रह्मणो वामपार्श्वे च गत्वा नृत्यं चकार च ॥ ९ ॥
दिव्यवर्षसहस्रोत्थ-तपसा दारुणेन च ।
तत्रापि वामपार्श्वेसौ चक्रे वक्त्रं द्वितीयकम् ॥ १० ॥
एवं क्रमात्तदासक्तो जातोसौ चतुराननः ।
ऊर्द्धे च गर्दभाकारं स्वतुण्डं कृतवान्पुनः ॥ ११ ॥

सा नर्त्तकी तपो भ्रष्टं तं विधायेति धूर्त्तिका ।
स्वर्गे गत्वा सुरेन्द्राणां नत्वा तद्वृत्तकं जगौ ॥ १२ ॥
भो स्वामिनः सुखं नित्यं यूयं तिष्ठथ लीलया ।
कन्दर्पमूर्च्छितो ब्रह्मा सम्पपात महीतले ॥ १३ ॥
इन्द्रेणोक्तं तदाकर्ण्य तत्र किं त्वं स्थिता न हि ।
सा जगादेति भो देव वृद्धोसौ नैव रोचते ॥ १४ ॥
ततः कारुण्यभावेन देवेन्द्रेण महाधिया ।
उर्वशी प्रेषिता वेश्या तत्समीपे मनोहरा ॥ १५ ॥
सापि तत्र समागत्य शक्रादेशेन भक्तितः ।
कृत्वा तत्पादसंस्पर्शं चक्रे तं च सचेतनम् ॥ १६ ॥
तदा तामुर्वशीं प्राप्य गृहं कृत्वा निजेच्छया ।
नाना भोगान्प्रभुञ्जानः स ब्रह्मा लौकिकः स्थितः ॥ १७ ॥
अहो मूढा न जानन्ति देवं देवस्वरूपकम् ।
जल्पन्ति मत्तवन्नित्यं स्वेच्छया सत्यवर्जितम् ॥ १८ ॥
इन्द्रादीनां पदं दिव्यं गृह्यते केन तद्धठात् ।
किं दुराचारमित्युच्चैः कुर्वन्ति सुरयोषितः ॥ १९ ॥
यो ब्रह्मा त्रिजगद्देवः किं करोति कुकर्म सः ।
सर्वमेतदसत्यं हि ज्ञातव्यं नीतिवेदिभिः ॥ २० ॥
श्रीमज्जिनागमे प्रोक्तो ब्रह्मासौ पञ्चधा ध्रुवम् ।
मोक्षे तथाऽऽत्मनिज्ञाने चारित्रे वृषभप्रभुः ॥ २१ ॥
अन्यथा न परो ब्रह्मा विद्यते भुवनत्रये ।
रागादिदूषितः कामी कथं देवो भवेद्भुवि ॥ २२ ॥

यस्तु रागादिभिर्मुक्तो लोकालोकप्रकाशकः ।
केवलज्ञानसचक्षु स मे ब्रह्मा वृषध्वजः ॥ २३ ॥
यो जानात्यखिलं जगत्त्रयमिद सत्केवलज्ञानभाक्
भव्याम्भोरुहभास्करोतिचतुर संसारनिस्तारकः ।
ब्रह्मा श्रीवृषभेश्वरो गुणनिधि स्वर्गापवर्गप्रदः
स स्यान्मे भवशान्तये शुचितरो देवेन्द्रवर्यैः स्तुतः ॥ २४ ॥

इति कथाकोशे लौकिकस्य ब्रह्मणः कथा समाप्ता ।

३९–परिग्रहाद्भीतस्य धनदत्तस्य कथा ।

नत्वा निर्ग्रन्थनाथेशं श्रीजिनं परमेश्वरम् ।
ग्रन्थोत्पन्नं भय प्राप्तौ भ्रातरौ तत्कथां ब्रुवे ॥ १ ॥
दशार्णविषये रम्ये पुरे चैकरथाभिधे ।
धनदत्तोभवच्छ्रेष्ठी धनदत्ता प्रिया तयोः ॥ २ ॥
संजातौ धनदेवाख्य-धनमित्रौ सुतोत्तमौ ।
धनमित्राभवत्पुत्री स्वरूपगुणमण्डिता ॥ ३ ॥
धनदत्ते मृते तस्मिन्स्तौ पुत्रौ पापकर्मणा ।
दारिद्र्येण महाकष्टं पीडितौ शर्महारिणा ॥ ४ ॥
कौशाम्बीं नगरीं गत्वा प्रणम्य निजमातुलम् ।
ऊचतुः साश्रुपातं च स्वपितुर्मरणं तदा ॥ ५ ॥
मातुलोपि ततो धीमान् श्रुत्वा तद्वृत्तकं तयोः ।
समुद्धीर्य शुभैर्वाक्यै-रष्टानर्घ्यमणीन्ददौ ॥ ६ ॥

बन्धुत्वं तद्दयालुत्वं गम्भीरत्वं तदेव च ।
अर्थिनां यान्निजैर्वित्तै-र्भवेदाशाप्रपूरणम् ॥ ७ ॥
तौ तान्मणीन्समादाय मार्गे तल्लोभतस्तराम् ।
चिन्तयामासतुश्चित्ते मारणं च परस्परम् ॥ ८ ॥
ततः स्वपुरसानिध्यं समागत्य स्वमानसे ।
पश्चात्तापं विधायोच्चै-स्तौ प्रकाश्य मनोमलम् ॥ ९ ॥
क्षिप्त्वा वेत्रवतीनद्यां तान्मणीन्गृहमागतौ ।
मत्स्येन गिलितास्ते तु मांसं मत्वा सुपापिना ॥ १० ॥
ततोसौ धीवरेणैव हतस्तोयचरः पुनः ।
तयोर्मातुः करे प्राप्ता मणयः कर्मयोगतः ॥ ११ ॥
तदासौ धनदत्तापि मणीनादाय मानसे ।
पुत्रपुत्रीमहाघातं चिन्तयामास लोभतः ॥ १२ ॥
पुनर्निन्दां निजां कृत्वा स्वपुत्र्यै संददौ मणीन् ।
गृहीत्वा धनमित्रा च महापापप्रमोहिता ॥ १३ ॥
सापि स्वभ्रातृमातॄणां चित्ते धत्ते स्म मारणम् ।
अहो कष्टं कुधीर्लोभो जन्तूनां पापकारणम् ॥ १४ ॥
ततस्तया निजे चित्ते पश्चात्तापं विधाय च ।
भ्रातृभ्यां मणयो दत्ता कष्टकोटिविधायकाः ॥ १५ ॥
तौ तान्मणीन्परिज्ञात्वा महावैराग्ययोग्यतः ।
त्यक्त्वा परिग्रहं सर्वं महाक्लेशस्य कारकम् ॥ १६ ॥
स्वमातृभगिनीयुक्तौ नत्वा दमधराभिधम् ।
मुनीन्द्रं परया भक्त्या स्वर्गमोक्षसुखप्रदम् ॥ १७ ॥

दीक्षामादाय जैनेन्द्रीं सुरेन्द्राद्यैः समर्चिताम् ।
जातौ मुनी जगत्पूज्यौ निजात्मपरताकरौ ॥ १८ ॥
मत्वैवं भवभूरिदुःखजनकं लोभं महापापदं
मातृभ्रातृकुटुम्बवञ्चनगृहं त्यक्त्वा त्रिधा धार्मिकैः ।
श्रीमज्जैनमते जगत्त्रयहिते धर्मे सुशर्मप्रदे
कर्त्तव्यं सुमनो दृढं प्रतिदिनं शुद्धं महाश्रेयसे ॥ १९ ॥

इति कथाकोशे परिग्रहाद्भयमिति कथा समाप्ता ।

४०–धनाद्भीतस्य सागरदत्तस्य कथा ।

प्रणम्य परमात्मानं श्रीजिनं केवलेक्षणम् ।
जातं भयं धनाच्चेति कथयामि कथानकम् ॥ १ ॥
कौशाम्ब्यां धनमित्राख्य-धनदत्तादयो मुदा ।
वाणिज्येन वणिक्पुत्रा निर्गता राजगेहकम् ॥ २ ॥
तस्करैश्च महाटव्यां पापिष्ठैस्तद्धनं हृतम् ।
हानिर्लोके विपुण्याना-मुद्यमेपि भवेद्ध्रुवम् ॥ ३ ॥
चोरास्तेपि धनार्थं च मारणार्थं परस्परम् ।
रात्रौ चक्रुर्विषाहारं हा कष्टं दुष्ट चेष्टितम् ॥ ४ ॥
दस्यवस्ते तदाहारं भुक्त्वाशु प्राणनाशकम् ।
मृत्युं प्रापुः प्रकष्टेन क भवेत्पापिनां शुभम् ॥ ५ ॥
तेषां मध्ये वणिक्पुत्रः सुधीः सागरदत्तवाक् ।
रात्रिभुक्तिव्रतात्तेन न भुक्तं तद्विषान्नकम् ॥ ६ ॥

समालोक्य तदा सोपि तेषां मृत्युं विरक्तवान् ।
संत्यक्त्वा तद्धनं त्रेधा मुनिर्जातो जगद्धितः ॥ ७ ॥
एकेनापि जिनेन्द्रदेवकथिते नोच्चैर्व्रतेन स्वयं
ज्ञात्वा संसृतिचेष्टितं च हृदये विद्युच्चलं जीवितम् ।
त्यक्त्वा तच्च धनं विशिष्टचरणो ज्ञातो मुनिः शुद्धधीः
स श्रीसागरदत्तवाग्गुणनिधिः कुर्यात्सतां मंगलम् ॥ ८ ॥

इति कथाकोशे धनार्द्दीतस्य सागरदत्तस्य कथा समाप्ता ।

४१–धनाद्भमबुद्धिकुबेरदत्त-कथा ।

श्रीजिनं त्रिजगत्पूज्यं भारतीं भुवनोत्तमाम् ।
नमस्कृत्य गुरुं भक्त्या वक्ष्ये संगकथानकम् ॥ १ ॥
देशे मणिवते ख्याते पुरे मणिवताभिधे ।
राजा मणिवतो नाम्ना तद्राज्ञी पृथिवीमती ॥ २ ॥
तत्पुत्रो मणिचन्द्राख्यः संजातो गुणसंयुतः ।
शूरो धीरोतिगंभीरो राजविद्याविराजितः ॥ ३ ॥
स राजा पूर्वपुण्येन कुर्वन्राज्यं निजेच्छया ।
संस्थितः श्रीजिनेन्द्रोक्त-धर्मकर्मपरायणः ॥ ४ ॥
दानं भक्त्या सुपात्रेषु पूजां श्रीमज्जिनेशिनाम् ।
नित्यं परोपकारं च करोति स्म स भूपतिः ॥ ५ ॥
एकदा पृथिवीदेवी कुर्वती केशसंस्कृतिम् ।
मस्तके स्वपतेः केशं पलितं वीक्ष्य सा ददौ ॥ ६ ॥

दृष्ट्वा मणिवतो राजा केशं वा यमपाशकम् ।
त्रिधा वैराग्यमापन्नो जैनतत्वविदाम्वरः ॥ ७ ॥
स्वराज्यं मणिचन्द्राय दत्वा पुत्राय धीमते ।
कृत्वा पूजां जिनेन्द्राणां महास्नपनपूर्वकम् ॥ ८ ॥
दानं दत्वा यथायोग्य-मर्थिभ्यो विनयान्वितः ।
जिनदीक्षां समादाय मुनिर्जातो जगद्धितः ॥ ९ ॥
एकदासौ विशुद्धात्मा संस्मरञ्जिनपादयोः ।
एकाकी विहरन्धीमा-नुज्जयिन्याः श्मशानके ॥ १० ॥
समागत्य स्थितो रात्रौ धीरो मृतकशय्यया ।
ध्यायंश्चित्ते महाशान्त्यै परमात्मानमुत्तमम् ॥ ११ ॥
तदा कापालिकः पापी तत्रागत्य श्मशानके ।
मृतकद्वयं समानीय मुनेः पार्श्वे सुनिर्घृणः ॥ १२ ॥
तन्मस्तकत्रयेणाशु कृत्वा चुल्लीं निजेच्छया ।
तत्र वेतालिकीविद्या-साधनार्थं नरस्य च ॥ १३ ॥
कपाले चरुकं कर्तुं प्रवृत्तो वह्निना तदा ।
मुनेस्तस्य नसादाहात्पतिते च कपालके ॥ १४ ॥
नष्टः कापालिकः सोपि भयाचकितमानसः ।
मुनीन्द्रो मेरुवद्धीरो तथैवोच्चैः स संस्थितः ॥ १५ ॥
प्रभाते तं मुनिं दृष्ट्वा केनचित्कर्मयोगतः ।
श्रेष्ठिनो जिनदत्तस्य प्रोक्तं तद्वृत्तकं तदा ॥ १६ ॥
श्रेष्ठिना तेन तच्छ्रुत्वा गत्वा शीघ्रं श्मशानके ।
तं विलोक्य मुनिं धीरं हाहाकारं विधाय च ॥ १७ ॥

समानीय निजं गेहं महायत्नेन धीमता ।
पृष्टो वैद्यो मुनेस्तस्य शान्त्यर्थं सोपि संजगौ ॥ १८ ॥
अहो श्रेष्ठिन्सुधीः सोम-शर्मभट्टगृहेस्ति च ।
लक्षपाकं शुभं तैलं तेन स्यादग्निशान्तिता ॥ १९ ॥
श्रेष्ठिना तत्समाकर्ण्य गत्वा विप्रगृहं तदा ।
तुंकारी नामतद्भार्या तत्तैलं याचिता सती ॥ २० ॥
तया प्रोक्तं गृहाणैकं भो श्रेष्ठिंस्तैलसद्घटम् ।
केचिल्लोकेर्थिनां सन्ति दानिनो वा सुरद्रुमाः ॥ २१ ॥
ततस्तद्घटमादाय निर्गतो यावदेव सः ।
भग्नो घटस्ततस्तेन पुनस्तस्या निरूपितम् ॥ २२ ॥
सा जगाद सुधीरन्यो घटः संगृह्यते त्वया ।
चित्तं सतां भवेन्नित्यं गंभीरं सागरादपि ॥ २३ ॥
स्फुटिते च द्वितीयेस्मिन्कर्मतस्तृतीयेपि च ।
सा तुंकारी सती प्राह भो श्रेष्ठिन्मा भयं कुरु ॥ २४ ॥
यावत्ते कार्यसिद्धिः स्यात्तावत्तैलं गृहाण मे ।
तच्छ्रुत्वा जिनदत्तेन श्रेष्ठिना निजमानसे ॥ २५ ॥
अस्याः क्षमा महाश्चर्य-मद्वितीयात्र दृश्यते ।
संविचार्येति सा प्रष्टा भो मातः केन हेतुना ॥ २६ ॥
कृते महापराधेस्मिन्कोपो न क्रियते त्वया ।
तया प्रोक्तं मया प्राप्तं भो सुधीः कोपजं फलम् ॥ २७ ॥
तत्कथं श्रूयतां तात पुरे चानन्दनामनि ।
विप्रोभूच्छिवशर्माख्यो धनवान्नृप पूजितः ॥ २८ ॥

कमलश्रीः प्रिया पुत्राः शिवभूत्यादयोऽभवन् ।
अष्टाहं नवमी पुत्री भद्रा नाम्नी मता जनैः ॥ २९ ॥
रूपलावण्यसौभाग्य-महामानविराजिता ।
तुंकर्त्तु मां समर्थो न विद्यते कोपि भीतितः ॥ ३० ॥
एकदा मे पिता पुर्यां दापयामास घोषणाम् ।
तुंकारं मे सुतां कोपि माकरोत्विति सर्वथा ॥ ३१ ॥
तदा तुंकारिका चेति संजातं मम नामकम् ।
महामानो भवत्यत्र श्रेयसे नैव देहिनाम् ॥ ३२ ॥
कदाचिन्न करोम्यस्य तुंकारमिति निश्चयात् ।
सोमशर्मद्विजेनाहं परिणीता कुलक्रमात् ॥ ३३ ॥
अत्रैवोज्जयिनीमध्ये समानीता विभूतिभिः ।
यावत्स्थिता सुखं गेहे सारसम्पद्विराजिते ॥ ३४ ॥
तावच्चैकं दिने सोम-शर्मा मे प्राणवल्लभः ।
रात्रौ नाट्यकलां दृष्ट्वा दीर्घकाले समागतः ॥ ३५ ॥
द्वारे स्थित्वा जगादोच्चै-रुद्घाटय कपाटकम् ।
मया तदा प्रकोपेन मौनेनावस्थितं गृहे ॥ ३६ ॥
बृहद्वेला गता याव-त्तावत्तेन क्रुधा मम ।
तुंकारितं तदा चित्ते कोपनाहं प्रकम्पिता ॥ ३७ ॥
वह्निज्वालेव मूढात्मा कृत्वा द्वारं निरर्गलम् ।
त्यक्त्वा गेहं पुरं चापि बहिर्योवद्विनिर्गता ॥ ३८ ॥
तावच्चोरैः समालोक्य गृहीत्वाभरणादिकम् ।
नाम्ना विजयसेनस्य भिल्लस्याहं समर्पिता ॥ ३९ ॥

पल्लिकायां स पापिष्ठः कुर्वन्मे शीलखण्डनम् ।
वारितो वनदेव्योच्चैः कृत्वा नानोपसर्गकम् ॥ ४० ॥
भिल्लो भीत्वा तदा सोपि सार्थवाहाय मां ददौ ।
सार्थवाहोपि मे शीलं कालं कर्तुं क्षमो न हि ॥ ४१ ॥
ततो रुष्टा स पापात्मा नीत्वा मां परतीरकम् ।
दत्तवान्क्रमिरागेण रक्तकम्बलकारिणे ॥ ४२ ॥
तदा तेन जलूकाभिः कष्टतो रक्तकं मम ।
कम्बलानां निमित्तेन स्वीकृतं भूरिवासरैः ॥ ४३ ॥
महाकोपेन जन्तूनां मादृशानां स्वपापतः ।
भो श्रेष्ठिन्संभवत्येव दुष्टापच्च पदे पदे ॥ ४४ ॥
उज्जयिन्या महीभर्त्रा तत्र पारसभूपतेः ।
पार्श्वे सम्प्रेषितो दूतो मद्भ्राता धनदेवभाक् ॥ ४५ ॥
कृतकार्येण तेनाहं दृष्ट्वा भ्रात्रा शुभोदयात् ।
प्रोक्त्वा तद्भूपतेः सर्व-मत्रानीय च भक्तितः ॥ ४६ ॥
सोमशर्मद्विजस्यास्य भर्तृकस्य समर्पिता ।
बान्धवास्ते भवन्त्येव ये कष्टे शर्मदायिनः ॥ ४७ ॥
रक्तक्षयात्तदा कष्टं वातेनाहं प्रपीडिता ।
लक्ष्यपाकेन तैलेन वैद्येन सुखिनी कृता ॥ ४८ ॥
ततो मया मुनीन्द्रेभ्यो धर्मं श्रुत्वा जिनेशिनाम् ।
सम्यक्त्वं त्रिजगत्पूतं व्रतं चादाय शर्मदम् ॥ ४९ ॥
नैव कस्योपरि श्रेष्ठिन्कर्तव्यः कोपको ध्रुवम् ।
स्वीचक्रे सद्व्रतं चेति शर्मकोटिविधायकम् ॥ ५० ॥

तस्माद्धो तात कुत्रापि कोपो न क्रियते मया ।
मारं तैलं गृहीत्वोच्चैः समाधानं मुनेः कुरु ॥ ९१ ॥
श्रेष्ठिना तां प्रणम्याशु तैलमादाय वेगतः ।
गत्वा गृहं मुनेस्तस्य शरीरे भूरि यत्नतः ॥ ९२ ॥
तत्तैलेन दिनैः कैश्चित्कृत्वा सम्मर्दनादिकम् ।
महाशान्ति विधायोच्चैः सारपुण्यमुपार्जितम् ॥ ९३ ॥
ततः श्रेष्ठी महाभक्त्या तस्यैव जिनमन्दिरे ।
जगत्पूज्यो मुनीन्द्रोसौ प्रावृट्योगं गृहीतवान् ॥ ९४ ॥
श्रेष्ठिनानर्घ्यरत्नौघैः पूरितस्ताम्रसद्घटः ।
सप्तव्यसनसंसक्त-स्वपुत्रस्य दुरात्मनः ॥ ९५ ॥
तदा कुवेरदत्तस्य भयात्तत्र जिनालये ।
निखन्य स्थापितो गूढं मुनेः शयनसन्निधौ ॥ ९६ ॥
तदा कुबेरदत्तोसौ प्रच्छन्नं पापमण्डितः ।
मत्सर्वं पश्यतिस्मोच्चै-श्चेष्टितं स्वपितुः कुधीः ॥ ९७ ॥
एकदा तेन पुत्रेण तस्मादुत्खन्य वेगतः ।
प्रासादं प्रांगणे सोपि निखन्य स्थापितो घटः ॥ ९८ ॥
मुनिर्विशुद्धचरित्रो जानन्पश्यन्नपि ध्रुवम् ।
तदा मध्यस्थभावेन संस्थितो मेरुवत्तराम् ॥ ९९ ॥
पूर्णयोगे तु योगीन्द्रः पृष्ट्वा तं श्रेष्ठिनं सुखम् ।
विहाराय विनिर्गत्य स्थितो ध्याने पुराद्बहिः ॥ ६० ॥
श्रेष्ठी कुम्भमनालोक्य संजातो व्यग्रमानसः ।
तं जानाति मुनिश्चैव नान्यः कोपीति चेतसि ॥ ६१ ॥

संविचार्य मुनेः पार्श्वे गत्वा देव मम ध्रुवम् ।
त्वां विना न रतिश्चित्ते तस्मादागच्छ भो पुरम् ॥ ६२ ॥
इत्यादि मायया पश्चा-त्तं समानीय सन्मुनिम् ।
पृच्छति स्म मुने ब्रूहि काञ्चिद्धर्मकथामिति ॥ ६३ ॥
तच्छ्रुत्वा स मुनिः प्राह भो श्रेष्ठिंस्त्वं महानपि ।
चिरश्रावकतो दिव्यं कथयात्र कथानकम् ॥ ६४ ॥
ततोऽसौ जिनदत्ताख्यः श्रेष्ठी स्वाभिमतार्थकम् ।
सूचयन्समुवाचैवं ख्याते पद्मरथे पुरे ॥ ६५ ॥
वसुपालो महाराज-स्तेनायोध्यापतिं प्रति ।
जितशत्रुं द्रुतं दूतः प्रेषितः कार्यहेतवे ॥ ६६ ॥
स दूतस्तु महाटव्यां तृषितो मूर्च्छयान्वितः ।
वृक्षाधः पतितः कष्टं गतप्राणश्चनोथवा ॥ ६७ ॥
दूतं कण्ठगतप्राणं तमालोक्यैकवानरः ।
निमज्य सरसि स्वच्छे तत्रागत्य दयापरः ॥ ६८ ॥
तस्योपरि स्वकीयं च संविधूय शरीरकम् ।
अग्रे भूत्वा जलं तस्य दर्शयामास निर्मलम् ॥ ६९ ॥
सोपि पापी पयः पीत्वा हत्वा तं वानरं पुनः ।
तच्चर्मभस्त्रिकां कृत्वा ततो गमनहेतवे ॥ ७० ॥
तोयमादाय दुष्टात्मा निर्गतो धर्मवर्जितः ।
किं स्वामिंस्तस्य दूतस्य युक्तं मर्कटमारणम् ॥ ७१ ॥
तदाकर्ण्य मुनीन्द्रोसौ प्रोक्त्वा युक्तं न तद्भुवि ।
निर्दोषत्वं स्वकीयं च सूचयन्सत्कथां जगौ ॥ ७२ ॥

कौशाम्बीपत्तने विप्रः शिवशर्माभिधानकः ।
ब्राह्मणी कपिला तस्य संजाता पुत्रवर्जिता ॥ ७३ ॥
एकदा शिवशर्मासौ दृष्ट्वाटव्यां द्विजोत्तमः ।
पिल्लकं नकुलस्योच्चैः समानीय स्वयोषितः ॥ ७४ ॥
इमं पुत्रं गृहाणेति कपिलायाः समर्पयत् ।
किं करोति न मोहान्धः प्राणी तत्वपराङ्मुखः ॥ ७५ ॥
ततोसौ पालितः सौख्यं शिक्षितो गृहकर्मकम् ।
करोति नकुलः किंचित्स्वशक्त्या प्रेषणं तदा ॥ ७६ ॥
ततश्च कपिला कुक्षौ पुत्रोद्भूत्कर्मयोगतः ।
तं सुप्तं मञ्चके पुत्रं सैकदा कपिला द्रुतम् ॥ ७७ ॥
नकुलस्य समर्प्योच्चै-स्तण्डुलान्खण्डितुं गता ।
तदा सर्पेण पुत्रोसौ भक्षितो मृत्युमाप्तवान् ॥ ७८ ॥
कोपतो नकुलः सोपि हत्वा सर्पं सुदारुणम् ।
रक्तलिप्तमुखः पश्चात्संप्राप्तः कपिलान्तिकम् ॥ ७९ ॥
अनेन मारितः पुत्रः इत्याशंक्य स्वमानसे ।
मारितो नकुलः कष्टं ब्राह्मण्या मुशलेन सः ॥ ८० ॥
पश्चात्स्वगेहमागत्य मृतं दृष्ट्वा भुजंगमम् ।
पश्चात्तापस्तया चक्रे धिङ्मूढानां विचेष्टितम् ॥ ८१ ॥
भो श्रेष्ठिन्सर्पदोषेण किं तस्या विप्रयोषितः ।
युक्तं निरपराधस्य नकुलस्यैव मारणम् ॥ ८२ ॥
न युक्तमिति भो देव श्रेष्ठी प्राह कथानकम् ।
वाणारस्यां महाराजो जितशत्रुर्विचक्षणः ॥ ८३ ॥

तद्वैद्यो धनदत्ताख्यो धनदत्ता प्रियाभवत् ।
तयोर्धनादिमित्राख्य-धनचन्द्रौ सुतौ मतौ ॥ ८४ ॥
पठितौ न भिषक्शास्त्रं मृते वैद्ये स्वकर्मतः ॥
तज्जीवनं तदान्यस्मै ददौ वैद्याय भूपतिः ॥ ८५ ॥
वैद्यपुत्रौ तु चम्पायाः शिवभूतिभिषग्वरम् ।
नत्वा वैद्यमहाशास्त्रं ज्ञात्वा व्याघुटितौ पुनः ॥ ८६ ॥
ततोटव्यां समालोक्य व्याघ्रं चक्षुःप्रपीडितम् ।
ज्येष्ठेन वारितश्चापि धनचन्द्रो लघुर्भिषक् ॥ ८७ ॥
औषधं नेत्रयोस्तस्य परीक्षार्थं ददौ मुदा ।
नीरोगेण तदा तेन लघुरेव प्रभक्षितः ॥ ८८ ॥
किं मुने पापिनस्तस्य युक्तं वैद्यप्रभक्षणम् ।
इत्यादि श्रेष्ठिनो वाक्यं समाकर्ण्य सकारणम् ॥ ८९ ॥
मुनिः प्राह विशुद्धात्मा शृणु त्वं भो वणिग्वर ।
चम्पायां सोमशर्माख्यो ब्राह्मणोस्य प्रिया द्वयम् ॥ ९० ॥
सोमिल्या सोमशर्मा च सोमिल्यायाः सुतोभवत् ।
तत्रैव पत्तने चास्ति भद्राख्यो वृषभोत्तमः ॥ ९१ ॥
गृहे गृहे पशुः सोपि ग्रासं च लभते तृणम् ।
शान्तत्वात्कस्यचिन्नैव स बाधां कुरुते कदा ॥ ९२ ॥
वन्ध्या सा सोमशर्मा च ब्राह्मणी दुष्टमानसा ।
सपत्नी पुत्रकं हत्वाऽऽरोपयद्भद्रश्रृंगके ॥ ९३ ॥
अनेन मारितो बालो विप्रघातीति पत्तने ।
त्यक्तः सर्वजनैर्भद्र-वृषोयं क्षुत्प्रपीडितः ॥ ९४ ॥

प्रवेशं लभते नैव कदा कापि सुदुःखितः।
एकदा जिनदत्ताख्य-श्रेष्ठिनो वल्लभा प्रिया ॥ ९५ ॥
संजाते परगोधोरु-दोषे सा चात्मशुद्धये ।
कर्त्तुकामोज्वलद्दिव्यं संस्थिता जनसंगमे ॥ ९६ ॥
तदा प्रस्तावमासाद्य वृषोयं तत्तफालकम् ।
संजग्राह मुखेनाशु निर्दोषो भणितो जनैः ॥ ९७ ॥
किं भो श्रेष्ठिन्वृथा तस्य जनानां मूढचेतसाम् ।
दोषं निरपराधस्य दातुं युक्तं भवेद्भुवि ॥ ९८ ॥
जिनदत्तो जगादैवं गंगातीरे मनोहरे ।
गर्त्तायां पतितः कष्टं हस्तिबालः कदाचन ॥ ९९ ॥
तापसो विश्वभूतिस्तु तं विलोक्य तदा द्रुतम् ।
नीत्वा स्वपल्लिकायां च पोषयामास यत्नतः ॥ १०० ॥
कैश्चिद्दिनैस्ततो सोपि संजातः सुमहान् गजः ।
तच्छ्रुत्वा श्रेणिकेनोच्चै-र्गृहीतस्तापसात्सुखम् ॥ १०१ ॥
बन्धनाङ्कुशघातादि-कष्टं दृष्ट्वा द्विपोपि सः ।
भक्त्वा स्तंभं समायातस्तदा तापससन्निधौ ॥ १०२ ॥
तत्पृष्ठतः समायाता राजकीयनृणां पुनः ।
तेषां समर्प्यमानेन सम्बोध्य मधुरैः स्वनैः ॥ १०३ ॥
पापिना हस्तिना तेन तापसः सोपि मारितः ।
युक्तं किं भो मुनेस्तस्य महातापसमारणम् ॥ १०४ ॥
ततो मुनिः कथां प्राह हस्तिनागपुरे शुभे ।
पूर्वस्यां दिशि भात्युच्चै-र्विश्वसेनेन कारितम् ॥ १०५ ॥

भूभुजा सहकाराणां वनं तत्रैकदा पुरा ।
सौलिका सर्पमादाय स्थिता चाम्रतरूपरि ॥ १०६ ॥
तदा सर्पविषेणाशु पक्वमेकं फलं च तत् ।
गृहीत्वा वनपालोपि दर्शयामास भूपतेः ॥ १०७ ॥
स्वराज्यै धर्मसेनायै ददौ राजा च तत्फलम् ।
तद्भक्षणात्तदा सापि राज्ञी प्राप्ता यमालयम् ॥ १०८ ॥
रुष्टो राजा ततः सर्व-तदुद्यानस्य खण्डनम् ।
कारयामास भो श्रेष्ठिन्तत्किं युक्तं महीपते ॥ १०९ ॥
नैव युक्तमिति प्रोक्त्वा ततः श्रेष्ठी कथां जगौ ।
कश्चिन्नरो महाटव्यां गच्छन्सिंहं विलोक्य च ॥ ११० ॥
शीघ्रं सिंहभयान्नष्ट्वा-ऽऽसन्नपल्लीमहाद्रुमम् ।
समारुह्य स्थितः सौख्यं ततः सिंहे गते सति ॥ १११ ॥
अवतीर्य तरोर्मार्गे गच्छता तेन पापिना ।
तदान्वेषयतां काष्ठं महद्भूमिपतेर्नृणाम् ॥ ११२ ॥
सारभेरीनिमित्तं च दर्शितः सोपि पादपः ।
तैस्तु संखंडितो वृक्षः सुच्छायः सुमनोहरः ॥ ११३ ॥
रक्षाविधायिनस्तस्य सुजनस्येव सत्तरोः ।
तत्किं कारयितुं युक्तं भो मुने तस्य पापिनः ॥ ११४ ॥
तच्छ्रुत्वा मुनिनाथोसौ संजगाद कथानकम् ।
कौशाम्बीपत्तने राजा गन्धर्वानीक संज्ञकः ॥ ११५ ॥
स्वर्णकारोभवत्तत्र सज्जातिः पत्तने तराम् ।
नामतोङ्गारदेवोसौ रत्नसंस्कारकोविदः ॥ ११६ ॥

एकदा राजकीयोरु-मुकुटाग्रमहामणिम् ।
तेनोज्वालयता गेहे समायातो मुनीश्वरः ॥ ११७ ॥
चर्यार्थे संप्रणम्याशु भक्त्या मेदजसंज्ञकः ।
स्थापितः कर्मशालायां स मुनिस्तु सुखं स्थितः ॥ ११८ ॥
तत्समीपे मणिं धृत्वा भार्याग्रे स गतो यदा ।
मणिः संगलितस्ताव-द्रक्तत्वात्क्रौञ्चपक्षिणा ॥ ११९ ॥
आगतेन ततस्तेन मणिं चापश्यता द्रुतम् ।
सम्पृष्टोसौ मुनीन्द्रोपि जानन्मौनेन संस्थितः ॥ १२० ॥
स्वर्णकारः पुनः प्राह ब्रूहि त्वं भो मणिं मुने ।
अन्यथा सकुटुम्बस्य संक्षयो मे भविष्यति ॥ १२१ ॥
तथैव संस्थितः सोपि मुनीन्द्रः करुणापरः ।
ततो रुष्टेन तेनाशु चोरोयं चेति मानसे ॥ १२२ ॥
ज्ञात्वा बध्वा महाकाष्ठै-राहतोसौ मुनीश्वरः ।
धिग्धनं धिक्च मूढत्वं वेत्ति किंचिन्न यज्जनः ॥ १२३ ॥
एककाष्ठे तदा क्रौञ्च-गले लग्ने लसद्द्युतिः ।
पद्मरागमणिः सोपि निर्गतो वा यशस्ततिः ॥ १२४ ॥
तं विलोक्य मणिं सोपि स्वर्णकारः सुदुःखितः ।
हाहाकारं विधायोच्चै-र्लग्नस्तन्मुनिपादयोः ॥ १२५ ॥
अहो श्रेष्ठिन्यथा तेन जानता मुनिना मणिः ।
प्रोक्तो नैव दयालुत्वा-त्तथाहं ते च सद्घटम् ॥ १२६ ॥
जानन्नपि ध्रुवं धीर कथयामि न संयमी ।
कुरु त्वं यच्च जानासि साम्प्रतं त्वन्मनोगतम् ॥ १२७ ॥

तदा कुबेरदत्तोसौ प्रच्छन्नं तन्निशम्य च ।
समानीय घटं शीघ्रं प्रोल्लसद्रत्नसंभृतम् ॥ १२८ ॥
कियन्तमुपसर्गं भो करिष्यति भवान्मुनेः ।
इत्युक्त्वा कोपतः पित्रे जिनदत्ताय तं ददौ ॥ १२९ ॥
ततोसौ जिनदत्ताख्यः श्रेष्ठी लज्जाभरान्वितः ।
कुबेरदत्तोपि पुत्रः पश्चात्तापं विधाय च ॥ १३० ॥
नत्वा तं मेरुवद्धीरं मुनीन्द्रं सत्तपोनिधिम् ।
भक्त्या क्षमापयित्वा च तस्यैव चरणान्तिके ॥ १३१ ॥
त्रिधा वैराग्यमासाद्य जैनीं दीक्षां सुखप्रदाम् ।
गृहीत्वा तौ मुनी जातौ निजात्मपरतारकौ ॥ १३२ ॥
श्रीमज्जिनेन्द्रचन्द्रोक्त-प्रोल्लसद्बोधसिंधवः ।
सारसम्यक्त्वरत्नाढ्या लसच्छीलोर्मिराजिताः ॥ १३३ ॥
ये ते मुनयो नित्यं सुरेन्द्राद्यैः समर्चिताः ।
अस्माकं वन्दिता भक्त्या शान्तये सन्तु शर्मदाः ॥ १३४ ॥
जातः श्रीमतिमूलसंघतिलके श्रीकुन्दकुन्दान्वये
विद्यानन्दिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
श्रीभट्टारकमल्लिभूषणगुरू रत्नात्रयालंकृतः
कुर्यात्सूरिमतल्लिको गुणनिधिर्नित्यं सतां मङ्गलम् ॥ १३५ ॥

इति कथाकोशे भट्टारक-श्रीमल्लिभूषण-शिष्य-ब्रह्मनेमिदत्त-विरचिते संगभयाधिकारे मणिवतमुनि-तुंकारी-कथा-वर्णनायां द्वितीयः परिच्छेदः ।

४२–पिण्याकगन्धस्य कथा ।

प्रणम्य त्रिजगन्नाथं श्रीजिनं सारशर्मदम् ।
वक्ष्ये पिण्याकगन्धस्य चरित्रं धनलोभिनः ॥ १ ॥
कांपिल्यनगरे राजा नाम्ना रत्नप्रभोभवत् ।
राज्ञी विद्युत्प्रभा जाता रूपसौभाग्यमण्डिता ॥ २ ॥
श्रेष्ठी श्रीजिनदत्ताख्यो जिनपादाब्जषट्पदः ।
राजादिपूजितो धीमान् श्रावकाचारकोविदः ॥ ३ ॥
तत्रैव नगरे श्रेष्ठी परः पिण्याकगन्धवाक् ।
द्वात्रिंशत्कोटिसुद्रव्यो लोभाद्भुंक्ते खलं खलः ॥ ४ ॥
द्रव्यं लब्ध्वा कुधीर्यस्तु दातुं भोक्तुं क्षमो न हि ।
पापतः कृपणत्वाच्च स भुंक्ते दुःखमेव च ॥ ५ ॥
तस्य स्त्री सुन्दरी नाम्नी विष्णुदत्तः सुतोजनि ।
एकदा राजकीयं च तडागं खनता तदा ॥ ६ ॥
उड्डुनैकेन संलब्ध्वा सुवर्णकुशिकाभृता ।
मञ्जूषा कर्मयोगेन चिरकालस्थिता ततः ॥ ७ ॥
महाकिट्टिप्रलिप्तत्वा-देका लोहस्य मूल्यतः ।
दत्ता श्रीजिनदत्ताख्य-श्रेष्ठिने कुशिका मुदा ॥ ८ ॥
सोपि श्रेष्ठी सुधीर्ज्ञात्वा पश्चात्स्वर्णमनोहरम् ।
पापभीरुस्तदा तेन सुवर्णेन सुखप्रदाम् ॥ ९ ॥
जिनेन्द्रप्रतिमां कृत्वा तत्प्रतिष्ठां जगद्धिताम् ।
कारयामास सद्दृष्टि-र्धर्मिणामीदृशी मतिः ॥ १० ॥

द्वितीया च कुशी तेन जिनदत्तेन धीमता ।
परद्रव्यमिति ज्ञात्वा गृहीता नैव तद्व्रतात् ॥ ११ ॥
ततः पिण्याकगन्धस्तां गृहीत्वा लोहमूल्यतः ।
ज्ञात्वा सुवर्णमयीं तां च पुनर्देहीति संजगौ ॥ १२ ॥
तथाष्टानवतिः कुश्यः प्रच्छन्नं चोडुकेन हि ।
तस्य तावद्दिनैर्दत्ता लोहमूल्यादजानता ॥ १३ ॥
ततः पिण्याकगन्धाख्यः स श्रेष्ठी धनलम्पटः ।
भागिनेयविवाहार्थं भगिन्याग्रहतो द्रुतम् ॥ १४ ॥
कुशीनां ग्रहणे पुत्रं तं निरूप्य प्रलोभतः ।
संप्राप्तः पिप्पलग्रामं प्रेरितः पापकर्मणा ॥ १५ ॥
तेनोडुना समानीतां विष्णुदत्तस्तु तां कुशीम् ।
किं कार्यमनया चेति तदासौ न गृहीतवान् ॥ १६ ॥
ततो राजभटेनाशु खननार्थं हठेन ताम् ।
गृहीत्वा खनता तेन सुवर्णकुशिका शतम् ॥ १७ ॥
इत्यक्षराणि संवीक्ष्य दर्शिता सा महीपतेः ।
उडुश्चाकारितो राज्ञा पृष्टोसौ संजगाविति ॥ १८ ॥
एका श्रीजिनदत्ताय कुश्योष्टानवतिर्ध्रुवम् ।
अन्याः पिण्याकगन्धाय मया दत्ता महीपते ॥ १९ ॥
आहूतो जिनदत्तोसौ प्रोक्त्वा तद्वृत्तकं पुनः ।
दर्शयामास जैनेन्द्रीं प्रतिमां पापनाशिनीम् ॥ २० ॥
तां दृष्ट्वा भूपतिश्चित्ते परमानन्दनिर्भरः ।
वस्त्राद्यैः पूजयामास श्रेष्ठिनं तं गुणोज्ज्वलम् ॥ २१ ॥

पिण्याकश्रेष्ठिनो गेहं गृहीत्वा तत्कुटुम्बकम् ।
निक्षिप्तं कष्टतो राज्ञा कारागारे प्रकोपतः ॥ २२ ॥
येन तृष्णातुरेणोच्चै-र्गृहीतं परवित्तकम् ।
निजं तेन स्वहस्तेन क्षयं नीतं च सर्वथा ॥ २३ ॥
विवाहान्तरं सोपि समागच्छन्निजं गृहम् ।
श्रुत्वा स्वगेहवृत्तान्तं मार्गे पिण्याकगन्धकः ॥ २४ ॥
इमौ पादौ दुरात्मानौ सर्वलक्ष्मीक्षयङ्करौ ।
गतौ ग्राममिति क्रोधाद्धत्वा पाषाणकेन च ॥ २५ ॥
मृत्वार्तध्यानतो कष्टं षष्ठेसौ नरके कुधीः ।
लेह्लकप्रस्तरे पापी पपात प्रौढलोभतः ॥ २६ ॥
इति ज्ञात्वा बुधैर्नित्यं विवेकोत्कृष्टमानसैः ।
त्याज्यः पापप्रदो लोभो यस्त्वन्यायप्रवर्त्तकः ॥ २७ ॥
स जयतु जिननाथः सर्वदेवेन्द्रवन्द्यः
सकलगुणसमुद्रो विश्वतत्वैकदीपः ।
विगतनिखिलदोषो दत्तभव्यप्रलक्ष्मी-
र्विमलतरगिरीशो बोधसिन्धुः सतां वै ॥ २८ ॥

इति कथाकोशे कृपण-पिण्याकगन्धस्य कथा समाप्ता ।

———

४३—लुब्धकस्य कथा ।

प्रोल्लसत्केवलज्ञानं श्रीजिनं त्रिजगद्गुरुम् ।
प्रणम्य परया भक्त्या वक्ष्ये लुब्धकथानकम् ॥ १ ॥
चम्पापुर्यां महाराजः संजातोभयवाहनः ।
पुण्डरीकाऽभवद्राज्ञी पुण्डरीकसमेक्षणा ॥ २ ॥
लुब्धनामाजनि श्रेष्ठी पापतो धनलम्पटः ।
श्रेष्ठिनी नागवस्वाख्या तस्याभूत्प्राणवल्लभा ॥ ३ ॥
पुत्रौ गुरुडदत्ताख्य-नागदत्तौ मनःप्रियौ ।
लुब्धकश्रेष्ठिना तेन स्वगेहे भूरिवित्ततः ॥ ४ ॥
यक्षयक्षीगजोष्ट्रादि-महिषाश्वयुगानि च ।
हैमानि कारितान्युच्चैः शृङ्गपुच्छखुरादिषु ॥ ५ ॥
नाना रत्नप्रवालादि-जटितानि निजेच्छया ।
बलीवर्दस्तु वैकाकी सुवर्णाभावतस्तदा ॥ ६ ॥
द्वितीयवृषभस्योच्चै-र्निमित्तेनैकदा कुधीः ।
सप्ताहोरात्रिसद्वृष्टौ जातायां कर्मयोगतः ॥ ७ ॥
गंगाप्रवाहतः काष्ठं कष्टादानयति स्म सः ।
अहो दुरात्मनां तृष्णा कदा केन प्रशाम्यति ॥ ८ ॥
पुण्डरीका तदा राज्ञी स्वप्रासादोपरि स्थिता ।
आनयन्तं महाकाष्ठं कष्टतो वीक्ष्य लुब्धकम् ॥ ९ ॥
स्वनाथं प्रति सा प्राह हंहो स्वामिंस्तवापि च ।
राज्ये कोपि दरिद्रोयं दृश्यते कष्टमाश्रितः ॥ १० ॥

अस्मै किञ्चिद्धनं देव दीयते करुणाधिया ।
युक्तं कारुण्ययुक्तानां चित्ते दानमतिर्भवेत् ॥ ११ ॥
तदाकर्ण्य नृपो धीमांस्तं समाहूय लुब्धकम् ।
संजगाद त्वया वित्तं यावदत्र प्रयोजनम् ॥ १२ ॥
तावत्संगृह्यते शीघ्रं तच्छ्रुत्वा लुब्धकोवदत् ।
एकाकी मे गृहे देव बलीवर्दः प्रवर्त्तते ॥ १३ ॥
विलोक्यते द्वितीयस्तु तन्निशम्य महीपतिः ।
जगावित्थं मदीयेषु बलीवर्देषु साम्प्रतम् ॥ १४ ॥
बलीवर्दं गृहाण त्वं यः सर्वेषु मनोहरः ।
राजकीयान्समालोक्य ततोसौ वृषभोत्तमात् ॥ १५ ॥
अस्माद्वृषेन सादृश्यो नास्ति देवेति ते वृषः ।
लुब्धकः प्राह भूपाग्रे ततो राज्ञा प्रजल्पितम् ॥ १६ ॥
कीदृशास्ते बलीवर्दो भो वणिक्मे प्रदर्शय ।
ततस्तेन गृहं नीत्वा राज्ञः सन्दर्शितो वृषः ॥ १७ ॥
तं समालोक्य भूपालः सुवर्णवृषभोत्तमम् ।
ईदृशास्ते वृषभोस्ति परमाश्चर्यमासवान् ॥ १८ ॥
श्रेष्ठिन्या नागवस्वा च रत्नैः स्थालं प्रपूरितम् ।
दत्वा श्रेष्ठिकरे प्रोक्तं समर्पय महीभुजे ॥ १९ ॥
तदा तस्य प्रलोभत्वात्स्थालं च ददतो द्रुतम् ।
हस्तस्याङ्गुलयो जाताः फणाकाराः सुकष्टतः ॥ २० ॥
दत्तं येन कदा किञ्चित्कस्मैचिन्नैव पापतः ।
तन्मतिः प्रेरिता चापि नास्ति दाने कदाचन ॥ २१ ॥

ततो राजा विलोक्योच्चै-स्तच्चरित्रं सुनिन्दितम् ।
दुष्टात्मा फणहस्तोय-मित्युक्त्वा स्वगृहं गतः ॥ २२ ॥
एकदासौ महालोभ-ग्रहग्रस्तस्तु लुब्धकः ।
तद्द्वितीयबलीवर्द-निमित्तं पापकर्मतः ॥ २३ ॥
गत्वा च सिंहलद्वीप-प्रमुखेषु बहुष्वपि ।
चतस्त्रः स्वर्णकोट्यस्तु समुपार्ज्य प्रकृष्टतः ॥ २४ ॥
सिन्धुमध्ये समागच्छन्स्फुटिते यानपात्रके ।
मृत्वा सर्पो निजे गेहे निधिस्थाने बभूव च ॥ २५ ॥
तत्रापि तद्धनं कस्य गृहीतं न ददाति सः ।
कोपाद्गरुडदत्तेन ज्येष्ठपुत्रेण मारितः ॥ २६ ॥
तदा मृत्वा चतुर्थेसौ महार्त्तध्यानपीडितः ।
संजातो नारको घोरे नरके पापकर्मणा ॥ २७ ॥
एवं धर्मं विना जन्तु-र्नाना लोभादिवञ्चितः ।
कष्टं प्रयाति पापेन संसारे दुःखसागरे ॥ २८ ॥
ज्ञात्वैवं भवदुःखकोटिजनकं दुष्क्रोधलोभादिकं
त्यक्त्वा दूरतरं विशुद्धमनसस्त्रेधा सदा चेतसि ।
श्रीमत्सारजिनेन्द्रदेवगदितं धर्मं सुशर्मप्रदं
शक्त्या भक्तिभरेण शान्तिनिलयं सन्तो भजन्तु श्रिये ॥२९॥

इति कथाकोशे लुब्धकश्रेष्ठिनः कथा समाप्ता।

४४–वसिष्ठतापसस्य कथा ।

नत्वाष्टादशभिर्दोषै-र्निर्मुक्तं जिननायकम् ।
वसिष्ठतापसस्यौचै-श्चरित्रं रचयाम्यहम् ॥ १ ॥
मथुरानगरे राजा समभूदुग्रसेनवाक् ।
रेवतीनाम तद्राज्ञी संजाता चित्तवल्लभा ॥ २ ॥
श्रेष्ठी श्रीजिनदत्ताख्यो जिनपादाब्जषट्पदः ।
तस्यैव श्रेष्ठिनो दासी प्रियंगुलतिकाभवत् ॥ ३ ॥
पुरे तत्र वसिष्ठाख्य-स्तापसो यमुनातटे।
कृत्वा स्नानं च पञ्चाग्नि-साधनं कुरुते सदा ॥ ४ ॥
तदा पौरजनो मूढस्तं समालोक्य तापसम् ।
स जातो भक्तिकस्तस्य मूढा मूढक्रियारताः ॥ ५ ॥
पौरदास्यस्तथा सर्वाः पानीयानयनक्षणे ।
नित्यं प्रदक्षिणीकृत्य भक्तितस्तं नमन्ति च ॥ ६ ॥
सा प्रियंगुलता दासी सखीभिः प्रेरितापि च ।
प्रणामं कुरुते नैव जैनगेहप्रसंगतः ॥ ७ ॥
ततस्ताभिर्बलात्कारं संधृत्वा हस्तपत्सु ? च ।
पात्यमाना पदे तस्य निःशंकं सा जगाविति ॥ ८ ॥
यद्यस्य तापसस्यात्र प्रणामः क्रियते मया ।
तदा धीवरनाथस्य प्रणामः क्रियते न किम् ॥ ९ ॥
तच्छ्रुत्वा सर्वदासीनां रुष्टोसौ तापसः कुधीः ।
नष्टास्ताश्च मदोन्मत्ताः कृत्वा हास्यं च दासिकाः ॥ १०

उग्रसेननृपस्याग्रे गत्वासौ तापसोवदत् ।
भो प्रभो जिनदत्तेन धीवरो भणितोप्यहम् ॥ ११ ॥
ततो राज्ञा समाहूतो स श्रेष्ठी जिनदत्तवाक् ।
सद्दृष्टिर्निर्भयः प्राह भूपाग्रे सत्यमण्डितः ॥ १२ ॥
देवायं तापसश्चैव प्रमाणं तपसा युतः ।
यद्यसौ धीवरः प्रोक्तो मया भो नाऽथ निश्चयात् ॥ १३ ॥
तापसेन ततः प्रोक्तं दास्याहं भणितोस्य च ।
हसित्वा वचनं तस्य साहूता भूभुजा तदा ॥ १४ ॥
तां दृष्ट्वा तापसः कोपात्स च प्राह कुधीस्तदा ।
रे रण्डे विप्रपुत्रोहं वायुभक्षी सुतापसः ॥ १५ ॥
कथं त्वयातिपापिन्या धीवरो भणितो भुवि ।
सा प्रियंगुलतावोच-त्तदोच्चैर्निर्भया सती ॥ १६ ॥
मत्स्यान्मारयति व्यक्तं धीवरस्त्वमपि ध्रुवम् ।
ततस्ते धीवरस्यापि विशेषो नैव भूतले ॥ १७ ॥
परीक्षार्थं जटाभारं झाटय त्वं शठ द्रुतम् ।
तस्मिन्कृते तदा तेन पतिताः क्षुद्रमत्स्यकाः ॥ १८ ॥
तदा राजा जिनेन्द्राणां धर्मस्योच्चैः प्रशंसनम् ।
कृत्वा निष्काशितः शीघ्रं तापसो मानवर्जितः ॥ १९ ॥
गंगागंधवतीनद्योः संगमे सोपि तापसः ।
पञ्चाग्निसाधनं कर्तुं प्रवृत्तः कष्टतः पुनः ॥ २० ॥
तत्र पञ्चशतैर्युक्तो मुनीन्द्रो मुनिभिस्तदा ।
वीरभद्रः समायातो जैनतत्वविदांवरः ॥ २१ ॥

दृष्ट्वा तं तापसं तत्र मुनिश्चैको जगौ तदा ।
अस्य घोरं तपो देव तच्छ्रुत्वा गुरुरब्रवीत् ॥ २२ ॥
अज्ञानिनां दयाहीनं किं तपस्तु प्रशस्यते ।
ततो रुष्टाहमज्ञानी कथं भो तापसोवदत् ॥ २३ ॥
आचार्येण तदा प्रोक्तं यदि त्वं ज्ञानवान्ध्रुवम् ।
मृत्वा गुरुः क ते जातो वद त्वं चेति तापस ॥ २४ ॥
स च प्राह गतः स्वर्गे मे गुरुस्तापसोत्तमः ।
तच्छ्रुत्वा वीरभद्रेण प्रोक्तं संज्ञानचक्षुषा ॥ २५ ॥
नन्वस्मिन्दह्यमाने च महाकाष्ठे प्रकष्टतः ।
गुरुस्ते सर्परूपेण दह्यमानस्तु तिष्ठति ॥ २६ ॥
ततो रुष्टेन तेनाशु तत्काष्ठे च द्विधाकृते ।
दृष्टो भुजंगमः सोपि हा कष्टं मूढचेष्टितम् ॥ २७ ॥
तं दृष्ट्वा तापसश्चापि त्यक्त्वा गर्वं ततो द्रुतम् ।
धर्ममाकर्ण्य जैनेन्द्रं मुनिर्जातो दिगम्बरः ॥ २८ ॥
एकदा मथुराभ्यर्णे गोवर्द्धनगिरौ शुभे ।
वसिष्ठयतिनस्तस्य महामासोपवासिनः ॥ २९ ॥
सुविद्यादेवताः सिद्धाः संजगुश्चेति भो प्रभो ।
आदेशं देहि नः शीघ्रं किं कुर्मो दासिका वयम् ॥ ३० ॥
तेनोक्तं लोभभावेन यदास्माकं प्रयोजनम् ।
तदागच्छथ यूयं भो देवता गुणमण्डिताः ॥ ३१ ॥
पूर्णे मासोपवासेथ भक्तितश्चोग्रसेनकः ।
स्थापयत्यत्र मा कोपि वसिष्ठमुनिसत्तमम् ॥ ३२ ॥

अहं संस्थापयिष्यामि पत्तने चेति घोषणम् ।
दापयामास भूभर्त्ता मूढभक्तिस्तु कष्टदा ॥ ३३ ॥
पारणादिवसे पूर्वं पट्टहस्तिमदाश्रितः ।
आलानस्तंभमुन्मूल्य निर्गतो निजलीलया ॥ ३४ ॥
स राजा व्यग्रचित्तोभू-दुग्रसेनः सुविस्मृतः ।
मुनिः सोपि क्षुधाक्रान्तो भ्रमित्वा पत्तनेखिले ॥ ३५ ॥
राजालये तथा नैव प्राप्तवान्भ्रामरीं ततः ।
अलाभेन समागत्य स्वस्थानं नपसि स्थितः ॥ ३६ ॥
द्वितीये पारणाघस्रे वह्निदाहे पुरे सति ।
कर्मतश्चोग्रसेनोसौ संजातो व्याकुलाशयः ॥ ३७ ॥
तृतीयस्य तथा मासो-पवासस्य परे दिने ।
प्रेषिते श्रीजरासन्ध-राजेनादेशके तदा ॥ ३८ ॥
उग्रसेनः स मूढात्मा संजातो व्यग्रमानसः ।
अज्ञानादत्र जन्तूनां कार्यसिद्धिः कुतो भवेत् ॥ ३९ ॥
अन्तरायं ततः कृत्वा निर्गच्छन्तं पुराद्बहिः ।
मूर्च्छया विकलीभूतं दृष्ट्वा तं कष्टमाश्रितम् ॥ ४० ॥
वृद्धिका कोपतः प्राह मुनिं स्थापयतो जनान् ।
वारयत्येष भूनाथः स्वयं न स्थापयत्यहो ॥ ४१ ॥
मारितोनेन राज्ञासौ मुनीन्द्रस्तपसां निधिः ।
इत्याकर्ण्य मुनिः सोपि महाकोपाग्निमास्थितः ॥ ४२ ॥
गत्वा गोवर्द्धनं शीघ्रं पर्वतं ताः स्वदेवताः ।
प्रोक्तवान्पापकर्मायं युष्माभिर्मार्यतां नृपः ॥ ४३ ॥

ताभिः प्रोक्तं मुने नैव युक्तं ते जिनलिङ्गिनः ।
तच्छ्रुत्वा स पुनः प्राह मूढधीः कोपमण्डितः ॥ ४४ ॥
जन्मान्तरे तु युष्माभि-र्मदीयाज्ञा विधीयताम् ।
इत्युक्त्वा मारयिष्यामि भवेन्यस्मिन्सुपापिनम् ॥ ४५ ॥
उग्रसेनमिमं दान-महाविघ्नविधायकम् ।
कृत्वा निदानकं चेति स्वतपःक्षयकारकम् ॥ ४६ ॥
मृत्वासौ रेवतीगर्भे समायातो निदानतः ।
हा कष्टं पापरूपोयं कोपः कार्यविनाशकः ॥ ४७ ॥
एकदा क्षीणदेहां च रेवतीं वीक्ष्य भूपतिः ।
उग्रसेनो जगौ देवि किं ते दौर्बल्यकारणम् ॥ ४८ ॥
तयोक्तं देव संजातो दोहलो दुष्टको मम ।
कीदृशो दोहलश्चेति पृष्टा सापि पुनर्जगौ ॥ ४९ ॥
वक्तुं न शक्यते स्वामिन्दुष्टत्वात्सोपि दोहलः ।
आग्रहेण तदावोच-द्रेवती प्राणवल्लभम् ॥ ५० ॥
विदार्य हृदयं तेत्र रक्तपानं करोम्यहम् ।
यादृशो बालको गर्भे तादृशः स्त्रीमनोरथः ॥ ५१ ॥
ततस्तेन नरेन्द्रेण कारिते लेपनिर्मिते ।
स्वाकारे च तया चक्रे हा कष्टं पापकर्म तत् ॥ ५२ ॥
कैश्चिद्दिनैः सुतः सोपि संजातः कुलनाशकः ।
यथा वंशोद्भवो वन्हि-र्दहत्येव सुकाननम् ॥ ५३ ॥
तन्मुखं चोग्रसेनस्य तदालोकयतः स्वयम् ।
क्रूरदृष्टिं विधायोच्चै-र्बद्धो मुष्टिः सुतेन तु ॥ ५४ ॥

दुष्टोयमिति संज्ञात्वा स बालो भूभुजा तदा ।
स्वनाममुद्रिकारत्न-कम्बलाभ्यां समन्वितः ॥ ९५ ॥
धृत्वा कांस्यसमुत्पन्न-मंजूषायां प्रवेगतः ।
यमुनायां विनिर्मुक्तो दुष्टात्मा कस्य वा प्रियः ॥ ९६ ॥
कौशाम्ब्यां गंगभट्टाख्य-कल्पपालस्य भामिनी ।
राजोदरी समागत्य नदीतीरं जलार्थिनी ॥ ९७ ॥
तां समादाय मंजूषां दृष्ट्वा तं बालकं मुदा ।
कंसनाम विधायोचैः पोषयामास सा गृहे ॥ ९८ ॥
यदाष्टवार्षिको जातो दुष्टत्वात्परपुत्रकान् ।
निर्दयं हन्ति पापिष्टः प्राणी कस्य सुखप्रदः ॥ ९९ ॥
निर्घाटितस्तया गेहात्स कंसो रौद्रमानसः ।
सौरीं पुरीं समागत्य वसुदेवमहीपतेः ॥ ६० ॥
शिष्यो भूत्वा सुशास्त्रज्ञो वरं कञ्चिच्च लब्धवान् ।
अत्रान्तरे कथां वक्ष्ये नत्वा श्रीमज्जिनेश्वरान् ॥ ६१ ॥
अथ सिंहरथो राजा जरासंधस्य शत्रुकः ।
नैव सिद्धयति दुष्टत्वा-त्ततोसौ चक्रभृज्जगौ ॥ ६२ ॥
सर्वसामन्तभूपाना-मग्रणीर्यस्तु सद्भटः ।
शीघ्रं सिंहरथं शत्रुं धृत्वा चानयति ध्रुवम् ॥ ६३ ॥
तस्मै जीवंजसां पुत्रीं स्वदेशं वाञ्छितं पुनः ।
ददामीति पुरे शीघ्रं दापयामास घोषणम् ॥ ६४ ॥
तच्छ्रुत्वा वसुदेवोसौ समुद्रविजयस्य वै ।
ज्येष्ठभ्रातुः समादेशा-त्सर्वसैन्यसमन्वितः ॥ ६५ ॥

पोदनंपुरमासाद्य सैन्यं धृत्वा पुराद्बहिः ।
सार्थवाहस्य रूपेण पुरे प्रच्छन्नभावतः ॥ ६६ ॥
सिंहमूत्रादिकं तत्र दापयित्वा गजादिषु । ?
रणे सिंहरथं जित्वा पातयामास भूतले ॥ ६७ ॥
पुनः कंसं प्रति प्राह वसुदेवः स्वसारथिम् ।
गृह्यते भो त्वया शीघ्रं शत्रुकश्चेति धीमता ॥ ६८ ॥
तेन क्रुद्धेन कंसेन बद्धः सिंहरथो नृपः ।
स्वयं तप्तो भवेद्वन्हिः किं पुनर्वायुना हतः ॥ ६९ ॥
तं गृहीत्वा द्रुतं सोपि वसुदेवो विचक्षणः ।
जरासन्धमहीभर्त्तु-रर्पयामास शत्रुकम् ॥ ७० ॥
जरासन्धस्तु सन्तुष्टो जगाद मम देहजाम् ।
गृहाणेमं शुभं देशं यत्तुभ्यं रोचते तराम् ॥ ७१ ॥
प्रोक्तं श्रीवसुदेवेन नायं बद्धो मया प्रभो ।
बद्धः कंसेन भो देव ततोस्मै दीयतेखिलम् ॥ ७२ ॥
कुलं पृष्टस्ततः प्राह कंसोयं सुभटाग्रणीः ।
कल्पपालीसुतोहं च भो नरेन्द्रेति सेवकः ॥ ७३ ॥
तल्लक्षणं समालोक्य जरासन्धो नरेश्वरः ।
तस्याः पुत्रोयमित्युच्चै-र्निश्चयो नैव संभवेत् ॥ ७४ ॥
इत्यालोच्य तदा शीघ्रं तामाकारयति स्म सः ।
भवन्ति प्रायशो भूपा भूतले चतुराशयाः ॥ ७५ ॥
कल्पपाली ततो भीत्या धृत्वा मंजूषिकां करे ।
तत्रागत्य नृपस्याग्रे तां मुक्त्वा चेति संजगौ ॥ ७६ ॥

नायं देव सुतो मेस्ति मंजूषायाः सुतोप्ययम् ।
इत्याकर्ण्य ततश्चक्री दृष्ट्वा तद्रत्नकम्बलम् ॥ ७७ ॥
उग्रसेनमहीभर्त्तु-स्तां विलोक्य च मुद्रिकाम् ।
ज्ञात्वा राजकुलोत्पन्नं ददौ तस्मै स्वपुत्रिकाम् ॥ ७८ ॥
जीवंजसाभिधां कंसः परिणीय महोत्सवैः ।
स्वपितुः पर्ववैरेण देशमादाय दुष्टधीः ॥ ७९ ॥
मथुरायां समागत्य प्रज्वलन्कोपवान्हिना ।
उग्रसेनं च संग्रामे धृत्वा कष्टेन तातकम् ॥ ८० ॥
पुरीगोपुरसान्निध्ये कृत्वा तं पंजरे दृढम् ।
दत्वा कोद्रवकाहारं काञ्जिकेन तु मिश्रितम् ॥ ८१ ॥
स्वयं राज्यं प्रकुर्वाणः संस्थितः क्रूरमानसः ।
अहो लोके भवत्येव कुपुत्रः कुलनाशकः ॥ ८२ ॥
तदा कंसलघुभ्राता दृष्ट्वा संसारचेष्टितम् ।
अतिमुक्तकनामासौ संजातो मुनिसत्तमः ॥ ८३ ॥
ततः कंसेन सद्भक्त्या गुरुत्वाद्वसुदेववाक् ।
संस्थापितः स्वसान्निध्ये प्रीतितो गुणमण्डितः ॥ ८४ ॥
अथेह मृतिकावत्यां पुर्यां देवकिभूपतेः ।
भार्यायां धनदेव्यास्तु देवकी चारुकन्यकाम् ॥ ८५ ॥
प्रतिपन्नस्वभगिनीं तां विवाहप्रयुक्तितः ।
कंसोसौ वासुदेवाय कुरुवंशोद्भवां ददौ ॥ ८६ ॥
देवक्याश्चैकदा पूर्वं पुष्पवत्याः सुचीरकम् ।
धृत्वा स्वमस्तके तूर्य-निनादेन महोत्सवैः ॥ ८७ ॥

पुरीमध्ये प्रनृत्यन्ती तदा जीवंजसा मुदा ।
चर्यागतमुनिं हास्या-दतिमुक्तकसंज्ञकम् ॥ ८८ ॥
चक्रिपुत्री जगौ तं च देवर त्वमपि स्फुटम् ।
नृत्यं कुरु स्वयं चेति यौवनादिमदोद्धता ॥ ८९ ॥
तेनोक्तं ज्ञानिना मुग्धे नृत्यं मे नैव कल्पते ।
मार्गं रुद्धा स्थिता सापि पापिनी कंसभामिनी ॥ ९० ॥
तदातिपीडितेनोक्तं मुनीन्द्रेणेति मूढधीः ।
किं नृत्यं त्वं करोषीति देवक्या पुत्रकेन हि ॥ ९१ ॥
भर्त्ता तव प्रहन्तव्य-स्तच्छ्रुत्वा तच्च चीरकम् ।
कोपतः सा द्विधा चक्रे पुनस्तेन प्रजल्पितम् ॥ ९२ ॥
त्वयेदं चीरकं मुग्धे कृतं द्वेधा यथा ध्रुवम् ।
तथा च देवकीभावीपुत्रः शूरमतल्लिकः ॥ ९३ ॥
संकरिष्यति भो बाले त्वत्पितुर्देहखण्डनम् ।
तत्समाकर्ण्य सा शीघ्रं कष्टतः स्वगृहं गता ॥ ९४ ॥
हसन्पापं प्रपुष्णाति प्राणी चाज्ञानभावतः ।
प्रश्चात्तत्कर्मणः सोपि फलं भुंक्ते सुकष्टतः ॥ ९५ ॥
पृष्टा कंसेन सा प्राह गलदश्रुविलोचना ।
तन्मुनेर्वचनं चित्ते महाचिन्ताविधायकम् ॥ ९६ ॥
तच्छ्रुत्वा कंसराजोसौ मूढात्मा जीविताशया ।
दुष्टबुद्ध्या ततो नत्वा वसुदेवं गुणोज्ज्वलम् ॥ ९७ ॥
देवक्या जनितः पुत्रो हन्तव्यः स मया ध्रुवम् ।
देवकी च प्रसूतिं मे गृहे कुर्यादिति स्फुटम् ॥ ९८ ॥

वरं याचितवान्पूर्वं सोपि तस्मै प्रदत्तवान् ।
नैव छद्म सतां चित्ते स्ववाक्यप्रतिपालने ॥ ९९ ॥
तन्निशम्य तदा प्राह देवकी स्वपतिं प्रति ।
तपो गृह्णामि भो देव पुत्रदुःखं सुदुस्सहम् ॥ १०० ॥
ततश्च वसुदेवोसौ देवक्या भार्यया सह ।
गत्वोद्याने समालोक्य फलिताम्रतरोरधः ॥ १०१ ॥
अतिमुक्तकनामानं मुनीन्द्रं ज्ञानलोचनम् ।
प्रणम्य च महाभक्त्या संजगौ भो यतीश्वर ॥ १०२ ॥
केन मे तनुजेनोच्चै-र्जरासन्धश्च कंसकः ।
हन्तव्यो ब्रूहि योगीन्द्र जिनेन्द्रपदपद्मभाक् ॥ १०३ ॥
देवक्या च तदा हस्त-धृताम्रतरुशाखिका ।
मुक्त्वा तस्यास्तु शाखायाः फलयुग्मत्रयं शुभम् ॥ १०४ ॥
ऊर्द्धगतं ततश्चैकं फलं भूमौ पपात तत् ।
अष्टमं च फलं पक्व-मूर्द्धभागं गतं पुनः ॥ १०५ ॥
तं निमित्तं समालोक्य तेनोक्तं ज्ञानचक्षुषा ।
शृणु भो वासुदेव त्वं महाभव्यशिरोमणे ॥ १०६ ॥
षट् पुत्रास्तेत्र निर्वाण-गामिनो नास्ति संशयः ।
सप्तमस्तु जरासन्ध-कंसयोः प्राणनाशकः ॥ १०७ ॥
अष्टमश्चाष्ट कर्माणि क्षयं नीत्वा विचक्षणः ।
ज्ञातव्यो मुक्तिकान्तायाः कान्तो भावी गुणाष्टभाक् ॥ १०८ ॥
तच्छ्रुत्वा मुनिनाथोक्तं परमानन्ददायकम् ।
स्वचित्ते संविचार्येति नान्यथा मुनिभाषितम् ॥ १०९ ॥

भक्त्या तौ तं मुनिं नत्वा संप्राप्तौ हर्षितौ गृहे ।
धर्मे श्रीमज्जिनेन्द्रोक्ते विश्वासः शर्मकारणम् ॥ ११० ॥
अथैकदा सती सैव देवकी शुद्धमानसा ।
कंसगेहे सुतं द्वंद्वं संप्रसूता शुभप्रदम् ॥ १११ ॥
तत्क्षणे पुण्ययोगेन तच्च देवतया द्वयम् ।
भद्रिलाख्यपुरे रम्ये श्रेष्ठी श्रीश्रुतदृष्टिवाक् ॥ ११२ ॥
अलकाख्या प्रिया तस्याः प्रसूतायाः समर्प्य च ।
मृतं तत्पुत्रयुग्मं तु देवक्याग्रे शनैर्धृतम् ॥ ११३ ॥
अहो पुण्यवतां पुंसां सुराः कुर्वन्ति रक्षणम् ।
तस्मात्पुण्यं जिनेन्द्रोक्तं कार्यं सत्सौख्यकारणम् ॥ ११४ ॥
पुण्यं जिनेन्द्रपादाब्ज-चर्चनं परया मुदा ।
पात्रदानं व्रताद्यैस्तु संयुक्तं मुनिभिः स्मृतम् ॥ ११५ ॥
पापिना तेन कंसेन धृत्वा तन्मृतकद्वयम् ।
आस्फालितं शिलापीठे पापिनां धिक्च जीवितम् ॥ ११६ ॥
एवं तस्याः सुदेवक्याः पुत्रयुग्मत्रयं मुदा ।
देवतापूर्वपुण्येन स्थापयामास यत्नतः ॥ ११७ ॥
भद्रिलाख्यपुरे तत्र षट् पुत्रास्ते गुणोज्वलाः ।
चरमाङ्गधरा धीराः प्राप्ता वृद्धिं यथासुखम् ॥ ११८ ॥
ततोसौ सप्तमे मासे देवक्या चाष्टमीनिशि ।
सप्तमः शत्रुसन्दोह-ध्वंसकस्तनुजोभवत् ॥ ११९ ॥
तदा रात्रौ गलत्तोये तं समादाय देहजम् ।
संचचाल पिता धीरो रक्षार्थं वसुदेववाक् ॥ १२० ॥

छत्रं श्रीबलभद्रेण संधृतं बालकोपरि ।
रक्षाविधायिनी सापि देवता पुण्ययोगतः ॥ १२१ ॥
शीघ्रं वृषभरूपेण शृङ्गे कृत्वा सुदीपकम् ।
द्योतयामास सन्मार्ग-मग्रे भूत्वा शुभोदयात् ॥ १२२ ॥
वासुदेवपदाङ्गुष्ठ-स्पर्शमात्रेण पुण्यतः ।
अभूत्प्रतोलिकासार-कपाटं च निरर्गलम् ॥ १२३ ॥
समुत्तीर्य नदीं दत्त-पारां तां यमुनां ततः ।
मातृकादेवतागेहं सम्प्रविश्य सबालकौ ॥ १२४ ॥
प्रच्छन्नं देवतापृष्ठे यावत्तौ संस्थितौ भटौ ।
तावदेव प्रपुण्येन नन्दाख्यो यस्तु गोपकः ॥ १२५ ॥
तस्य प्रिया यशोदा च चन्दनाक्षतपुष्पकैः ।
पुत्रार्थिनी समाराध्य भक्त्या तां पुरदेवताम् ॥ १२६ ॥
तस्यामेव सती रात्रौ प्रसूता स्वगृहे सुताम् ।
तां विलोक्य ततो रुष्टा नन्दगोपस्य भामिनी ॥ १२७ ॥
गृहीत्वा पुत्रिकां कोपा-त्तत्रागत्य मठे तदा ।
धृत्वा तां देवताग्रे च गृहाण तव देवते ॥ १२८ ॥
इत्युक्त्वा निर्गता याव-त्तावत्तेनैव धीमता ।
तां पुत्रीं वसुदेवेन गृहीत्वा परया मुदा ॥ १२९ ॥
देवताग्रे निजं पुत्रं धृत्वा प्रच्छन्नतो द्रुतम् ।
गच्छन्ती भणिता सैवं हे यशोदे मनोहरम् ॥ १३० ॥
पुत्रमेतं गृहाण त्वं तच्छ्रुत्वा सा च मूढधीः ।
तं समादाय संतुष्टा स्वगेहं गोपिका गता ॥ १३१ ॥

अहो पुण्यस्य सामग्री लक्ष्यते केन भूतले ।
यत्प्रसादाद्भवत्युच्चै-रचिंन्त्यं फलमद्भुतम् ।। १३२ ॥
तौ समादाय तां पुत्री-मागत्य स्वगृहं शनैः ।
अर्पयामासतुः शीघ्रं देवक्याः सुभटोत्तमौ ॥ १३३ ॥
तां प्रभाते समालोक्य देवक्यग्रे च पुत्रिकाम् ।
दुष्टात्मा नासिकाभङ्गं तस्याश्चक्रे स कंसकः ॥ १३४ ॥
वर्द्धमानेथ तत्रोच्चै-र्वासुदेवे स्वलीलया ।
कंसो गेहे च नक्षत्र-पाताद्युत्पातवीक्षणात् ॥ १३५ ॥
तदा नैमित्तिकं प्राह किमेतदिति कारणम् ।
ततः शकुनशर्माख्यो जगौ नैमित्तिकाग्रणीः ॥ १३६ ॥
हन्तव्यो येन भो देव त्वं क्षणेन प्रकोपतः ।
गोकुले वर्द्धमानस्तु सोपि संतिष्ठेत भटः ॥ १३७ ॥
तदाकर्ण्य स कंसोपि स्मृत्वा पूर्वभवागताः ।
सिद्धा विद्याः प्रति प्राह भो देव्यो यत्र मे रिपुः ॥ १३८ ॥
मारणीयः स युष्माभि-र्वेगतो दुष्टमानसः ।
तच्छ्रुत्वा देवतास्ताश्च तं हन्तुं चक्रिरे मनः ॥ १३९ ॥
पूतना प्रथमा विद्या विषदुग्धस्तनी तदा ।
हन्तुकामा गता तत्र वासुदेवसमीपकम् ॥ १४० ॥
पीत्वा तत्क्षीरमत्युच्चै-र्वासुदेवेन वैरिणा ।
निर्घाटिता गता देवी प्राणसन्देहमाश्रिता ॥ १४१ ॥
द्वितीया काकदेवी च चञ्चुपक्षप्रलुञ्चनात् ।
यमलार्जुनदेवी सा बद्धोदूखलकेन च ॥ १४२ ॥

चतुर्थी निर्जिता विद्या निजपादप्रहारतः ।
शीघ्रं शाकटिका नष्टा मानभंगेन लज्जिता ॥ १४३ ॥
वृषाख्या गलभंगेन पंचमी दमिता तराम् ।
अश्वदेवी तथा षष्ठी गलस्योन्मोटनेन च ॥ १४४ ॥
मेघदेवी तदा तेन सप्ताहोरात्रिवर्षणैः ।
निर्जिता सप्तमी देवी वासुदेवेन धीमता ॥ १४५ ॥
शीघ्रं गोवर्द्धनोत्तुङ्ग-पर्वतोद्धारणेन च ।
काली नामाष्टमी देवी हता पद्मह्रदे मुदा ॥ १४६ ॥
भग्नास्ता देवताः सर्वाः प्रोक्त्वा कंसं प्रति द्रुतम् ।
समर्था देव नैवात्र वयं चेति स्वयं गताः ॥ १४७ ॥
ततश्चाणूरमल्लादि-मर्दनेसौ रणाङ्गणे ।
हत्वा कंसं दुरात्मानं वासुदेवः सुनिर्दयम् ॥ १४८ ॥
उग्रसेनं तथा राज्ये धृत्वा प्राज्ये गुणोज्वलम् ।
जरासन्धं द्विधा कृत्वा त्रिखण्डेशो बभूव च ॥ १४९ ॥
श्रीमन्महापुराणे च कथासौ विस्तरेण वै ।
ज्ञातव्या श्रीजिनेन्द्रोक्त-धर्मशास्त्रविचक्षणैः ॥ १५० ॥
इत्युच्चैर्बहुरागरोषवशतः के के न नष्टा स्वयं
लोकेधर्मपराङ्मुखा जडधियो दुष्कर्मजालाश्रिताः ।
ज्ञात्वैवं बुधसत्तमैः शुचितमैर्धर्मोजिनेन्द्रोदितः
संसेव्यो भवसिन्धुतारणपरः स्वर्गापवर्गप्रदः ॥ १५१ ॥

इति कथाकोशे वसिष्ठमुनेः कथा समाप्ता ।

४५–लक्ष्मीमत्या मानकथा ।

यस्य ज्ञानं जगद्बन्धो-र्लोकालोकप्रकाशकम् ।
श्रेयसे तं जिनं नत्वा वक्ष्ये मानकथानकम् ॥ १ ॥
देशेत्र मगधे ख्याते लक्ष्मीग्रामे मनोहरे ।
सोमदेवद्विजस्यासी-ल्लक्ष्मीमत्यभिधा प्रिया ॥ २ ॥
रूपसौभाग्यसल्लक्ष्मी-यौवनोन्मत्तमानसा ।
सदा विप्रत्वगर्वेण मण्डिता मण्डनप्रिया ॥ ३ ॥
एकदा सोमदेवोसौ ब्राह्मणो धर्मवत्सलः ।
पक्षमासोपवासादि-तपोरत्नाकरं मुनिम् ॥ ४ ॥
समाधिगुप्तनामानं चर्याकाले समागतम् ।
भक्त्या संस्थाप्य तं शीघ्रं दानार्थं त्रिजगद्धितम् ॥ ५ ॥
हे प्रिये भोजयेत्युच्चै-र्मुनीन्द्रं गुणशालिनम् ।
प्रोक्त्वेति कार्यव्यग्रत्वा-न्निर्गतो गेहतः स्वयम् ॥ ६ ॥
साप्यासने स्थिता मूढा पश्यन्ती दर्पणे मुखम् ।
स्वगर्वेण मुनेस्तस्य दत्वा दुर्वचनानि च ॥ ७ ॥
विचिकित्सां पुनः कृत्वा द्वाःकपाटं पिधाय च ।
तस्थौ दुष्टाशया कष्टं हा पापं किमतः परम् ॥ ८ ॥
मुनीन्द्रोपि जगद्वन्द्यो गतश्चारित्रमण्डितः ।
युक्तं पापात्मनां याति निधानं च गृहागतम् ॥ ९ ॥
तत्पापात्सप्तमे घस्रे महोदुम्बरकुष्ठिनी ।
संजाता ब्राह्मणी मानान्मुनेर्निन्दा न शान्तये ॥ १० ॥
सर्वैस्त्यक्ता जनैः पापा-त्तत्कष्टं सोढुमक्षमा ।
अग्निं प्रविश्य सा लक्ष्मी-मती मृत्वार्त्तमानसा ॥ ११ ॥

तत्रैव रजकस्याभू-द्रर्दभी पापकर्मणा ।
दुग्धपानं विना मृत्वा जाता तत्रैव शूकरी ॥ १२ ॥
कुक्कुरी क्रूरपापेन पुनस्तत्रैव कुकुरी ।
सापि दावाग्निना दग्धा कुक्कुरी प्राणहारिणा ॥ १३ ॥
अहो हालाहलं घोरं वरं जन्मैकदुःखदम् ।
भक्षितं न पुनर्निन्दा मुनीनां शीलशालिनाम् ॥ १४ ॥
पत्तने भृगुकच्छाख्ये नर्मदारुनदीतटे ।
काणा नाम्नी सुदुर्गन्धा साभूद्धीवरपुत्रिका ॥ १५ ॥
मानतो ब्राह्मणी जाता क्रमाद्धीवरदेहजा ।
जातिगर्वो न कर्त्तव्य-स्ततः कुत्रापि धीधनैः ॥ १६ ॥
तत्र नावा जनान्नित्यं सा समुत्तारयत्यलम् ।
एकदा तं समालोक्य मुनीन्द्रं ज्ञानलोचनम् ॥ १७ ॥
नदीतीरे प्रणम्योच्चैः संजगौ त्वं मया प्रभो ।
क्वापि दृष्टोसि तच्छ्रुत्वा तेनोक्तं पूर्ववृत्तकम् ॥ १८ ॥
त्वं बालिके पुरा लक्ष्मी-ग्रामे लक्ष्मीमती कुधीः ।
सोमदेवाद्विजस्योच्चै-र्भामिनी मानवञ्चिता ॥ १९ ॥
कृत्वा मे निन्हवं मुग्धे महाकष्टेन पीडिता ।
अग्नौ मृत्वा पुनर्जाता गर्दभी शूकरी क्रमात् ॥ २० ॥
तत्रैव कुक्कुरी भूत्वा कुक्कुरी च ततो मृता ।
अत्र जातासि दुर्गन्धा धीवरीकुक्षिसंभवा ॥ २१ ॥
इत्यादिकं समाकर्ण्य सैव धीवरबालिका ।
ततो जातिस्मरी भूत्वा नत्वा तं मुनिनायकम् ॥ २२ ॥

भो मुने पापकर्माहं संजगादेति दुःखिता ।
रक्ष रक्षात्र योगीन्द्र मां पतन्तीं कुयोनिषु ॥ २३ ॥
ततः समाधिगुप्तेन मुनीन्द्रेण प्रजाल्पितम् ।
धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समर्चितम् ॥ २४ ॥
संजाता क्षुल्लिका तत्र तपः कृत्वा स्वशक्तितः ।
मृत्वा स्वर्गं समासाद्य तस्मादागत्य भूतले ॥ २५ ॥
कुण्डाख्यनगरे राजा भीष्मो राज्ञी यशस्वती ।
तयोः पुत्री बभूवासौ रूपिणी रूपमण्डिता ॥ २६ ॥
वासुदेवेन सा कन्या परिणीता गुणोज्वला ।
पुण्येन सर्वजन्तूनां भवेयुः सम्पदोखिलाः ॥ २७ ॥
सुकुलजन्मयशोवरसम्पदा
सकलशास्त्रमतिर्बुधसंगमः ।
सुगतिरद्भुतशर्म शिवोद्भवं
भवति जैनमतोत्तमसेवनात् ॥ २८ ॥

इति कथाकोशे लक्ष्मीमत्या मानकथा समाप्ता ।

४६–मायाविनी-पुष्पदत्तायाः कथा ।

प्रणम्य त्रिजगन्नाथं श्रीजिनं शर्मकोटिदम् ।
मायाशल्यकथां माया-विनाशाय गदाम्यहम् ॥ १ ॥
अत्राभूदजितावर्त्त-पत्तने सुचिरंतने ।
पुष्पचूलो महाराजः पुष्पदत्ता प्रियाभवत् ॥ २ ॥

एकदासौ महीनाथो राज्यं कुर्वन्निजेच्छया ।
अमरादिगुरोः पार्श्वे मुनीन्द्रस्य महाधियः ॥ ३ ॥
धर्ममाकर्ण्य जैनेन्द्रं स्वर्गमोक्षसुखप्रदम् ।
त्रिधा वैराग्यमासाद्य मुनिर्जातो विचक्षणः ॥ ४ ॥
पुष्पदत्ता च सा राज्ञी बह्मिलाख्यार्यिकान्तिके ।
आर्यिकारूपमादाय कुलैश्वर्यादिगर्विता ॥ ५ ॥
अन्यासामार्यिकाणां च धर्मतत्वपराङ्मुखा ।
वन्दनां न करोति स्म धिङ्मूढाना कुचेष्टितम् ॥ ६ ॥
तथासौ पुष्पदत्ताख्या मूढात्मा स्वशरीरके ।
सुगंन्धद्रव्यकेनोच्चैः संस्कारं कुरुते स्म च ॥ ७ ॥
तदा सा ब्रह्मिला प्राह जैनमार्गे विचक्षणा ।
आर्यिके पुष्पदत्ते भो तवेदं नैव युज्यते ॥ ८ ॥
तच्छ्रुत्वा सापि दुष्टात्मा मायावाक्यं जगाद च ।
भो कन्तिके स्वभावेन सुगन्धं मे शरीरकम् ॥ ९ ॥
यस्य चित्ते स्वयं नास्ति धर्मः श्रीमज्जिनेशिनाम् ।
बोधितस्यापि दुष्टत्वा-त्तस्य दुष्कर्म पापिनः ॥ १० ॥
एवं मायामहाशल्य-मंडिता पुष्पदत्तिका ।
मृत्वा पापेन चम्पायां तद्राजश्रेष्ठिनो गृहे ॥ ११ ॥
जाता सागरदत्तस्य दासी पूतिमुखी कुधीः ।
इति ज्ञात्वा बुधैर्नित्यं त्याज्यं मायाकुकर्म तत् ॥ १२ ॥
मायासौ पशुयोनिदुःखजननी माया कुलध्वंसिनी
माया रूपयशोमहत्वसुगतिश्रीशर्मनिर्नाशिनी ।

ज्ञात्वेत्थं जिनधर्मकर्मनिरतैः सत्पंडितैर्दूरत—
स्त्यक्त्वा तां भवसागरस्य लतिकां धर्मेत्र कार्या मतिः॥ १ ३॥

इति कथाकोशे मायाविनी-पुष्पदत्ता-कथा समाप्ता ।

४७—मरीचि-कथा ।

शर्मशस्याम्बुदं नत्वा श्रीजिनाङ्घ्रिद्वयं मुदा ।
वक्ष्ये मरीचिवृत्तान्तं पूर्वसूत्रानुसारतः ॥ १ ॥
अयोध्यानगरे पूर्वं चक्रिणो भरतेशिनः ।
पुत्रो मरीचिनामाभू-द्भव्यात्मा भद्रमानसः ॥ २ ॥
इन्द्रनागेन्द्रचन्द्राद्यै-श्चर्चितेन निरन्तरम् ।
श्रीमदादिजिनेनामा सोपि जातो मुनिस्ततः ॥ ३ ॥
एकदा तं जिनाधीशं श्रीमत्तीर्थकरं मुदा ।
समवादिसृतौ नत्वा जगाद भरतेश्वरः ॥ ४ ॥
स्वामिन्नग्रे भविष्यन्ति ये त्रयो विंशतिर्जिनाः ।
तेषां मध्येत्र कोप्यस्ति तीर्थेशां भावितीर्थकृत् ॥ ५ ॥
तेनोक्तं श्रीजिनेन्द्रेण केवलज्ञानचक्षुषा ।
भो वत्स ते सुतश्चायं मरीचिर्नैव संशयः ॥ ६ ॥
अन्त्यतीर्थकराधीशो भविष्यति गुणोज्वलः ।
तच्छ्रुत्वा भरताधीशः संजातो हर्षसंकुलः ॥ ७ ॥
मरीचिस्तु तदाकर्ण्य मूढबुद्धिप्रभावतः ।
त्यक्त्वा व्रतं च सम्यक्त्वं मुक्त्वा भूत्वा कुलिंगिभाक् ॥ ८ ॥

परिव्राजकरूपादिनाना सांख्यमतादिकम् ।
संप्रकाश्य स्वयं घोरे संसारे दुःखसागरे ॥ ९ ॥
नाना जन्मांतरा गाधे संभ्रान्तो भूरिभीतिदे ।
प्रमादो देहिनां लोके विघ्नकारीति शत्रुवत् ॥ १० ॥
अज्ञानाद्भव्यजन्तुश्च भवेद्दुःखी प्रमादवान् ।
तस्माद्भव्यैर्न कर्त्तव्यो धर्मकार्ये प्रमादकः ॥ ११ ॥
ततः कालान्तरे कष्टं भ्रमित्वा भूरि संसृतौ ।
मरीचिर्मोहमाहात्म्या-त्पश्चाच्छ्रीजिनधर्मतः ॥ १२ ॥
नन्दाख्यो भूपतिर्भूत्वा गुरुं नत्वाभवन्मुनिः ।
उपार्ज्य तीर्थकृन्नाम षोडशोत्कृष्टकारणैः ॥ १३ ॥
भुक्त्वा स्वर्गसुखं दिव्यं समागत्य महीतले ।
ख्याते कुण्डपुरेत्रैव श्रीसिद्धार्थमहीपतेः ॥ १४ ॥
पुत्रोऽभूत्प्रियकारिण्या-स्तीर्थकृद्भुवनार्चितः ।
कुमारत्वे समादाय दीक्षां जातो मुनीश्वरः ॥ १५ ॥
घातिकर्मक्षयं कृत्वा केवलज्ञानभास्करः ।
सर्वदेवेन्द्रनागेन्द्र-नरेन्द्राद्यैः प्रपूजितः ॥ १६ ॥
भव्यान्सम्बोध्य सन्मार्गे स्वर्गमोक्षसुखप्रदः ।
शेषकर्मक्षयं कृत्वा सम्प्राप्तो मोक्षमक्षयम् ॥ १७ ॥
अहो भव्यास्ततो नित्यं भवन्तः सारशर्मणे ।
चित्ते संभावयन्तूच्चै-र्नान्यथा जिनभाषितम् ॥ १८ ॥
स जयतु शुभकर्त्ता वर्द्धमानो जिनेन्द्रः
सकलभुवननाथैः पूजितो बोधसांद्रः ।

सुरनरखचरेन्द्रोत्कृष्टसौख्यं प्रदत्वा
फलति परमलक्ष्मीं शाश्वतीं यस्य भक्तिः ॥ १९ ॥
इति कथाकोशे मरीचि-कथा समाप्ता ।

४८—गन्धमित्रस्य कथा ।

नत्वानन्तगुणाधीशं श्रीजिनं त्रिजगद्धितम् ।
घ्राणेन्द्रियकथां गन्ध-मित्रस्य रचयाम्यहम् ॥ १ ॥
अयोध्यापत्तने राजा सुधीर्विजयसेनवाक् ।
राज्ञी विजयमत्याख्या तयोः पुत्रौ बभूवतुः ॥ २ ॥
ज्येष्ठोसौ जयसेनाख्यो द्वितीयो गन्धमित्रकः ।
नाना सुगन्धपुष्पादौ लम्पटो मधुलिट् यथा ॥ ३ ॥
एकदासौ महीनाथ-स्त्रिधा वैराग्ययोगतः ।
स्वराज्यं ज्येष्ठपुत्राय दत्वा स्नपनपूर्वकम् ॥ ४ ॥
गन्धमित्रं लघुं पुत्रं युवराज्ये विधाय च ।
मुनेः सागरसेनस्य पादमूले सुभक्तितः ॥ ५ ॥
दीक्षामादाय जैनेन्द्रीं मुनिर्जातो विचक्षणः ।
धर्मकर्मरतो नित्यं भवेत्प्राणी सुलक्षणः ॥ ६ ॥
गन्धमित्रेण तेनापि महातृष्णातुरेण च ।
राज्यमुद्दाल्य तत्पुर्या ज्येष्ठो निर्घाटितो हठात् ॥ ७ ॥
राज्यलक्ष्मीर्महापापं ज्ञातव्यं प्रायशो भुवि ।
यत्रासक्तो जनो मूढो हन्ति बन्धूनपि ध्रुवम् ॥ ८ ॥

तदासौ जयसेनश्च राज्यभ्रष्टः सुदुःखितः ।
तस्य संमारणोपायं स्वचित्ते चिन्तयत्यलम् ॥ ९ ॥
गन्धमित्रः सदा स्त्रीभिः संयुतः सरयूनदीम् ।
गत्वा तत्र जलक्रीडां घ्राणासक्तः करोति सः ॥ १० ॥
तन्मत्वा जयसेनेन ज्येष्ठभ्रात्रा प्रकोपतः ।
विषवासितपुष्पाणि सुगन्धानि प्रपञ्चतः ॥ ११ ॥
तेन मुक्तानि तन्नद्यां तान्यादाय प्रवेगतः ।
गन्धमित्रस्तु मूढात्मा पुष्पाण्याघ्राय लम्पटः ॥ १२ ॥
मृत्वा घ्राणेन्द्रियासक्तः संप्राप्तो नरकं कुधीः ।
इन्द्रियाणां वशः प्राणी क्षयं यान्ति क्षितौ विधिः ॥ १३ ॥
एकेनापि वशीकृतोत्र विषयेनोच्चैर्नरेन्द्रात्मजः
सम्प्राप्तो नरकं सुदुःखकलितं हा गन्धमित्रः कुधीः ।
मूढो यस्तु समस्तभोगनिरतः कष्टं न किं यास्यति
सोप्येवं सुविचार्य पंडितजनः श्रीजैनधर्मेस्तु वै ॥ १४ ॥

इति कथाकोशे घ्राणदोषाख्याने गन्धमित्रस्य कथा समाप्ता।

४९–गन्धर्वसेनायाः कथा ।

सर्वसौख्यप्रदं नत्वा पादद्वैतं जिनेशिनः ।
वक्ष्ये गन्धर्वसेनाया श्चरित्रं मूढचेतसः ॥ १ ॥
पुरे पाटलिपुत्राख्ये राजा गन्धर्वदत्तकः ।
राज्ञी गन्धर्वदत्ताभूत्तयोः पुत्री बभूव च ॥ २ ॥

नाम्ना गन्धर्वसेनासौ नाना गान्धर्वशास्त्रवित् ।
यो जयत्यत्र मां धीरो लसद्गन्धर्वविद्यया ॥ ३ ॥
स मे भर्त्ता भवत्येव नान्यथेति प्रगर्विता ।
प्रतिज्ञां च समादाय क्षत्रियाञ्जयति स्म सा ॥ ४ ॥
श्रुत्वा तां वार्त्तिकां धीमान्पोदनाख्यपुरात्स्वयम् ।
युतः पञ्चशतैश्छात्रैः पांचालस्तत्कलाचणः ॥ ५ ॥
उपाध्यायः समागत्य वादार्थी परया मुदा ।
तत्र पाटलिपुत्रस्य स्थित्वोद्याने मनोहरे ॥ ६ ॥
समायाति यदा कोपि सूचनीयः स मे ध्रुवम् ।
इत्युक्त्वाशोकवृक्षाधः सुप्तोसौ छात्रकान्प्रति ॥ ७ ॥
पुरं द्रष्टुं गतास्तेपि छात्रकाः कौतुकात्तदा ।
तत्र गन्धर्वसेना सा वीक्षितुं तं समागता ॥ ८ ॥
पृष्ट्वा छात्रं च तन्नाम दृष्ट्वा तं निद्रयाश्रितम् ।
वीणासमूहमध्यस्थं लालालिप्तमुखाम्बुजम् ॥ ९ ॥
तत्रारुचिं विधायोच्चै-र्गन्धपुष्पादिवस्त्रकैः ।
तं पादपं समभ्यर्च्य गता गेहं नृपात्मजा ॥ १० ॥
पाञ्चालोशोकवृक्षं च समालोक्य समर्चितम् ।
श्रुत्वा तद्वृत्तकं सर्वं हंहो जातं विरूपकम् ॥ ११ ॥
इत्युक्त्वा तत्पुरं गत्वा नत्वा तं भूपतिं बुधः ।
तत्कन्यामन्दिराभ्यर्णे स्वस्थानं संगृहीतवान् ॥ १२ ॥
तत्र पश्चिमरात्रौ च वीणायाः सुस्वरं मुदा ।
गीतं चकार पाञ्चालो जनानां श्रुतिपेशलम् ॥ १३ ॥

श्रुत्वा गन्धर्वसेना सा गीतं चेतोनुरंजनम् ।
तदासक्ता ततो भूत्वा कुरंगीव प्रवेगतः ॥ १४ ॥
तत्सम्मुखं प्रगच्छन्ती प्रासादाद्धद्रसात्तदा ।
पपात भ्रान्तितः कष्टं मृत्वा दीर्घभवं गता ॥ १५ ॥
कन्याकर्णरसेन लम्पटमतिर्गंधर्वसेना कुधीः
सम्प्राप्ता भवसागरेति विषमे दुष्कर्मणा मज्जनम् ।
चित्ते चेति विचार्य दुःखजनकं पञ्चेन्द्रियाणां सुखं
सन्तः श्रीजिनधर्मशर्मनिलयं नित्यं श्रयन्तु श्रिये ॥१६॥
इति कथाकोशे कर्णेन्द्रियाख्याने गन्धर्वसेनायाः कथा समाप्ता ।

५०–भीमराज्ञः कथा ।

नत्वाहं केवलज्ञान-लोचनं श्रीजिनेश्वरम् ।
वक्ष्ये भीमनृपाख्यानं सतां वैराग्यकारणम् ॥ १ ॥
कांपिल्यनगरे राजा भीमो भीमाशयः कुधीः ।
सोमश्रीर्भामिनी तस्यां भीमदासः सुतोभवत् ॥ २ ॥
कुलक्रमागतत्वाच्च नन्दीश्वरमहाविधौ ।
जीवघातनिषेधस्य दापिता तेन घोषणा ॥ ३ ॥
तत्र तेनैव भीमेन मांसासक्तेन पापिना ।
सूपकारः स्वयं मांसं याचितो दुष्टचेतसा ॥ ४ ॥
सोपि बालं श्मशानाच्च समानीय मृतं तदा ।
भूपतेस्तस्य संस्कृत्य ददौ भीमस्य पापिनः ॥ ५ ॥

तद्भक्षणात्तदा भीमो जिह्वादुस्वादुलम्पटः ।
सूपकारं प्रति प्राह कस्मान्मृष्टमिदं वद ॥ ६ ॥
लब्धाभयेन तेनापि प्रोक्ते तस्मिन्कुकर्मणि ।
भीमो जगाद मे देहि तदेवं नरजंगलम् ॥ ७ ॥
सूपकारस्तदा पापी लड्डुकादिप्रवञ्चनैः ।
नित्यमेकं कुधीर्बालं जनानां हन्ति तत्कृते ॥ ८ ॥
यस्तु पापीजनो लोके संगतिस्तस्य तादृशी ।
यथा भीमस्य सम्पन्नः सूपकारोतिपापधीः ॥ ९ ॥
ज्ञात्वा जनेन तत्सर्वं तयोः पापप्रचेष्टितम् ।
प्रोक्तं मंत्रिकुमाराणां ततस्तैर्नीतिवेदिभिः ॥ १० ॥
भीमदासो विशिष्टात्मा राजपुत्रो महोत्सवैः ।
राज्ये संस्थापितो भक्त्या प्रजानां हितकारकः ॥ ११ ॥
कांपिल्यनगरात्सोपि भीमो दुष्टाशयो द्रुतम् ।
निर्घाटितः कुधीस्तेन सूपकारेण संयुतः ॥ १२ ॥
पापिनः स्वप्रजापुत्र-मित्रमंत्र्यादयो जनाः ।
सर्वे स्युर्बान्धवाश्चापि शत्रवो नात्र संशयः ॥ १३ ॥
ततस्तेन च भीमेन कानने सूपकारकः ।
महाक्षुधातुरेणाशु भक्षितः पापकर्मणा ॥ १४ ॥
सोपि भीमः स्वपापेन मेखलाख्यपुरं गतः ।
मारितो वसुदेवेन संप्राप्तो नरकं ततः ॥ १५ ॥
विगतधर्ममतिर्भवसागरे
पतति कर्मकलंकवशीकृतः ।

बुधजनाश्च ततो वरशर्मणे
शुभकरं जिनधर्मं भजन्तु वै ॥ १६ ॥

इति कथाकोशे रसनेन्द्रियलुब्धभीमराज्ञः कथा समाप्ता।

५१—नागदत्तायाः कथा।

श्रीजिनं त्रिजगत्स्वामि—समर्चितपदद्वयम्।
नत्वाहं नागदत्ताया-श्चरित्रं रचयामि च ॥ १ ॥
आभीराख्यमहादेशे नासक्यनगरे वरे।
वणिक्सागरदत्तोभू-न्नागदत्ता च तत्प्रिया ॥ २ ॥
श्रीकुमारस्तयोः पुत्रः श्रीषेणा तनुजाजनि।
निजेन नन्दगोपेन नागदत्ता रताभवत् ॥ ३ ॥
एकदा नागदत्ताया वाक्यतः सोपि गोपकः।
व्याधिव्याजेन दुष्टात्मा संस्थितश्च गृहे तदा ॥ ४ ॥
स्वयं सागरदत्तस्तु गृहीत्वा गोधनं तदा।
गत्वा पश्चिमरात्रौ च सुप्तोटव्यां सुनिश्चलः ॥ ५ ॥
तत्र गत्वा स नन्देन मारितः पापकर्मणा।
परस्त्रीलम्पटो जीवः किं करोति न निन्दितम् ॥ ६ ॥
तदासौ नागदत्ता च नन्दको निन्दितो भुवि।
दुराचारं प्रकुर्वन्तौ स्थितौ गेहे दुराशयौ ॥ ७ ॥
श्रीकुमारस्तदा मातुः पापकर्मप्रपीडितः।
नित्यं चित्ते करोत्येव महाकष्टं सुलज्जितः ॥ ८ ॥

रुष्टया च तया नन्दः पापिन्या प्रेरितः पुनः ।
श्रीकुमारमपि त्वं रे मारयेत्यत्र गोपकः ॥ ९ ॥
तथा नन्दः स्थितो गेहे रोगव्याजेन पापधीः ।
ततो गोधनमादाय गच्छन्स श्रीकुमारकः ॥ १० ॥
भगिन्या भणितः शीघ्रं बान्धवः श्यादिषेणया ।
नागदत्ताज्ञया धीर यथा ते मारितः पिता ॥ ११ ॥
मार्यसे त्वमपि व्यक्तं नन्दकेनाद्य पापिना ।
कुरु त्वं यत्नमत्युच्चै-स्तच्छ्रुत्वा श्रीकुमारवाक् ॥ १२ ॥
गत्वाटव्यां महाकाष्ठं वस्त्रेणाछाद्य वेगतः ।
धृत्वा वने स्वयं तत्र तिरो भूत्वा च संस्थितः ॥ १३ ॥
ततो नन्देन गत्वाशु हते खड्गेन दारुके ।
सेल्लेन श्रीकुमारेण हतो नन्दः सुपृष्ठतः ॥ १४ ॥
प्रभाते गृहमायातो गृहीत्वा गोधनं तदा ।
दोहनार्थं कुमारोसौ तया पृष्टः सुदुष्टया ॥ १५ ॥
त्वां गवेषयितुं पुत्र प्रेषितो नन्दको मया ।
कुत्र संतिष्ठते सोपि तच्छ्रुत्वा नन्दनोवदत् ॥ १६ ॥
अयं जानाति सेल्लो मे ततस्तं वीक्ष्य सेल्लकम् ।
रक्तलिप्तं सुपापिन्या दुष्टया नागदत्तया ॥ १७ ॥
आहत्य मुषलेनैव मारितः श्रीकुमारकः ।
श्रीषेणयातिकोपेन सा तदा दुष्टमानसा ॥ १८ ॥
मारिता मुशलेनाशु नागदत्ता सुपापिनी ।
मृत्वा च नरकं प्राप्ता पापी पापेन पच्यते ॥ १९ ॥

धिक्कामं सुदुराचारं येनासक्तो जनः कुधीः ।
महापापमुपार्ज्यैवं स्वयं यात्येव दुर्गतिम् ॥ २० ॥
तस्माद्भव्यैर्जिनेन्द्रोक्तं शीलं शर्मशतप्रदम् ।
पालनीयं जगच्चेतो-रंजनं धर्महेतवे ॥ २१ ॥
शीलं श्रीजिनभाषितं शुचितरं देवेन्द्रवृन्दैः स्तुतं
शीलं दुःखकलंकपंकसलिलं शीलं जगन्मोहनम् ।
ये भव्याः प्रतिपालयन्ति नितरां नित्यं सुशर्मप्रदं
भुक्त्वा ते त्रिदशादिसौख्यमतुलं शुद्धं लभन्ते सुखम् ॥२२॥

इति कथाकोशे नागदत्तायाः कथा समाप्ता ।

५२—द्वीपायनमुनेः कथा ।

प्रणम्य त्रिजगत्पूज्यं श्रीजिनं शर्मकोटिदम् ।
द्वीपायनस्य संवक्ष्ये चरित्रं मुनिभाषितम् ॥ १ ॥
पुरी द्वारवती ख्याता देशे सौराष्ट्रसंज्ञके ।
श्रीमन्नेमिजिनेन्द्रस्य जन्मनायापवित्रिता ॥ २ ॥
तत्र श्रीबलभद्राख्य-वासुदेवौ नरेश्वरौ ।
महाराज्यं प्रकुर्वन्तौ नवमौ हलिकेशवौ ॥ ३ ॥
एकदा तौ जगत्पूज्यं श्रीमन्नेमिजिनाधिपम् ।
ऊर्जयन्तगिरौ नत्वा समवादिसृतौ स्थितम् ॥ ४ ॥
अष्टधा सुमहाद्रव्यैः समभ्यर्च्य सुभक्तितः ।
स्तुत्वा सद्धर्ममाकर्ण्य हृष्टो ज्येष्ठो जगाद च ॥ ५ ॥

जगद्बन्धो जिनाधीश केवलज्ञानलोचन ।
ब्रूहि मो त्रिजगन्नाथ प्रोल्लसत्करुणार्णव ॥ ६ ॥
ईदृशी वासुदेवस्य सम्पदा शर्मदायिनी ।
भविष्यति कियत्कालं लोकालोकप्रकाशक ॥ ७ ॥
तदा प्राह जिनाधीशो वासुदेवस्य सम्पदा ।
स्थित्वा द्वादशवर्षेषु ततो नाशं प्रयास्यति ॥ ८ ॥
यादवानां क्षयो मद्या-द्भविष्यति निसंशयः ।
दाहो द्वारवतीपुर्या द्वीपायनकुमारतः ॥ ९ ॥
अनया छुरिकया च बलभद्र त्वदीयया ।
जरत्कुमारहस्तेन वासुदेवक्षयो ध्रुवम् ॥ १० ॥
तच्छ्रुत्वा वासुदेवेन मद्यं सर्वं प्रवेगतः ।
ऊर्जयन्तगिरेः कुंजे निक्षिप्तं पापकारणम् ॥ ११ ॥
द्वीपायनो मुनिर्भूत्वा पूर्वदेशं गतो द्रुतम् ।
मूढाः कुर्वन्तु कर्माणि नान्यथा जिनभाषितम् ॥ १२ ॥
छुरिका बलभद्रस्य घृष्टा सूक्ष्मा च सागरे ।
निक्षिप्ता सा तु मत्स्येन गृहीता कर्मयोगतः ॥ १३ ॥
पारंपर्येण तां प्राप्य विध्वस्तछुरिकां तदा ।
चक्रे जरत्कुमारोसौ बाणाग्रं पापकर्मणा ॥ १४ ॥
ततो द्वादश वर्षेषु द्वीपायनमुनिर्मुदा ।
अजानन्नधिकान्मासान्समागत्य निजेच्छया ॥ १५ ॥
ऊर्जयन्तगिरेः पार्श्वे स्थितश्चातापनेन सः ।
योगेन कर्मणां योगो हन्यते केन भूतले ॥ १६ ॥

तस्मिन्नेव दिने पाप-कर्मणा प्रेरितैर्भृशम् ।
यादवानां कुमाराद्यैः क्रीडां कृत्वा च पर्वते ॥ १७ ॥
मार्गे महातृषाक्रान्तै-र्भ्रान्त्या मद्याश्रितं जलम् ।
पीत्वा पुरं प्रगच्छद्भि-र्मत्तवन्नष्टचेतनैः ॥ १८ ॥
द्वीपायनमुनेरग्रे रक्षार्थं भक्तितस्तराम् ।
सार्द्धं श्रीवासुदेवेन बलभद्रेण निर्मिताम् ॥ १९ ॥
पाषाणवृत्तिमालोक्य पाषाणैः स मुनिस्तदा ।
पूरितस्तैर्महापापं हा कष्टं मद्यचेष्टितम् ॥ २० ॥
मत्तो मातृभगिन्यादौ कामचेष्टां प्रवाञ्छति ।
वेत्ति किंचिन्न पापात्मा मद्यपानी सुनिर्दयः ॥ २१ ॥
तां वार्त्तां च समाकर्ण्य बलभद्रेण धीमता ।
युतेन वासुदेवेन तत्रागत्य प्रभाक्तितः ॥ २२ ॥
सोपि कण्ठगतप्राणो द्वीपायनमुनिर्द्रुतम् ।
सत्क्षमां कारितो मूढो दर्शयामास चांगुली ॥ २३ ॥
ततो मृत्वा क्रुधा भूत्वा सोपि भावनदेवकः ।
तौ द्वौ मुक्त्वाग्निना पापी सर्वां द्वारवतीं पुरीम् ॥ २४ ॥
भस्मीचक्रेति कोपेन किं करोति न मूढधीः ।
ततो भव्यैः प्रशान्त्यर्थं कोपः सन्त्यज्यते सदा ॥ २५ ॥
नष्ट्वा तौ भ्रातरौ कष्टं देहमात्रपरिग्रहौ ।
संप्राप्तौ काननं घोरं पापपाके क्व सम्पदा ॥ २६ ॥
पुण्योदये सुखी प्राणी भवेद्दुःखी स्वपापतः ।
तस्मात्पापं परित्यज्य पुण्यं कुर्वन्तु धीधनाः ॥ २७ ॥

पुण्यं पात्राश्रितं दानं पुण्यं श्रीजिनपूजनम् ।
पुण्यं शीलोपवासाद्यै-र्भाषितं पूर्वसूरिभिः ॥ २८ ॥
वने जरत्कुमारेण तेन बाणेन कष्टतः ।
वासुदेवस्तृषाक्रान्तो हतः स्वस्थानकं गतः ॥ २९ ॥
शोकाच्छ्रीबलभद्रस्तु संवहन्मृतकं तदा ।
पूर्वजन्मप्रमित्रेण देवेन प्रतिबोधितः ॥ ३० ॥
चन्दनाद्यैः सुधीः शीघ्रं कृत्वा तद्दहनक्रियाम् ।
त्रिधा वैराग्यसम्पन्नो जैनतत्वविदांवरः ॥ ३१ ॥
दीक्षामादाय जैनेन्द्रीं तपः कृत्वा सुदुस्सहम् ।
तुंग्यां सम्प्राप्य माहेन्द्र-स्वर्गे देवो बभूव सः ॥ ३२ ॥
लसत्किरीटभूषाद्यै-र्दिव्यवस्त्रैः सुभूषितः ।
सेवितः सुरसन्दोहै-रप्सरोभिः समन्वितः ॥ ३३ ॥
नाना भोगान्प्रभुञ्जानः स्वर्गलोकसमुद्भवान् ।
मेरुकैलासशैलादौ जिनबिम्बानि पूजयन् ॥ ३४ ॥
महाभक्त्या विमानस्थो गत्वा सद्धर्महेतवे ।
साक्षात्तीर्थङ्करानुच्चैः सद्दृष्टिस्तान्समर्चयन् ॥ ३५ ॥
इत्यादिश्रीजिनाधीश-महासेवापरायणः ।
स देवः पूर्वपुण्येन संस्थितस्तत्र सौख्यतः ॥ ३६ ॥
स श्रीमान्बलभद्रदेवसुमुनी रत्नत्रयालङ्कृतः
श्रीमज्जैनपदाब्जयुग्ममधुलिट् चारित्रचूडामणिः ।
शान्तिं कान्तिमनःप्रसन्नसहितां नित्यं महामङ्गलं
दद्यान्मे गुणरत्नरंजितमतिः सद्बोधसिन्धुः सुखम् ॥ ३७ ॥

इति कथाकोशे द्वीपायनमुनेः कथा समाप्ता ।

५३–मद्यदोष-कथा ।

श्रीमत्सर्वज्ञमानम्य वक्ष्ये सम्पद्विधायकम् ।
जनानां प्रतिबोधाय मद्यदोषकथानकम् ॥ १ ॥
एकचक्रपुरात्पूर्वं गंगां गन्तुं विनिर्गतः ।
एकपादविधो वेद-वेदाङ्गानां सुपारगः ॥ २ ॥
स परिव्राजको विष्णु-चरणाम्भोजषट्पदः ।
मार्गे गच्छन्विधेर्योगा-त्प्राप्तो विन्ध्याटवीं तदा ॥ ३ ॥
तत्राटव्यां वयोन्मत्तैः प्रोन्मत्तैर्मद्यपानतः ।
मांसासक्तैः कुमातंगै-र्मातंगीगीतसङ्गतैः ॥ ४ ॥
मार्गे रुद्धा धृतः सोपि भणितश्चेति रे द्विज ।
मद्यमांसनवस्त्रीणां मध्ये यद्रोचते तराम् ॥ ५ ॥
तदेकं क्रियते कर्म त्वया भो नान्यथा ध्रुवम् ।
जीवता दृश्यते गंगा-नदी रे मूढमानस ॥ ६ ॥
सोपि तत्र स्मृतेर्वाक्यं चिन्तयामास चेतसि ।
तिलसर्षपमात्राच्च दोषाः स्युर्मांसभक्षणात् ॥ ७ ॥

यतः—

तिलसर्षपमात्रं च मांसं खादन्ति ये नराः ।
तिष्ठन्ति नरके ताव-यावच्चन्द्रदिवाकरौ ॥
चाण्डालीसंगमे चात्र द्विजानां सुकुलोद्भवाम् ।
प्रायश्चित्तान्नवेच्छुद्धिः काष्ठभक्षणसंज्ञकात् ॥
य एवं विधां सुरां पिबति न तेन सुरा पीता भवतीति
निखिलमखमणौ सूत्रामणौ ।

धातकीपिष्टपानीयै-र्गुडाद्यैर्मद्यसंभवः ।
तस्माद्धेतोर्न दोषोत्र, स्वचित्ते चेति मूढधीः ॥ ८ ॥
संविचार्य महापापं मद्यपानं चकार सः ।
तस्य माहात्म्यतो गाढं संजातो नष्टमानसः ॥ ९ ॥
दूरीकृत्य स्वकौपीनं चक्रे चोद्भटनर्त्तनम् ।
ग्रहग्रस्तो यथा कष्टं कुसङ्गः कुलनाशकः ॥ १० ॥
ततस्तीव्रक्षुधाक्रान्तो मतिभ्रष्टः स तापसः ।
पापकर्मोदये शीघ्रं पलं भक्षितवान्पुनः ॥ ११ ॥
पूर्णकुक्षिस्ततः सोपि प्रोल्लसत्कामपीड़ितः ।
मातंगीं मदनोन्मत्तां कुधीः कामितवांस्तदा ॥ १२ ॥

भवतिचात्र श्लोक—

हेतुशुद्धेः श्रुतेर्वाक्यात्पीतमद्यः किलैकपात् ।
मांसमातङ्गिकासङ्ग-मकरोन्मूढमानसः ॥
इति ज्ञात्वा बुधैस्त्याज्या हेतुशुद्धेर्मतिर्भुवि ।
मृष्टतोयात्समुत्पन्नं विषं हन्त्येव देहिनाम् ॥ १३ ॥
नित्यस्नानविधायको हरिपदद्वन्द्वे सुसेवापरो
वेदज्ञोपि किलैकपात्स्मृतिमतिर्नष्टः परिव्राजकः ।
अज्ञानादिह हेतुशुद्धिचलितो मुक्त्वा सुशीलं ततो
ज्ञात्वैवं बुधसत्तमैर्जिनपतेः संज्ञानमासेव्यताम् ॥ १४ ॥

इति कथाकोशे मद्यदोषाख्याने एकपात्परिव्राजकस्य कथा समाप्ता ।

५४–सगरचक्रवर्त्तिनः कथा।

संप्रणम्य जिनाधीशं सुराधीशैः समर्चितम्।
श्रीमद्द्वितीयचक्रेश-चरित्रं रचयाम्यहम्॥ १ ॥
जम्बूद्वीपेत्र विख्याते प्राग्विदेहे मनोहरे।
सीतानद्या अवाग्भागे सुदेशो वत्सकावती ॥ २ ॥
तत्रस्थे पृथिवीनाम-पत्तने सुचिरन्तने।
जयसेनो महाराजो जयसेनास्य तत्प्रिया ॥ ३ ॥
तयोः पुत्रः समुत्पन्नो रतिषेणो गुणोज्वलः।
द्वितीयो धृतिषेणश्च चारुसौभाग्यशोभितः ॥ ४ ॥
एकदा रतिषेणाख्यो मृत्युं प्राप्तो विधेर्वशात्।
तच्छोकेन महीनाथो जयसेनो विशुद्धधीः ॥ ५ ॥
स्वराज्यं धृतिषेणाय दत्वा पुत्राय धीमते।
समभ्यर्च्य जिनाधीशान्कार्यसिद्धिविधायिनः ॥ ६ ॥
सार्द्धं महारुतेनोच्चै-र्मिथुनेन तथा नृपैः।
यशोधरगुरोः पार्श्वे दीक्षां जैनेश्वरीं श्रितः ॥ ७ ॥
दीर्घकालं तपः कृत्वा संन्यासेन प्रसन्नधीः।
मृत्वा महाबलो नाम्ना देवोभूदच्युतो महान् ॥ ८ ॥
महारुतोपि तत्रैव मणिकेतुः सुरोभवत्।
जिनेन्द्रपदपद्मेषु चञ्चरीकोतिभक्तिमान् ॥ ९ ॥
स्वर्गलक्ष्मीं समासाद्य तयोः सन्तुष्टचेतसोः।
आवयोर्यो महीभागे पूर्वं याति नृजन्मताम् ॥ १० ॥

तस्यान्यो बोधको भूया-ज्जैनदीक्षाकृते सुधीः ।
धर्मानुरागतश्चेति संजाते वचसि स्थिरे ॥ ११ ॥
द्वाविंशत्यब्धिभिः पूर्णं भुक्त्वा सौख्यं सुराश्रितम् ।
च्युत्वासावच्युतः स्वर्गा-च्छेषपुण्यप्रभावतः ॥ १२ ॥
सुधीर्महाबलो देवः साकेतनगरे शुभे ।
समुद्रविजयस्योच्चै-र्भूपतेः सुबलापतेः ॥ १३ ॥
पुत्रोभूत्सगराख्योसौ सज्जनानन्ददायकः ।
पूर्वाणां सप्ततिर्लक्षा-स्तस्यायुःपरमावधिः ॥ १४ ॥
चतुःशतानि चापानां पञ्चाशदधिकानि च ।
कनत्काञ्चनसद्वर्ण-कायोत्सेधोस्य वर्णितः ॥ १५ ॥
रूपलावण्यसंयुक्तः प्राप्तसद्यौवनो गुणी ।
श्रित्वा राज्यश्रियं धीमान्षट्खण्डाधिपतिर्बभौ ॥ १६ ॥
भुञ्जानस्य महाभोगा-ञ्जिनभक्तिप्रपूर्वकम् ।
तस्य षष्ठि सहस्राणि पुत्राणामभवन्सुखम् ॥ १७ ॥
अहो पुण्येन जन्तूनां भवेयुः सारसम्पदः ।
तस्मात्पुण्यं जिनोद्दिष्टं कुर्वन्तु सुधियो जनाः ॥ १८ ॥
तदा सिद्धवने श्रीम-च्चतुर्मुखमहामुनेः ।
केवलज्ञानसम्प्राप्तौ पूजार्थं परया मुदा ॥ १९ ॥
देवेन्द्राद्यैः समायातैः सहागत्य सुरोत्तमः ।
ज्ञात्वा तं सगराधीशं मणिकेतुर्मुदावदत् ॥ २० ॥
भो प्रभो स्मरसि व्यक्तं यदावाभ्यां पुरोदितम् ।
अच्युताख्ये महास्वर्गे प्रोल्लसत्प्रीतियोगतः ॥ २१ ॥

नृलोकं याति यः पूर्वं स्वर्गस्थेन महाधिया ।
शीघ्रं सम्बोधनीयश्च स श्रीजैनतपोविधौ ॥ २२ ॥
त्वया भुक्तं महाराज्यं दीर्घकालं विचक्षणः ।
किं पुनर्भूरिभिर्भोगै-र्भव्यात्मन्दुःखकारणैः ॥ २३ ॥
अतस्त्वं श्रीजिनेन्द्रोक्तं तपो धृत्वा जगद्धितम् ।
सावधानस्तरां भूत्वा कुरु प्रीतिं शिवश्रिये ॥ २४ ॥
इति श्रीसगरश्चक्री बोधितोपि सुधाशिना ।
विरक्तः संसृतेर्नैव पुत्राणां मोहमूर्च्छितः ॥ २५ ॥
ज्ञात्वा तन्मानसं भूरि सम्पदाप्रमदाश्रितम् ।
स्वस्थानं स सुरः प्राप्तः कुतो लब्ध्या विना शुभम् ॥ २६ ॥
तथैकदा सुरः सोपि तं तपो ग्राहितुं पुनः ।
मणिकेतुः समागत्य धृत्वा चारणरूपकम् ॥ २७ ॥
भावयन्संयमं जैनं स्वर्गमोक्षसुखप्रदम् ।
सगरस्य जिनागारे जिनबिम्बानि भक्तितः ॥ २८ ॥
वन्दित्वा शर्मदान्युच्चैः संस्थितो दिव्यरूपभाक् ।
दृष्ट्वा तं विस्मयं प्राप्तो जगाद सगरो नृपः ॥ २९ ॥
किं कारणं तपो लक्ष्म्या भो मुने यौवनोद्यते ।
तवेत्याकर्ण्य गूढात्मा संजगौ स मुनीश्वरः ॥ ३० ॥
यौवनं तडिदाभं भो भूपते भाति भूतले ।
कोयं कायोशुचिर्गोढं भोगा वा भोगिनोऽहिताः ॥ ३१ ॥
संसाराब्धिर्महाघोरो दुस्तरो मोहिनां विभो ।
तीर्यतेत्र मया चारु-तपोनावा जिनेशिनः ॥ ३२ ॥

इत्यादिकैः शुभैर्वाक्यै-र्बोधितोपि महीपतिः ।
जानन्संसारसद्भावं पुत्रपाशं न मुक्तवान् ॥ ३३ ॥
वर्त्तते नातितुच्छोस्य संसारश्चेति मानसे ।
ज्ञात्वा देवः सखेदोसौ मणिकेतुर्दिवं गतः ॥ ३४ ॥
अथैकदा सुतास्तेपि नृपं सिंहासनस्थितम् ।
नत्वा भक्त्या जगुः सर्वे श्रूयतां भो नृपाधिप ॥ ३५ ॥
ये पुत्राः क्षत्रियाणां च शूरा धीरा धरातले ।
असाध्यं स्वपितुर्नैव साधयन्ति सुभक्तितः ॥ ३६ ॥
तेषां जन्म भटत्वं च निष्फलं वन्ध्यवृक्षवत् ।
अतोस्माकं कृपां कृत्वा भवद्भिः सुविचक्षणैः ॥ ३७ ॥
दीयते प्रेषणं किंचि-द्येन स्यात्सफलं तनुः ।
तत्समाकर्ण्य चक्रेशो जगाद मधुरं वचः ॥ ३८ ॥
न मेऽसाध्यमहो पुत्राः षट्खण्डेषु प्रवर्त्तते ।
तस्मादेष ममादेशो भवद्भिर्भुज्यते धनम् ॥ ३९ ॥
तच्छ्रुत्वा भूपतेर्वाक्य-मनुलंघ्यं च ते सुताः ।
नत्वा मौनं विधायोच्चैः संस्थिताः शंकिताशयाः ॥ ४० ॥
तथान्येद्युः समासाद्य भूपतिं स्थिरसंस्थितम् ।
पुनः प्रणम्य सद्भक्त्या प्रोचुस्ते सुभटोत्तमाः ॥ ४१ ॥
प्रेषणेन विना देव क्रियते नैव भोजनम् ।
अस्माभिश्चेति तच्छ्रुत्वा संविचार्य प्रभुर्जगौ ॥ ४२ ॥
भो पुत्रा धर्मकार्यं मे वर्त्तते शर्मकारणम् ।
कैलासे कारिताः श्रीम-च्चक्रिणा भरतेदिना ॥ ४३ ॥

चतुर्विंशतितीर्थेशां गृहाः काञ्चननिर्मिताः ।
प्रोल्लसद्रत्ननिर्माणा यत्रार्हत्प्रतिमाः शुभाः ॥ ४४ ॥
तेषां यत्नाय कुर्वन्तु भवन्तः परितो गिरिम् ।
गंगासत्खातिकां शीघ्रं दुस्तरां दुष्टचेतसाम् ॥ ४५ ॥
ततस्ते तं नृपं नत्वा परमानन्दनिर्भराः ।
दण्डरत्नेन तां चक्रुः सत्वरं साहसोद्धताः ॥ ४६ ॥
तस्मिन्नेव क्षणे धीमान्सम्बोधाय महीपते ।
मणिकेतुः सुरः सोपि कुमारान्देवमायया ॥ ४७ ॥
क्रूरनागाकृतिं धृत्वा भस्मीचक्रे बुधोत्तमः ।
क्वचित्सन्तः प्रकुर्वन्ति सद्धिताय हितेतरम् ॥ ४८ ॥
ज्ञात्वापि मरणं तेषां मंत्र्याद्यास्तस्य भूपतेः ।
तद्दुःखमसमर्थस्य सोढुं चक्रुर्न तां कथाम् ॥ ४९ ॥
तदा ब्राह्मणरूपेण स देवो मणिकेतुवाक् ।
समागत्य नृपप्रान्ते शोकाकुलितमानसः ॥ ५० ॥
अहो चक्रेश भूचक्रं रक्षत्युच्चैस्त्वयि प्रभो ।
अन्तकेन सुतो मेत्र गृहीतो दुष्टचेतसा ॥ ५१ ॥
तं त्वं प्राणप्रियं पुत्रं समानीय प्रभो द्रुतम् ।
यावत्प्राणस्थितिर्मेत्र तावद्देहि महीपते ॥ ५२ ॥
चक्रे पूत्कारकं चेति तन्निशम्य धराधिपः ।
किंचिद्धास्यं विधायोच्चै-स्तस्य सम्बोधनाय च ॥ ५३ ॥
जगौ भो विप्र किं मुग्ध-स्त्वं जातोसि महीतले ।
विना सिद्धैर्निराबाधैर्यमः केनात्र वार्यते ॥ ५४ ॥

तं निवारयितुं वाञ्छा वर्त्तते भवतो यदि ।
दीक्षां जैनीं समादाय कुरु त्वं स्वात्मनो हितम् ॥ ९५ ॥
तच्छ्रुत्वा स द्विजः प्राह सत्यमेतन्महीपते ।
यद्यमं प्रति नैवात्र समर्थोस्ति नरोपि कः ॥ ९६ ॥
त्वया भयं न कर्त्तव्यं मया किंचित्प्रकथ्यते ।
पुत्रास्ते मारिताः सर्वे यमेन प्राणहारिणा ॥ ९७ ॥
तत्समाकर्ण्य भूपालो प्रोल्लसच्छोकमूर्च्छितः ।
महादुःखवचः श्रुत्वा कस्य मूर्च्छा न जायते ॥ ९८ ॥
तदा शीतोपचाराद्यै-र्गुरोर्वाक्यामृतैरिव ।
चेतनां स नृपो नीतः सज्जनैश्चित्तरञ्जनैः ॥ ९९ ॥
ततस्त्रिविधवैराग्यं समासाद्यैव चक्रभृत् ।
दत्वा भागीरथायोच्चैः स राज्यं मोहवर्जितः ॥ ६० ॥
दृढधर्मजिनेन्द्रस्य पादपद्मद्वयान्तिके ।
दीक्षां जग्राह जैनेन्द्रीं भवभ्रमणनाशिनीम् ॥ ६१ ॥
तदासौ वेगतो गत्वा कैलासं च सुरोत्तमः ।
मायामृत्युमपाकृत्य चक्रिपुत्राङ्गगौ पुनः ॥ ६२ ॥
अहो पुत्रा भवन्मृत्युं समाकर्ण्यैव दुःखितः ।
युष्मत्पिता श्रियं त्यक्त्वा तपो धृत्वा वनं श्रितः ॥ ६३ ॥
यस्मादहं समायातो महाचिन्ताहताशयः ।
युष्मत्कुलद्विजोन्वेष्टुं भवतो नृपदेहजान् ॥ ६४ ॥
सर्वे षष्ठि सहस्राणि पुत्रास्ते तद्वचः श्रुतेः ।
दृढधर्मजिनस्यैव पार्श्वे दीक्षां समाश्रिताः ॥ ६५ ॥

श्रीमान्भगीरथश्चापि नत्वा तान्मुनिसत्तमान् ।
श्रुत्वा धर्मं जिनेन्द्राणां संजातः श्रावकोत्तमः ॥ ६६ ॥
तदासौ प्रगटीभूय मणिकेतुसुरः सुधीः ।
नत्वा श्रीसगरादींश्च मुनीन्सुतपासि दृढान् ॥ ६७ ॥
क्षन्तव्यं सेवकेनोच्चै-र्निर्मितेत्रापराधके ।
भवद्भिर्जैनतत्वज्ञै-र्भक्त्या चेति जगौ गिरम् ॥ ६८ ॥
तच्छ्रुत्वा मुनयः प्राहुर्भो सुरेन्द्र बुधोत्तम ।
कोपराधस्तवास्माकं कार्यसिद्धिर्विधायिनः ॥ ६९ ॥
यत्त्वया निर्मितं कार्यं महामित्रेण धीमता ।
तत्कर्तुं कः क्षमो लोके त्वां विना धर्मवत्सलः ॥ ७० ॥
अतस्त्वमेव भो देव जैनपादाब्जषट्पदः ।
मुक्तिलक्ष्म्याः परिप्राप्त्यै कारणं शर्मकारणम् ॥ ७१ ॥
इत्यादिकं वचः श्रुत्वा स देवो सुखदायकम् ।
तान्प्रणम्य महाभक्त्या सिद्धकार्यो दिवं गतः ॥ ७२ ॥
ते मुनीद्रा जिनेन्द्रोक्तं तपः कृत्वा सुदुस्सहम् ।
सम्मेदपर्वते मोक्षं शुक्लध्यानेन संययुः ॥ ७३ ॥
तेषां निर्वाणसम्प्राप्तिं श्रुत्वा निर्विण्णमानसः ।
सुधीर्भगीरथश्चापि वरदत्ताय धीमते ॥ ७४ ॥
दत्वा राज्यं निजं प्राज्यं जिनस्नपनपूर्वकम् ।
कैलासाख्यगिरिं गत्वा शिवगुप्तमहामुनेः ॥ ७५ ॥
नत्वा पादद्वयं भक्त्या गृहीत्वा सुतपःश्रियम् ।
भूत्वा महामुनिर्गंगा-नदीतीरे मनोहरे ॥ ७६ ॥

संस्थितः प्रतिमायोगं समादाय बुधोत्तमः ।
तदा सर्वे सुरेन्द्राद्याः क्षीराब्धेस्तोयसद्घटैः ॥ ७७ ॥
श्रीमद्भगीरथस्यास्य भक्त्या पादाब्जयोर्मुदा ।
चक्रुर्महाभिषेकं च शर्मकोटिविधायकम् ॥ ७८ ॥
तत्प्रवाहं समासाद्य सापि गंगा नदी तराम् ।
तदा प्रभृति तीर्थत्वं जनानां समुपागता ॥ ७९ ॥
तस्मिन्गंगातटे चापि भगीरथमुनीश्वरः ।
कृत्वा तपः शिवं प्राप्तो जरामरणवार्जितम् ॥ ८० ॥
स जयतु सगराख्यः केवलज्ञानचक्षुः
सकलसुरसमर्च्यो मुक्तिकान्तासुकान्तः ।
विदितपरमतत्वास्ते मुनीन्द्राश्च नित्यं
मम विशदसुखश्रीकारणं सन्तु सन्तः ॥ ८१ ॥

इति कथाकोशे द्वितीयचक्रवर्त्तिसगरस्य कथा समाप्ता ।

५५–मृगध्वजस्य कथा ।

नत्वा जिनं महाभक्त्या त्रैलोक्यप्रभुपूजितम् ।
वक्ष्ये मृगध्वजाख्यानं पूर्वाचार्यैः प्रभाषितम् ॥ १ ॥
अयोध्या नगरे रम्ये राजा सीमन्धरोभवत् ।
तत्प्रिया जिनसेनाख्या तयोः पुत्रो मृगध्वजः ॥ २ ॥
राजकीयोपि तत्रैको महिषो भणितो जनैः ।
समायाति प्रयात्येव पादयोश्च पतत्यलम् ॥ ३ ॥

क्रीडन्तं पुष्करिण्यां तं समालोक्यैकदा पशुम् ।
मंत्रिश्रेष्ठिकुमाराभ्यां सहायातो मृगध्वजः ॥ ४ ॥
राजपुत्रो जगौ तत्र मांसासक्तः स्वसेवकम् ।
पश्चिमं चरणं चास्य मह्यं देहीति पापधीः ॥ ५ ॥
तथा कृते च भृत्येन महिषः सोपि कष्टतः ।
त्रिभिः पादैर्नृपस्याग्रे गत्वा संपतितस्तदा ॥ ६ ॥
राजा सीमन्धरस्तस्मै जिनधर्मधुरन्धरः ।
सारपञ्चनमस्कारान्ददौ संन्याससंयुतान् ॥ ७ ॥
परोपकारिणः केचित्सन्ति सन्तो गुणाकराः ।
चन्द्रार्ककल्पवृक्षोरु-तोयदेभ्योतिसुन्दराः ॥ ८ ॥
तत्प्रभावेन सौधर्म-स्वर्गे देवो बभूव सः ।
श्रीमज्जैनेन्द्रसद्धर्मो देहिनां सुहितंकरः ॥ ९ ॥
पुत्रवृत्तान्तमाकर्ण्य ततो रुष्टेन भूभुजा ।
सिद्धार्थमंत्रिणः प्रोक्तं मारय त्रीनपि द्रुतम् ॥ १० ॥
तां वार्तां च ततः श्रुत्वा मंत्रिश्रेष्ठिनृपात्मजाः ।
मुनिदत्तमुनेः पार्श्वे जैनी दीक्षां समाश्रिताः ॥ ११ ॥
ततो वैराग्यभावेन तपः कृत्वा सुदुस्सहम् ।
मृगध्वजो मुनिः सोपि जैनतत्वविदाम्वरः ॥ १२ ॥
क्षयं नीत्वा सुधीर्ध्यानाद् घातिकर्मचतुष्टयम् ।
केवलज्ञानमुत्पाद्य संजातो भुवनार्चितः ॥ १३ ॥
महापापप्रकर्त्तापि प्राणी श्रीजैनधर्मतः ।
भवेत्रिलोक्यसंपूज्यो धर्मात्किं भो परं शुभम् ॥ १४ ॥

स श्रीकेवललोचनोतिचतुरो भव्यौघनिस्तारको
देवेन्द्रादिसमर्चितो हितकरो धीरो मृगादिध्वजः ।
नाना शर्मयशःप्रबोधजनकैर्भक्त्या समाराधितो
दद्यान्मे भवतां च निर्वृतिपदं नित्यं महामङ्गलम् ॥ १९ ॥

इति कथाकोशे मृगध्वजमुनेराख्यानं समाप्तम् ।

५६–परशुरामस्य कथा ।

नमस्कृत्य जिनाधीशं संसाराम्भोधितारणम् ।
श्वेतरामस्य संवच्मि चरित्रं चित्रकारणम् ॥ १ ॥
अयोध्यापत्तने राजा कार्त्तवीर्योतिमूढधीः ।
पद्मावती महाराज्ञी तस्यासीत्प्राणवल्लभा ॥ २ ॥
अटव्यां तापसावास-पल्लिकायां च तापसः ।
रेणुका कामिनीनाथ-स्तत्रास्ते यमदग्निवाक् ॥ ३ ॥
तयोः पुत्रौ मनःप्रीतौ श्वेतरामस्तु पूर्वकः ।
महेन्द्ररामनामा च द्वितीयः प्राणवल्लभः ॥ ४ ॥
एकदा रेणुकाभ्राता वरदत्तो मुनीश्वरः ।
तत्पल्लिकासमीपेसौ वृक्षमूले सुखास्थितः ॥ ५ ॥
तत्र तं रेणुका वीक्ष्य भ्रातरं मुनिसत्तमम् ।
महाप्रीत्या प्रणम्योच्चैः पादमूले च संस्थिता ॥ ६ ॥
तेनोक्तं वरदत्ताख्य-मुनीन्द्रेण महाधिया ।
शृणु त्वं भो भगिन्यत्र सावधानेन चेतसा ॥ ७ ॥

सम्यक्त्वं त्रिगजत्पूतं दुर्गतिच्छेदकारणम् ।
स्वर्गमोक्षतरोर्बीजं भवभ्रान्तिनिवारणम् ॥ ८ ॥
तच्च, देवो जिनाधीशो रागद्वेषादिवर्जितः ।
केवलज्ञानसाम्राज्यः सुरासुरनमस्कृतः ॥ ९ ॥
तद्भाषितो भवेद्धर्मो लोकद्वयसुखप्रदः ।
इन्द्रनागेन्द्रचन्द्राद्यैः पूजितो दशधा मुदा ॥ १० ॥
उत्तमादिक्षमादिस्तु प्रसिद्धो भुवनत्रये ।
भवेद्वाले गुरुश्चापि शीलसंयमतत्परः ॥ ११ ॥
ज्ञानध्यानरतो नित्यं भार्यादिग्रन्थवर्जितः ।
इत्येतच्छर्मदं विद्धि सम्यक्त्वं मुग्धमानसे ॥ १२ ॥
पात्रदानं गुणाधानं जिनार्चा शर्मदायिनी ।
शीलपर्वोपवासादि-धर्मोयं गृहिणां शुभः ॥ १३ ॥
इत्यादिकं समाकर्ण्य रेणुका बान्धवोदितम् ।
धर्मं श्रीमज्जिनेन्द्राणा सन्तुष्टा मानसे तदा ॥ १४ ॥
सम्यक्त्वरत्नमादाय सा सती भक्तितस्तराम् ।
स्वात्मनो मण्डनं चक्रे भव्यानां तद्धिभूषणम् ॥ १५ ॥
ततो धर्मानुरागेण तस्यै श्रीवरदत्तवाक् ।
परश्वाख्यां महाविद्यां भगिन्यै मुनिसत्तमः ॥ १६ ॥
कामधेनुसुविद्यां च दत्वा शर्मप्रदायिनीम् ।
स्वस्थानं प्राप्तवान्धीरो जैनतत्वविदाम्वरः ॥ १७ ॥
सम्यक्त्वशालिनी सा च रेणुका स्वगृहे सुखम् ।
संस्थिता जिनपादाब्ज-भृङ्गी सद्धर्मवत्सला ॥ १८ ॥

एकदा कार्त्तवीर्योसौ राजा तत्र वने घने ।
गजस्य बन्धनार्थं च समायातस्तदा मुदा ॥ १९ ॥
कामधेनुमहाविद्या-प्रभावेन मनोहरम् ।
कारितः षड्रसोपेतं भोजनं यमदग्निना ॥ २० ॥
स पापी कार्त्तवीर्योपि संभुक्त्वा लोभपूरितः ।
संग्रामे तापसं हत्वा कुधीस्तं यमदग्निकम् ॥ २१ ॥
कामधेनुं समादाय निर्गतस्तद्वनाज्जवात् ।
पोषितो दुर्जनः प्राणी सर्पवत्प्राणनाशकः ॥ २२ ॥
तदा तौ रेणुकापुत्रौ गृहीत्वा समिधादिकम् ।
समागतौ गृहं मातु-र्ज्ञात्वा तां कष्टवार्त्तिकाम् ॥ २३ ॥
श्वेतरामस्ततो ज्येष्ठः पुत्रोसौ सुभटाग्रणीः ।
रेणुकायाः समादाय तां विद्यां परशुप्रथाम् ॥ २४ ॥
गत्वा महेन्द्ररामेण संयुतः कौशलां पुरीम् ।
कीर्त्तवीर्यं सुसंग्रामे मारयामास भूपतिम् ॥ २५ ॥
मृत्वासौ निजपापेन कार्त्तवीर्यो नृपः कुधीः ।
सम्प्राप्तो नरकं घोरं पापिनामीदृशी गतिः ॥ २६ ॥
धिक्तृष्णां पापिनीं जन्तो-र्महादुःखप्रदायिनीम् ।
यत्रासक्तो जनोऽन्यायं कृत्वा कष्टं प्रयात्यलम् ॥ २७ ॥
अन्यायेन नरेन्द्राद्याः क्षयं गच्छन्ति किं परे ।
यद्वायुना द्विपा यान्ति तत्र किं शलभादयः ॥ २८ ॥
तदायोध्यापुरे सोपि श्वेतरामः स्वविद्यया ।
ख्यातः परशुरामेति संजातः सुमहीपतिः ॥ २९ ॥

भवति जगति शूरः पण्डितो दिव्यलक्ष्मी–
पतिरिह सुखयुक्तः पुण्यपण्येन जीवः ।
इति मनसि विचारं चारु कृत्वा सुभव्याः
कुरुत जिनमतोक्तं सारपुण्यं सुखाय ॥ ३० ॥

इति कथाकोशे परशुरामस्य कथा समाप्ता ।

५७–सुकुमालमुनेः कथा ।

यन्नामस्मृतिमात्रेण प्राप्यते सारसम्पदा ।
तं प्रणम्य जिनं वक्ष्ये सुकुमालकथां मुदा ॥ १ ॥
कौशाम्बीनगरे ख्याते संजातोऽतिबलो नृपः ।
पुरोहितोऽभवत्तस्य सोमशर्मा विचक्षणः ॥ २ ॥
काश्यपी कामिनी तस्यां काश्यप्यां संबभूवतुः ।
अग्निभूतिस्तथा वायु-भूतिनामा सुतोपि च ॥ ३ ॥
तौ द्वौ पुत्रौ प्रमादेन शास्त्राभ्यासं न चक्रतुः ।
विना पुण्येन जन्तूनां मुखाब्जे नैव भारती ॥ ४ ॥
सोमशर्मण्यतस्तास्मि-न्कालव्याधेन भक्षिते ।
पुरोहितपदं तस्य गृहीतं गोत्रिभिस्तदा ॥ ५ ॥
मूर्खत्वान्न तयोर्दत्तं भूभुजातिबलेन तत् ।
क्व भवेन्मूढजन्तूनां दानमानादिकक्रिया ॥ ६ ॥
ततस्तौ मानभंगेन गत्वा राजगृहं पुरम् ।
पितृव्यं सूर्यमित्राख्यं नत्वा वृत्तान्तमूचतुः ॥ ७ ॥

कैश्चिद्दिनैस्ततस्तेन सूर्यमित्रेण धीमता ।
नाना शास्त्राणि तावुच्चैः पाठितौ पोषितावपि ॥ ८ ॥
तौ विद्वांसौ ततो भूत्वा समागत्य निजं गृहम् ।
स्वविद्यां भूपतेस्तस्य दर्शयामासतुस्तराम् ॥ ९ ॥
स राजातिबलस्ताभ्यां पुरोहितपदं ददौ ।
सरस्वत्याः प्रसादेन किं न जायेत भूतले ॥ १० ॥
अथ राजगृहे तस्य सूर्यमित्रस्य चैकदा ।
सन्ध्यायां सरसो मध्ये सूर्यार्घं ददतो मुदा ॥ ११ ॥
मुद्रिका राजकीया च हस्ताद् ध्वस्ता जलान्विते ।
पद्मे सम्पतिता तत्र ततो भीतेन तेन तु ॥ १२ ॥
मुनिं सुधर्मनामानं प्रणम्यावधिलोचनम् ।
प्रोक्तं मे मुद्रिका देव न जाने क्व गता मुने ॥ १३ ॥
ब्रूहि भो करुणासिन्धो सा मया प्राप्यते कथम् ।
मुनिः प्राह सुधीः सास्ति तडागे कमलोपरि ॥ १४ ॥
पुरोहितः प्रभातेसौ सूर्यमित्रश्च मुद्रिकाम् ।
दृष्ट्वा तस्मात्समादाय सन्तुष्टो मुनिपादयोः ॥ १५ ॥
नत्वा जगाद योगीन्द्र विद्यां मे देहि धीधन ।
यया प्रश्नं सुजानामि भवत्पादप्रसादतः ॥ १६ ॥
तेनोक्तं मुनिना धीर जैनदीक्षां विना भुवि ।
विद्यैषा न समायाति ततोसौ सूर्यमित्रवाक् ॥ १७ ॥
केवलं लोभतस्तस्य पादमूले मुनेर्मुदा ।
दीक्षां जग्राह जैनेन्द्रीं सर्वसिद्धिप्रदायिनीम् ॥ १८ ॥

पुनः पुनश्च तां विद्यां संपृच्छन्भक्तितस्तदा ।
क्रियागमं जिनेन्द्रोक्तं पाठितो गुरुणाखिलम् ॥ १९ ॥
ततोसौ गुरुसद्वाक्य-प्रदीपोद्योतनेन च ।
हत्वाज्ञानतमस्तोमं संजातो धर्मतत्वविन् ॥ २० ॥
येन भव्येन सद्भक्त्या गुरुः सन्मार्गदर्शकः ।
आराधितो जगद्बन्धुः किं न सिद्धयति तस्य वै ॥ २१ ॥
ततः श्रीजैनसद्धर्मे भूत्वा यो प्रौढधीर्मुनिः ।
पृष्ट्वा गुरुसुधर्माख्य-मेकाकी विहरन्भुवि ॥ २२ ॥
कौशाम्बीं नगरीं गत्वा चर्यार्थं युक्तितो भ्रमन् ।
सूर्यमित्रो मुनिर्धीमा-नग्निभूतिगृहं गृतः ॥ २३ ॥
तदाग्निभूतिना तेन महाभक्त्या प्रयुक्तितः ।
अन्नदानं जगत्सारं तस्मै दत्तं सुखप्रदम् ॥ २४ ॥
वायुभूतिर्लघुभ्राता प्रेरितश्चाप्यनेन तु ।
स तस्मै वन्दनां नैव चक्रे चक्रे च निन्दनम् ॥ २५ ॥
भाविदुर्गतिभाक्प्राणी सद्धर्मे प्रेरितोपि च ।
कदाचिन्न रतो मूढ भवेत्पापात्कुकर्मसु ॥ २६ ॥
अग्निभूतिः सुपूतात्मा सूर्यमित्रं मुनीश्वरम् ।
अनुव्रजन्कियन्मार्गं धर्ममाकर्ण्य शर्मदम् ॥ २७ ॥
त्रिधा वैराग्यमापन्नो-ऽसौ गृहीत्वा तपस्तराम् ।
मुनिर्जातो लसद्भक्त्या सुधीः स्वपरतारकः ॥ २८ ॥
अग्निभूतिप्रिया या च सोमदत्ता महासती ।
श्रुत्वा तां स्वपतेर्वार्त्तां दुःखतो देवरं जगौ ॥ २९ ॥

वायुभूते त्वया पापा-त्र कृता मुनिवन्दना ।
कृतं तन्निन्दनं चापि रे कुधीस्तन्निमित्ततः ॥ ३० ॥
भ्राता ते स मुनिर्जातो महावैराग्यतो ध्रुवम् ।
तच्छ्रुत्वा कोपतस्तेन पापिना वायुभूतिना ॥ ३१ ॥
गच्छ गच्छ त्वकं चापि पार्श्वे नग्नस्य तस्य च ।
विटलस्याशुचेश्चेति प्रोक्त्वा पादेन सा हता ॥ ३२ ॥
सोमदत्ता तदा श्रुत्वा तद्वाक्यं कष्टकोटिदम् ।
जन्मान्तरे सपुत्राहं पादं ते सुखदायकम् ॥ ३३ ॥
भक्षयिष्यामि मूढात्मा निदानं सा करोदिति ।
धिङ्मूढत्वं यतो मूढा भस्मीकुर्वन्ति सच्छुभम् ॥ ३४ ॥
वायुभूतिस्तु पापात्मा मुनिनिन्दाप्रभावतः ।
उदुम्बरोरुकुष्ठेन पीडितः सप्तभिर्दिनैः ॥ ३५ ॥
यो मुनिस्त्रिजगत्पूज्यो धर्ममार्गोपदेशकः ।
तन्निन्दको महापापी किं कष्टं न प्रयाति सः ॥ ३६ ॥
मृत्वा ततः कुधीः सोपि दुष्टकष्टप्रकष्टतः ।
कौशाम्बीनगरे तत्र नटस्याजनि गर्दभी ॥ ३७ ॥
तत्रैव सा पुनर्मृत्वा संजाता शूकरी ततः ।
चम्पापुर्यां स्वपापेन जाता चाण्डालकुक्करी ॥ ३८ ॥
चम्पायां च पुनस्तत्र जाता चाण्डालपुत्रिका ।
दुष्टदुर्गन्धसंयुक्ता चक्षुषान्धा स्वकर्मणा ॥ ३९ ॥
जम्बूवृक्षतले कष्टा-द्भक्षयन्ती च तत्फलम् ।
दृष्ट्वा चाण्डालपुत्रीं तां कर्मयोगेन धीधनः ॥ ४० ॥

अग्निभूतिमुनिः प्राह सूर्यमित्रं गुरुं प्रति ।
वराकीयं महाकष्टं हा कथं जीवति क्षितौ ॥ ४१ ॥
तच्छ्रुत्वा सूर्यमित्रेण प्रोक्तं संज्ञानचक्षुषा ।
तवेयं वायुभूतिस्तु भ्राता धर्मपराङ्मुखः ॥ ४२ ॥
मन्निन्दापापतः कुष्ठी मृत्वा भूत्वा च गर्दभी ।
शूकरी कुक्करी चापि जाता चाण्डालपुत्रिका ॥ ४३ ॥
ततस्तेन मुनीन्द्रेण प्रोल्लसत्करुणाधिया ।
ग्राहिता शर्मदान्युच्चैः सा पंचाणुव्रतानि च ॥ ४४ ॥
ततो मृत्वा त्र चम्पायां नागशर्माभिधस्य सा ।
पुरोहितस्य संजाता नागश्रीर्नाम कन्यका ॥ ४५ ॥
नागोद्याने तदा श्रेष्ठि-मंत्रिकन्यादिभिः सह ।
एकदा नागपूजार्थं सा गता तत्र पुण्यतः ॥ ४६ ॥
सूर्यमित्राग्निभूती तौ समायातौ मुनीश्वरौ ।
दृष्ट्वा सद्भावतः सा च तयोः पार्श्वे स्थिता तदा ॥ ४७ ॥
नागश्रियं समालोक्य तां कन्यां च लघोर्मुनेः ।
पूर्वजन्मस्वसम्बन्धा-त्स्नेहोभून्मानसे तराम् ॥ ४८ ॥
पृष्टेन सूर्यमित्रेण संप्रोक्ते स्नेहकारणे ।
ततोग्निभूतिना तस्यै सारसम्यक्त्वपूर्वकम् ॥ ४९ ॥
अणुव्रतानि पञ्चैव दत्वा प्रोक्तं च बालिके ।
व्रतान्येतानि ते तातो यदि त्याजयति त्वया ॥ ५० ॥
अत्रागत्य पुनः पुत्रि दीयन्ते मे गुणोज्वले ।
भवन्ति मुनयो धीराः सत्यं सन्मार्गदर्शकाः ॥ ५१ ॥

ततोऽसौ भक्तिभारेण नत्वा तौ द्वौ मुनीश्वरौ ।
नागश्रीः स्वगृहं प्राप्ता यावच्चित्ते प्रमोदतः ॥ ५२ ॥
अन्याभिर्लोककन्याभिः श्रुत्वा तां वार्त्तिकां तदा ।
नागशर्मद्विजेनोक्तं भो सुते मुग्धमानसे ॥ ५३ ॥
अस्माकं न कुले युक्तं ब्राह्मणानां मुनेर्व्रतम् ।
कर्त्तुं पुत्रि ततः शीघ्रं त्यज त्वं व्रतसञ्चयम् ॥ ५४ ॥
तत्समाकर्ण्य सावोच-त्तर्हिं तानि व्रतानि तु ।
समर्पयामि तस्यैव मुनेश्चैतानि निश्चयात् ॥ ५५ ॥
ततस्तां स्वकरे धृत्वा ब्राह्मणः कोपसंयुतः ।
वने तन्मुनिसान्निध्ये संचचाल प्रवेगतः ॥ ५६ ॥
मार्गे तया प्रगच्छन्त्या शूलाभ्यर्णे सुकष्टतः ।
वाद्यमाने कुवादित्रे जाते कोलाहले स्वरे ॥ ५७ ॥
बद्धमेकं नरं दृष्ट्वा पृष्टोसौ कन्यया द्विजः ।
किमर्थं कष्टतो बद्ध-स्तातायं ब्रूहि कारणम् ॥ ५८ ॥
तेनोक्तं वरसेनाख्यो याचमानो निजं धनम् ।
मारितोत्र वणिक्पुत्रः पुत्रि चानेन पापिना ॥ ५९ ॥
तस्मादयं प्रकष्टेन मार्यते राजकिंकरैः ।
तन्निशम्य सुता प्राह शृणु त्वं तात मे वचः ॥ ६० ॥
एतद्व्रतं जगत्सारं दत्तं मे मुनिना सुधीः ।
कथं सन्त्यज्यते धीर महाशर्मविधायकम् ॥ ६१ ॥
विप्रः प्राह सुते चैतद्व्रतं तिष्ठतु साम्प्रतम् ।
पश्चादन्यानि दीयन्ते तस्मै नग्नाय बालिके ॥ ६२ ॥

ततश्चाग्रे प्रगच्छन्त्या दृष्टा नागश्रिया परम् ।
बद्धं तथा द्विजः पृष्टः संजगादेति पुत्रिके ॥ ६३ ॥
वणिक्नारदनामासौ व्यलीकवचनैः कुधीः ।
जनानां वंचनं पुत्रि करोत्यत्र स्वपापतः ॥ ६४ ॥
तद्दोषेण सुते चायं हन्यते पापधीरिह ।
शेषं वक्तव्यमत्रापि ज्ञातव्यं पूर्ववद्बुधैः ॥ ६५ ॥
एवं चोर्यपरस्त्रीक-भूरिलोभाश्रिताञ्जनान् ।
नागशर्मा द्विजः प्रोक्त्वा पुनः प्राह सुतां प्रति ॥ ६६ ॥
अहो पुत्रि प्रतिष्ठन्तु व्रतान्येतानि किं तु वै ।
त्वमागच्छ मुनिः सोपि तर्ज्यते वचनोत्करैः ॥ ६७ ॥
येनासौ परबालानां व्रतं नैवं ददात्यतः ।
दुर्जनो न भवत्येव सर्वथा सुजनैः रतः ॥ ६८ ॥
ततो गत्वा सुदूरस्थो द्विजो कोपाग्निपूरितः ।
जगौ किं रे मुने नग्न वंचिता मत्सुता व्रतैः ॥ ६९ ॥
हा कष्टं मूर्खजन्तूनां चेष्टितं पापकर्मणाम् ।
व्रतैः शीलैः शुभोपेतै-र्वंचितः कोपि किं भुवि ॥ ७० ॥
सूर्यमित्रेण संप्रोक्तं भो विप्रेयं सुता मम ।
नागश्रीर्न त्वदीया च सर्वथा भणितापि सा ॥ ७१ ॥
एहि पुत्रीति मत्पार्श्वे तच्छ्रुत्वा सा च कन्यका ।
भट्टारकस्य सान्निध्ये गत्वोच्चैः संस्थिता तदा ॥ ७२ ॥
अन्यायोन्यायकश्चेति कुर्वन्पूत्कारकं द्विजः ।
गत्वा चम्पापुरीमध्ये चन्द्रवाहनभूपतिम् ॥ ७३ ॥

जगौ देव मुनीन्द्रेण गृहीता मत्सुता हठात् ।
तच्छ्रुत्वा सर्वलोकाना-माश्चर्यं समभूद्धृदि ॥ ७४ ॥
ततः सर्वजनैर्युक्त-श्चन्द्रवाहनभूपतिः ।
समागत्य मुनेः पार्श्वे नत्वां तं कौतुकाश्रितः ॥ ७५ ॥
मदीयासौ मदीयासौ पुत्रिका मुनिविप्रयोः ।
विवादे चेति संजाते जगौ भट्टारकस्तदा ॥ ७६ ॥
चतुर्दश लसद्विद्या पाठितासौ मया प्रभो ।
मदीयेयं ततः पुत्री तच्छ्रुत्वा स नृपोवदत् ॥ ७७ ॥
यद्येवं भो मुनिस्वामि-न्पाठयेमां स्वकन्यकाम् ।
सूर्यवत्सूर्यमित्रोसौ स्ववाक्यकिरणैस्तदा ॥ ७८ ॥
जगच्चित्तस्थमूढत्व-प्रौढान्धतिमिरं हरन् ।
मुनिः प्राहेति भो वायु-भूते संपठ्यते त्वया ॥ ७९ ॥
तच्छ्रुत्वा प्रोल्लसद्विद्याः पूर्वजन्माश्रितास्तया ।
नागश्रिया महाश्चर्यं प्रव्यक्तं पठितास्तदा ॥ ८० ॥
विस्मितेन नरेन्द्रेण प्रोक्तं नत्वा मुनीश्वरम् ।
महामुने स्वसम्बन्धं ब्रूहि भो करुणाकर ॥ ८१ ॥
संज्ञानलोचनोवोच-त्तदासौ मुनिसत्तमः ।
वायुभूतिभवादेस्तु साक्षात्पूर्वप्रचेष्टितम् ॥ ८२ ॥
तच्छ्रुत्वा मुनिनाथोक्तं परमाश्चर्य कारणम् ।
ज्ञात्वा मोहादिकं सर्वं मानसे दुःखकारणम् ॥ ८३ ॥
चन्द्रवाहनभूपालो महावैराग्ययोगतः ।
भूरि राजसुतैः सार्द्धं जिनदीक्षां गृहीतवान् ॥ ८४ ॥

स विप्रो नागशर्मापि श्रुत्वा धर्मं जिनेशिनाम् ।
मुनिर्भूत्वाऽच्युते स्वर्गे देवोभूत्पुण्यपावनः ॥ ८५ ॥
नागश्रीश्च जिनेन्द्रोक्तं तपः कृत्वा स्वपुण्यतः ।
तत्रैवाच्युतकल्पेसौ देवो जातो महर्द्धिकः ॥ ८६ ॥
अहो भव्या जगत्सारो गुरुश्चिन्तामणिर्यथा ।
यत्प्रसादेन जन्तूनां सम्पदा विविधाः सदा ॥ ८७ ॥
अग्निमन्दरसच्छैले सूर्यमित्राग्निभूतिकौ ।
तौ मुनीन्द्रौ जगद्वन्द्यौ घातिकर्मक्षयंकरौ ॥ ८८ ॥
केवलज्ञानमुत्पाद्य भूत्वा त्रैलोक्यपूजितौ ।
संप्राप्तौ परमानन्द-दायकौ मोक्षमक्षयम् ॥ ८९ ॥
तौ द्वौ सत्केवलज्ञान-लोचनौ श्रीजिनेश्वरौ ।
अस्माकं भवतां नित्यं सच्छ्रिये भुवनोत्तमौ ॥ ९० ॥
अथावन्तिलसद्देशे विख्यातोज्जयिनीपुरे ।
इन्द्रदत्तो महाश्रेष्ठी परमेष्ठीप्रभक्तिमान् ॥ ९१ ॥
श्रेष्ठिनी गुणवत्याख्या रूपसौभाग्यमण्डिता ।
तस्यागर्भे समागत्य स्वर्गादच्युतसंज्ञकात् ॥ ९२ ॥
नागशर्मचरो देवः पूर्वपुण्यप्रसादतः ।
पुत्रः सुरेन्द्रदत्ताख्यः संजातो सुगुणान्वितः ॥ ९३ ॥
तत्रैव नगरे श्रीम-त्सुभद्रश्रेष्ठिनः सुताम् ।
यशोभद्रां सुरेन्द्रादि-दत्तोसौ परिणीतवान् ॥ ९४ ॥
नाना भोगान्प्रभुञ्जानौ तौ स्थितौ पूर्वपुण्यतः ।
श्रीमज्जिनेन्द्रचन्द्रोक्त-धर्मकर्मसुतत्परौ ॥ ९५ ॥

एकदा सा यशोभद्रा प्रणम्यावधिलोचनम् ।
मुनिं प्राह सुधीर्मेत्र पुत्रो भावी न वा मुने ॥ ९६ ॥
तेनोक्तं श्रीमुनीन्द्रेण भो सुते संभविष्यति ।
पुत्रस्ते नैव सन्देहो भव्यानामग्रणीः सुधीः ॥ ९७ ॥
भर्त्ता सुरेन्द्रदत्तस्ते दृष्ट्वा तन्मुखपंकजम् ।
ग्रहीष्यति ध्रुवं जैनीं दीक्षां स्वर्मोक्षदायिनीम् ॥ ९८ ॥
सोपि पुत्रि सुतस्ते तु सुधीः सन्मुनिदर्शनात् ।
त्यक्त्वा भोगान्विशुद्धात्मा तपः शीघ्रं गृहीष्यति ॥ ९९ ॥
ततः कैश्चिद्दिनैः सापि यशोभद्रा गुणोज्वलम् ।
नागश्रीचरदेवं तं संप्राप्ता सुतमुत्तमम् ॥ १०० ॥
महोत्सवशतैस्तत्र बन्धुभिः परमादरात् ।
सुकुमाल इति व्यक्तं प्रोक्तः शर्मप्रदायकः ॥ १०१ ॥
श्रेष्ठी सुरेन्द्रदत्तस्तु दृष्ट्वा तं तनयं तदा ।
दत्वा श्रेष्ठिपदं तस्मै मुनिर्जातो जगद्धितः ॥ १०२ ॥
ततोसौ पूर्वपुण्येन श्रेष्ठी श्रीसुकुमालवाक् ।
नवयौवनमासाद्य परिणीय कुलोत्तमाः ॥ १०३ ॥
द्वात्रिंशत्प्रोल्लसत्कन्या रूपलावण्यमण्डिताः ।
नित्यं ताभिः प्रभुञ्जानो दिव्यान्भोगान्सुखं स्थितः ॥ १०४ ॥
तन्माता च यशोभद्रा स्वगेहे पुत्रमोहतः ।
मुनीनामपि तत्रोच्चैः प्रवेशं सा निराकरोत् ॥ १०५ ॥
उज्जयिन्यां समागत्य केनचिच्चैकदा तदा ।
राज्ञः प्रद्योतनाम्नश्च दर्शितो रत्नकम्बलः ॥ १०६ ॥

भूरि मूल्यभराद्राजा गृहीतुं न क्षमोभवत् ।
ततस्तं सा यशोभद्रा गृहीत्वा रत्नकम्बलम् ॥ १०७ ॥
खण्डं खण्डं विधायाशु पादत्राणार्थमद्भुतम् ।
द्वात्रिंशत्स्ववधूम्यश्च लीलया संददौ सती ॥ १०८ ॥
एकदा सौलिका चैकं पादत्राणं सुरक्तकम् ।
चञ्च्वादाय कचिच्छीघ्रं पातयामास तत्तदा ॥ १०९ ॥
वेश्यया च समादाय राज्ञः संदर्शितं ततः ।
तत्समालोक्य भूपालो ज्ञात्वा तद्वृत्तकं पुनः ॥ ११० ॥
महाश्चर्येण तद्गेहे सुधीः प्रद्योतवाक् स्वयम् ।
द्रष्टुं श्रीसुकुमालं तं समायातः शुभाशयः ॥ १११ ॥
तज्जनन्या विधायोच्चै-रभ्युत्थानादिकं तदा ।
राज्ञः पुत्रस्य चैकत्र चक्रे स्वारात्तिकां मुदा ॥ ११२ ॥
तत्तेजसा तथाकण्ठ- हारसत्तेजसाकुलम् ।
सुकुमालं समालोक्य तथा सद्भोजनक्षणे ॥ ११३ ॥
एकैकं सिक्तकं सारं भुंजानं तं महीपतिः ।
दृष्ट्वा पृष्ट्वा यशोभद्रां ज्ञात्वा तत्कारणं मुदा ॥ ११४ ॥
महाविस्मयमापन्नो भो श्रेष्ठिन्पूर्वपुण्यभाक् ।
अवन्ति सुकुमालस्त्वं तं जगादेति हर्षतः ॥ ११५ ॥
भोजनानन्तरं तत्र कीडावाप्यां स भूपतिः ।
कुर्वन्स्वयं जलक्रीडां पतितां निजमुद्रिकाम् ॥ ११६ ॥
तां पश्यन्प्रोल्लसत्कान्ति नानासद्भूषणोत्करम् ।
समालोक्य जले तत्र महाश्चर्येण चेतसि ॥ ११७ ॥

अहो पुण्येन सामग्री कीदृशीति विचारयन् ।
लज्जित्वा स्वगृहं प्राप्त-स्तत्पुण्यं संस्तुवन्मुहुः ॥ ११८ ॥
शृण्वन्तु महाभव्या धनं धान्यं सुसम्पदाः ।
पुत्रं मित्रं कलत्रं च रूपसौभाग्यमण्डितम् ॥ ११९ ॥
सद्बान्धवान्सुखोपेता-न्नानावस्त्रादिभूषणम् ।
एकद्वित्र्यादिसद्भूमि-लसत्प्रासादसञ्चयम् ॥ १२० ॥
यानजं पानसन्मान-यत्सारं भुवनत्रये ।
लभन्ते श्रीजिनेन्द्रोक्त-पुण्यपण्येन देहिनः ॥ १२१ ॥
तस्मात्त्यक्त्वाशु दुर्मार्गे कष्टदं बुधसत्तमैः ।
स्वर्गमोक्षश्रियो बीजं कार्यं पुण्यं जिनोदितम् ॥ १२२ ॥
तत्सुपुण्यं भवेदत्र भक्त्या श्रीमज्जिनार्चनैः ।
पात्रदानैस्तथाशीलो-पवासादिव्रतोत्तमैः ॥ १२३ ॥
अथैकदा जगत्पूज्यः सुकुमालस्य मातुलः ।
नाम्ना गणधराचार्यो जैनतत्वविदांवरः ॥ १२४ ॥
ज्ञात्वा श्रीसुकुमालस्य स्वल्पायुर्मुनिसत्तमः ।
तदीयोद्यानमागत्य सुधीर्योगं गृहीतवान् ॥ १२५ ॥
यशोभद्रा च तन्माता प्रोच्चैः स्वाध्यायघोषणम् ।
यावद्योगपरिप्राप्ति-र्वारयामास तं मुनिम् ॥ १२६ ॥
ततस्तेन मुनीन्द्रेण योगनिष्ठापनक्रियाम् ।
कृत्वा पश्चादूर्द्धलोक-प्रज्ञप्तिपठनोच्चकैः ॥ १२७ ॥
अच्युतस्वर्गदेवाना-मायुरुत्सेधसत्सुखे ।
व्यावर्णनं तरां कर्त्तुं प्रारब्धं पुण्ययोगतः ॥ १२८ ॥

तच्छ्रुत्वा सुकुमालोसौ स्वामी जातिस्मरोभवत् ।
गत्वा तस्य मुनेः पार्श्वे नत्वा तं भक्तितः स्थितः ॥ १२९ ॥
मुनिः प्राह सुधीर्वत्स तवायुश्च दिनत्रयम् ।
यज्जानासि हितं स्वस्य कुरु त्वं तद्धि वेगतः ॥ १३० ॥
तत्समाकर्ण्य धीरोसौ सुकुमालो गुणोज्वलः ।
शीघ्रं दीक्षां समादाय जैनीं स्वसौख्यदायिनीम् ॥ १३१ ॥
त्रिधा वैराग्यतः कृत्वा संन्यासं शल्यवर्जितम् ।
प्रायोपयानसन्नाम्नि संस्थितो मरणे सुधीः ॥ १३२ ॥
अग्निभूतेस्तु या भार्या सोमदत्ता निदानतः ।
सा संसारे परिभ्रम्य तत्रैवोज्जयिनीपुरे ॥ १३३ ॥
श्रृगाली पापतो भूत्वा चतुःपुत्रसमन्विता ।
पूर्ववैरेण पादाभ्यां समारभ्यैव तं मुनिम् ॥ १३४ ॥
भक्षयामास हा कष्टं निदानं पापराशिदम् ।
तस्माद्भव्यैर्न कर्त्तव्यं तत्रिधा दुःखकारणम् ॥ १३५ ॥
सुकुमालमुनिः सोपि मेरुवद्धीरमानसः ।
शत्रमित्रसमश्चित्ते सुधीः सारसमाधिना ॥ १३६ ॥
तृतीये दिवसे तं च सहमानः परीषहम् ।
मृत्वा तदाच्युतस्वर्गे जातो देवो महर्द्धिकः ॥ १३७ ॥
क्व ते भोगा मनोभीष्टा-स्तपः क्वेदं सुदारुणम् ।
अहो भव्या सतां वृत्तं परमाश्चर्यकारणम् ॥ १३८ ॥
तत्राच्युते सुधीः स्वर्गे देवोसौ सारसौख्यभाक् ।
श्रीमज्जिनेन्द्रपादाब्ज-संजातो भक्तिनिर्भरः ॥ १३९ ॥

उज्जयिन्यां तदा देवैर्महाकोलाहलः कृतः ।
महाकालः कुतीर्थोभू-ज्जन्तूनां तत्र नाशकृत् ॥ १४० ॥
गन्धतोयलसद्वृष्टिः कृता देवैः सुभक्तितः ।
तत्र गन्धवती नाम्नी नदी जातेति भूतले ॥ १४१ ॥
स श्रीमान्वरभोगसंगनिरतो ज्ञात्वा मुनेर्वाक्यतः
स्वल्पं जीवितमात्मनो हि सकलं त्यक्त्वा कलत्रादिकम् ।
धृत्वा चारु तपो जिनेन्द्रकथितं सोढ्वापशूपद्रवं ।
देवोभूत्सुकुमालनिर्मलमुनिर्भूयात्सतां शान्तये ॥ १४२ ॥
इति कथाकोशे श्रीसुकुमालमुनेराख्यानं समाप्तम् ॥

५८–सुकोशलमुनेः कथा ।

अर्हन्तं त्रिजगत्पूतं भारतीं भुवनोत्तमाम् ।
नत्वा गुरुं प्रवक्ष्येहं सुकोशलकथामिमाम् ॥ १ ॥
अयोध्यायां महाराजः प्रजापालो गुणोज्वलः ।
श्रेष्ठी सिद्धार्थनामाभू-द्धनैर्धान्यैः समन्वितः ॥ २ ॥
द्वात्रिंशत्तस्य संजाता भार्याः सद्रूपमण्डिताः ।
सर्वास्ताः कर्मयोगेन कामिन्यः पुत्रवर्जिताः ॥ ३ ॥
अहो पुत्रं विना नारी राजते नैव भूतले ।
रूपलावण्ययुक्तापि वल्लीव निष्फला भुवि ॥ ४ ॥
तासां मध्ये तु या भार्या श्रेष्ठिनः प्राणवल्लभा ।
पुत्रार्थं यक्षदेवान्सा पूजयन्ती जयावती ॥ ५ ॥
प्रोक्ता ज्ञानिमुनीन्द्रेण भो सुते दुःखदायिनीम् ।
त्यक्त्वा भक्तिं कुदेवानां जैनधर्मे स्थिरा भव ॥ ६ ॥

येन ते सप्तवर्षाणां मध्ये स्याद्गर्भसंभवः ।
तच्छ्रुत्वा सा च संतुष्टा जिनधर्मे दृढाभवत् ॥ ७ ॥
यद्वाञ्छा मानसे नित्यं वर्तते सुतरां भुवि ।
तद्वस्तु प्राप्तिसान्निध्ये भवेद्धर्षो न कस्य वै ॥ ८ ॥
ततः कैश्चिद्दिनैस्तस्या जयावत्याः सुधर्मतः ।
सुकोशलो लसत्कान्तिः पुत्रो जातो मनोहरः ॥ ९ ॥
श्रेष्ठी सिद्धार्थनामासौ दृष्ट्वा तन्मुखपंकजम् ।
नयंधरमुनेः पार्श्वे सुधीर्दीक्षां गृहीतवान् ॥ १० ॥
मां बालपुत्रसंयुक्तां मुक्त्वा जातो मुनिस्त्विति ।
जयावती महाकोपं चक्रे सिद्धार्थसन्मुनौ ॥ ११ ॥
अहो चास्मै मुनीन्द्रस्य युक्तं दातुं तपः किमु ।
कोपान्मुनिप्रवेशस्तु निषिद्धः स्वगृहे तया ॥ १२ ॥
हा कष्टं मोहतो जन्तुः मद्धर्मं त्यजति ध्रुवम् ।
जन्मान्धको यथा चिन्ता-मणिं हस्तस्थितं कुधीः ॥ १३ ॥
वृद्धिं प्राप्य ततः सोपि सुकोशलवणिक्पतिः ।
द्वात्रिंशत्कुलजाः कन्याः परिणीय गुणोज्वलाः ॥ १४ ॥
नाना भोगान्प्रभुञ्जानः संस्थितः पूर्वपुण्यतः ।
जन्तूनां पूर्वपुण्येन सम्पदो विविधा भवेत् ॥ १५ ॥
एकदा जननीभार्या-धात्रिकाभिः समन्वितः ।
स्वप्रासादोपरिस्थोसौ सुकोशलवणिग्वरः ॥ १६ ॥
पश्यन्पुरस्य सच्छोभां तत्रायातं मुनीश्वरम् ।
नाना देशान्विहृत्योच्चै-र्दृष्ट्वा सिद्धार्थमद्भुतम् ॥ १७ ॥

कोयं मातः सुधीरेवं पृष्टवान् जननीं मुदा ।
जयावती क्रुधा प्राह रंकोयं याति कोपि भो ॥ १८ ॥
तदा सुकोशलेनोक्तं सावधानेन धीमता ।
सर्वलक्षणयुक्तत्वा-न्नायं रंको भवत्यहो ॥ १९ ॥
सुनन्दा धात्रिकावोच-त्तदा तन्मातरं प्रति ।
न युक्तं निन्दितं वाक्यं वक्तुं चास्य महामुनेः ॥ २० ॥
मुग्धे कुलप्रभोस्ते च ततो रुष्टा तु सा जगौ ।
तिष्ठ मौनेन नेत्राभ्यां वारयामास धात्रिकाम् ॥ २१ ॥
दुष्टस्त्रीमानसे नास्ति धर्मस्नेहः कदाचन ।
यथा ज्वलन्महावह्नि-मध्यभागो न शीतलः ॥ २२ ॥
मात्राहं वंचितः कष्टं चिन्तयन्निजचेतसि ।
तदा सुकोशलो धीमान्सूपकारेण भाषितः ॥ २३ ॥
जाता भोजनवेलेति भो स्वामिन्क्रियते कृपा ।
तथा मातृस्वभार्याभिः प्रेरितो भोजनाय सः ॥ २४ ॥
तेनोक्तं धीमता तत्र मया सत्यस्वरूपकम् ।
अस्योत्तमपुरुषस्य ज्ञात्वा भोक्तव्यमित्यलम् ॥ २५ ॥
ततः सुनन्दया धात्र्या प्रोक्तं पूर्वं प्रघट्टकम् ।
सुकोशलः समाकर्ण्य महावैराग्ययोगतः ॥ २६ ॥
गत्वा तस्य मुनेः पार्श्वे नत्वा पादद्वयं मुदा ।
ज्ञात्वा धर्मस्य सद्भावं जिनेन्द्रैः परिकीर्त्तितम् ॥ २७ ॥
सुभद्रायाः स्वभार्याया गर्भस्थाय सुताय च ।
दत्वा श्रेष्ठिपदं शीघ्रं त्यक्त्वा मोहादिकं धनम् ॥ २८ ॥

नत्वा सिद्धार्थनामानं पुनस्तं मुनिसत्तमम् ।
दीक्षामादाय जैनेन्द्रीं मुनिर्जातो विचक्षणः ॥ २९ ॥
यः सुधीः पूर्वपुण्येन संयुक्तो धर्मवत्सलः ।
सावधानो हिते नित्यं स केन भुवि वंच्यते ॥ ३० ॥
आर्त्तध्यानेन सा मृत्वा श्रेष्ठिनी तु जयावती ।
देशे मगधसंज्ञे च गिरौ मौद्गिलनामनि ॥ ३१ ॥
व्याघ्री स्वपापतो जाता त्रिपुत्रा क्रूरमानसा ।
मुक्त्वा धर्मं जिनेन्द्रोक्तं जन्तुर्यात्येव दुर्गतिम् ॥ ३२ ॥
तदा तौ कर्मयोगेन मुनीन्द्रौ गुणशालिनौ ।
मौद्गिलपर्वते योगं गृहीत्वा भुवनोत्तमौ ॥ ३३ ॥
चतुर्मासोपवासान्ते पूर्णयोगे जगद्धितौ ।
चर्यार्थं निर्गतौ तौ च दृष्ट्वा व्याघ्री दुराशया ॥ ३४ ॥
संन्यासेन स्थितौ यावत्तया तावत्क्रमेण च ।
भक्षितौ मरणं प्राप्य तदा सारसमाधिना ॥ ३५ ॥
जातौ सर्वार्थसिद्धौ तौ सिद्धार्थाख्यसुकोशलौ ।
भाविमुक्तिश्रियः कान्तौ शान्तौ मे भवतां श्रिये ॥ ३६ ॥
सा व्याघ्री च समालोक्य खादन्ती तत्पलं तदा ।
सुकोशलकरे चारु लाञ्छनं भुवनोत्तमम् ॥ ३७ ॥
भूत्वा जातिस्मरी शीघ्रं त्यक्त्वा तत्पापकर्मकम् ।
हा कष्टं दुष्टसंसारे त्यक्तश्रीजैनसद्वृषाः ॥ ३८ ॥
भ्रमन्ति प्राणिनो मूढा मादृश्यः पापपंडिताः ।
पुत्रादीन्भक्षयन्तीति कृत्वा संसारनिन्दनम् ॥ ३९ ॥

संन्यासं च समादाय मृत्वा शुद्धाशयेन सा ।
प्राप्ता सौधर्मसत्स्वर्गे जीवानां शक्तिरद्भुता ॥ ४० ॥
अहो श्रीजैनसद्धर्म-प्रभावोभुवनोत्तमः ।
क्व व्याघ्री पापकर्मासौ क्व स्वर्गे सारसंभवः ॥ ४१ ॥
ततः श्रीजैनसद्धर्मो स्वर्गमोक्षसुखप्रदः ।
आराध्यो भक्तितो नित्यं भव्यैः स्वात्मप्रसिद्धये ॥ ४२ ॥
सिद्धश्रीमूलसंघाख्ये प्रोत्तुंगोदयभूधरे ।
भानुर्भट्टारकः स्वामी जीयान्मे मल्लिभूषणः ॥ ४३ ॥
प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगीतरङ्गैः—
निर्द्धूतैकान्तमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः ।
श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेन्दुप्रवृद्धो
जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यः श्रुताब्धिः ॥४४॥

इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्यब्रह्मनेमिदत्त-विरचिते श्रीसुकोशलश्रेष्ठिनः कथा समाप्ता ।

५९–गजकुमारमुनेः कथा ।

प्रसिद्धं स्वगुणैः सिद्धं पूजार्थं जिननायकम् ।
नत्वा गजकुमारस्य कथयामि कथानकम् ॥ १ ॥
श्रीमद्द्वारवतीपुर्यां प्रसिद्धायां जगत्त्रये ।
श्रीमन्नेमिजिनेन्द्रस्य पवित्रायां सुजन्मना ॥ २ ॥
वासुदेवोभवद्राजा त्रिखण्डेशो महाबलिः ।
तस्य गन्धर्वसेनायां राज्ञ्यां गजकुमारवाक् ॥ ३ ॥

पुत्रोभूद्भटकोटीनां मध्येसौ सुभटाग्रणीः ।
यत्प्रतापेन शत्रूणां दग्धा मानलता तता ॥ ४ ॥
पोदनादिपुरे राजा तथाभूदपराजितः ।
स च श्रीवासुदेवस्य नैव सिद्धयति दुष्टधीः ॥ ५ ॥
ततः श्रीवासुदेवेन घोषणा दापिता पुरे ।
योपराजितभूपालं समानयति विद्विषम् ॥ ६ ॥
तस्मै ददामि मत्प्रीत्या वाञ्छितं वरमुत्तमम् ।
श्रीमान् गजकुमारोसौ तत्समाकर्ण्य वेगतः ॥ ७ ॥
पितुः पादद्वयं नत्वा गत्वा तत्पोदनं पुरम् ।
युद्धेऽपराजितं जित्वा गृहीत्वा जीवितं द्रुतम् ॥ ८ ॥
समानीय त्रिखण्डोरु-स्वामिनस्तं समर्पयत् ।
दुःसाध्यं साध्यते केन सद्भटेन विना क्षितौ ॥ ९ ॥
वरं प्राप्य कुमारोसौ कामचारं सुलम्पटः ।
हठाद्द्वारवतीस्त्रीणां समूहं सेवते स्म च ॥ १० ॥
धिग्धिक्कामं दुराचारं महापापस्य कारणम् ।
यतो लज्जाभयं नैव कामिनां मुग्धचेतसाम् ॥ ११ ॥
श्रेष्ठिनः पांसुलस्यापि सुरत्याख्यास्ति कामिनी ।
प्रोल्लसद्रूपसंयुक्ता तस्यां सोपि रतोभवत् ॥ १२ ॥
अन्तः पांसुलकश्चापि प्रज्वलत्कोपवह्निना ।
गृहे संतिष्ठते कष्ट-मक्षमस्तन्निवारणे ॥ १३ ॥
एकदा केवलज्ञान-प्रकाशितजगत्त्रयः ।
श्रीमन्नेमिजिनः स्वामी सुरेन्द्राद्यैः प्रसेवितः ॥ १४ ॥

भव्यपुण्योदयेनोच्चै-र्द्वारवत्यां समागतः ।
तत्र श्रीबलभद्रेण वासुदेवान्वितेन च ॥ १५ ॥
अन्यैर्भूपादिभिः सर्वैः परमानन्दनिर्भरैः ।
तस्य श्रीजिननाथस्य पादपद्मद्वयं मुदा ॥ १६ ॥
समभ्यर्च्य बलाद्यैश्च स्वर्गमोक्षसुखप्रदम् ।
स्तुत्वा नत्वा महाभक्त्या भावितं चेतसि स्थिरम् ॥ १७ ॥
पुनस्ते धर्ममाकर्ण्य शर्मकोटिविधायकम् ।
मुनिश्रावकभेदाभ्यां श्रीमन्नेमिजिनोदितम् ॥ १८ ॥
सन्तुष्टा मानसे गाढं स्तुतिं चक्रुर्जिनेशिनाम् ।
श्रुत्वा धर्मं जिनेन्द्राणां कस्यानन्दो न जायते ॥ १९ ॥
तथा धर्मं समाकर्ण्य भक्त्या गजकुमारवाक् ।
त्रिधा वैराग्यमासाद्य कृत्वा निन्दां स्वकर्मणः ॥ २० ॥
दीक्षामादाय जैनेन्द्रीं भवभ्रमणनाशिनीम् ।
विहृत्योच्चैर्महीपीठं प्रान्तेसौ सत्तपोनिधिः ॥ २१ ॥
ऊर्जयन्तमहोद्याने प्रायोपमरणे दृढः ।
संन्यासेन स्थितः स्वामी निश्चलो मेरुवत्तराम् ॥ २२ ॥
तं तत्रस्थं कुधीर्ज्ञात्वा पांसुलो वैरतो द्रुतम् ।
गत्वा तत्र महाकोपा-त्तं संप्राप्य यतीश्वरम् ॥ २३ ॥
सर्वतो लोहकीलैश्च कीलित्वा च प्रसन्धिषु ।
नष्टः पापी समादाय भूरि पापस्य संचयम् ॥ २४ ॥
तदा गजकुमारोसौ मुनीन्द्रो जिनतत्त्ववित् ।
तां वेदनां सुधीश्चित्ते गणयंश्च तृणोपमाम् ॥ २५ ॥

कृत्वा समाधिना कालं स्वर्गलोकं ययौ द्रुतम् ।
तत्र सौख्यं चिरंकालं भुंजानः सुखतः स्थितः ॥ २६ ॥
अहो सतां महाचित्रं चारित्रं भुवनोत्तमम् ।
क वेदनाभवद्भूरिः क समाधिः प्रशर्मदः ॥ २७ ॥
सकलभुवननाथश्रीजिनेन्द्रप्रणीतं
विमलसुखनिवासं जैनधर्मं निशम्य ।
विशदतरमतीशः संयमी योत्र जातो
भवतु गजकुमारः शान्तयेसौ मुनीन्द्रः ॥ २८ ॥
इति कथाकोशे गजकुमारमुनेः कथा समाप्ता ।

६०–पणिकमुनेः कथा ।

श्रीजिनं शर्मदं नत्वा शान्तये सद्भिरर्चितम् ।
वक्ष्ये श्रीपणिकाख्यानं संक्षेपेण जगद्धितम् ॥ १ ॥
पुरे पणीश्वरे रम्ये प्रजापालो महीपतिः ।
श्रेष्ठी सागरदत्ताख्यः पणिका श्रेष्ठिनी प्रिया ॥ २ ॥
तयोः पुत्रः पवित्रात्मा संजातः पणिकाभिधः ।
सुधीः सन्मार्गसंसक्तो विरक्तः पापकर्मणि ॥ ३ ॥
एकदा पणिको धीमान्वर्द्धमानजिनेशिनः ।
समवादिसृतिं प्राप्य प्रोल्लसद्रत्नतोरणाम् ॥ ४ ॥
मानस्तंभादिसद्भूत्या जगच्चेतोनुरंजनम् ।
तत्र गंधकुटीमध्ये त्रिपीठेषु निरंजनम् ॥ ५ ॥

कनत्काञ्चनसद्रत्न-सिंहासनमधिष्ठितम् ।
पूर्णेन्दुकांतिविद्वेषि-छत्रत्रयविराजितम् ॥ ६ ॥
तारहारोज्वलैर्दिव्यै-र्वीज्यमानं सुचामरम् ।
सूर्यकोटिप्रभाभार-हारिसत्कान्तिमण्डितम् ॥ ७ ॥
सर्वसन्देहविध्वंसि-दिव्यध्वनिसमन्वितम् ।
दुंदुभीनां महाध्वानै-र्भुवनत्रयशोभितम् ॥ ८ ॥
इन्द्रनागेन्द्रचन्द्रार्क-नरेन्द्राद्यैः समर्चितम् ।
निर्ग्रन्थादिगुणोपेतं भव्यसन्दोहसंस्तुतम् ॥ ९ ॥
चतुस्त्रिंशन्महाश्चर्यै-र्भूषितं भुवनोत्तमम् ।
सच्चतुष्टयसंयुक्तं व्यक्तलोकत्रयक्रमम् ॥ १० ॥
दृष्ट्वा श्रीवर्द्धमानाख्यं जिनेन्द्रं मुक्तिसत्प्रियम् ।
त्रिः परीत्य लसद्भक्त्या समभ्यर्च्य कृतश्रियम् ॥ ११ ॥
नत्वा स्तुत्वा सतां स्तुत्यं धर्ममाकर्ण्य शर्मदम् ।
श्रुत्वास्तोकतरं स्वायु-र्दीक्षामादाय निर्मदम् ॥ १२ ॥
एकाकी विहरन्नुच्चै-स्ततोऽसौ पणिको मुनि ।
गंगां नदीं समागत्य नौमध्ये चैकदा स्थितः ॥ १३ ॥
नौर्निमज्जति यावत्सा तावत्सोपि मुनीश्वर ।
केवलज्ञानमुत्पाद्य सद्ध्यानान्मोक्षमाप्तवान् ॥ १४ ॥
स श्रीवणिक्सुतो धीमान्मेरुवन्निश्चलाशयः ।
कर्मसन्दोहशत्रुघ्नो दद्यान्मे शाश्वतीं श्रियम् ॥ १५ ॥
श्रीमत्सागरदत्तनामपणिकासच्छ्रेष्ठिनीनन्दनः
पूतात्मा पणिको विलोक्य शिवदं श्रीवर्द्धमानं जिनम् ।

ज्ञात्वा स्वल्पतरं निजायुमखिलं त्यक्त्वा च मोहादिकं
भूत्वा यस्तु मुनिः स मुक्तिमगमन्नित्यं सुखं मे क्रियात् १६

इति कथाकोशे श्रीपणिकमुनेः कथा समाप्ता ।

६१—श्रीभद्रबाहुमुनेः कथा ।

नत्वा जिनं जगद्भद्रं सुरासुरनमस्कृतम् ।
भद्रबाहोर्मुनीन्द्रस्य चरित्रं कथ्यते हितम् ॥ १ ॥
पुण्ड्रवर्द्धनसद्देशे कोटीसन्नगरे वरे ।
राजा पद्मरथो धीमान्सोमशर्मा पुरोहितः ॥ २ ॥
श्रीदेवी भामिनी तस्य तयोः पुत्रो बभूव च ।
भद्रबाहुर्गुणैर्भद्रो भद्रमूर्त्तिर्भवोत्तमः ॥ ३ ॥
एकदा प्रौढबालोसौ मौंजीबन्धे कृते सति ।
क्रीडां कुर्वन्पुरीबाह्ये भूरिबालजनैः सह ॥ ४ ॥
तत्र क्रीडाविधौ धीमान्गोलकांश्च त्रयोदश ।
क्रमेणोपरि संचक्रे बुद्ध्या हस्तकलान्वितः ॥ ५ ॥
सर्वभव्यार्चिते श्रीम-द्वर्धमानजिनेशिनि ।
मुक्तिं प्राप्ते च पञ्चानां चतुर्दशसुपूर्विणाम् ॥ ६ ॥
मध्ये यस्तु चतुर्थस्तु चतुर्दशसुपूर्ववित् ।
गोवर्द्धनो मुनिः श्रीम-दूर्जयन्तगिरौ शुभे ॥ ७ ॥
वन्दनार्थं प्रगच्छन्सन्स कोटीपुरमागतः ।
दृष्ट्वा तद्गोलकक्रीडा-विज्ञानं भुवनोत्तमम् ॥ ८ ॥

चतुर्दशमहापूर्व-धरोयं पञ्चमो ध्रुवम् ।
भद्रबाहुर्विशुद्धात्मा भाविश्रीश्रुतकेवली ॥ ९ ॥
इति ज्ञात्वा ततः प्रोक्त्वा सोमशर्माद्विजस्य च ।
नीत्वा तं बालकं स्वान्तं सर्वशास्त्राणि सद्गुरुः ॥ १० ॥
पाठयित्वा जगत्सार-शर्मकारीणि देहिनाम् ।
प्रेषयामास तद्गेहं स्वामी सर्वगुणाकरः ॥ ११ ॥
भद्रबाहुस्ततो बाल-स्त्यक्त्वा गेहादिकं पुनः ।
गोवर्द्धनमुनेः पार्श्वे समागत्य द्रुतं सुधीः ॥ १२ ॥
दीक्षामादाय जैनेन्द्रीं स्वर्गमोक्षसुखप्रदाम् ।
मुनिर्भूत्वाभवत्सोपि चतुर्दशसुपूर्ववित् ॥ १३ ॥
ज्ञाततत्वव्रजः प्राणी गृहावासं कुतो भजेत् ।
आस्वादितामृतस्वादुः कथं पिण्याकमाचरेत् ॥ १४ ॥
गोवर्द्धनगुरौ तस्मिन्स्वर्गलोकं गते सति ।
संघाधारस्ततो भूत्वा भद्रबाहुः श्रुतेक्षणः ॥ १५ ॥
संघेन महता सार्द्धं भव्यशस्यापि तर्पयन् ।
स्ववाक्यामृतधाराभि-रुज्जयिन्यां समागतः॥ १६ ॥
चर्यायां स प्रतिष्ठः सन्नुत्संगे संस्थितेन च ।
अव्यक्तबालकेनोक्तो गच्छ गच्छेति भो मुने ॥ १७ ॥
तत्समाकर्ण्य तत्वज्ञो भद्रबाहुर्मुनीश्वरः ।
सत्यं द्वादशवर्षेषु दुर्भिक्षं संभविष्यति ॥ १८ ॥
ज्ञात्वेति सोन्तरायं च कृत्वा स्वस्थानमागतः ।
सन्ध्याकाले तदा सर्व-मुनीनामग्रतोऽवदत् ॥ १९ ॥

अत्र द्वादशवर्षाणि भावि दुर्भिक्षकं ध्रुवम् ।
मया स्वल्पायुषात्रैव स्थीयते भो तपस्विनः ॥ २० ॥
यूयं दक्षिणदेशं तु संगच्छन्तु कृतोद्यमाः ।
इत्युक्त्वा दशपूर्वज्ञं विशाखाचार्यसन्मुनिम् ॥ २१ ॥
स्वशिष्यं संघसंयुक्तं सुधीः संज्ञानलोचनः ।
प्रेषयामास चारित्र-रक्षार्थं दक्षिणापथम् ॥ २२ ॥
तदा ते मुनयः सन्तो गत्वा तत्र सुखं स्थिताः ।
गुरोर्वाक्यानुगाः शिष्याः संभवन्ति सुखाश्रिताः ॥ २३ ॥
ततश्चोज्जयिनी नाथश्चन्द्रगुप्तो महीपतिः ।
वियोगाद्यतिनां भद्र-बाहुं नत्वाभवन्मुनिः ॥ २४ ॥
तदा श्रीभद्रबाहुश्च मुनीन्द्रः सुतपोनिधिः ।
श्रीमज्जिनेन्द्रचन्द्रोक्त-सारतत्वविदांवरः ॥ २५ ॥
उज्जयिन्यां सुधीर्भद्रः वटवृक्षसमीपके ।
क्षुत्पिपासादिकं जित्वा संन्यासेन समन्वितः ॥ २६ ॥
स्वामी समाधिना मृत्वा संप्राप्तः स्वर्गमुत्तमम् ।
सोऽस्माकं सन्मुनिर्दद्या-त्सन्मार्गे शर्मकोटिदम् ॥ २७ ॥

श्रीसोमशर्मद्विजवंशसन्मणिः
श्रीभद्रबाहुर्मुनिसत्तमाग्रणीः ।
जिनेन्द्रधर्माब्धिसमग्रचद्रमाः
कुर्यात्सतां सारसुखाश्रिताः शुमाः ॥ २८ ॥

इति कथाकोशे पञ्चमश्रुतकेवलिश्रीभद्रबाहुमुनेराख्यानं समाप्तम् ।

६२–द्वात्रिंशच्छ्रेष्ठिपुत्राणां कथा ।

श्रीसर्वज्ञं प्रणम्योच्चै-र्लोकालोकप्रकाशकम् ।
द्वात्रिंशच्छ्रेष्ठिपुत्राणां चरित्रं रचयाम्यहम् ॥ १ ॥
कौशाम्बीनगरे रम्ये द्वात्रिंशच्छ्रेष्ठिनोभवन् ।
इन्द्रदत्तादयः ख्याता भूरिद्रव्यसमन्विताः ॥ २ ॥
तेषां समुद्रदत्ताद्याः पुत्रा द्वात्रिंशदुत्तमाः ।
ये जाताः सद्गुणोपेताः सारसम्यक्त्वमण्डिताः ॥ ३ ॥
सर्वे ते जिनपादाब्ज-सेवनैकमधुव्रताः ।
परस्परं सुमित्रत्वं प्राप्ताः सद्धर्मशालिनः ॥ ४ ॥
अहो पुण्यस्य सामग्री सर्वे ते श्रेष्ठिनां सुताः ।
लक्ष्मीमित्रत्वसद्धर्म-सादृश्यं यत्समागताः ॥ ५ ॥
एकदा त्रिजगत्पूज्यं केवलज्ञानलोचनम् ।
श्रीजिनेन्द्रं गुणैः सान्द्रं समभ्यर्च्य प्रभक्तितः ॥ ६ ॥
नत्वा स्तुत्वा सुरैः स्तुत्यं धर्ममाकर्ण्य निर्मलम् ।
सर्वे समुद्रदत्ताद्या महाभव्यमतल्लिका ॥ ७ ॥
ज्ञात्वा स्वल्पतरं स्वायुः स्वयम्भुवदनाम्बुजात् ।
ततो दीक्षां समादाय भवभ्रमणनाशिनीम् ॥ ८ ॥
ते सर्वे मुनयो धीरा जैनतत्वविदांवराः
सत्तपश्चरणोपेता विस्तीर्णे यमुनातटे ॥ ९ ॥
प्रायोपयानसंज्ञेन मरणेन स्थिरं स्थिताः ।
महावृष्ट्यां प्रजातायां प्रवाहेन नदीह्रदे ॥ १० ॥

पातितास्ते तदा सर्वे कालं कृत्वा समाधिना ।
स्वर्गं प्राप्ताः सतां वृत्तं मेरोः शृंगाच्च निश्चलम् ॥ ११ ॥
स्वर्गे तत्र लसत्सौख्यं भुंजानास्ते स्वपुण्यतः ।
श्रीमज्जिनेन्द्रपादाब्ज-संजाता भक्तिनिर्भराः ॥ १२ ॥
स जयतु जिनदेवो यस्य चारित्रमुच्चैः
स्थिरतरमतुलं वै दुष्टनानोपसर्गैः ।
सकलभुवनसारं दत्तसंसारपारं
परमसुखनिवासं ध्वस्तमोहादिपाशम् ॥ १३ ॥

इति कथाकोशे द्वात्रिंशच्छ्रेष्ठिपुत्राणामाख्यानं समाप्तम् ।

आराधना-कथाकोशः ।

[तृतीयखण्डम् ।]

रचयिता—

ब्रह्मचारी श्रीमन्नेमिदत्तः ।

सम्पादकः—

उदयलालः काशलीवालः ।

श्रीवीतरागाय नमः ।

आराधना-कथाकोशः ।

(तृतीयखण्डम्)

६३—श्रीधर्मघोषाख्यानम् ।

प्रणम्य त्रिजगद्देवं श्रीजिनं धर्मदेशकम् ।
वक्ष्ये श्रीधर्मघोषाख्य—मुनीन्द्रस्य कथानकम् ॥ १ ॥
चम्पायां चैकदा कृत्वा सुधीर्मासोपवासकम् ।
धर्मघोषो मुनिः पश्चा-द्धर्ममूर्त्तिर्गुणाकरः ॥ २ ॥
गोष्ठे तु पारणां कृत्वा संचचाल स्वलीलया ।
नष्टे मार्गे तदा भूरिहरिताङ्कुरितोपरि ॥ ३ ॥
आगच्छन्स तृषाक्रान्तो गंगातीरे मनोहरे ।
वटवृक्षतले यावद्वि-श्रान्तोसौ मुनीश्वरः ॥ ४ ॥
गंगादेवी तदा वीक्ष्य तं मुनिं तपसां निधिम् ।
प्रासुकं निर्मलं तोयं कुंभे कृत्वा मनोहरम् ॥ ५ ॥
समानीय प्रणम्योच्चैः संजगादेति भो मुने ।
कृपां कृत्वा पिबेदं मे सज्जलं भुवनोत्तमम् ॥ ६ ॥
तेनोक्तं श्रीमुनीन्द्रेण नास्माकं कल्पते शुभे ।
ततोऽसौ देवता गत्वा शीघ्रं पूर्वविदेहकम् ॥ ७ ॥

केवलज्ञानिनं नत्वा भक्तितः संजगौ तदा ।
न पीतं हेतुना केन जलं मे मुनिना विभो ॥ ८ ॥
ततः श्रीकेवली प्राह जिनेन्द्रो भुवनार्चितः ।
मुग्धे देवकराहारो मुनीना नैव कल्पते ॥ ९ ॥
गंगादेवी तदागत्य सुगन्धीकृतदिङ्मुखाम् ।
समन्तात्तन्मुनेः शीत-तोयवृष्टिं चकार सा ॥ १० ॥
तदासौ धर्मघोषाख्यो मुनीन्द्रो धर्मतत्ववित् ।
समाधानं समासाद्य शुक्लध्यानेन धीरधीः ॥ ११ ॥
केवलज्ञानमुत्पाद्य सुरासुरसमर्चितः ।
मुक्तिं संप्राप्तवान्स्वामी सोऽस्माकं सत्सुखं क्रियात् ॥ १२ ॥
स श्रीकेवललोचनोतिचतुरो भव्यौघसम्बोधको
लोकालोकविलोकनैकनिपुणो देवेन्द्रवृन्दार्चितः ।
मिथ्यामोहमहान्धकारतरणिश्चिन्तामणिः प्राणिनां
कुर्यान्मे भवतां च निर्मलसुखं श्रीधर्मघोषो जिनः ॥ १३ ॥

इति कथाकोशे धर्मघोषमुनेराख्यानं समाप्तम् ।

६४—श्रीदत्तस्याख्यानम् ।

केवलज्ञानसल्लक्ष्मी-नायकं श्रीजिनेश्वरम् ।
नत्वा देवकृते कष्टे वक्ष्ये श्रीदत्तवृत्तकम् ॥ १ ॥
इलावर्द्धनसत्पुर्यां राजाभूज्जितशत्रुवाक् ।
इला राज्ञी तयोः पुत्रः श्रीदत्तः संबभूव च ॥ २ ॥

अयोध्याभूपतेरंशु-मतः पुत्रीं स्वयंवरे ।
सुधीरंशुमतीं पूतां श्रीदत्तः परिणीतवान् ॥ ३ ॥
अंशुमत्या सहैकस्तु समायातः शुकस्तदा ।
स पक्षी तु तयोर्द्यूते स्वगेहे रममाणयोः ॥ ४ ॥
श्रीदत्तस्य जये रेखा-मेकामंशुमतीजये ।
द्वे रेखे संददात्येव पक्षिणश्चापि वञ्चकाः ॥ ५ ॥
श्रीदत्तेन तदा रुष्ट्वा ग्रीवायां चम्पितः शुकः ।
मृत्वा व्यन्तरदेवोभून्महाकष्टेन दुष्टधीः ॥ ६ ॥
श्रीदत्तश्चैकदा सोपि स्वप्रासादोपरि स्थितः ।
मेघस्य पटलं नष्टं समालोक्य विरक्तवान् ॥ ७ ॥
अहो संसारके सर्वं वस्तु विद्युल्लतोपमम् ।
भोगा भुजंगभोगाभाः कायो मायोपमो मली ॥ ८ ॥
तत्र मूढाः प्रकुर्वन्ति प्रीतिं संसारकादिषु ।
हा कष्टं किमतोन्यच्च मूढत्वेन समं भुवि ॥ ९ ॥
इत्यादिकं विचार्योच्चैः स्वचित्ते संसृतेः स्थितिम् ।
दीक्षामादाय जैनेन्द्रीं स्वर्गमोक्षप्रदायिनीम् ॥ १० ॥
एकाकी विहरन्धीमान्भव्यसंघान्प्रबोधयन् ।
निजं पुरं समागत्य शीतकाले बहिः स्थितः ॥ ११ ॥
कायोत्सर्गे स्थितं वीक्ष्य तदा तं मुनिसत्तमम् ।
शुकव्यन्तरदेवोऽसौ पूर्ववैरेण पापधीः ॥ १२ ॥
घोरवातमहाशीत-तोयसंसेवनादिभिः ।
पीडयामास दुष्टात्मा किं कुकार्यमतः परम् ॥ १३ ॥

श्रीदत्तश्च मुनीन्द्रोसौ शत्रुमित्रसमाशयः ।
महासमाधिना स्वामी सोढ़ाशेषपरीषहीन् ॥ १४ ॥
शुक्लध्यानप्रभावेन मेरुवन्निश्चलस्तराम् ।
केवलज्ञानमुत्पाद्य संप्राप्तो मोक्षमक्षयम् ॥ १५ ॥
स श्रीमज्जितशत्रुराजतनुजः श्रीदत्तनामा मुनि-
भूत्वा देवकृतप्रकष्टमतुलं सोढ्वा शुभध्यानतः ।
हत्वाशेषनिबन्धनानि नितरां प्राप्तः श्रियं शाश्वतीं
स श्रीकेवललोचनो जिनपतिर्दद्यात्स्वभक्तिं मम ॥ १६ ॥

इति कथाकोशे श्रीदत्तमुनेराख्यानं समाप्तम् ।

६५—श्रीवृषभसेनस्याख्यानम् ।

प्रोल्लसत्परमानन्द-जगद्वन्द्यं जिनेश्वरम् ।
नत्वा वृषभसेनस्य चरित्रं रचयाम्यहम् ॥ १ ॥
उज्जयिन्यां महाराजः प्रद्योताख्यो गुणोज्वलः ।
मदोन्मत्तगजारूढो गजार्थमटवीं गतः ॥ २ ॥
नीतो मत्तगजेनासौ सुदूरं भूरिदुःखतः ।
वृक्षशाखां नृपः प्रोच्चै-रवलम्ब्यावतीर्य च ॥ ३ ॥
एकाकी तु समागच्छन्खेटग्रामे मनोहरे ।
स्थितः कूपतटे याव-ज्जिनपालस्य धीमतः ॥ ४ ॥
ग्रामकूटस्य तोयार्थं जिनदत्तागता सुता ।
तदा तेन नरेन्द्रेण जलं पातुं प्रयाचिता ॥ ५ ॥

महान्तं पुरुषं ज्ञात्वा दत्वा तस्मै जलं मुदा ।
सा ततो गृहमागत्य तां वार्त्तां स्वपितुर्जगौ ॥ ६ ॥
ततोसौ जिनपालेन समागत्य प्रभक्तितः ।
नीत्वा गृहं सुखस्नानं भोजनं कारितो नृपः ॥ ७ ॥
दानं स्तोकतरं चापि प्रस्तावे शर्मकोटिदम् ।
प्रावृट्काले यथा चोप्तं बीजं भूरिफलं भवेत् ॥ ८ ॥
भृत्यादौ च समायाते स प्रद्योतो महीपतिः ।
महोत्सवशतैस्तत्र तां कन्यां परिणीय च ॥ ९ ॥
चक्रे पट्टमहाराज्ञीं जिनदत्तां गुणोज्वलाम् ।
नाना भोगान्प्रभुञ्जानः संस्थितो निजलीलया ॥ १० ॥
कैश्चिद्दिनैस्ततस्तस्याः सुतोत्पत्तिनिशाक्षणे ।
स्वप्ने राज्ञा समालोक्य वृषभं सुमनोहरम् ॥ ११ ॥
पुत्रो वृषभसेनोयं संप्रोक्तः परया मुदा ।
जिनेन्द्रभवनोत्साह- स्नानपूजाप्रदानतः ॥ १२ ॥
एवं सत्कर्मभिर्नित्यं गते संवत्सराष्टके ।
राजा प्रद्योतनामासौ प्राप्तसौख्यपरम्पराम् ॥ १३ ॥
पुत्रं प्राह सुधी राज्यं त्वं गृहाण सुतोत्तम ।
मया श्रीमज्जिनेन्द्रोक्तं सत्तपः क्रियतेधुना ॥ १४ ॥
सुतेनोक्तमहो तात किं राज्यं कुर्वतोङ्गिनः ।
परलोकमहासिद्धि-र्विद्यते नैव भूतले ॥ १५ ॥
राजा जगाद भो पुत्र नैव मुक्तिस्तपो विना ।
मुक्तेः संसाधनं जैनं तपः प्रोक्तं यतो बुधैः ॥ १६ ॥

यद्यैवं निश्चयस्तात दुःखदे राज्यकर्मणि ।
निर्वृत्तिर्ममाप्यस्ति भवत्पादप्रसादतः ॥ १७ ॥
पुत्रवाक्यं समाकर्ण्य भ्रातृव्याय महोत्सवैः ।
दत्वा राज्यं स्वपुत्रेण सार्द्धं जातो मुनिर्नृपः॥ १८ ॥
स श्रीवृषभसेनाख्यो मुनिः श्रीजिनभाषितम् ।
तपः कुर्वस्तदैकाकी विहरन्भुवतोत्तमः ॥ १९ ॥
कोशाम्बीपत्तनाम्यर्णे पर्वतोरुशिलातले ।
ज्येष्ठमासे सुधीर्योगं ददात्यातापनं सदा ॥ २० ॥
तत्प्रभावं समालोक्य सर्वे भव्यजनास्तदा ।
श्रीमज्जिनेन्द्रसद्धर्मे संजाताः सुतरां रताः ॥ २१ ॥
एकदासौ मुनिर्धीर-श्चारुचारित्रमंडितः ।
निर्गतो देहयात्रार्थं जैनतत्वविदांवरः ॥ २२ ॥
तदा चेर्ष्यापरः पापी बुद्धदासः कुवन्दकः ।
तां शिलां पावकेनोच्चै-रग्निवर्णां चकार सः ॥ २३ ॥
साधूनां सुप्रभावस्तु सह्यते नैव दुर्जनैः ।
यथा भानुप्रभावश्च घूकानां न सुखायते ॥ २४ ॥
चर्यां कृत्वा समागत्य शिलामालोक्य तादृशीम् ।
सत्प्रतिज्ञापरः स्वामी स श्रीवृषभसेनवाक् ॥ २५ ॥
सारसंन्यासमादाय निश्चलो मुनिसत्तमः ।
स्थितो यावच्छिलापीठे तावत्त्रैलोक्यपूजितम् ॥ २६ ॥
केवलज्ञानमुत्पाद्य निर्वाणं प्राप्तवान्सुधीः ।
अहो मेरोरपि व्यक्तं चारित्रं निश्चलं सताम् ॥ २७ ॥

यच्चित्तोन्नतपर्वतस्य पुरतः प्रोत्तुङ्गभूभृद्गणोऽ–
णुत्वं याति सरित्पतिस्तु नितरां दर्भाग्रबिन्दूपमाम् ।
स श्रीमान्वृषभादिसेनजिनपः प्रध्वस्तकर्मा विभु–
र्देयात्स्वस्य गुणश्रियं गुणनिधिर्मे सर्वसिद्धिप्रदाम् ॥ २८ ॥

इति कथाकोशे श्रीवृषभसेनमुनेराख्यानं समाप्तम् ।

६६–कार्त्तिकेयमुनेराख्यानम् ।

केवलज्ञानसन्नेत्रं पवित्रं शर्मकारणम् ।
नत्वा जिनं प्रवक्ष्यामि कार्त्तिकेयकथानकम् ॥ १ ॥
कार्त्तिकाख्यपुरे राजा संजातोग्न्यभिधानकः ।
राज्ञी वीरमती पुत्री कृत्तिका रूपमण्डिता ॥ २ ॥
साथ नन्दीश्वराष्टम्या-मुपवासं विधाय च ।
कृत्वा पूजां जिनेन्द्राणां शेषां पित्रे सुता ददौ ॥ ३ ॥
तदा तद्रूपमालोक्य दिव्यं राजाग्निवाक् कुधीः ।
सर्वलिङ्गीन्द्विजादींश्च दुष्टात्मा कामुकोऽवदत् ॥ ४ ॥
उत्पन्नं मद्गृहे रत्नं कस्य भो भवति ध्रुवम् ।
ब्रूत यूयं तदाकर्ण्य जगुस्ते मुग्धमानसाः ॥ ५ ॥
भो नरेन्द्र तवैव स्या-त्ततः प्राहुर्मुनीश्वराः ।
कन्यारत्नं विना देव सर्वं ते नात्र संशयः ॥ ६ ॥
तद्वाक्यं त्रिजगत्पूज्यं तच्चित्ते कष्टकोटिदम् ।
संजातं पापिनां युक्तं कथं पथ्यायते वचः ॥ ७ ॥

ततस्तेन सुरुष्टेन देशा-न्निर्घाट्य तान्मुनीन् ।
स्वपुत्री कृत्तिका नाम्नी परिणीता स्वयं हठात् ॥ ८ ॥
पापिनां कामिनां लोके भाविदुर्गतिदुःखिनाम् ।
क धर्मः क च लज्जासौ क नीतिः क च सन्मतिः ॥ ९ ॥
कैश्चिद्दिनैस्ततस्तस्यां कार्त्तिकेयो सुतोभऽवत् ।
पुत्री वीरमती जाता रूपलावण्यमण्डिता ॥ १० ॥
रोहेडनगरे सा तु पुत्री क्रौंचमहीभुजे ।
दत्ता भोगान्प्रभुञ्जाना संस्थिता सुखतः सती ॥ ११ ॥
चतुर्दशसु वर्षेषु गतेषु निजलीलया ।
कार्त्तिकेयः सुधीः क्रीडां कुर्वन्नेकदिने ततः ॥ १२ ॥
नमिप्रभृतितद्राज-कुमाराणां मनोहरम् ।
मातामहात्समायातं दृष्ट्वा वस्त्रादिकं शुभम् ॥ १३ ॥
जगाद मातरं चेति भोमातस्ते पिता मम ।
किं कारणं कदा किंचि-न्नैव प्रेषयते स्फुटम् ॥ १४ ॥
अश्रुपातं विधायोच्चैः कृत्तिका प्राह भो सुत ।
किं कथ्यते स महापाप-मेको मे ते पिता कुधीः ॥ १५ ॥
तद्वृत्तकं समाकर्ण्य कार्त्तिकेयोवदत्पुनः ।
भो मातः किं पिता मेयं निषिद्धो नैव केनचित् ॥ १६ ॥
तयोक्तं मुनिभिः पुत्र निषिद्धो बहुशो बुधैः ।
दुष्टो निर्घाटयामास स्वदेशात्तान्मुनीश्वरान् ॥ १७ ॥
कीदृशास्ते सुतः प्राह मुनीन्द्रा गुणशालिनः ।
सा जगौ जैनतत्वज्ञा निर्ग्रन्था धर्मनायकाः ॥ १८ ॥

मयूरकोमलोत्कृष्ट-पिच्छहस्ता दयान्विताः ।
कमण्डलुकरा दूरे ते तिष्ठन्ति दिगम्बराः ॥ १९ ॥
जनन्या वचनं श्रुत्वा कार्त्तिकेयो विरक्तवान् ।
गृहान्निर्गत्य पूतात्मा गत्वा स्थानं मुनीशिनाम् ॥ २० ॥
नत्वा मुनीन्महाभक्त्या दीक्षामादाय शर्मदाम् ।
मुनिर्जातो जिनेन्द्रोक्त-सप्ततत्वविचक्षणः ॥ २१ ॥
कृत्तिका जननी मृत्वा तदार्त्तेन स्वकर्मणा ।
जाता व्यन्तरदेवी सां प्रोल्लसद्रूपसम्पदा ॥ २२ ॥
कार्त्तिकेयो मुनिर्धीमान्विहरन्स तपोनिधिः ।
रोहेडनगरं प्राप्तो ज्येष्ठमासे गुणोज्वलः ॥ २३ ॥
अमावास्यादिने स्वामी चर्यायां संप्रविष्टवान् ।
प्रासादोपरिभूमिस्था दृष्ट्वा वीरमती च ताम् ॥ २४ ॥
भ्राता ममेति संज्ञात्वा पत्युः स्वोत्संगतः शिरः ।
परित्यज्य तदा शीघ्रं समागत्य प्रभक्तितः ॥ २५ ॥
तुभ्यं नमोस्तु वीरेति लग्ना तत्पादपद्मयोः ।
बन्धुत्वाच्च मुनित्वाच्च कस्य प्रीतिर्न जायते ॥ २६ ॥
तदा क्रौंचनृपः पापी दृष्ट्वा तां कामिनीं तथा ।
मारयामास तं क्रोधा-त्स्वशक्त्या मुनिनायकम् ॥ २७ ॥
पापी मिथ्यारतः प्राणी जैनधर्मपराङ्मुखः ।
किं करोति न दुष्कर्म जन्मकोटिप्रकष्टदम् ॥ २८ ॥
तदा शीघ्रं समागत्य व्यन्तरी जननीचरी ।
सा मयूरस्य रूपेण मूर्च्छितं मुनिसत्तमम् ॥ २९ ॥

दृष्ट्वा शीतलनाथस्य मन्दिरे सुमनोहरे ।
नीत्वा यत्नेन सद्भक्त्या स्थापयामास देवता ॥ ३० ॥
तत्रासौ कार्त्तिकेयस्तु मुनीन्द्रो जैनतत्त्ववित् ।
कृत्वा समाधिना कालं सम्प्राप्तः स्वर्गमुत्तमम् ॥ ३१ ॥
देवैस्तत्र समागत्य कृता पूजा सुभक्तितः ।
स्वामी श्रीकार्त्तिकेयाख्यं ततोभूच्चेति तीर्थकम् ॥ ३२ ॥
वीरमत्यास्तु सम्बन्धा-द्भ्रातृकादिद्वितीयकम् ।
लौकिकं पर्वसंजातं तदा प्रभृति भूतले ॥ ३३ ॥
श्रीमज्जिनेन्द्रचन्द्रोक्तं शास्त्रं सन्देहनाशकम् ।
संभजन्तु बुधा नित्यं स्वर्गमोक्षसुखप्रदम् ॥ ३४ ॥

सकलतत्वविलोकनदीपिका
यदुदितां भुवनोत्तमभारती ।
स मम देवनिकायसमार्चितो
दिशतु शाश्वतशर्म जिनाधिपः ॥ ३५ ॥

इति कथाकोशे श्रीकार्त्तिकेयमुनेराख्यानं समाप्तम् ।

६७–अभयघोषमुनेराख्यानम् ।

संप्रणम्य जिनाधीशं सुराधीशैः समर्चितम् ।
मुनेरभयघोषस्य चरित्रं रचयाम्यहम् ॥ १ ॥
काकन्दीनगरे राजा संजातोभयघोषवाक् ।
राज्ञी चाभयमत्याख्या तस्याभूत्प्राणवल्लभा ॥ २ ॥

एकदाभयघोषेण पुरबाह्यं गतेन च ।
चतुष्पादेषु संबध्वा जीवन्तं कच्छपं दृढम् ॥ ३ ॥
स्कन्धे यष्ट्यां विधायैव समागच्छंश्च धीवरः ।
दृष्टो राज्ञा स्वचक्रेण पापतोऽज्ञानभावतः ॥ ४ ॥
चत्वारः कच्छपस्याशु छिन्नाः पादाः प्रमादिना ।
हन्ति पापीजनो जन्तून्विना न्यायेन दुष्टधीः ॥ ५ ॥
कच्छपोसौ महाकष्टं मृत्वा तस्यैव भूपतेः ।
चण्डवेगः सुतो जातः कृत्वाकामप्रानिर्जराम् ॥ ६ ॥
एकदासौ महीनाथः सुधीरभयघोषवाक् ।
चन्द्रग्रहणमालोक्य जातो वैराग्यमण्डितः ॥ ७ ॥
अहो पापी दुरात्माहं जैनतत्वपराङ्मुखः ।
मोहान्धतमसाक्रान्तो महान्धे लोचने सति ॥ ८ ॥
हिताहितं न पश्यामि मूढोहं पापमण्डितः ।
कथं संसारवाराशेः पारं यास्यामि निर्मलम् ॥ ९ ॥
अतः परं महाघोरं तपः कृत्वा जिनोदितम् ।
अनादिकालसंलग्ना-ञ्जित्वा कर्ममहारिपून् ॥ १० ॥
मुक्तिकान्ताकरस्पर्शं संकरोमि सुखप्रदम् ।
इत्यादिकं विचार्योच्चैः स्वचित्ते चतुरोत्तमः ॥ ११ ॥
दत्वा राज्यं स्वपुत्राय चण्डवेगाय वेगतः ।
दीक्षामादाय जैनेन्द्री-मिन्द्रियाणां प्रदण्डिनीम् ॥ १२ ॥
गुरुं नत्वा मुनिर्भूत्वा संसाराम्भोधितारणम् ।
जन्ममृत्युजरातंक-कुपंकक्षयकारिणम् ॥ १३ ॥

एकाकी सुतपः कुर्वन्विहरंश्च महीतले ।
काकन्दीनगरोद्याने स्थितो वीरासनेन सः ॥ १४ ॥
पूर्ववैरेण पापात्मा चण्डवेगश्च पुत्रकः ।
तत्रायातस्तदा तस्य मुनीन्द्रस्य महाधियः ॥ १५ ॥
छिनत्ति स्म स्वचक्रेण हस्तौ पादौ च मूढधीः।
अज्ञानी धर्महीनस्तु किं पापं यत्करोति न ॥ १६ ॥
मुनीन्द्रोभयघोषस्तु तत्क्षणे ध्यानतत्परः ।
केवलज्ञानमुत्पाद्य संप्राप्तो मोक्षमक्षयम् ॥ १७ ॥
अहो जीवस्य सच्छक्ति-र्महाश्चर्यं प्रवर्त्तते ।
क कष्टं दारुणं दिव्यं क च ध्यानं शिवप्रदम् ॥ १८ ॥
जित्वाशेषपरीषहान्दृढतरान्हत्वा च मोहादिका-
न्नाना जन्मशतोरुकष्टजनकान्क्षिप्त्वाशु कर्मारिकान् ।
संप्राप्तोक्षयमोक्षसौख्यमतुलं स श्रीजिनः शं क्रिया-
त्संपूज्योभयघोषनामकलितो नित्यं सतां सेवितः ॥ १९ ॥

इति कथाकोशे श्रीमदभयघोषमुनेराख्यानं समाप्तम् ।

६८–श्रीविद्युच्चरमुनेराख्यानम् ।

सर्वसौख्यप्रदं नत्वा जिनेन्द्रं भुवनोत्तमम् ।
वक्ष्ये विद्युच्चराख्यानं विख्यातं मुनिभाषितम् ॥ १ ॥
मिथलाख्यपुरे राजा सुधीर्वामरथोभवत् ।
तत्पारो यमदण्डोभू-च्चोरो विद्युच्चरो महान् ॥ २ ॥

नाना विज्ञानसम्पन्नो निष्पन्नश्चोरकर्मणि ।
दिनेसौ कुष्ठिरूपेण चोरो मायायुतस्तदा ॥ ३ ॥
कचिद्देवकुले शून्ये रंको भूत्वा च तिष्ठति ।
रात्रौ दिव्यनरो भूत्वा चोरो भोगान्करोति च ॥ ४ ॥
एकदा तस्य भूपस्य रात्रौ हारं गृहीतवान् ।
प्रभाते यमदण्डाख्यं राजा वामरथोवदत् ॥ ५ ॥
चोरेण दिव्यरूपेण मोहयित्वा च मां पुनः ।
हारो मे संहृतः शीघ्रं यमदण्ड समानय ॥ ६ ॥
तं हारं सप्त रात्रेण नान्यथा निग्रहं तव ।
करिष्यामीति तच्छ्रुत्वा तल्गरः स विचक्षणः ॥ ७ ॥
नत्वा नृपं पुरादौ च तं गवेषयितुं गतः ।
दृष्ट्वा सर्वत्र यत्नेन ततः सप्तमवासरे ॥ ८ ॥
शून्यालये समालोक्य तं नीत्वा च नृपान्तिकम् ।
सुधीः प्राह नरेन्द्रायं तस्करो दुष्टमानसः ॥ ९ ॥
तेनोक्तं नैव चोरोहं कोटपालः पुनर्जगौ ।
अयं देव भवत्येव तस्करो नात्र संशयः ॥ १० ॥
तदा राज्ञो जनैः प्रोक्तं देवासौ तलरक्षकः ।
चोराभावे महारंकं मारयत्येव साम्प्रतम् ॥ ११ ॥
ततस्तेन तल्गारेण नीत्वा तं निजमन्दिरम् ।
माघमासे महाशीत-तोयसेचनकादिभिः ॥ १२ ॥
तापताडनबन्धोरुद्वात्रिंशाङ्गुष्कदर्थनैः ।
पीडितोपि वदत्येष नाहं चोर इति स्फुटम् ॥ १३ ॥

प्रभाते भूपतेरग्रं नीत्वा तं तलरक्षकः ।
संजगाद नरेन्द्रासौ सर्वचोरशिरोमणिः ॥ १४ ॥
स च प्राह महादस्यु-र्नाहं चोरो भवाम्यहो ।
चोराणां साहसो गूढो वर्ण्यते केन भूतले ॥ १५ ॥
दत्वाभयप्रदानं च स राज्ञो भणितस्तदा ।
सत्यं ब्रूहि महाधीर किं त्वं चोरो न वेति च ॥ १६ ॥
तेनोक्तं तस्करेणैवं ततो निर्भयचेतसा ।
अहो नरेन्द्र चोरोहं सत्यस्ते तलरक्षकः ॥ १७ ॥
ततो वामरथो राजा महाविस्मयतो जगौ ।
द्वात्रिंशद्दण्डनैः कष्टं कथं रे निर्जितं त्वया ॥ १८ ॥
चोराग्रणीस्तदावोच-द्भूपाल मया श्रुतम् ।
मुनेः पार्श्वे महादुःखं यत्क्रूरं नरकोद्भवम् ॥ १९ ॥
तस्मात्कोटिप्रभागं तु नैतद्दुःखं भवेत्परम् ।
संचिन्त्येति स्वचित्तेहं संजातस्तत्क्षमः प्रभो ॥ २० ॥
हृष्टो राजा जगादैवं वरं प्रार्थय भो भट ।
तेनोक्तं भो नराधीश दीयते भवता द्रुतम् ॥ २१ ॥
दानं मेस्मै सुमित्राय तल्गराय सुनिर्भयम् ।
तच्छ्रुत्वा स महीनाथो महाश्चर्यपरोवदत् ॥ २२ ॥
कथं भो कोट्टपालोयं मित्रं तेत्र प्रवर्त्तते ।
स पुनस्तस्करो प्राह श्रूयतां भो महीपते ॥ २३ ॥
दक्षिणाख्यपथेऽभीर-देशे वेनानदीतटे ।
पुरेवेनातटे ख्याते जितशत्रुर्महीपतिः ॥ २४ ॥

राज्ञी जयावती तस्याः पुत्रो विद्युच्चरोस्म्यहम् ।
श्रूयतां च तथा देव तत्रैव नगरे शुभे ॥ २५ ॥
तल्गरो यमपाशोभू-त्तद्भार्या यमुना सती ।
तयोश्च यमदण्डोसौ पुत्रो जातो गुणोज्वलः ॥ २६ ॥
एकोपाध्यायसान्निध्ये मया चोरागमः सुधीः ।
अनेन कोट्टपालस्य शास्त्रं संपठितं विभो ॥ २७ ॥
द्वाभ्यां कृत्वा प्रतिज्ञेति मयोक्तं तत्र गर्वतः ।
यत्र रे यमदड त्वं तल्गारस्तत्पुरे मया ॥ २८ ॥
कर्त्तव्या चोरिकावश्यं तच्छ्रुत्वानेन जल्पितम् ।
यत्र त्वं तस्करस्तत्र मया रक्षा विधीयते ॥ २९ ॥
एकदा मे पिता देव जितशत्रुर्गुणाकरः ।
दत्वा राज्यं च मे प्राज्यं जैनीं दीक्षां गृहीतवान् ॥ ३० ॥
यमपाशस्तल्गरस्तु समर्प्यास्मै निजं पदम् ।
सोपि जातो मुनिर्धीमान्यमदण्डः प्रभीतवान् ॥ ३१ ॥
मदीयभयतो राजं-स्त्वदीयमिथिलापुरम् ।
समागत्य तल्गरोयं संजातो यमदण्डकः ॥ ३२ ॥
तत्प्रतिज्ञावशादेव समागत्यात्र पत्तने ।
संगवेषयितुं चामुं चोरो जातोहमद्भुतम् ॥ ३३ ॥
इत्युक्त्वा हारपर्यन्तं कथयित्वा च वृत्तकम् ।
ग्रहीत्वा यमण्दडं स्वं पुरं विद्युच्चरो गतः ॥ ३४ ॥
तत्र वैराग्यभावेन संप्रविश्य स्वमन्दिरम् ।
सुधीर्विद्युच्चरः सोपि जैनतत्वविदाम्वरः ॥ ३५ ॥
राज्यं दत्वा स्वपुत्राय जिनस्नपनपूर्वकम् ।
भूरिराजसुतैः सार्द्धं मुनिर्भूत्वा विचक्षणः ॥ ३६ ॥

कुर्वंस्तपो जिनेन्द्रोक्तं स्वर्गमोक्षसुखप्रदम् ।
भव्यान्सम्बोधयन्नुच्चै-र्विहरंश्च महीतले ॥ ३७ ॥
मुनिपंचशतैर्युक्तो विरक्तो मदनादिषु ।
तामलिप्तपुरीं प्राप्तो न लिप्तो मोहकर्दमैः ॥ ३८ ॥
पुरप्रवेशे तत्रासौ प्रोक्तश्चामुण्डया मुनिः ।
भो मुने मम पूजाद्या यावत्कालं समाप्यते ॥ ३९ ॥
तावत्त्वया न कर्त्तव्यः प्रवेशस्तामलिप्तके ।
देव्यापि वारितः शिष्यैः प्रेरितो मुनिसत्तमः ॥ ४० ॥
तदा पुरं प्रविश्योच्चैः पुरः पश्चिमभागके ।
प्रकारस्य समीपे तु शिष्यवर्गैः समन्वितः ॥ ४१ ॥
रात्रौ सत्प्रतिमायोगे संस्थितो निश्चलाशयः ।
चामुण्डया तदा शीघ्रं प्रचण्डक्रोधचेतसा ॥ ४२ ॥
कपोतकप्रमाणोरु-दंशकैर्मशकैस्तया ।
उपसर्गो महांश्चक्रे तदा विद्युच्चरो मुनिः ॥ ४३ ॥
महावैराग्यसंयुक्तः सोढाशेषपरीषहम् ।
शुक्लध्यानप्रभावेन हत्वा कर्मारिसंचयम् ॥ ४४ ॥
केवलज्ञानमुत्पाद्य संप्राप्तो मोक्षमक्षयम् ।
सोस्माकं पूजितो नित्यं प्रकुर्याच्छाश्वतीं श्रियम् ॥ ४५ ॥
इन्द्रैश्चारुनरेन्द्रखेचरतरैर्नागेन्द्रयक्षेश्वरैः
प्रोद्यत्पञ्चविधप्ररत्नमुकुटप्रव्यक्तभाभासुरैः ।
नित्यं यस्तु विशुद्धभक्तिभरतः संपूज्य चाराधितः
स श्रीमान्मम मङ्गलं शिवपतिर्दद्याच्च विद्युच्चरः ॥ ४६ ॥

इति कथाकोशे विद्युच्चरमुनेराख्यानं समाप्तम् ।

६९–श्रीगुरुदत्तमुनेराख्यानम् ।

नत्वा पंच गुरून्भक्त्या प्रोल्लसत्केवलश्रिये ।
गुरुदत्तमुनेर्वच्मि चरित्रं भुवनोत्तमम् ॥ १ ॥
हस्तिनागपुरे धीमान् जिनधर्मधुरन्धरः ।
राजा विजयदत्ताख्यो विजया प्राणवल्लभा ॥ २ ॥
तयोः पुत्रोतिगंभीरो धीरोभूद्गुरुदत्तवाक् ।
पूर्वपुण्येन सम्पूर्णो रूपलावण्यमण्डितः ॥ ३ ॥
तस्मै विजयदत्तोसौ राजा राज्यश्रियं निजाम् ।
दत्वा स्वयं मुनिर्जातो गुरुं नत्वा दिगम्बरम् ॥ ४ ॥
लाटदेशेथ विख्याते द्रोणीमत्पर्वतान्तिके ।
सुधीश्चन्द्रपुरीपुर्यां चन्द्रकीर्तिर्महीपतिः ॥ ५ ॥
चन्द्रलेखा महाराज्ञी सुताभयमती सती ।
तेन श्रीगुरुदत्तेन परिणेतुं प्रयाचिता ॥ ६ ॥
न दत्ता चन्द्रकीर्त्याख्य-भूभुजा निजदेहजा ।
ततः कोपात्समागत्य स सैन्यो गुरुदत्तकः ॥ ७ ॥
समन्ताद्वेष्टयामास शीघ्रं चन्द्रपुरीं महान् ।
तच्छ्रुत्वाभयमत्याख्या तदसक्ता सुता जगौ ॥ ८ ॥
तातं प्रति प्रभो देहि गुरुदत्ताय मां सुधीः ।
ततस्तेन नरेन्द्रेण तस्मै दत्ता सुतोत्सवैः ॥ ९ ॥
तदा श्रीगुरुदत्तस्य प्रोक्तं सर्वजनैरिति ।
अस्मिन्द्रोणीमति ख्याते पर्वते भो नरेश्वर ॥ १० ॥

व्याघ्रः संतिष्ठते देव पापी प्राणिभयंकरः ।
तेनायं भो महाधीर देशश्चोत्त्रासितोखिलः ॥ ११ ॥
तच्छ्रुत्वा स्वजनैः सार्द्धं गत्वा तेन प्रवेगतः ।
व्याघ्रः संवेष्टितः सोपि गुहां नष्ट्वा प्रविष्टवान् ॥ १२ ॥
गुहामध्ये तदा क्षिप्त्वा तेन काष्ठानि भूरिशः ।
तद्द्वारे च तथा तीव्रो वह्निः प्रज्वालितो महान् ॥ १३ ॥
ततो व्याघ्रो महाकष्टान्मृत्वा चन्द्रपुरीपुरे ।
विप्रस्य भरताख्यस्य विश्वदेव्याः स्त्रियोभवत् ॥ १४ ॥
पुत्रोसौ कपिलो नाम महाक्रूराशयः पुनः ।
पूर्वाभ्यासाश्रिता जन्तोः प्रायशो भवति क्रिया ॥ १५ ॥
तयोस्तदा महाभोगा-न्नित्यं भुञ्जानयोर्मुदा ।
संजातो गुरुदत्ताख्या-ऽभयमत्याः सुतोत्तमः ॥ १६ ॥
सुधीः सुवर्णभद्राख्यः स्वगुणैस्तर्पिताखिलः ।
रूपसौभाग्यसद्भाग्य-मंडितो विमलाशयः ॥ १७ ॥
दत्वा तस्मै निजं राज्यं स राजा गुरुदत्तवाक् ।
जिनेन्द्रचरणाम्भोज-सेवनैकमधुव्रतः ॥ १८ ॥
त्रिधा वैराग्यसंयुक्तो मुनिर्भूत्वा निरंजनः ।
एकाकी विहरन्स्वामी जिनतत्वविदाम्वरः ॥ १९ ॥
कपिलक्षेत्रमागत्य कायोत्सर्गेण संस्थितः ।
तदाऽसत्कर्मयोगेन ब्राह्मणः कपिलः कुधीः ॥ २० ॥
भोजनं मे गृहीत्वा त्वं समागच्छेर्द्रुतं प्रिये ।
इत्युक्त्वा कपिलो भार्यां स्वक्षेत्रं गतवांस्तदा ॥ २१ ॥

तत्क्षेत्रं कर्षणायोग्यं मत्वा भट्टारकं प्रति ।
ब्राह्मण्याः कथयेस्त्वं मे भर्त्ता ते गतवान्ध्रुवम् ॥ २२ ॥
अन्यत्क्षेत्रमितिव्यक्तं प्रोक्त्वा मूढाशयो गतः ।
अहो प्राणी न जानाति मूढो मार्गं महामुनेः ॥ २३ ॥
ब्राह्मण्या च समागत्य पृष्टोसौ मुनिसत्तमः ।
स्वामी मौनेन संयुक्तः संस्थितः सा गृहं गता ॥ २४ ॥
तदा महाक्षुधाक्रान्तो विप्रो वेलाव्यतिक्रमे ।
गृहमागत्य कोपेन स्वकान्तां कटुकं जगौ ॥ २५ ॥
रे रे रंडे मृतोद्याहं क्षुधापीडितविग्रहः ।
पृष्ट्वा तं नग्नकं शीघ्रं समायातासि किं न हि ॥ २६ ॥
तयोक्तं भीतितो देव मया पृष्टोपि निस्पृहः ।
किंचिन्नैव मुनिः प्राह ततोहं गृहमागता ॥ २७ ॥
तदा तेन प्ररुष्टेन पापिना कपिलेन च ।
तत्रागत्य मुनिं वेष्ट-यित्वा शाल्मलितूलकैः ॥ २८ ॥
अग्निः प्रज्वालितस्तीव्रं तदासौच मुनीश्वरः ।
शुक्लध्यानाग्निना शीघ्रं घातिकर्मेन्धनोत्करम् ॥ २९ ॥
भस्मीकृत्वा जगत्पूज्यं केवलज्ञानमाप्तवान् ।
तदा देवागमे जाते पुष्पवृष्टिं प्रकुर्वति ॥ ३० ॥
ब्राह्मणोसौ महाश्चर्यं सम्प्राप्तः कपिलस्ततः ।
नत्वा तं केवलज्ञानि-गुरुदत्तं जिनेश्वरम् ॥ ३१ ॥
धर्ममाकर्ण्य जैनेन्द्रं सुरासुरसमर्चितम् ।
कृत्वात्मनिन्दनं तत्र मुनिर्भक्त्या बभूव सः ॥ ३२ ॥

अहो भव्याः सतां नित्यं संगतिः शर्मदायिनी ।
क्वासौ विप्रो महातीव्रः क्व जातस्तु मुनिस्तराम् ॥ ३३ ॥
ततो भव्यैः प्रकर्त्तव्यं साधुसंगैर्निजं कुलम् ।
पवित्रं परमानन्दो जायते येन शर्मदः ॥ ३४ ॥
स जयतु जिनदेवः सर्वदेवेन्द्रवन्द्य-
त्रिभुवनसुखकर्त्ता विश्वसन्देहहर्त्ता ।
स्थिरतरगुरुदत्तः प्राप्तनित्यस्वभावो
मम दिशतु सुखानि श्रीप्रभाचन्द्रदेवः ॥ ३५ ॥
इति कथाकोशे श्रीगुरुदत्तमुनेराख्यानं समाप्तम् ।

७०–विलातपुत्रस्याख्यानम् ।

चञ्चत्सत्केवलज्ञान-लोचनं श्रीजिनेश्वरम् ।
नत्वा विलातपुत्रस्य चरित्रं रचयाम्यहम् ॥ १ ॥
पुरे राजगृहे राजा-भवत्प्रश्रेणिको महान् ।
एकदा पुरबाह्येसौ निर्गतो निजलीलया ॥ २ ॥
दुष्टाश्वेन ततो नीतो महाटव्यां प्रवेगतः ।
तत्रस्थयमदण्डस्य महाटव्या महीपतेः ॥ ३ ॥
तिलकादिवतीं कन्यां दृष्ट्वा सद्रूपशालिनीम् ।
तदा कन्दर्पबाणेन विद्धोसौ भूपतिस्तराम् ॥ ४ ॥
प्रोक्तं च यमदण्डेन हे नरेन्द्र विचक्षण ।
अस्याः पुत्राय चेद्राज्यं दीयते भवता ध्रुवम् ॥ ५ ॥

तदा तुभ्यं ददाम्येतां स्वपुत्रीं तिलकावतीम् ।
तच्छ्रुत्वेवं करिष्यामि प्रोक्त्वा चेति महीपतिः ॥ ६ ॥
तां कन्यां परिणीयोच्चै-स्ततः प्रश्रेणिकः सुधीः ।
प्राप्तो राजगृहाख्यं च स्वपुरं प्रमदान्वितः ॥ ७ ॥
नाना भोगान्प्रभुञ्जानो यावत्संतिष्ठते प्रभुः ।
पुत्रं चिलातपुत्राख्यं प्रसूता तिलकावती ॥ ८ ॥
एकदा च नरेन्द्रेण पृष्टो नैमित्तिको महान् ।
अहो मे बहुपुत्राणां मध्ये को भाविभूपतिः ॥ ९ ॥
तत्समाकर्ण्य स प्राह सुधीर्नैमित्तिकाग्रणीः ।
सिंहासनसमारूढो भेरीं सन्ताडयन्मुदा ॥ १० ॥
क्षैरेयीं कुक्कुराणां च ददतो निजबुद्धितः ।
भुंक्ते तथाग्निदाहे च हस्तिसिंहासनादिकम् ॥ ११ ॥
छत्रं निःसारयत्येव यस्तु स स्यान्महीपतिः ।
तन्निशम्य ततो राजा परीक्षार्थं शुभे दिने ॥ १२ ॥
भेरीसिंहासनाभ्यर्णे दत्वा क्षैरेयिकाशनम् ।
सर्वराजकुमाराणां मुक्ताः पञ्चशतश्वकाः ॥ १३ ॥
तदा नष्टाः कुमारास्ते सर्वे कुक्कुरभीवशाः ।
श्रेणिकस्तु महाधीमान्सर्वपुत्रशिरोमणिः ॥ १४ ॥
क्षैरेयीभाजनान्युच्चै-धृत्वा स्वस्य समीपके ।
एकैकं कुक्कुराणां च मुञ्चंस्तद्भाजनं पुनः ॥ १५ ॥
स्वसिंहासनमारुह्य भेरीं संताडयंस्तथा ।
भुंक्ते स्म प्रौढधीः सार-क्षैरेयीमग्निदाहके ॥ १६ ॥

तथा सिंहासनं छत्रं हस्तिचामरयुग्मकम् ।
शीघ्रं निस्सारयामास भावितीर्थंकरः प्रभुः ॥ १७ ॥
ज्ञात्वा प्रश्रेणिकेनायं महाराजो भविष्यति ।
तदा शत्रुभयाच्छीघ्रं दत्वा दोषं प्रपञ्चतः ॥ १८ ॥
कुक्कुरोच्छिष्टकादिं च देशान्निर्घाटितः स च ।
अहो पुण्यवतां पुंसां को वा यत्नं करोति न ॥ १९ ॥
तदा गत्वा कुमारोसौ श्रेणिकः सुभटाग्रणीः ।
पुर्यां द्राविडदेशस्थ-काञ्च्यां सौख्येन संस्थितः ॥ २० ॥
प्रश्रेणिकस्तु भूनाथो भुक्त्वा भोगान्सुधार्मिकः ।
तस्मै चिलातपुत्राय दत्वा राज्यं महोत्सवैः ॥ २१ ॥
स्वयं वैराग्यतः स्वामी दीक्षां जैनेश्वरीं शुभाम् ।
समादाय मुनिर्जातो जगत्प्राणिहितंकरः ॥ २२ ॥
ततश्चिलातपुत्रश्च स्थित्वा राज्येपि मूढधीः ।
अन्यायेषु रतो गाढं हा कष्टं किमतः परम् ॥ २३ ॥
श्रेणिकस्तु समागत्य तदा राजगृहं पुरम् ।
देशान्निर्घाट्य तं शीघ्रं स्वयं राज्ये सुखं स्थितः ॥ २४ ॥
अहो राजाभवत्युच्चै-र्यः प्रजाप्रतिपालकः ।
नान्यो लोकद्वये स्वस्य कीर्त्तिलक्ष्मीविनाशकः ॥ २५ ॥
गत्वा चिलातपुत्रश्च महाटव्यां बलान्वितः ।
दुर्गं कृत्वा तथा देश-करं गृह्णाति निर्भयः ॥ २६ ॥
अथास्य विद्यते कोपि भर्तृमित्राख्यसत्सखा ।
तस्यापि भर्तृमित्रस्य मातुलो रुद्रदत्तवाक् ॥ २७ ॥

सुभद्रां स्वसुतां तस्मै भर्तृमित्राय याचिताम् ।
न ददाति ततश्चापि भर्तृमित्रस्य वाक्यतः ॥ २८ ॥
युक्तश्चिलातपुत्रोसौ भटैः पञ्चशतैर्द्रुतम् ।
गत्वा राजगृहं कोपा-द्विवाहस्नानकालके ॥ २९ ॥
तां छलेन समादाय निर्गतः क्रूरमानसः ।
तच्छ्रुत्वा श्रेणिको राजा ससैन्यः पृष्टतोगमत् ॥ ३० ॥
पलायितुमशक्तेन तेन दुष्कर्मकारिणा ।
सुभद्रा मारिता कन्या संजाता व्यन्तरी तदा ॥ ३१ ॥
शीघ्रं चिलातपुत्रेण नश्यता च स्वकर्मतः ।
वैभारपर्वते रम्ये मुनिपंचशताश्रितम् ॥ ३२ ॥
मुनीन्द्रं मुनिदत्ताख्यं दृष्ट्वा नत्वा सुभक्तितः ।
प्रोक्तं स्वामिंस्तपो देहि साधयामि निजं हितम् ॥ ३३ ॥
स च प्राह मुनिर्ज्ञानी जैनतत्वविदाम्वरः ।
सुधीः शीघ्रं समादाय जैनीं दीक्षां सुखप्रदाम् ॥ ३४ ॥
साधय त्वं निजं कार्यं तवायुर्दिवसाष्टकम् ।
ततश्चिलातपुत्रोसौ श्रुत्वा वाक्यं महामुनेः ॥ ३५ ॥
गृहीत्वा सुतपो जैनं संसाराम्भोधितारणम् ।
स्थितः प्रायोपयानाख्य-मरणे धीरमानसः ॥ ३६ ॥
श्रेणिकस्तु महाराज-स्तं विलोक्य तथास्थितम् ।
नत्वा प्रशस्य सद्भक्त्या पश्चात्प्राप्तो निजं पुरम् ॥ ३७ ॥
सुभद्रा व्यन्तरी सा च पूर्ववैरेण पापिनी ।
सोलिकारूपमादाय स्थित्वा तन्मस्तके तदा ॥ ३८ ॥

चञ्च्वा तल्लोचनद्वंद्वं सन्निष्काश्य प्रकष्टतः ।
पश्चादष्टदिनेषूच्चै-र्विकृत्य मधुमक्षिका ॥ ३९ ॥
चक्रे पीडां सुधीः सोपि निःस्पृहो निजविग्रहे ।
मृत्वा समाधिना स्वामी प्राप्तः सर्वार्थसिद्धिकाम् ॥ ४० ॥
स श्रीमान्सुभटाग्रणीर्गुणनिधिर्जित्वोपसर्गं दृढं
श्रीमज्जैनपदाब्जचिन्तनपरो देवेन्द्रवृन्दैः स्तुतः ।
संप्राप्तो निजपुण्यसंबलयुतः सर्वार्थसिद्धिं शुभां
दद्याच्चारुचिलातपुत्रसुमुनिर्भव्योत्र मे मङ्गलम् ॥ ४१ ॥

इति कथाकोशे महामण्डलेश्वर-श्रीश्रेणिक-सुत-चिलात-पुत्रस्याख्यानं समाप्तम् ।

७१—श्रीधन्यमुनेराख्यानम् ।

नमस्कृत्य जिनाधीशं सारधर्मोपदेशकम् ।
धन्यनाममुनेर्वच्मि चरित्रं शर्मदायकम् ॥ १ ॥
जम्बूद्वीपेत्र विख्याते पूते पूर्वविदेहके ।
वीतशोकपुरे राजा संजातोशोकनामभाक् ॥ २ ॥
धान्यगाहनवेलायां स राजा भूरिलोभतः ।
बन्धनं कारयत्येव बलीवर्दमुखेषु च ॥ ३ ॥
तथा महानसे पाकं कुर्वतीनां च योषिताम् ।
कारयित्वा स्तनेषूच्चै-र्बन्धनं कर्मबन्धनम् ॥ ४ ॥
तद्बालानां स्तनं पातुं न ददात्येव मूढधीः ।
अहो लोभेन मूढात्मा किं करोति न पातकम् ॥ ५ ॥

एकदा तस्य भूभर्त्तु-र्मुखे शिरसि चाभवत् ।
महारोगस्ततस्तस्य विनाशार्थं महौषधम् ॥ ६ ॥
पाचयित्वा समादाय भाजने भोजनाय च ।
यावत्संतिष्ठते राजा-ऽशोकस्तावच्छुभोदयात् ॥ ७ ॥
महारोगग्रहग्रस्तो मुनीन्द्रो भुवनोत्तमः ।
चर्याकाले समायातः पवित्रीकृतभूतलः ॥ ८ ॥
दृष्ट्वा तं सुतपोयुक्तं मुनिं परमनिस्पृहम् ।
यो मे रोगो मुनेरस्य स एव भवति ध्रुवम् ॥ ९ ॥
इति ज्ञात्वा महाभक्त्या नवपुण्यैः समन्वितम् ।
तस्मै तदौषधं दिव्यं पथ्यं चापि ददौ नृपः ॥ १० ॥
ततो द्वादशवर्षोत्थ-रोगस्तस्य महामुनेः ।
शीघ्रं नष्टो यथा मिथ्या-दृष्टिः सद्दृष्टिवाक्यतः ॥ ११ ॥
तत्पुण्येन नृपः सोपि क्षेत्रेऽत्र भरते शुभे ।
पुरे चामलकण्ठाख्ये निष्ठसेनो महीपतिः ॥ १२ ॥
नन्दिमत्यभिधा राज्ञी तयोः पुत्रोभवत्सुधीः ।
रूपलावण्यसत्पुण्य-मण्डितो धन्यनामकः ॥ १३ ॥
एकदा स्वगुणैः सार्द्धं वृद्धिं प्राप्य स धन्यकः ।
अरिष्टनेमितीर्थस्य पादमूले जगद्धिते ॥ १४ ॥
धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समार्चितम् ।
ज्ञात्वा स्वल्पतरं स्वायु-र्मुनिर्जातो विचक्षणः ॥ १५ ॥
पूर्वकर्मोदयाद्भिक्षा-मप्राप्तो धीरमानसः ।
उग्रोग्रं सुतपः कुर्वन्विहरंश्च महीतले ॥ १६ ॥

सौरीपुरीं समागत्य यमुनापूर्वसत्तटे ।
आतापनाख्ययोगेन संस्थितो मुनिनायकः ॥ १७ ॥
तदा पापर्द्धिकां गत्वा यमुनाचक्रं भूभुजा ।
पुनर्व्याघुटितेनैव पापिनाशकुनास्थया ॥ १८ ॥
स्वबाणैः पूरितः साधु-स्तदासौ धन्यनामभाक् ।
शुक्लध्यानप्रभावेन सिद्धिं प्राप्तो निरंजनः ॥ १९ ॥
अहो धीरत्वमत्युच्चैः सतां केनात्र वर्ण्यते ।
येनो घोरोपसर्गेपि शीघ्रं मुक्तिः समाप्यते ॥ २० ॥
धन्यो धन्यमुनीश्वरो भयहरो भव्यात्मनां तारको
देवेन्द्रादिसमर्चितो हितकरः श्रीमुक्तिकान्तावरः ।
आधिव्याधिसमस्तदोषनिकरं हत्वा सुखं शाश्वतं
कुर्यान्मे वरबोधसिन्धुरतुलश्चारित्रचूडामणिः ॥ २१ ॥

इति कथाकोशे धन्यमुनेराख्यानं समाप्तम् ।

७२–पञ्चशतमुनीनामाख्यानम् ।

पादपद्मद्वयं नत्वा जिनेन्द्रस्य शुभश्रिये ।
मुनिपंचशतानां तु चरित्रं श्रेयसे ब्रुवे ॥ १ ॥
दक्षिणाख्यपथे ख्याते देशे च भरताभिधे ।
कुंभकारकटे पूर्वे पत्तने सुचिरंतने ॥ २ ॥
राजाभूद्दण्डको राज्ञी सुव्रता रूपमण्डिता ।
बालकाख्योभवन्मंत्री पापी धर्मपराङ्मुखः ॥ ३ ॥

तत्रैकदा पुरे पंच-शतोत्कृष्टमुनीश्वराः ।
नाम्नाभिनन्दनाद्याम्ने समायाताश्च लीलया ॥ ४ ॥
खण्डकाख्यमुनीन्द्रेण स मंत्री बालकः कुधीः ।
स्याद्वादवाग्भरैर्वादे निर्जितो धर्मवर्जितः ॥ ५ ॥
ततस्तेन प्रदुष्टेन भंडको मुनिरूपभाक् ।
मंत्रिणा बालकेनोच्चैः प्रेषितः सुव्रतान्तिके ॥ ६ ॥
तया सार्द्धं ततश्चेष्टां स कुर्वन्पापमण्डितः ।
राज्ञः संदर्शितः पश्चा-त्पश्यतां भो महामते ॥ ७ ॥
एतेषां भक्तियुक्तस्त्वं मन्येहं तव कामिनीम् ।
दातुं समिच्छसि व्यक्तं किं करोत्येष ते मुनिः ॥ ८ ॥
इत्याकर्ण्य ततो राजा दण्डको मूढमानसः ।
यंत्रे संपीडयामास मुनीन्द्रान्दुष्टकोपतः ॥ ९ ॥
दुष्टात्मा दुर्गतेर्गामी जन्तुर्मिथ्यात्वमोहितः ।
किं पापं कुरुते नैव जन्मकोटिप्रकष्टदम् ॥ १० ॥
तदा ते मुनयो धीरा जैनतत्वविदाम्वराः ।
शुक्लध्यानप्रभावेन सिद्धिं प्रापुर्जगद्धिताम् ॥ ११ ॥
चञ्चत्सुवर्णगिरिराजमुनिश्चलास्ते
प्रध्वस्तकर्ममलसंगतयो मुनीन्द्राः ।
देवेन्द्रदानवनरेन्द्रसमर्चनीया
नित्यं भवन्तु भवशान्तिविधायिनो मे ॥ १२ ॥

इति कथाकोशे पञ्चशतमुनीनामाख्यानं समाप्तम् ।

७३–चाणक्याख्यानम् ।

नत्वा नमत्सुराधीशैः समर्चितपदद्वयम् ।
श्रीजिनेन्द्रं प्रवक्ष्यामि चाणक्यस्य कथानकम् ॥ १ ॥
पुरे पाटलिपुत्राख्ये नन्दो राजा बभूव च ।
मंत्रिणोस्य त्रयः काविः सुबन्धुः शकटालवाक् ॥ २ ॥
पुरोधा कपिलस्तस्य देविला प्राणवल्लभा ।
तयोश्चाणक्यनामाभू-त्पुत्रो वेदविचक्षणः ॥ ३ ॥
एकदा काविमंत्री च नन्दं प्राह महीपते ।
प्रत्यन्तवासिनो भूपाः समायातास्तवोपरि ॥ ४ ॥
राजा जगाद भो मंत्रिन्द्रव्यं दत्वा मदोद्धतान् ।
शत्रून्निवारय प्रौढां-स्तछ्रुत्वा तेन मंत्रिणा ॥ ५ ॥
द्रव्यं दत्वा यथायोग्यं शत्रवस्ते निवारिताः ।
विना मंत्रिजनैर्नैव राज्ञो राज्यस्थितिर्भवेत् ॥ ६ ॥
पृष्टे राज्ञैकदा भाण्डा-गारिको धनहेतवे ।
स च प्राह प्रभो सर्वं शत्रूणां काविराददौ ॥ ७ ॥
ततो रुष्टेन नन्देन स काविः सकुटुम्बकः ।
अन्धकूपे विनिक्षिप्तः संकटद्वारके तथा ॥ ८ ॥
तत्रैकैकं तदा भक्त-सरावं दिवसं प्रति ।
दीयते स्तोकपानीयं हा मित्रं कस्य भूपतिः ॥ ९ ॥
कुटुम्बं काविना प्रोक्तं सकुटुम्बस्य भूभुजः ।
यो मारणे क्षमः सोत्र गृह्णात्वेतच्च भोजनम् ॥ १० ॥

परिवारस्तदा प्राह त्वमेवं सुभटस्तराम् ।
स काविस्तुः ततः कूपे बिलं कृत्वा निजोचितम् ॥ ११ ॥
कुर्वाणो भोजनं तत्र त्रीणि वर्षाणि संस्थितः ।
कुटुम्बं च मृतं सर्वं कूपस्थं पापकर्मणा ॥ १२ ॥
प्रत्यन्तवासिनां क्षोभे स्मृत्वा नन्देन कूपतः ।
काविमंत्री स निस्सार्य पुनर्मंत्रिपदे धृतः ॥ १३ ॥
ततोमौ नन्दभूभर्तु-र्वंशनाशाय वह्निवत् ।
नरं गवेषयन्नित्यं काविर्मंत्री दुराशयः ॥ १४ ॥
अटव्यामेकदा वीक्ष्य खनन्तं दर्भसूचिकाम् ।
तं चाणक्यं प्रति प्राह किमर्थं खन्यते त्वया ॥ १५ ॥
चाणक्येन ततः प्रोक्तं विद्धोहमनयेति च ।
काविस्तु पूर्यतेवो च-त्क्षमां कुरु महामते ॥ १६ ॥
किमत्र खननेनोच्चै-र्यदा मूलं तथा स्थितम् ।
किं शत्रोर्मारणेनात्र गृहीतं चेन्न मस्तकम् ॥ १७ ॥
तद्वाक्यं काविना श्रुत्वा स्वचित्ते चेति चिन्तितम् ।
अयं नन्दकुलोच्छेदे योग्यो भाति न संशयः ॥ १८ ॥
चाणक्यस्य प्रिया प्राह यशस्वत्यभिधा ततः ।
नन्दो राजा ददात्येव कपिलां गोमतल्लिकाम् ॥ १९ ॥
तां त्वं गृहाण भो नाथ गृह्णाम्येवं च सोवदत् ।
तं सम्बन्धं समाकर्ण्य स काविस्तु नृपं जगौ ॥ २० ॥
दीयते भो नराधीश कपिलानां सहस्रकम् ।
ब्राह्मणेभ्यो भवद्भिस्तु भूरिवित्तसमन्वितैः ॥ २१ ॥

अहो दुष्टस्य दुष्टत्वं लक्ष्यते केन भूतले ।
चित्तं चान्यद्वचश्चान्य-त्कायो मायामयो यतः ॥ २२ ॥
नन्दराजेन संप्रोक्तं ब्राह्मणानानय द्रुतम् ।
ददामि कपिलास्तेभ्य-स्ततोसौ मंत्रिशात्रुकः ॥ २३ ॥
चाणक्यं तं समानीय पुरोहितसुतं मुदा ।
अग्रासने शुभे कात्विः स्थापयामास दुष्टधीः ॥ २४ ॥
चाणक्येन तदा तेन स्वकुंडीभिर्बहूनि च ।
स्वीकृतान्यासनान्युच्चै-र्महातृष्णातुरेण च ॥ २५ ॥
तं तथास्थितमालोक्य कात्वि प्राह प्रपञ्चतः ।
अहो भट्ट नृपो वक्ति भूरिविप्राः समागताः ॥ २६ ॥
मुञ्चैकमासनं देव मुक्तं तेनैकमासनम् ।
एवं सर्वासनान्युच्चै-र्मोचयित्वा च मंत्रिणा ॥ २७ ॥
पुनः प्रोक्तं महाभट्ट किं करोम्यहमल्पकः ।
नन्दो विवेकशून्यात्मा भणत्येवं महीपतिः ॥ २८ ॥
अग्रासनं त्यज त्वं न दत्तमन्यस्य वर्त्तते ।
गच्छ त्वं स इति प्रोक्त्वा गले धृत्वा बहिः कृतः॥ २९ ॥
चाणक्योसौ ततः कोपा-न्नन्दवंशक्षयेच्छया ।
यो राज्यं नन्दभूपस्य समिच्छति महाभटः ॥ ३० ॥
गृहीतुं स समायातु भणित्वेति विनिर्गतः ।
एकस्तत्पृष्टतो लग्न-स्तं गृहीत्वा प्रवेगतः ॥ ३१ ॥
प्रत्यन्तवासिनां राज्ञां मिलित्वा क्रूरमानसः ।
घातुकेन समागत्य हत्वा नन्दं महीपतिम् ॥ ३२ ॥

तद्राज्यं च समादाय स्वयं राजा बभूव च ।
अहो मंत्रिप्रकोपेन भूपाः के न क्षयं गताः ॥ ३३ ॥
दीर्घकालं ततो राज्यं कृत्वा चाणक्यभूपतिः ।
महीधरमुनेः पार्श्वे धर्ममाकर्ण्य शर्मदम् ॥ ३४ ॥
मुनिर्भूत्वा सुधीः पञ्च-शतैः शिष्यैः समन्वितः ।
कुर्वन्विहारमत्युच्चै-र्भव्यान्सम्बोधयन्मुदा ॥ ३५ ॥
दक्षिणापथमागत्य जैनतत्वविचक्षणः ।
वनवासमहादेशे क्रौंचनामपुरे सुधीः ॥ ३६ ॥
तत्र पश्चिमभागस्थे गोष्ठे संन्यासपूर्वकम् ।
प्रायोपयानमरणे संस्थितो मुनिभिर्युतः ॥ ३७ ॥
यो नन्दस्य सुबन्ध्वाख्यो मंत्री पापपरायणः ।
नन्दे मृते महाक्रोधं कुधीश्चाणक्यके वहन् ॥ ३८ ॥
सोपि क्रौंचपुरी प्राप्तः सुमित्राख्यमहीपतेः ।
पार्श्वे स्थितस्तदा राजा सुमित्रो जिनधर्मभाक् ॥ ३९ ॥
भक्त्या गोष्ठं समागत्य नत्वा तान्मुनिसत्तमान् ।
अष्टधा सुमहत्पूजां कृत्वा श्रुत्वा गृहं गतः ॥ ४० ॥
पापी सुबन्धुनामा च मंत्री मिथ्यात्वदूषितः ।
समीपे तन्मुनीन्द्राणां कारीषाग्निं कुधीर्ददौ ॥ ४१ ॥
तदा ते मुनयो धीराः शुक्लध्यानेन संस्थिताः ।
हत्वा कर्माणि निःशेषं प्राप्ताः सिद्धिं जगद्धिताम् ॥ ४२ ॥
यत्रानन्तसुखं समस्तजगतां पूज्यं व्यथावर्जितं
रागद्वेषमदप्रमादरहितं संप्राप्य सिद्धालयम् ।

सर्वे ते मुनयो विशुद्धचरणास्तिष्ठन्ति ये नित्यशः
कुर्युर्मेपि सुखं विमुक्तिजनितं बोधाब्धयो निर्मलम् ॥ ४३ ॥
इति कथाकोशे चाणक्यमुनेराख्यानं समाप्तम् ।

७४–वृषभसेनस्याख्यानम् ।

श्रीजिनं भारतीं नत्वा श्रुताब्धिं मुनिसत्तमम् ।
वक्ष्ये वृषभसेनस्य चरित्रं भुवनोत्तमम् ॥ १ ॥
दक्षिणादिपथे ख्याते कुणालनगरे वरे ।
राजा वैश्रवणो धीमान्सद्दृष्टिर्जिनभक्तिभाक् ॥ २ ॥
रिष्टामात्योभवन्मंत्री पापी मिथ्यात्वमोहितः ।
युक्तं चन्दनवृक्षस्य पार्श्वे दुष्टोहिको भवेत् ॥ ३ ॥
एकदा भूरिसंघेन मण्डितो मुनिनायकः ।
सुधीर्वृषभसेनाख्य-स्तत्रायातो जगद्धितः ॥ ४ ॥
श्रुत्वा वैश्रवणो भूपो मुनीनामागमं शुभम् ।
लसद्विभूतिसंयुक्तो भक्तिमाञ्छुद्धमानसः ॥ ५ ॥
सार्द्धं सद्भव्यसन्दोहैः समागत्य मुनीश्वरान् ।
त्रिः परीत्य महाप्रीत्या नमस्कृत्य पुनः पुनः ॥ ६ ॥
समभ्यर्च्य जलाद्यैश्च स्तुत्वा स्तोत्रैः सुखप्रदैः ।
धर्मं श्रुत्वा जिनेन्द्रोक्तं प्रीतो राजा जगद्धितम् ॥ ७ ॥
जैनधर्मं जगत्सारं सम्पदाशर्मदायकम् ।
समाकर्ण्य सुखी न स्यात्को वा चेद्भाविसद्गतिः ॥ ८ ॥

रिष्टामात्यस्तदा मंत्री वादं कृत्वा मदोद्धतः ।
मानभङ्गं तरां प्राप्तो मुनीन्द्रवचनोत्करैः ॥ ९ ॥
ततो रात्रौ समागत्य प्रच्छन्नं मानभङ्गतः ।
पापी प्रज्वालयामास वह्निना वसतिं सताम् ॥ १० ॥
स्वयं चापल्यमाधत्ते स्वयं कुप्यति साधुषु ।
स्वयं पापं करोत्येव दुर्जनस्येति चेष्टितम् ॥ ११ ॥
तदा ते मुनयः सर्वे शुक्लध्यानेन धीधनाः ।
अनुभूयोपसर्गं तं प्राप्ताः स्वर्गापवर्गकम् ॥ १२ ॥
विघ्नं करोतु दुष्टात्मा पापी दुर्गतिकारणम् ।
सन्तः सद्धर्ममेवाभि-र्लभन्ते सौख्यमद्भुतम् ॥ १३ ॥
सन्तस्ते मुनिसत्तमाः शुचितराः सद्ध्यानशैलाश्रिताः
श्रीमत्सारजिनेन्द्रतत्वचतुरा जित्वोपसर्गं दृढम् ।
संप्राप्ताः स्वविशुद्धभावभरतः स्वर्गापवर्गं शुभं
देवेन्द्रादिसमर्चिताः शुभकराः कुर्युः सतां मंगलम् ॥ १४ ॥

इति कथाकोशे श्रीवृषसेनमुनेराख्यानं समाप्तम् ।

७५–शालिसिक्थमत्स्यस्य मनोदोषाख्यानम् ।

स्वयंभुवं नमस्कृत्य जिनेन्द्रं केवलेक्षणम् ।
संबोधाय सतां वच्मि मनोदोषस्य लक्षणम् ॥ १ ॥
स्वंभूरमणे ख्याते समुद्रे प्रान्तवर्त्तिनि ।
सहस्रयोजनैर्दीर्घो विस्तारे च तदर्द्धकः ॥ २ ॥
सार्द्धद्वयशतोत्सेधो महामत्स्यः प्रवर्त्तते ।
तस्य कर्णे तथा शालि-सिक्थमात्रो लघुः कुधीः ॥ ३ ॥

शालिसिक्थाख्यमत्स्योस्ति तत्कर्णे मलभक्षकः ।
महामत्स्यस्य तस्यैव भुक्त्वा जन्तूननेकशः ॥ ४ ॥
मुखच्छिद्रं प्रसार्योच्चै-र्निद्रां षण्मासंश्रिताम् ।
कुर्वाणस्य तदा सोपि लघुमत्स्यो दुराशयः ॥ ५ ॥
दृष्ट्वा मुखोरुदंष्ट्रान्तः संप्रविश्य प्रगच्छतः ।
मत्स्यकच्छपकादींश्च योजनादिप्रदीर्घकान् ॥ ६ ॥
स्वचित्ते चिन्तयत्येवं दिनं प्रति सुपापधीः ।
मूर्खोयं स्वमुखायातां-स्त्यजत्येतांश्च जन्तुकान् ॥ ७ ॥
शक्तिर्यदीदृशी मेस्ति तदैको न प्रगच्छति ।
हा कष्टं दुष्टचित्तस्य चेष्टितं पापकारणम् ॥ ८ ॥
स मृत्वा चेतसः स्वस्य महापापोदयात्ततः ।
कालेन सप्तमं नरकं प्राप्तः स कष्टराशिदम् ॥ ९ ॥
अहो पुण्यस्य पापस्य कारणं प्रायशो मनः ।
तस्मान्नित्यं सतां कार्यं चित्तं पूतं जिनश्रुतेः ॥ १० ॥
शास्त्रं विना न जानाति प्राणी किञ्चिच्छुभाशुभम् ।
ततः सद्भिः सदा कार्यं सारजैन श्रुतिश्रुतम् ॥ ११ ॥
श्रीमज्जैनवचः प्रदीपनिकरं मिथ्यातमोनाशकं
देवेन्द्रादिसमस्तभव्यनिवहैर्भक्त्या समभ्यर्चितम् ।
भो भव्या भवभूरिदुःखदलनं स्वर्मोक्षमार्गप्रदं
नित्यं चेतसि चिन्तयन्तु नितरां शान्त्यै भवन्तः श्रियै ॥ १२ ॥

इति कथाकोशे शालिसिक्थमत्स्यस्य मनोदोषाख्यानं समाप्तम् ।

७६–सुभौमचक्रवर्त्तिन आख्यानम्।

इन्द्रनागेन्द्रचन्द्रार्क-समर्चितपदद्वयम्।
नत्वा जिनं प्रवक्ष्येहं सुभौमेशस्य वृत्तकम्॥ १॥
ईर्ष्यावति पुरे राजा कार्त्तवीर्यो गुणोज्वलः।
रेवती कामिनी तस्य तयोः पुत्रः सुभौमवाक्॥ २॥
अष्टमश्चक्रवर्त्ती च तस्य पाकविधायकः।
जातो विजयसेनाख्यो नाना भोजनयुक्तिवित्॥ ३॥
एकदा तेन भूपाय तस्मै सत्पायसाशनम्।
दत्तमुष्णं प्रभोक्तुं च दग्धोसौ तेन चक्रभृत्॥ ४॥
तत्पायसं प्रकोपेन ततस्तेनैव चक्रिणा।
क्षिप्त्वा तन्मस्तके शीघ्रं मारितः सूपकारकः॥ ५॥
मृत्वा विजयसेनोसौ भूत्वा क्षारसमुद्रके।
ततो व्यन्तरदेवश्च ज्ञात्वा पूर्वप्रघट्टकम्॥ ६॥
कोपात्तापसरूपेण सुभौमस्यास्य चक्रिणः।
नाना मृष्टफलान्युच्चैः समानीय प्रदत्तवान्॥ ७॥
तत्फलास्वादनात्तेन सम्प्रोक्तं चक्रवर्त्तिना।
कुत्र सन्ति फलानीति महामृष्टानि तापस॥ ८॥
ततस्तेन प्रपंचेन नीत्वा तं फललम्पटम्।
समुद्रे प्रकटीभूय प्रोक्तमित्थं च शत्रुणा॥ ९॥
रे रे दुष्ट ममप्राण-नाशकस्त्वं मदोद्धतः।
क्व यासि त्वमिदानीं च हन्यतेत्र मया ध्रुवम्॥ १०॥

यदा पञ्चनमस्कारां-ल्लिखित्वात्र जले द्रुतम् ।
पादेन स्पृशसि व्यक्तं तदा त्वं मुच्यते मया ॥ ११ ॥
तदासौ चक्रवर्त्ती च कृत्वा तत्कर्मनिन्दितम् ।
कुधीः प्राणक्षयाच्छीघ्रं सप्तमं नरकं गतः ॥ १२ ॥
धिङ्मूढत्वमहो लोके लंपटत्वं हि धिक्तराम् ।
अष्टमश्चक्रभृच्चापि यतोसौ कुगतिं ययौ ॥ १३ ॥
विश्वासेन विहीनोसौ धर्मे श्रीमज्जिनेशिनाम् ।
भवेद्दुर्गतिभाक्प्राणी यथासौ चक्रवर्त्तिकः ॥ १४ ॥
धन्यास्ते जगतां पूज्या येषां चित्ते जिनेशिनः ।
नित्यं वाक्यामृतानि स्युः शर्मकारीणि देहिनाम् ॥ १५ ॥
सम्यक्त्वं त्रिजगद्धितं भवहरं शक्रादिभिः पूजितं
नाना शर्मविधायकं गुणकरं स्वर्गापवर्गप्रदम् ।
तद्भक्त्याष्टविधं जिनेन्द्रकथितं श्रित्वा च मुक्तिश्रिये
चित्ते भव्यमतल्लिका गतभयं संभावयन्तु प्रियम् ॥१६॥

इति कथाकोशे सुभौमचक्रवर्त्तिन आख्यानं समाप्तम् ।

७७–शुभनृपतेराख्यानम् ।

प्रणम्य परमानन्दं श्रीजिनेन्द्रजगद्धितम् ।
शुभाख्यभूपतेर्वच्मि चरित्रं विरतिप्रदम् ॥ १ ॥
मिथिलानगरे राजा शुभो राज्ञी मनोरमा ।
तयोर्देवरतिः पुत्रः संजातः सुगुणाकरः ॥ २ ॥

एकदा नगरे तत्र मुनीन्द्रो ज्ञानसंयुतः ।
नाम्ना देवगुरुर्धीमान्समायातः सुसंवभाक् ॥ ३ ॥
तदा महीपतिः सोपि शुभो भव्यजनैः सह ।
नत्वा मुनिं जगत्पूज्यं धर्ममाकर्ण्य पृष्टवान् ॥ ४ ॥
अहो मुने क्व मे जन्म भविष्यति विचक्षण ।
तच्छ्रुत्वा स मुनिः प्राह सुधीर्देवगुरुः स्फुटम् ॥ ५ ॥
निजवर्चो गृहे राजंस्त्वं भविष्यसि पापतः ।
महाकृमिर्मुनीन्द्राणां मानसे न भयं क्वचित् ॥ ६ ॥
नगर्याश्च प्रवेशे ते विट्प्रवेशो मुखे ध्रुवम् ।
छत्रभंगस्तथा विद्धि साभिज्ञानमिति स्फुटम् ॥ ७ ॥
सप्तमे च दिने भूप विद्युत्पातेन ते क्षयः ।
भविष्यति भवेदत्र प्राणिनां पापतो न किम् ॥ ८ ॥
पुरं प्रविशतश्चापि ततस्तस्य महीपतेः ।
रथाश्वचरणोद्घातान्मुखे गूथः प्रविष्टवान् ॥ ९ ॥
महावायुप्रवेगेन छत्रभंगोभवत्तदा ।
दुष्टपापोदये जन्तोः किं किं न स्याद्विरूपकम् ॥ १० ॥
सुतं प्राह ततो भूपः पुत्र वर्चोगृहेऽहकम् ।
पञ्चवर्णः कृमिः पापाद्भविष्यामि तदा त्वया ॥ ११ ॥
स हन्तव्य इति प्रोक्त्वा भीत्वा विद्युत्प्रपाततः ।
कारयित्वा महालोहमंजूषां तां प्रविश्य च ॥ १२ ॥
तस्थौ गंगाह्रदे यावत्तावत्सप्तमवासरे ।
सा मंजूषा स्वपापेन मत्स्येनोच्छादिता द्रुतम् ॥ १३ ॥

तस्मिन्नेव क्षणे कष्टं विद्युत्पातेन स प्रभुः ।
मृत्वा वर्चोगृहे जातः कृमिजन्तुः स्वपापतः ॥ १४ ॥
स देवरतिपुत्रेण मार्यमाणो पि विट्चयम् ।
प्रणश्य गतवानित्थं भुंक्ते जन्तुः स्वकर्मकम् ॥ १५ ॥
तदा देवरतेर्वाक्या-च्छ्रुत्वा तद्वृत्तकं जनाः ।
भीत्वा संसारचेष्टाया जिनधर्मे तरां रताः ॥ १६ ॥
सोपि देवरतिर्धीमान्महावैराग्यभावतः ।
विधाय संसृतेनिन्दां मुनिर्जातो विचक्षणः ॥ १७ ॥
सकलभुवनसारं दत्तसंसारपारं
दुरितशतनिवारं यस्य वाक्यं सुतारम् ।
स सृजतु जिनदेवो देवदेवेन्द्रवन्द्यो
निजचरणसुसेवां मुक्तिपर्यन्तमुच्चैः ॥ १८ ॥
इति कथाकोशे शुभनृपस्याख्यानं समाप्तम् ।

७८—सुदृष्टेराख्यानम् ।

नत्वा जगत्त्रयाधीशैः पूजितं श्रीजिनेश्वरम् ।
वक्ष्ये सुदृष्टिसन्नाम-रत्नविज्ञानिवृत्तकम् ॥ १ ॥
उज्जयिन्यां महाराजः प्रजापालः प्रजाहितः ।
श्रीमज्जिनेन्द्रपादाब्ज-सेवनैकमधुव्रतः ॥ २ ॥
राज्ञी च सुप्रभा तस्य सती सद्रूपमण्डिता ।
तदेव भुवने भाति रूपं यच्छीलसंयुतम् ॥ ३ ॥

तत्रैव पत्तने जातो रत्नविज्ञानिके महान् ।
सुदृष्टिर्नामतस्तस्य भार्याभूद्विमला कुधीः ॥ ४ ॥
वक्राख्यो दुष्टधीस्तस्या गृहे छात्रः प्रवर्त्तते ।
तेन सार्द्धं दुराचारं सा करोति स्म पापिना ॥ ५ ॥
एकदा विमलायाश्च वाक्यतः सोपि वक्रकः ।
सुदृष्टिं मारयामास कुर्वन्तं कामसेवनम् ॥ ६ ॥
स्ववीर्येण समं तत्र सुदृष्टिः कर्मयोगतः ।
मृत्वासौ विमलागर्भे पुत्रोभूत्कतिचिद्दिनैः ॥ ७ ॥
अहो संसारिणो जीवाः स्वकर्मवशवर्त्तिनः ।
नाना रूपं प्रयान्त्युच्चै-र्नटाचार्यो यथा भुवि ॥ ८ ॥
अथैकदा महोद्याने चैत्रमासे मनोहरे ।
सुप्रभाया महाराज्ञ्याः क्रीडन्त्या भूभुजा समम् ॥ ९ ॥
कण्ठस्थितो महाहारो नाम्ना क्रीडाविलासकः ।
त्रुटितः प्रोल्लसत्कान्ति-मण्डितो रचनान्वितः ॥ १० ॥
केनापि स्वर्णकारेण न हारो रचितस्तथा ।
सारपुण्यं विना केन सद्विज्ञानं हि लभ्यते ॥ ११ ॥
तं हारं च समालोक्य तदा स विमलासुतः ।
भूत्वा जातिस्मरो धीमान्रचयामास पूर्ववत् ॥ १२ ॥
ज्ञानविज्ञानसद्दानं पूजनं श्रीजिनेशिनाम् ।
पूर्वाभ्यासेन जन्तूनां समायाति स्वपुण्यतः ॥ १३ ॥
प्रजापालो नृपः प्राह तदा सन्तुष्टमानसः ।
सुदृष्टेर्निर्मितो हारः कथं भो रचितस्त्वया ॥ १४ ॥

तच्छ्रुत्वा स जगादेवं भो नरेन्द्र महामते ।
अहमेव भवाम्यत्र सुदृष्टिः परमार्थतः ॥ १५ ॥
पूर्ववृत्तान्तमाकर्ण्य स राजा जैनतत्ववित् ।
ज्ञात्वा संसारवैचित्र्यं मुनिर्जातो गुणोज्वलः ॥ १६ ॥
त्रिधा वैराग्यमासाद्य सोपि श्रीविमलासुतः ।
दीक्षामादाय जैनेन्द्रीं स्वर्गमोक्षसुखप्रदाम् ॥ १७ ॥
मुनिर्भूत्वा विशुद्धात्मा तपः कुर्वन्मनोहरम् ।
भव्यान्सम्बोधयन्नुच्चै-विहरंश्च महीतले ॥ १८ ॥
सौरीपुरोत्तरे भागे यमुनाया लसत्तटे ।
शुक्लध्यानेन कर्मारि-लोकालोकप्रकाशकम् ॥ १९ ॥
केवलज्ञानमुत्पाद्य भूत्वा त्रैलोक्यपूजितः ।
मुक्तिं संप्राप्तवान्स्वामी सोस्माकं शान्तयेस्तु वै ॥ २० ॥
स श्रीमान्भवसिन्धुतारणपरः सत्केवलज्ञानभाक्
कर्मारातिविनाशकाच्छिवपतिर्देवेन्द्रवृन्दार्चितः ।
लोकालोकविलोकनैकचतुरः स्वर्गापवर्गप्रदो
भूयान्मे भवतां च पूजितपदः सच्छ्रेयसे श्रीजिनः ॥२१॥

इति कथाकोशे सुदृष्टेराख्यानं समाप्तम् ।

७९—धर्मसिंहमुनेराख्यानम् ।

सर्वदेवेन्द्रचन्द्राद्यै-र्वन्दितं श्रीजिनेशिनम् ।
नत्वा श्रुताब्धिमासं च धर्मसिंहकथां ब्रुवे ॥ १ ॥
दक्षिणादिपथे ख्याते कौशलादिगिरौ पुरे ।
वीरसेनो महीनाथो राज्ञी वीरमती सती ॥ २ ॥
चन्द्रभूतिस्तयोः पुत्रश्चन्द्रश्रीश्च सुताभवत् ।
रूपलावण्यसौभाग्य-मण्डिता यौवनाश्रिता ॥ ३ ॥
कौशलाख्ये तथा देशे पुरे कौशलनामनि ।
धर्मसिंहो महाराज-स्तां कन्यां परिणीतवान् ॥ ४ ॥
तया सार्द्धं महाभोगान्स भुञ्जानः स्वपुण्यतः ।
दानपूजादिसत्कर्म-तत्परः सुचिरं स्थितः ॥ ५ ॥
एकदा स महीनाथो धर्मसिंहो विशुद्धधीः ।
नत्वा दमधराचार्यं मुनीन्द्रं सत्तपोनिधिम् ॥ ६ ॥
धर्ममाकर्ण्य जैनेन्द्रं सुरेन्द्राद्यैः समार्चितम् ।
त्रिधा वैराग्यमासाद्य मुनिर्जातो गुणोज्वलः ॥ ७ ॥
चन्द्रश्रीभगिनीं वीक्ष्य दुःखितां चन्द्रभूतिना ।
हठादसौ समानीय तस्याश्चैव समर्पितः ॥ ८ ॥
गत्वा सोपि पुनर्दीक्षां समादाय प्रवेगतः ।
मुनिर्भूत्वा महाघोरं करोति स्म सुधीस्तपः ॥ ९ ॥
तथैकदा समालोक्य चन्द्रभूतिं दुराशयम् ।
आगच्छन्तं मुनीन्द्रोसौ धर्मसिंहो गुणाकरः ॥ १० ॥

पुनर्मेसौ तपोभङ्गं कारयिष्यति मानसे ।
सं विचार्य तदा शीघ्रं व्रतरक्षणहेतवे ॥ ११ ॥
संप्रविश्य विशुद्धात्मा मृतहस्तिकलेवरम् ।
संन्यासेन ततो मृत्वा स्वर्गलोकं सुधीर्ययौ ॥ १२ ॥
अहो भव्यैः प्रकर्त्तव्यं कष्टेपि व्रतरक्षणम् ।
येन सौख्यं भवेदुच्चैः स्वर्गमोक्षादिसंभवम् ॥ १३ ॥
श्रीमज्जैनविशुद्धधर्मरसिकः श्रीधर्मसिंहो मुनिः
कृत्वा सारतपो जिनेन्द्रगदितं स्वर्गापवर्गप्रदम् ।
प्राप्तः स्वर्गसुखं प्रसिद्धमहिमा तत्पुण्यतो निर्मलं
स श्रीमान्गुणरत्नरंजितमतिः कुर्याच्च मे मंगलम् ॥ १४ ॥

इति कथाकोशे धर्मसिंहमुनेराख्यानं समाप्तम् ।

८०–वृषभसेनस्याख्यानम् ।

नत्वा जिनं जगत्पूज्यं स्वर्गमोक्षसुखप्रदम् ।
वक्ष्ये वृषभसेनस्य सच्चरित्रं सतामिदम् ॥ १ ॥
पुरे पाटलिपुत्राख्ये श्रेष्ठी वृषभदत्तवाक् ।
धनैर्धान्यैश्च सम्पूर्णः पूर्वपुण्येन शुद्धधीः ॥ २ ॥
भार्याभूद्वृषभश्रीश्च पुत्रो वृषभसेनकः ।
श्रीजिनेन्द्र पदाम्भोज-महासेवाविधायकः ॥ ३ ॥
तन्मातुलो धनपतिः श्रीकान्ताकामिनीपतिः ।
तयोः सद्रूपसंयुक्ता धनश्रीश्चारुकन्यका ॥ ४ ॥

तां श्रीवृषभसेनोसौ परिणीय महोत्सवैः ।
भुञ्जानो विविधान्भोगान्सुधीः सौख्येन संस्थितः ॥ ५ ॥
एकदा दमधरस्य मुनेः पार्श्वे सुभाक्तितः ।
श्रुत्वा धर्मं जिनेन्द्रोक्तं मुनिः शीघ्रं बभूव च ॥ ६ ॥
धनश्री रोदनं चक्रे ततोसौ मातुलेन च ।
गृहमानीय कष्टेन कारितो व्रतखण्डनम् ॥ ७ ॥
अहो मोहयुतो जन्तुः कार्याकार्यं न पश्यति ।
मत्तवत्कुरुते कर्म-भूरिपापविधायकम् ॥ ८ ॥
स श्रीवृषभसेनस्तु कारागारे यथा नरः ।
गृहे स्थित्वा कियत्कालं संजातश्च मुनिः सुधीः ॥ ९ ॥
पुनस्तं च समानीय प्रपंचेन स मातुलः ।
गृहे शृंखलया पापी स्थापयामास कष्टतः ॥ १० ॥
पुनर्मा व्रतसच्छैला-त्पातायिष्यति मानसे ।
संविचार्येति संन्यासं गृहीत्वा मुनिसत्तमः ॥ ११ ॥
मृत्वा समाधिना स्वर्गं संप्राप्तो निजपुण्यतः ।
दुर्जनैः पीडितश्चापि सज्जनो नाशुभे रतः ॥ १२ ॥
भवतु दुर्जनको विपदाप्रदो
विशदबुद्धिरसौ सुजनः पुनः ।
जिनपतेः पदपद्मसुसेवना--
द्भवति शर्मपतिर्निजपुण्यतः ॥ १३ ॥

इति कथाकोशे श्रीवृषभसेनाख्यानं समाप्तम् ।

८१–जयसेननृपस्याख्यानम्।

सारलक्ष्मीप्रदं नत्वा जिनेन्द्रं मुक्तिनायकम् ।
वक्ष्ये श्रीजयसेनस्य भूपतेः सत्कथानकम् ॥ १ ॥
सावस्तीपत्तने राजा जयसेनोभवत्पुरा ।
वीरसेना महाराज्ञी वीरसेनः सुतस्तयोः ॥ २ ॥
वन्दकः शिवगुप्ताख्यो निन्दकः पललम्पटः ।
सोपि राज्ञो गुरुर्जातो धिङ्मिथ्यात्वमशर्मकम् ॥ ३ ॥
एकदा नगरे तत्र मुनिवृन्दसमन्वितः ।
समायातो मुनीन्द्रस्तु यत्यादिवृषभः सुधीः ॥ ४ ॥
तत्पार्श्वे पुण्ययोगेन भव्यैः संघैः प्रमण्डितः ।
धर्ममाकर्ण्य जैनेन्द्रं भूपोभूच्छ्रावकोत्तमः ॥ ५ ॥
ततस्तेन महाभक्त्या जयसेनेन भूभुजा ।
जिनेन्द्रभवनैः सर्वं मण्डितं निजमण्डलम् ॥ ६ ॥
तदा स दुर्जनः पापी बुद्धकः शिवगुप्तकः ।
तद्भूपमारणोपायं चिन्तयंश्चेतसि क्रुधा ॥ ७ ॥
पुरीं च पृथिवीं गत्वा राजानं बौद्धधार्मिकम् ।
सुमत्याख्यं जगौ सर्वं जयसेनप्रचेष्टितम् ॥ ८ ॥
ततोसौ सुमतिर्लेखं प्रेषयामास तं प्रति ।
विरूपकं त्वया चक्रे बुद्धधर्मं गृहाण च ॥ ९ ॥
तेनोक्तं जयसेनेन जैनधर्मो जगद्धितः ।
निश्चयान्निश्चलो मेस्ति किमन्यैः पापकारणैः ॥ १० ॥

ज्ञातश्रीजैनसद्धर्मः प्राणी किं केन मुह्यति ।
वायुना महता चापि चाल्यते किं सुराचलः ॥ ११ ॥
रुष्टेन प्रेषितौ तेन सुमत्याख्येन दुर्भटौ ।
मारणार्थं समागत्य सावस्त्यां तौ च वेगतः ॥ १२ ॥
स्थित्वा दुष्टौ कियत्काल-मवकाशं विना ततः ।
पश्चादागत्य तं भूप-मूचतुर्निजवृत्तकम् ॥ १३ ॥
सुमतिश्च ततः प्राह पापात्मा सेवकान्प्रति ।
अस्ति कोपि भटो यस्तु जयसेनं प्रहन्ति च ॥ १४ ॥
तन्निशम्य हिमाराख्यो राजपुत्रो दुराशयः ।
अहं तं मारयाम्युच्चै-रित्युक्त्वा पापपण्डितः ॥ १५ ॥
सावस्तीनगरीं गत्वा यत्यादिवृषभस्य सः ।
मुनेः पार्श्वे प्रपंचेन मुनि-र्भूत्वा कुधीः स्थितः ॥ १६ ॥
एकदा जयसेनोसौ राजा सद्धर्मवत्सलः ।
जिनालये मुनिं नत्वा भूत्वा लोकं बहिः पुनः ॥ १७ ॥
पादमूले मुनेः स्थित्वा कृत्वा किंचित्प्रजल्पनम् ।
यावत्सुधीर्नमस्कारं गमनाय करोति च ॥ १८ ॥
बौद्धो हिमारकः सोपि हत्वा तं जयसेनकम् ।
नष्टः शीघ्रं महानिन्द्यो लोके बुद्धाश्रितो जनः ॥ १९ ॥
तमालोक्य मुनिः सोपि यत्यादिवृषभः सुधीः ।
दर्शनोडाहनाशाय लिखित्वा भित्तिभागके ॥ २० ॥
नृपो हिमारकेणैव मारितः पापकर्मणा ।
इति स्वयं विदार्योच्चै-रसिधेनुकयोदरम् ॥ २१ ॥

संन्यासं च समादाय निश्चलो मेरुवत्तराम् ।
मृत्वा स्वर्गालयं प्राप्य देवो जातो गुणोज्वलः ॥ २२ ॥
वीरसेनकुमारो यो जयसेनसुतस्तदा ।
दृष्ट्वा तौ मरणं प्राप्तौ भित्तौ वीक्ष्याक्षराणि च ॥ २३ ॥
प्रशंसां सुतरां कृत्वा मुनीन्द्रस्य विचक्षणः ।
धर्मे श्रीमज्जिनेन्द्रोक्ते संजातो तीव्रनिश्चलः ॥ २४ ॥
दुष्टात्मा कुरुते दोषं धर्मे श्रीमज्जिनेशिनाम् ।
स स्वभावेन निर्दोषो निरभ्रो भास्करो यथा ॥ २५ ॥
यः श्रीदेवनिकायभूपतिशतैर्नागेन्द्रसत्खेचरैः
पूज्यो भक्तिभरेण शर्मनिलयो धर्मो जिनेन्द्रोदितः ।
नाना दुःखविनाशको भवहरः स्वर्गापवर्गप्रदः
स श्रीमान्भवतां जगत्त्रयहितो दद्याच्छुभं मङ्गलम् ॥२६॥

इति कथाकोशे जयसेननृपस्याख्यानं समाप्तम् ।

८२–शकटालमुनेराख्यानम्

नत्वा पादद्वयं जैनं शर्मदं त्रिजगद्धितम् ।
ब्रुवेहं शकटालस्य मुनेर्वृत्तं बुधैर्मतम् ॥ १ ॥
पुरे पाटलिपुत्रे भूद्राजा नन्दोतिभद्रधीः ।
मंत्री श्रीशकटालाख्यो जैनधर्मरतस्तराम् ॥ २ ॥
द्वितीयस्तु कुधीर्मंत्री वरादिरुचिनामभाक् ।
तौ परस्परमत्यन्तं वैरिणौ भवत स्म च ॥ ३ ॥

एकदा मुनिभिर्युक्तो महापद्मो मुनीश्वरः ।
तत्रायातो जगत्पूज्यो जिनतत्वविदांवरः ॥ ४ ॥
तत्पार्श्वे श्रीजिनेन्द्रोक्तं धर्मं शर्माकरं द्विधा ।
समाकर्ण्य सुधीर्मंत्री शकटालो गुणोज्वलः ॥ ५ ॥
मुनिर्भूत्वा लसद्भक्त्या ज्ञात्वा शास्त्रार्थमुत्तमम् ।
आचार्यत्वं समासाद्य गुरोः पादप्रसादतः ॥ ६ ॥
कुर्वन्विहारमत्युच्चै-र्भव्यान्सम्बोधयन्सुखम् ।
कुर्वन्धर्मोद्यमं पूतं दुर्गतिच्छेदकारणम् ॥ ७ ॥
पुनः पाटलिपुत्राख्यं पुरमागत्य शुद्धधीः ।
नन्दस्यान्तःपुरे चर्यां कृत्वा स्वस्थानकं गतः ॥ ८ ॥
पूर्ववैरेण पापात्मा वरादिरुचिकस्तदा ।
नन्दं भूपं प्रति प्राह भो नरेन्द्र विचक्षण ॥ ९ ॥
भिक्षामिषेण ते गेहं संप्रविश्य प्रवेगतः ।
तवान्तःपुरके कष्टं शकटालः सुधूर्त्तकः ॥ १० ॥
अन्यायं च विधायैव स्वस्थानं गतवानिति ।
पापी दुर्गतिभाक् प्राणी किं करोति न पातकम् ॥ ११ ॥
ततो नन्देन भूभर्त्ता महाकोपेन तत्क्षणे ।
प्रेषितः शकटालस्य घातको मारणेच्छया ॥ १२ ॥
अहो मूढमतिर्जीवः प्रेरितो दुर्जनेन च ।
कार्याकार्यं न वेत्त्येव करोत्येव कुकर्म सः ॥ १३ ॥
शकटालो मुनीन्द्रोसौ दृष्ट्वा तं घातकं खरम् ।
ज्ञात्वा तन्मंत्रिणो दुष्ट-चेष्टितं पापकारणम् ॥ १४ ॥

संन्यासेन सुधीर्मृत्वा स्वर्लोकं च गतः सुखम् ।
दुष्टः करोतु दुष्टत्वं भवेन्नित्यं सतां शुभम् ॥ १५ ॥

सुनन्दोपि तदा राजा कृत्वा सर्वपरीक्षणम् ।
ज्ञात्वा मुनिं सुनिर्दोषं त्यक्त्वा कोपं प्रवेगतः ॥ १६ ॥

महापद्ममुनेः पाद-मूले सद्भक्तिनिर्भरः ।
श्रुत्वा धर्मं जिनैः प्रोक्तं सारसम्पद्विधायकम् ॥ १७ ॥

निन्दां गर्हां निजां कृत्वा दानपूजाव्रतान्विते ।
धर्मे श्रीमज्जिनेन्द्राणां संजातः सुतरां रतः ॥ १८ ॥

भवेज्जन्तुः कुसंगेन महापापस्य भाजनम् ।
स एव सद्गुरुं प्राप्य संभवेत्पुण्यभाजनम् ॥ १९ ॥

तस्माद्भव्यैः प्रकर्त्तव्यं सद्गुरोः सेवनं सदा ।
प्राप्यते येन सत्सौख्यं स्वर्गमोक्षभवं मुदा ॥ २० ॥

सम्यग्दर्शनबोधवृत्तसुतपोरत्नोत्कराराधना–
माला श्रीजिनसारसूत्रसहिता पूर्वं बुधैर्निर्मिता ।
सद्बोधाम्बुधिभिर्जगत्रयहितैः सा शर्मणे श्रीप्रभा–
चन्द्राद्यैस्तदनुग्रहेण सुधिया चक्रे मयापि श्रिये ॥ २१ ॥

इति कथाकोशे शकटालमुनेराख्यानं समाप्तम् ।

८३—श्रद्धाख्यानम् ।

विशुद्धकेवलज्ञान-प्रकाशितजगत्त्रयम् ।
नत्वा जिनं प्रवक्ष्यामि श्रद्धाख्यानं सतां प्रियम् ॥ १ ॥
कुरुजांगलसद्देशे हस्तिनागपुरे शुभे ।
विनयंधरभूपालो विनयादिवती प्रिया ॥ २ ॥
श्रेष्ठी वृषभसेनाख्य-स्तन्नाम्नी श्रेष्ठिनी मता ।
तयोः पुत्रस्तु संजातो जिनदासो गुणोज्वलः ॥ ३ ॥
एकदा तस्य भूभर्त्तुः कामासक्तस्य कर्मतः ।
महाव्याधिः समुत्पन्नो भूरिकामो न शान्तये ॥ ४ ॥
वैद्या न शक्नुवन्ति स्म तं व्याधिं संचिकित्सितुम् ।
पीडितस्तेन भूनाथो दुर्जनेन च पापिना ॥ ५ ॥
ततः सिद्धार्थसन्नाम्ना शुद्धश्रावकमंत्रिणा ।
पादौषधमुनेः पाद-प्रक्षालनजलं शुभम् ॥ ६ ॥
दत्तं तस्मै नरेन्द्राय सर्वव्याधिविनाशकम् ।
श्रीजिनेन्द्रपदाम्भोज-चंचरीकेण निर्मलम् ॥ ७ ॥
श्रद्धादिगुणसंयुक्तो विनयंधरभूपतिः ।
पीत्वा तज्जलमत्युच्चैः संजातो रोगवर्जितः ॥ ८ ॥
तज्जलास्वादनादेव गतो व्याधिः प्रवेगतः ।
भास्करस्योदये शीघ्रं प्रयात्येव यथा तमः ॥ ९ ॥
प्रभावः श्रीमुनीन्द्राणां तपसः केन वर्ण्यते ।
यत्पादक्षालनं तोयं सर्वव्याधिक्षयप्रदम् ॥ १० ॥

यथा सिद्धार्थमंत्री च सत्तोयं भूभुजे ददौ ।
तथा भव्यैः प्रदातव्यं धर्मपानीयमङ्गिनाम् ॥ ११ ॥
स श्रीपादौषधः स्वामी मुनीन्द्रो गुणसागरः ।
अस्तु मे शर्मणे नित्यं जैनतत्वविदांवरः ॥ १२ ॥
श्रद्धा श्रीजिनधर्मकर्मणि सतां दुःखौघविध्वंसिनी
देवेन्द्रादिनरेन्द्रचक्रिपदवीशर्मप्रदास्तोकतः ।
बाहुल्येन करोति या शुभतरा सत्केवलद्योतनं
व्यक्तानन्तचतुष्टयं शिवकरं सा शर्मणे वास्तु वै ॥ १३ ॥

इति कथाकोशे श्रद्धाख्यानं समाप्तम् ।

८४—स्वात्मनिन्दाफलाख्यानम् ।

सर्वदेवेन्द्रचन्द्राद्यैः पूजितं श्रीजिनेश्वरम् ।
संप्रणम्य प्रवक्ष्येहं स्वात्मनिन्दाफलोत्करम् ॥ १ ॥
काशीदेशे सुविख्याते पूते वाणारसी पुरे ।
राजा विशाखदत्तोभू-त्तद्राज्ञी कनकप्रभा ॥ २ ॥
चित्रकारो विचित्राख्यो नानाचित्रविधायकः ।
विचित्रादिपताकाख्या तस्य भार्या बभूव च ॥ ३ ॥
तयोर्बुद्धिमती पुत्री संजाता सुविचक्षणा ।
एकदा तस्य भूपस्य मन्दिरे वातिसुन्दरे ॥ ४ ॥
विचित्रचित्रकारस्य चित्रं चित्रयतः पितुः ।
बुद्धिमत्या समादाय भोजनं गतया तया ॥ ५ ॥

लीलया लिखितं तत्र भूपतेर्मणिकुट्टिमे ।
स्वच्छं मयूरपिच्छं त-द्गृह्णन् राजाल्पधीर्मतः ॥ ६ ॥
तथान्यदिवसे राज्ञो दर्शयंश्चित्रमद्भुतम् ।
भणितः स्वपिता चेति तया पुत्र्या सुधूर्त्तया ॥ ७ ॥
शीघ्रमागच्छ भो तात मा कुरु त्वं विलम्बलनम् ।
यौवनं साम्प्रतं याति भोजनस्य विचक्षण ॥ ८ ॥
तद्वचस्तु समाकर्ण्य भूपतिश्चित्रिताशयः ।
मुखं पश्यन्प्रमूर्खोसौ भणितश्च तया पुनः ॥ ९ ॥
तथान्यदा तया चापि कुड्यप्रच्छादने शुभे ।
अपनीते द्वितीये च कुड्ये चित्रावलोकने ॥ १० ॥
स राजा भणितो मूर्ख-स्ततः सोपि महीपतिः ।
पृष्ट्वा तत्कारणं सर्वं तुष्टस्तां परिणीय च ॥ ११ ॥
सर्वस्वान्तःपुरे चक्रे सुप्रधानां सुवल्लभाम् ।
गुणाः कुर्वन्ति दूतत्वं पुण्यतो भव्यदेहिनाम् ॥ १२ ॥
तस्याः सेवागतं सर्वं दुष्टमन्तःपुरं तदा ।
मस्तके टोल्लकाद्दत्वा गच्छति स्म दिनं प्रति ॥ १३ ॥
ततो बुद्धिमती सा च संजाता दुर्बला सती ।
जिनालयं प्रविश्योच्चैः पापस्य विलयप्रदम् ॥ १४ ॥
जिनेन्द्रप्रतिमाग्रे च कार्यसिद्धिविधायिनि ।
आत्मनिन्दां करोति स्म भक्तिभारेण मण्डिता ॥ १५ ॥
श्रीजिनेन्द्रजगद्वन्द्य स्वर्गमोक्षप्रदायक ।
अहं दीनकुलोत्पन्ना कस्य दोषोत्र दीयते ॥ १६ ॥

त्वमेव शरणं तात दुःखदावाग्निवारिद ।
किमन्यैर्बहुभिर्देवैः कामक्रोधादिदूषितैः ॥ १७ ॥
एकान्ते निन्दनं चेति कुर्वती स्वगृहे स्थिता ।
पृष्टापि भूभुजा वक्ति नैव दौर्बल्यकारणम् ॥ १८ ॥
अथैकस्मिन्दिने श्रीम-ज्जिनेन्द्रभवनं शुभम् ।
पूर्वं प्राप्तेन तद्राज्ञा श्रुत्वा तद्दुःखकारणम् ॥ १९ ॥
अन्तःपुरं मुनिर्भर्त्स्यं कृत्वा सेवापरं तराम् ।
सती बुद्धिमती सा च सुप्रधाना कृता मुदा ॥ २० ॥
एवमन्यैर्बुधैश्चापि श्रीजिनाग्रे सुभक्तितः ।
क्षुल्लकाद्यैः प्रकर्त्तव्या स्वात्मनिन्दा शुभश्रिये ॥ २१ ॥
शुभकुलोत्तमशर्मविधायिनी
  जिनपतेः पदभक्तिरसौ सदा ।
भवतु दुर्गतिदुःखविनाशिनी
  शिवपदं मम देव यतो मुदा ॥ २२ ॥

इति कथाकोशे आत्मनिंदाप्राप्तफलदृष्टान्ताख्यानं समाप्तम् ।

८५–आत्मनिन्दाख्यानम् ।

सर्वदोषप्रहर्त्तारं कर्त्तारं शर्मणः सताम् ।
नत्वा जिनं प्रवक्ष्येहं स्त्रीकथां गर्हणाश्रिताम् ॥ १ ॥
अयोध्यानगरे राजा दुर्योधन इतीरितः ।
श्रीदेवीकामिनीनाथः संजातो न्यायमण्डितः ॥ २ ॥

बभूव ब्राह्मणस्तत्र सर्वोपाध्यायनामभाक् ।
ब्राह्मणी तस्य वीराख्या यौवनोन्मत्तमानसा ॥ ३ ॥
सार्द्धं छात्रेण संसक्ता पापिनी साग्निभूतिना ।
हत्वा पतिं निजं वृद्धं सर्वोपाध्यायकं तदा ॥ ४ ॥
छत्रिकायां समारोप्य कृष्णरात्रौ श्मशानकम् ।
निक्षेप्तुं च गता तत्र कोपाद्व्यन्तरदेवता ॥ ५ ॥
छत्रिकां कीलयामास मस्तके संजगाद च ।
प्रभाते पुरनारीणा-मग्रतस्तु गृहे गृहे ॥ ६ ॥
दुराचारंस्त्वया स्वस्य कथ्यते गर्हणोत्करैः ।
तदा ते पतति व्यक्तं मस्तकाच्छत्रिका द्रुतम् ॥ ७ ॥
तया तथा कृते शीघ्रं छत्रिका पतिता क्षितौ ।
सा लोके च विशुद्धाभू-द्ब्राह्मणी निजगर्हणात् ॥ ८ ॥
तथान्यैस्तु बुधैः कार्यं गर्हणं स्वस्य शुद्धये ।
गुरूणामग्रतो भक्त्या दोषकं पापभीरुभिः ॥ ९ ॥
शल्येनैव यथा प्रपीडिततनुर्निष्काश्य शल्यं भटः
संप्राप्नोति सुखं तथा च सुधियः श्रीजैनसूत्रान्वितान् ।
श्रित्वा श्रीमुनिनायकाञ्छुभतरान्भूत्वा च शल्योज्झिताः
स्वात्मोत्पन्नकुदोषगर्हणभरैर्नित्यं भजन्तु श्रियम् ॥ १० ॥

इति कथाकोश आत्मगर्हणाख्यानं समाप्तम् ।

८६—सोमशर्ममुनेराख्यानम् ।

सम्प्रणम्य जिनाधीशं सारधर्मोपदेशकम् ।
सोमशर्ममुनेर्वच्मि शर्मदं सुकथानकम् ॥ १ ॥

आलोचनैर्गर्हणनिन्दनैश्च
व्रतोपवासैः स्तुतिसत्कथाभिः ।
एभिस्तु योगैः क्षपणं करोमि
विषप्रतीघातमिवाप्रमत्तः ॥ २ ॥

अथात्र भरते क्षेत्रे पुण्ड्राख्यविषये शुभे ।
देवीकोट्टपुरे जातो ब्राह्मणः सोमशर्मवाक् ॥ ३ ॥
वेदवेदाङ्गपारज्ञः सोमिल्याब्राह्मणीपतिः ।
संजातौ चाग्निभूत्याख्य-वायुभूती तयोः सुतौ ॥ ४ ॥
तत्रैव नगरे विष्णु-दत्तनामा द्विजोपरः ।
विष्णुश्रीकामिनीनाथो भूरिवित्तसमन्वितः ॥ ५ ॥
ऋणं श्रीविष्णुदत्तस्य गृहीत्वा सोमशर्मकः ।
एकदा धर्ममाकर्ण्य मुनेः पार्श्वे जिनेशिनाम् ॥ ६ ॥
दीक्षामादाय सद्भक्त्या मुनिर्भूत्वा विचक्षणः ।
कृत्वा विहारमत्युच्चैः प्राप्तः कोट्टपुरं पुनः ॥ ७ ॥
दृष्ट्वासौ विष्णुदत्तेन धृत्वा द्रव्यं प्रयाचितः ।
सोमशर्ममुनेः पुत्रौ निर्धनौ तौ तु साम्प्रतम् ॥ ८ ॥
द्रव्यं मे देहि भो धीर नो चेद्धर्मं सुशर्मदम् ।
तछ्रुत्वा सोमशर्माख्यं तं मुनिं सुतपोनिधिम् ॥ ९ ॥

वीरभद्रमहाचार्य-वाक्यतस्तु श्मशानके ।
धर्मं विक्रीणयन्तं च प्रत्यक्षीभूय देवता ॥ १० ॥
संजगाद मुने स्वामिन्धर्मस्ते कीदृशो भुवि ।
ततः प्राह मुनिः सोपि सोमशर्मा गुणोज्वलः ॥ ११ ॥
मूलोत्तरैर्गुणैर्युक्तो दशलाक्षणिको महान् ।
धर्मो देवि मम श्रीम-ज्जिनेन्द्रैर्भाषितः शुभः ॥ १२ ॥
तत्समाकर्ण्य सा देवी सन्तुष्टा भक्तिभारतः ।
नत्वा मुनिं जगद्वन्द्यं संजगौ व्यक्तभाषया ॥ १३ ॥

धम्मो जयवसियरणं धम्मो चिंतामणी अणग्घेओ ।
धम्मो सुहवसुधारा धम्मो कामदुहा धेणू ॥
किं जंपिएण बहुणा जं चं दीसइ सम्मतियलोए ।
इंदियमणोहिरामं तं तं धम्मफलं सव्वं ॥

सर्वलोकोत्तमस्यास्य नास्ति मूल्यं सुधर्मणः ।
किं तु सर्वोपसर्गस्य विनाशार्थं महामुनेः ॥ १४ ॥
एकवारं त्रिमुष्टया च समुत्पाटितकेशजम् ।
मूल्यलेशं ददामीमं श्रीमतां शर्मकारिणाम् ॥ १५ ॥
इत्युक्त्वासौ लसत्कान्ति-प्रद्योतितककुब्मुखम् ।
रत्नराशिं विधायोच्चै-र्देवता स्वगृहं गता ॥ १६ ॥
श्रीमज्जिनेन्द्रसद्धर्म-प्रभावः केन वर्ण्यते ।
यो धर्मः शर्मदो नित्यं सुरेन्द्राद्यैः समर्चितः ॥ १७ ॥
प्रभाते तत्तपोलक्ष्मी-सत्प्रभावप्रवीक्षणात् ।
विष्णुदत्तो द्विजश्चापि नत्वा तं मुनिनायकम् ॥ १८ ॥

संजगाद मुने धीर धन्यस्त्वं जैनतत्वविद् ।
दुर्धरोरुतपोयुक्तो विरक्तो मोहकर्मणि ॥ १९ ॥
अहं दुष्कर्मयोगेन वंचितो धनतस्करैः ।
अतः परं भवत्पाद-पद्मयुग्माश्रयं भजे ॥ २० ॥
इत्यादिकैः शुभैर्वाक्यैः स्तुत्वा तं भक्तिनिर्भरः ।
पादमूले मुनेस्तस्य दीक्षामादाय निर्मदः ॥ २१ ॥
मुनिर्भूत्वा गुरोर्भक्त्या स्वर्मोक्षसुखभागभूत् ।
अहो धर्माश्रितो जन्तुः को वा न स्यान्महासुखी ॥ २२ ॥
सर्वभव्यजनाश्चान्ये धर्मे श्रीमज्जिनेशिनाम ।
तं प्रभावं समालोक्य संजाता भक्तिनिर्भराः ॥ २३ ॥
तद्धनैः श्रावकैश्चापि कोटितीर्थाभिधानकः ।
चैत्यालयो जिनेन्द्राणां कारितः शर्मदायकः ॥ २४ ॥
श्रीमत्सारजिनेन्द्रदेवगदितं त्रैलोक्यसंपूजितं
नाना शर्मविधायकं भवहरं स्वर्मोक्षदं सत्तपः ।
आराध्यैव विशुद्धभक्तिभरतो ये साधवो धीधनाः
प्राप्ता मुक्तिसुखं विनाशरहितं कुर्वन्तु ते मे श्रियम् ॥२५॥

इति कथाकोशे श्रीसोमशर्ममुनेराख्यानं समाप्तम् ।

८७–कालाध्ययनाख्यानम् ।

यस्य ज्ञानं जगत्सार-संसाराम्भोधिपारदम् ।
तं प्रणम्य जिनं वक्ष्ये कालाध्ययनवृत्तकम् ॥ १ ॥
वीरभद्रो जगद्भद्रो मुनीन्द्रो जैनतत्ववित् ।
एकदासौ महाटव्या-महोरात्रं पठंश्रुतम् ॥ २ ॥
श्रुतदेव्या तया दृष्ट-स्ततः सम्बोधनाय च ।
धृत्वा गोकुलिकारूपं समागत्य निशि स्फुटम् ॥ ३ ॥
सुगन्धिमधुरं तक्रं गृहीस्वेति स्व लीलया ।
सा जल्पन्ती मुनेः पार्श्वे चक्रे पर्यटनं तदा ॥ ४ ॥
वीरभद्रो मुनिः प्राह शास्त्राभ्यासैकमानसः ।
मुग्धे किं गृहिलासीति तक्रं गृह्णाति कोऽधुना ॥ ५ ॥
निशायां निर्जने देशे तच्छ्रुत्वा देवतावदत् ।
त्वमेव गृहीलोऽकाले पठस्यत्रागमं यतः ॥ ६ ॥
ततोसौ मुनिरालोक्य नक्षत्राणि नभस्तले ।
प्रबुद्धो गुरुसान्निध्यं गत्वालोच्य निजक्रियाम् ॥ ७ ॥
शास्त्रं संपठति स्मोच्चैः काले काले तथान्यदा ।
तं पठन्तं जिनैः प्रोक्तं स्वागमं मुनिसत्तमम् ॥ ८ ॥
दृष्ट्वासौ देवता तुष्टा विशुद्धाष्टविधार्चनैः ।
पूजयामास सद्भक्त्या सद्गुणैः को न पूजितः ॥ ९ ॥
ततोसौ वीरभद्रस्तु मुनीन्द्रो ज्ञानमण्डितः ।
दर्शनज्ञानचारित्रैः परलोकं सुधीर्गतः ॥ १० ॥

तस्माच्छ्रीजिनभाषितं शुभतरं ज्ञानं जगन्मोहनं
नित्यं सारविभूतिशर्मजनकं स्वर्गापवर्गप्रदम् ।
युक्ता भक्तिभरेण निर्मलधियो विश्वप्रदीपं हितं
श्रित्वा शोककलंकपंकहरणं कुर्वन्तु सन्तः सुखम् ॥११॥

इति कथाकोशे कालाध्ययनाख्यानं समाप्तम् ।

८८-अकालाध्ययनाख्यानम् ।

नत्वा जिनं जगद्वन्द्यं केवलज्ञानलोचनम् ।
अकालाख्यानकं वक्ष्ये सतां सम्बोधहेतवे ॥ १ ॥
शिवनन्दी मुनिः कश्चि-देकदा गुरुवाक्यतः ।
श्रीमच्छ्रवणनक्षत्रो-दये स्वाध्यायकालकः ॥ २ ॥
भवत्येवं परिज्ञात्वा तथापि प्रौढकर्मतः ।
अकाले संपठन्मिथ्या-समाधिमरणेन सः ॥ ३ ॥
गंगानद्यां महामत्स्यः संजातः पापकर्मणा ।
जिनाज्ञालोपनेनैवं प्राणी दुर्गतिभाग्भवेत् ॥ ४ ॥
ततश्चैकदिने सोपि मत्स्यस्तु पुलिने शुभे ।
साधुपाठं समाकर्ण्य भूत्वा जातिस्मरोभवत् ॥ ५ ॥
अहो पठितमूर्खोहं जैनवाक्यपराङ्मुखः ।
संजातः पापतो मत्स्यो दुष्टकर्मविधायकः ॥ ६ ॥
इत्यात्मनिन्दनं कृत्वा गृहीत्वा त्रिजगद्धितम् ।
सम्यक्त्वं भक्तिभारेण संयुक्तं सद्गुणव्रतैः ॥ ७ ॥

समाराध्य जिनेन्द्रस्य पादपद्मद्वयं मुदा ।
स्वर्गे महर्धिको जातो देवः सत्पुण्यसम्बलः ॥ ८ ॥
धर्मस्याराधकः स्वर्गी भवेत्पापी विराधकः ।
पूर्वोसौ सत्सुखोपेतः परो दुःखाश्रितो जनः ॥ ९ ॥
इति ज्ञात्वा बुधैर्नित्यं धर्मः श्रीजिनभाषितः ।
आराध्यो भक्तितो नित्यं शक्त्या शर्मशतप्रदः ॥ १० ॥

विमलतरविभूतिः प्राणिनां शुद्धकीर्ति-
भवति विशदमूर्त्तिर्ज्ञानतश्चारुशान्तिः ।
असुरसुरनरेन्द्रैः खेचरेन्द्रैः प्रपूज्यं
जिनपतिवरबोधं संभजन्तु प्रभव्याः ॥ ११ ॥

इति कथाकोशे अकालाध्ययनाख्यानं समाप्तम् ।

८९—विनयाख्यानम् ।

सर्वं देवेन्द्रनागेन्द्र-नरेन्द्राद्यैः समर्चितम् ।
नत्वा जिनं प्रवक्ष्येहं विनयाख्यानकं शुभम् ॥ १ ॥
वत्सदेशे सुविख्याते कौशाम्बीपत्तने शुभे ।
राजाभूद्धनसेनाख्यो विष्णुभक्तो विमुग्धधीः ॥ २ ॥
धनश्रीः श्रीरिवात्यन्त-सुन्दरा तस्य कामिनी ।
श्रीजिनेन्द्रपदाम्भोज-सद्भृङ्गी श्राविकोत्तमा ॥ ३ ॥
सुप्रतिष्ठाभिधस्तत्र पुरे भागवतस्तथा ।
तद्राजाग्रासने भुंक्ते भोजनं कुतपोव्रतः ॥ ४ ॥

स जलस्तंभिनीविद्या-सामर्थ्येन प्रपंचतः ।
यमुनाख्यामहानद्या-मध्ये जापं करोति च ॥ ५ ॥
तत्प्रभावं समालोक्य सर्वे मूढजनास्तदा ।
संप्राप्ता विस्मयं युक्तं मूढा मूढक्रियारतः ॥ ६ ॥
अथ श्रीविजयार्धस्य दक्षिणश्रेणिसंस्थिते ।
रथनूपुरचक्रादि-वालाख्ये पत्तनेभवत् ॥ ७ ॥
राजा विद्युत्प्रभः ख्यातः श्रावकव्रतमण्डितः ।
विद्युद्वेगा महाराज्ञी विष्णुभक्ता बभूव च ॥ ८ ॥
एकदा तौ विनोदेन कौशाम्बीमागतौ पुरीम् ।
माघमासे जलस्नानं नद्यां जापं जलोपरि ॥ ९ ॥
कुर्वन्तं सुप्रतिष्ठन्तं मिथ्यात्वविषदूषितम ।
विद्युद्वेगा विलोक्योच्चै-स्तत्प्रशंसां चकार सा ॥ १० ॥
ततो विद्युत्प्रभः प्राह सुधीर्विद्याधराधिपः ।
आगच्छतो प्रिये चास्य मूढत्वं दर्शयामि ते ॥ ११ ॥
तदा चांडालरूपेण ताभ्यां द्वाभ्यां प्रपञ्चतः ॥
यमुनोपरि गत्वाशु दुष्टकर्मोत्करस्य च ॥ १२ ॥
प्रक्षालनेन तत्सर्वं जलं संदूषितं महत् ।
ततो रुष्टेन तेनापि प्रोक्त्वा कष्टमिति स्फुटम् ॥ १३ ॥
नद्याश्चोपरि गत्वाशु तथा स्नानादिकं पुनः ।
प्रारब्धं मूढभावेन किं न कुर्वन्ति देहिनः ॥ १४ ॥
पुनस्ताभ्यां परीक्षार्थं तज्जलं चातिदूषितम् ।
ततः सोपि प्रकोपेन दूरं गत्वा तथा स्थितः ॥ १५ ॥

एवं ताभ्यां बहून्वारां-स्तज्जले दूषिते तराम् ।
स्नानजापादिकं त्यक्त्वा मोहं प्राप्तः स मूढधीः ॥ १६ ॥
ततस्ताभ्यां वनक्रीडा-प्रासादादोलनादिकम् ।
विद्यया दर्शितं तस्य नभोयानादिकं तथा ॥ १७ ॥
तद्दृष्ट्वा सुप्रतिष्ठोसौ विष्णुभक्तः सुविस्मयात् ।
अहो विद्याधराणां च देवानामपि नेदृशी ॥ १८ ॥
विद्या संविद्यते यादृक्चाण्डालानां मनोहरा ।
एषा चेद्वर्त्तते मे च विद्या सर्वप्रवञ्चनम् ॥ १९ ॥
करोमीति हृदि ध्यात्वा समागत्य तदन्तिकम् ।
संजगादेति भो ब्रूत यूयं कस्मात्समागताः ॥ २० ॥
महाश्चर्यं प्रकुर्वन्ति भवन्तः कथमीदृशम् ।
आनन्दो वर्त्तते मेत्र भवत्क्रीडासमीक्षणात् ॥ २१ ॥
तच्छ्रुत्वा सोपि मातंगो जगौ भो विष्णुभाक्तिक ।
नैवं जानासि किंचात्र मातंगोहमिति स्फुटम् ॥ २२ ॥
नमस्कर्त्तुं समायातो गुरोः पादद्वयं मुदा ।
तुष्टेन गुरुणा मह्यं दत्ता विद्या सुखप्रदा ॥ २३ ॥
तस्याः प्रभावतः सर्वं मयेदं क्रियते ध्रुवम् ।
तत्समाकर्ण्य तेनोक्तं तदा भागवतेन च ॥ २४ ॥
अहो कृपां विधायोच्चै-र्मह्यमेषा प्रदीयते ।
विद्या यया करोम्यत्र सद्विनोदमहं पुनः ॥ २५ ॥
स चाण्डालस्तदा प्राह त्वमुत्तमकुलोद्भवः ।
वेदवेदाङ्गपारज्ञो न विद्या विनयैर्विना ॥ २६ ॥

विद्युद्वेगस्त्वकं चापि यत्र मां पश्यसि स्फुटम् ।
तत्राष्टाङ्गनमस्कारं कृत्वा सद्भक्तिनिर्भरः ॥ २७ ॥
भवत्पादप्रसादेन जीवामीति प्रजल्पसि ।
तदा विद्याप्रसिद्धिस्ते न चेत्सिद्धापि याति सा ॥ २८ ॥
सर्वं करोमि तेनोक्तं यद्भवद्भिः प्रजल्पितम् ।
ततस्तस्मै निजां विद्यां दत्त्वासौ स्वगृहं गतः ॥ २९ ॥
सोपि विद्याप्रभावेन कृत्वा चारुविकुर्वणाम् ।
सिद्धा विद्येति संज्ञात्वा सुप्रतिष्ठाख्यो विष्णुभाक् ॥ ३० ॥
तद्वेलातिक्रमे प्राप्तो भोजनार्थं नृपान्तिकम् ।
राज्ञा पृष्टः कथं वेला-तिक्रमो भगवन्नभूत् ॥ ३१ ॥
प्रोक्तं तेन मृषा वाक्यं लम्पटेन कुवादिना ।
भो नरेन्द्र चिरं चारु-तपोमाहात्म्यतोद्य मे ॥ ३२ ॥
सर्वे हरिहरब्रह्मा-सुराद्या भक्तिनिर्भराः ।
मां समभ्यर्च्य योगीन्द्रं स्वस्थानं संययुर्मुदा ॥ ३३ ॥
तेन राजन्बृहद्वेला संजातेति तथापरम् ।
अभूत्प्रभो नभोभागे गमनागमनं च मे ॥ ३४ ॥
ततः श्रीधनसेनोसौ भूपतिः प्राह भो द्विज ।
त्वं प्रभाते महाश्चर्यं सर्वं मे दर्शय ध्रुवम् ॥ ३५ ॥
दर्शयिष्यामि चेत्युक्त्वा स कृत्वा भोजनं गतः ।
प्रभाते मठिकायां च राजादीनां मनोहरम् ॥ ३६ ॥
दर्शयत्येव ब्रह्मादि-रूपं यावत्कृतोद्यमः ॥
तावच्चण्डालरूपेण तत्रायातौ च तौ पुनः ॥ ३७ ॥

तदा दृष्ट्वा वदन्सोपि मातंगौ दुष्टचेष्टितौ ।
कस्मादिमौ समायातौ नष्टा विद्येति जल्पनात् ॥ ३८ ॥
किं कारणं नृपः प्राह भगवन्ब्रूहि मे स्फुटम् ।
प्रोक्तं तेन यथार्थं च श्रुत्वा सोपि महीपतिः ॥ ३९ ॥
तौ प्रणम्य लसद्भक्त्या चण्डालौ पूर्वयुक्तितः ।
ततो विद्यां समादाय तां परीक्ष्य प्रहर्षतः ॥ ४० ॥
सम्प्राप्तः स्वगृहं शीघ्रं विद्यालाभो हि शर्मदः ।
येन जन्तुर्भवत्येव नित्यं सत्सौख्यभाजनम् ॥ ४१ ॥
अन्यदा स्वसभामध्ये विष्टरस्थो महीपतिः ।
तं चण्डालं समायातं दृष्ट्वा भक्तिनिर्भरः ॥ ४२ ॥
सम्प्रणम्य जगादोच्चैर्भो स्वामिंस्त्वत्प्रसादतः ।
जीवामीति ततः सोपि विद्युत्प्रभखगाधिपः ॥ ४३ ॥
विलोक्य विनयं तस्य सुधीः संतुष्टमानसः ।
स्वरूपं प्रकटीकृत्य तस्मै भूपाय शर्मदाम् ॥ ४४ ॥
दत्वा विद्यां तथान्यां च सम्प्राप्तो निजमन्दिरम् ।
गुरूणां विनयेनोच्चैः किं न जायेत सुन्दरम् ॥ ४५ ॥
तदाश्चर्यं समालोक्य स राजा धनसेनवाक् ।
विद्युद्वेगा तथान्ये च संजाताः श्रावकोत्तमाः ॥ ४६ ॥
अन्यैश्चापि महाभव्यैः स्वर्गमोक्षसुखप्रदः ।
गुरूणां विनयः कार्यो विशुद्धपरिणामतः ॥ ४७ ॥
सर्वकार्यप्रासीद्धिं च या करोति क्षणार्द्धतः ।
अस्तु सा सद्गुरोर्भक्तिः क्रियासन्दोहभूषणम् ॥ ४८ ॥

वन्द्यते स गुरुर्नित्यं यः संसारमहार्णवम् ।
स्वयं तरति पूतात्मा भव्यानां तारणक्षमः ॥ ४९ ॥
यस्य श्रीजिनपादपद्मयुगले देवेन्द्रचन्द्रार्चिते
शास्त्रे सद्विनयस्तथा मुनिजने जैने सदा तिष्ठति ।
तस्य श्रीजयकीर्तिकान्तिविलसद्बोधादयः सद्गुणाः
प्रीत्यां पार्श्वनिवासिनोतिनितरां तिष्ठन्ति शर्मप्रदाः ॥५०॥

इति कथाकोशे विनयाख्यानं समाप्तम् ।

५०—अवग्रहाख्यानम् ।

पादपद्मद्वयं नत्वा जिनेन्द्रस्य शुभप्रदम् ।
उपधानकथा वक्ष्ये यतः सौख्यं भजाम्यहम् ॥ १ ॥
अहिच्छत्रपुरे राजा वसुपालो विचक्षणः ।
श्रीमज्जैनमते भक्तो वसुमत्यभिधा प्रिया ॥ २ ॥
तेन श्रीवसुपालेन कारिते भुवनोत्तमे ।
लसत्सहस्रकूटे श्री-जिनेन्द्रभवने शुभे ॥ ३ ॥
श्रीमत्पार्श्वजिनेन्द्रस्य प्रतिमा पापनाशिनी ।
तत्रास्ते चैकदा तस्यां भूपतेर्वचनेन च ॥ ४ ॥
दिने लेपं ददात्युच्चै-र्लेपकाराः कलान्विताः ।
मांसादिसेविनस्ते तु ततो रात्रौ स लेपकः ॥ ५ ॥
पतत्येव क्षितौ शीघ्रं कदर्थ्यन्ते च तेखिलाः ।
एवं च कतिचिद्वारैः खेदक्षुण्णे नृपादिके ॥ ६ ॥

तदैकेन परिज्ञात्वा लेपकारेण धीमता ।
देवताधिष्ठितां दिव्यां जिनेन्द्रप्रतिमां हिताम् ॥ ७ ॥
कार्यसिद्धिर्भवेद्याव-त्तावत्कालं सुनिश्चितम् ।
अवग्रहं समादाय मासादेर्मुनिपार्श्वतः ॥ ८ ॥
तस्यां लेपः कृतस्तेन स लेपः संस्थितस्तदा ।
कार्यसिद्धिर्भवेत्येवं प्राणिनां व्रतशालिनाम् ॥ ९ ॥
तदासौ वसुपालेन भूभुजा परया मुदा ।
नानावस्त्रसुवर्णाद्यैः पूजितो लेपकारकः ॥ १० ॥
तथा कार्यप्रसिद्ध्यर्थं भक्त्या ज्ञानादिकर्मणि ।
अवग्रहः प्रकर्त्तव्यो मुन्यादिबुधसत्तमैः ॥ ११ ॥
जिनपतिकथितोसौ बोधसिन्धुः प्रयुक्त्या
विशदतरमुनीन्द्रैः सेवितः शर्महेतुः ।
सुरनरखचरेन्द्रैः पूजितो भक्तिसांद्रैः
स भवतु मम नित्यं केवलज्ञानकर्त्ता ॥ १२ ॥

इति कथाकोशे अवग्रहाख्यानं समाप्तम् ।

९१—अभिमानस्याख्यानम् ।

विशुद्धकेवलज्ञानं नत्वा श्रीमज्जिनेश्वरम् ।
बहुमानकथां वच्मि सारशर्मप्रदायिनीम् ॥ १ ॥
काशीदेशे सुविख्याते जातो वाराणसीपुरे ।
राजा वृषध्वजो धीमान्स्वप्रजाप्रतिपालकः ॥ २ ॥

वसुमत्यभिधा तस्य महादेवी बभूव च ।
रूपलावण्यसौभाग्य-मण्डिता पूर्वपुण्यतः ॥ ३ ॥
तथा गंगानदीतीरे पलासग्रामवासकः ।
नाम्नाशोकोभवद्धीमान्महागोकुलिकस्तदा ॥ ४ ॥
ददात्यसौ नरेन्द्राय तस्मै संवत्सरं प्रति ।
सद्घृतैः पूर्णकुंभानां सहस्रं करमुत्तमम् ॥ ५ ॥
तस्य भार्याभवन्नन्दा सती वन्ध्या स्वकर्मतः ।
साशोकाय सुधीर्भार्या रोचते नैव मानसे ॥ ६ ॥
रूपशीलादियुक्तापि कामिनी पुत्रवर्जिता ।
पुंसश्चित्ते समायाति नैव वल्लीव निष्फला ॥ ७ ॥
अशोकस्तु तदा सोपि सुधीर्गोकुलिको महान् ।
पुत्रार्थं कामिनीमन्यां सुनन्दां परिणीतवान् ॥ ८ ॥
तयोश्च कलहे जाते क्रियोस्तेन च धीमता ।
अर्द्धमर्द्धं विधायोच्चैर्दत्तं सर्वं गृहादिकम् ॥ ९ ॥
नन्दा नित्यं विशुद्ध्यादि-भाजनादिप्रयत्नकम् ।
दानमानादिसत्पूजां गोपालानां विधाय च ॥ १० ॥
घृतकुंभसहस्रार्द्धं कृत्वा संवत्सरं प्रति ।
ददाति स्म स्वनाथाय राजदेयं गुणोज्वला ॥ ११ ॥
सुनन्दा च स्वरूपादि-महागर्वेण दूषिता ।
गोपालानां कुधीः पूजां नैव यत्नं करोति च ॥ १२ ॥
तस्या गोपालकाः सर्वे स्वयं दुग्धं पिबन्ति च ।
तस्मात्तस्य घृतं जातं प्रमादादतितुच्छकम् ॥ १३ ॥

नन्दयान्यघृतं चापि दत्तं गोकुलिकेन तु ।
निर्घाटिता सुनन्दा सा सौभाग्येन प्रगर्विता ॥ १४ ॥
नन्दा नन्दप्रदा सा च स्वपुण्येन तदा सती ।
स्वगेहे सर्ववित्तादौ सुप्रधानाभवच्छुभा ॥ १५ ॥
एवं मुन्यादिभिर्जैन-धर्मकर्मणि शर्मदम् ।
पूजादानादिकं कार्यं नित्यं सद्बोधसिद्धये ॥ १६ ॥
श्रीमज्जैनपदाम्बुजेत्र नितरां स्वर्मोक्षसौख्यप्रदे
शास्त्रे श्रीजिनभाषिते शुभतरे धर्मे गुरौ सज्जने ।
ये यच्छन्ति विशुद्धभक्तिभरतः सद्भूरिमानादिकं
तेषां सारयशः सुबोधविलसच्छ्रीशर्म नित्यं भवेत् ॥ १७ ॥

इति कथाकोशे बहुमानाख्यानं समाप्तम्।

९२–अनिह्नवाख्यानम् ।

यस्य सत्केवलज्ञाने भाति विश्वमणूपमम् ।
तं जिनेन्द्रं प्रणम्योच्चै-रनिह्नवकथां ब्रुवे ॥ १ ॥
अवन्तिविषये श्रीमा-नुज्जयिन्यां विचक्षणः ।
राजाभूद्धृतिषेणाख्य-स्तद्राज्ञी मलयावती ॥ २ ॥
चण्डप्रद्योतनः पुत्रस्तयोर्जातो गुणोज्वलः ।
रूपलावण्यसौभाग्य-मण्डितः पूर्वपुण्यतः ॥ ३ ॥
दक्षिणादिपथे वेना-तटाख्ये नगरे तथा ।
ब्राह्मणः सोमशर्माभूत्सोमाख्या ब्राह्मणी तयोः ॥ ४ ॥

सुपुत्रः कालसंदीवः सर्वविद्याविराजितः ।
उज्जयिन्यां समागत्य स श्रीसोमसुतो महान् ॥ ५ ॥
चण्डप्रद्योतनं चारु-लिपीश्चाष्टादशोत्तमाः ।
पाठयामास पूतात्मा कालसंदीववाक् सुधीः ॥ ६ ॥
एकां म्लेच्छलिपिं तेन तं सुपाठयता तथा ।
कूटं पठन्प्रभोः पुत्रो हतः पादेन सोवदत् ॥ ७ ॥
यदाहं संभविष्यामि भूपतिस्तु तदा तव ।
पादं संखण्डयिष्यामि युक्तं स्वल्पमतिः शिशुः ॥ ८ ॥
ततस्तं पाठयित्वासौ कालसंदीवको द्विजः ।
गत्वा दक्षिणदेशं च मुनिर्जातो गुणोज्वलः ॥ ९ ॥
सोपि श्रीधृतिषेणाख्यो राजा श्रीजिनभक्तिभाक् ।
चण्डप्रद्योतनायोच्चै-र्दत्वा राज्यं तपोगृहीत् ॥ १० ॥
एकदा तस्य भूपस्य चण्डप्रद्योतनस्य हि ।
लेखः संप्रेषितो म्लेच्छ-राजेनोच्चैः स्वकार्यतः ॥ ११ ॥
केनापि वाचितो नैव स लेखस्तु ततो नृपः ।
स्वयं वाचयति स्मोच्चै-स्तं लेखं तुष्टमानसः ॥ १२ ॥
स्मृत्वासौ सद्गुरुं चित्ते तं समानीय भक्तितः ।
पूजयामास शुद्धात्मा तत्पदाम्बुजमद्भुतम् ॥ १३ ॥
भवन्ति सद्गुरोर्वाचो भव्यानां शर्मदायकाः ।
यथा चौषधयोर्जन्तो-र्भवेयुश्चारुसौख्यदाः ॥ १४ ॥
सोपि श्रीकालसंदीवो मुनिः श्रीजिनसूत्रवित् ।
कस्मैचिच्छ्वेतसदीव-नाम्ने दीक्षां जिनोदिताम् ॥ १५ ॥

दत्वा कुर्वन्विहारं च भव्यान्सम्बोधयन्सुधीः ।
श्रीमद्वीरजिनेन्द्रस्य विपुलाख्यगिरौ स्थिताम् ॥ १६ ॥
समवादिसूर्तिं प्राप्तो महाशर्मविधायिनीम् ।
कृत्वा तद्वन्दनां भक्त्या संस्थितो विमलाशयः ॥ १७ ॥
श्वेतसंदीवकश्चापि नूतनो मुनिसत्तमः ।
समवादिसृतेर्बाह्ये योगे स्वातापने स्थितः ॥ १८ ॥
निर्गच्छता तदा श्रीमच्छ्रेणिकेन महीभुजा ।
दृष्टः कस्ते गुरुश्चेति संपृष्टोसौ सुभक्तितः ॥ १९ ॥
स च प्राह मुनिः श्रीमन्द्वर्द्धमानो गुरुर्मम ।
इत्युक्ते पाण्डुरं तस्य शरीरं कृष्णतामितम् ॥ २० ॥
ततो व्याघुटितः श्रीमाञ्छ्रेणिको गौतमं मुनिम् ।
तच्छरीरस्य कृष्णत्व-कारणं पृष्टवान्नृपः ॥ २१ ॥
तेनोक्तं ज्ञानिना भूप स्वगुरोर्निह्नवाद्ध्रुवम् ।
तत्कायः कृष्णवर्णोभू-त्तत्समाकर्ण्य धीमता ॥ २२ ॥
शीघ्रं पश्चात्समागत्य तत्समीपं महीभुजा ।
श्रेणिकेन शुभैर्वाक्यै-र्भक्त्या सम्बोधितः स च ॥ २३ ॥
ततो सौ श्वेतसंदीवो मुनिः कृत्वा सुनिन्दनम् ।
शुक्लध्यानेन संहत्वा घातिकर्मचतुष्टयम् ॥ २४ ॥
केवलज्ञानमुत्पाद्य लोकालोकप्रकाशकम् ।
पूजितस्त्रिजगद्भव्यैः संप्राप्तो मोक्षमक्षयम् ॥ २५ ॥
ततो भव्यैर्न कर्त्तव्यो निह्नवः स्वगुरोः कदा ।
समाराध्यो गुरुर्यस्मात्स्वर्गमोक्षसुखप्रदः ॥ २६ ॥

सश्रीकेवललोचनोतिचतुरो भव्यौघसम्बोधको
देवेन्द्रादिनरेन्द्रखेचरशतैर्भक्त्या सदाभ्यर्चितः ।
व्यक्तानन्तचतुष्टयो गुणनिधिः श्रीश्वेतसंदीववाक्
कुर्यान्मे भवशान्तिमक्षयसुखं शीघ्रं जिनः शर्मदम् ॥ २७ ॥

इति कथाकोशे निह्नवाख्यानं समाप्तम् ।

९३—व्यंजनहीनाख्यानम् ।

नत्वा श्रीमज्जिनेन्द्रस्य पादपद्मद्वयं मुदा ।
वक्ष्ये व्यंजनहीनस्य कथां सम्बोधहेतवे ॥ १ ॥
देशे मगधसंज्ञेभूत्पुरे राजगृहे सुधीः ।
वीरसेनो महाराजो वीरसेना प्रिया तयोः ॥ २ ॥
सिंहनामा सुतो जात-स्तस्योपाध्यायकोभवत् ।
सोमशर्मा सुधीः सर्व-शास्त्रव्याख्याविचक्षणः ॥ ३ ॥
सुरम्यविषये ख्याते पोदनादिपुरे तथा ।
राजा सिंहरथस्तस्यो-परि प्राप्तेन तेन तु ॥ ४ ॥
वीरसेनेन भूभर्त्ता पोदनाख्यपुरात्तदा ।
सिंहोध्यापयितव्योसौ सुलेखः प्रेषितो गृहम् ॥ ५ ॥
सिंहोध्यापयितव्यः स शब्दस्यैव विचारणे ।
'ध्यै'स्मृतीति प्रचिन्ताया-मस्यधातोः प्रयोगकम् ॥ ६ ॥
ज्ञात्वा कारयितव्यस्तु चिन्तां राज्यादिके सुतः ।
सिंहो पाठयितव्यो न जगौ चेति कुवाचकः ॥ ७ ॥

इत्याकारे प्रलुप्ते च व्याख्याते भ्रान्तितस्तदा ।
पाठितो नैव सिंहोसौ हा कष्टं मूढचेष्टितम् ॥ ८ ॥
आगतेन ततो राज्ञा वीरसेनेन धीमता ।
ज्ञात्वा तत्कारणं कष्टं वाचको दण्डितः क्रुधा ॥ ९ ॥
तस्मादेवं न कर्त्तव्यः प्रमादः साधुभिः क्वचित् ।
येन कार्यस्य हानिः स्या-दर्थसन्दोहनाशिनी ॥ १० ॥

यथौषधं हीनगुणत्वमाश्रितं
निहन्ति नैवात्र शरीरवेदनाम् ।
तथाक्षरैर्हीनगुणाश्रितं श्रुतं
हितं न तत्तच्च शुभं सुधीः पठेत् ॥ ११ ॥

इति कथाकोशे व्यंजनहीनाख्यानं समाप्तम् ।

९४—अर्थहीनाख्यानम् ।

सर्वकल्याणकेपूच्चै-श्चर्चितांस्त्रिदशादिभिः ।
नत्वा जिनेश्वरान्वक्ष्ये अर्थहीनकथानकम् ॥ १ ॥
विनीतविषये रम्ये पुरेयोध्याभिधानके ।
राजाभूद्वसुपालाख्यो वसुमत्यभिधा प्रिया ॥ २ ॥
तयोः पुत्रः समुत्पन्नो वसुमित्रो विचक्षणः ।
तस्योपाध्यायको जातो गर्गनामा गुणोज्वलः ॥ ३ ॥
अवन्तिविषये पुर्या-मुज्जयिन्यां तथाभवत् ।
वीरदत्तो महात्राजा वीरदत्ता सुवल्लभा ॥ ४ ॥

अयं श्रीवीरदत्ताख्यो वसुपालस्य भूभुजः ।
मानभङ्गं करोत्युच्चै-स्ततः स वसुपालकः ॥ ५ ॥
उज्जयिन्यां समागत्य तस्योपरि महाक्रुधा ।
गतेषु दिवसेषूच्चै-र्वसुमत्यादिकान्प्रति ॥ ६ ॥
पुत्रोध्यापयितव्योसौ वसुमित्रोतिसादरम् ।
शालिभक्तं मसिम्पृक्तं सर्पिर्युक्तं दिनं प्रति ॥ ७ ॥
गर्गोपाध्यायकस्योच्चै-र्दीयते भोजनाय च ।
लेखं संप्रेषयामास भूपश्चेति निजं गृहम् ॥ ८ ॥
विनीतानगरीं प्राप्तः स लेखस्तु प्रमादतः ।
वाचितो वाचकेनैव महामुग्धेन कर्मतः ॥ ९ ॥
सुतोध्यापयितव्योसौ तथा गर्गाय धीमते ।
मसिघृतं सुभक्तं च दीयते भोजनक्षणे ॥ १० ॥
चूर्णीकृत्य ततोङ्गारं घृतभक्तेन मिश्रितम् ।
दत्तं तस्मै तकैर्मूढै-रुपाध्यायाय सेवकैः ॥ ११ ॥
आगतेन ततो राज्ञा समाधानं सुभक्तितः ।
उपाध्यायश्च पृष्टोसौ संजगाविति भो नृप ॥ १२ ॥
अस्ति मे कुशलं देव भवत्पुण्यप्रसादतः ।
किन्तु तेत्र कुलाचारै-र्मसिं भोक्तुं क्षमोस्मि न ॥ १३ ॥
तदा श्रीवसुपालेन पृष्टा राज्ञी च कारणम् ।
तं लेखं दर्शयामास सा सती गुणमण्डिता ॥ १४ ॥
ततस्तेन नरेन्द्रेण वाचकस्य महाक्रुधा ।
मुण्डनादिखरारोहैः कृतो दण्डस्तु कष्टदः ॥ १५ ॥

एवमन्यैर्न कर्त्तव्यं साधुभिस्तु प्रमादतः ।
सदर्थस्याप्यनर्थत्वं सर्वशास्त्रविचक्षणैः ॥ १६ ॥
तस्माच्छ्रीजिनभाषितं शुभतरं कीर्तिप्रमोदप्रदं
ज्ञानं ज्ञानघनैर्विशुद्धचरणैः सद्भिः सदा सेवितम्।
युक्त्या भक्तिभरेण निर्मलधियो भव्या भजन्त्यत्र ये
तेषां सारसुखं प्रबोधविलसच्छ्रीसंभवं संभवेत् ॥ १७ ॥

इति कथाकोशे अर्थहीनाख्यानं समाप्तम् ।

९५–व्यंजनार्थहीनस्याख्यानम् ।

विशुद्धकेवलज्ञानं नत्वा श्रीमज्जिनेश्वरम् ।
व्यंजनार्थप्रहीनस्य प्रवक्ष्येहं कथानकम् ॥ १ ॥
कुरुजांगलसद्देशे हस्तिनागपुरे परे ।
महापद्मोभवद्राजा जिनपादाब्जषट्पदः ॥ २ ॥
तस्य राज्ञी महासाध्वी पद्मश्री रूपशालिनी ।
श्रीमज्जिनेन्द्रसद्धर्म-कर्मसन्दोहभाविनी ॥ ३ ॥
तथा सुरम्यदेशे च पोदनाख्यमहापुरे ।
सिंहनादो महीनाथ-स्तस्योपरि महाक्रुधा ॥ ४ ॥
स श्रीमांश्च महापद्मः पोदनादिपुरं गतः ।
तत्र श्रीमज्जिनेन्द्राणां महास्तंभसहस्रकम् ॥ ५ ॥
सहस्रकूटसन्नाम मन्दिरं शर्ममन्दिरम् ।
दृष्ट्वा सन्तुष्टचेतस्को लसद्धर्मानुरागतः ॥ ६ ॥

ईदृशं श्रीजिनागारं मत्पुरे सौख्यकारणम् ।
कारयामि जगत्सारं संविचार्येति मानसे ॥ ७ ॥
महास्तंभसहस्रस्य कर्त्तव्यः संग्रहो ध्रुवम् ।
इत्युच्चैः प्रेषयामास पत्रकं स्वपुरं प्रति ॥ ८ ॥
वाचितं वाचकेनाशु भ्रान्त्या स्तभसहस्रकम् ।
ग्राह्यं चेति तदाकर्ण्य तत्रस्थैर्वेगतो जनैः ॥ ९ ॥
गृहीत्वा स्तंभशब्देन महाच्छागसहस्रकम् ।
पोषितं बहुयत्नेन हा कष्टं मूढचेष्टितम् ॥ १० ॥
ततो राज्ञा समागत्य महापद्मेन धीमता ।
प्रोक्तं भो यन्मयादिष्टं तन्मे दर्शयथ ध्रुवम् ॥ ११ ॥
दर्शिताश्च जनैश्छागा-स्ततो रुष्टेन भूभुजा ।
आज्ञाता मारणे लोका--स्ततस्तैरिति जल्पितम् ॥ १२ ॥
किं कुर्मो भो महीनाथ वयं प्रेषणकारिणा ।
वाचकेन यदादिष्टं तदस्माभिर्विनिर्मितम् ॥ १३ ॥
तदा तेन प्रकोपेन महापद्मेन भूभुजा ।
वाचको दण्डितो गाढं प्रमादो न सुखायते ॥ १४ ॥
एवमन्यैर्न कर्त्तव्यः प्रमादः साधुभिर्जनैः ।
ज्ञानध्यानादिसत्कार्ये जैनतत्वविचक्षणैः ॥ १५ ॥
इत्थं श्रीजिनभाषितं शुभतरं ज्ञात्वा सुशास्त्रं बुधै--
स्त्यक्त्वा मोहविधायकं भयकरं त्रेधा प्रमादं सदा ।
धर्म्ये कर्मणि शर्मकोटिजनके सज्ज्ञातदानादिके
भक्त्या श्रीजिनपूजने शुभतरे कार्या मतिः श्रेयसे ॥ १६ ॥

इति कथाकोशे व्यंजनार्थहीनाख्यानं समाप्तम् ।

९६-हीनाधिकाक्षराख्यानम् ।

नत्वा जिनं जगत्पूज्यं केवलज्ञानलोचनम् ।
हीनाधिकाक्षराख्यानं प्रवक्ष्ये भव्यरञ्जनम् ॥ १ ॥
सुराष्ट्रविषये श्रीम-दुर्जयन्तमहागिरौ ।
श्रीमच्चन्द्रगुहामध्ये जैनतत्वाब्धिचन्द्रमाः ॥ २ ॥
धरसेनो महाचार्यो ज्ञात्वा स्तोकं स्वजीवितम् ।
अविच्छित्तिनिमित्तं च शास्त्रस्योच्चैर्विचक्षणः ॥ ३ ॥
आन्ध्रदेशे सुविख्याते वेनातटपुरे परे ।
जिनयात्रासमायात-महाचार्यान्प्रति द्रुतम् ॥ ४ ॥
प्राज्ञौ कृतार्थतां प्राप्तौ नूतनौ द्वौ स्थिरौ मुनी ।
सिद्धान्तोद्धरणे योग्यौ प्रेषणीयौ मदन्तिके ॥ ५ ॥
दत्वा लेखमिति व्यक्तं स्वकीयं ब्रह्मचारिणम् ।
प्रेषयामास पूतात्मा जैनधर्मधुरन्धरः ॥ ६ ॥
तं लेखं तैः समालोक्य मुनीन्द्रैस्तुष्टमानसैः ।
तथाभूतौ मुनी भक्तौ प्रोल्लसद्धर्मरागिणौ ॥ ७ ॥
पुष्पदन्ताख्यभूतादि-बलिसंज्ञौ गुणोज्वलौ ।
प्रेषितौ परया भक्त्या सिद्धान्तोद्धरणे क्षमौ ॥ ८ ॥
तयोरागमने पूर्वं सूरिः पश्चिमसन्निशि ।
स्वप्ने शुभ्रतरौ दिव्यौ नूतनौ वृषभोत्तमौ ॥ ९ ॥
पतन्तौ पादयोः स्वस्य दृष्ट्वा सद्भक्तिनिर्भरौ ।
धरसेनो महाचार्यः प्रोल्लसत्प्रमदान्वितः ॥ १० ॥

सर्वसंन्देहसन्दोह-ध्वंसिनी श्रुतदेवता ।
जयत्वत्र सतां नित्यं वदन्नित्थं समुत्थितः ॥ ११ ॥
प्रभाते तौ समायातौ द्वौ मुनी भक्तिपूर्वकम् ।
नत्वा तत्पादपद्मं च संस्तुतिं चक्रतुर्मुदा ॥ १२ ॥
दिनत्रयं गुरुः सोपि तयोः कृत्वा यथोचितम्
हीनाधिकाक्षरे पूर्वं विद्ये साधयितुं तदा ॥ १३ ॥
परीक्षार्थं सुधीस्ताभ्यां ददाति स्म विचक्षणः ।
तौ समादाय तौ मंत्रौ गिरौ रैवतके शुभे ॥ १४ ॥
श्रीमन्नेमिजिनेन्द्रस्य शुभे सिद्धशिलातले ।
मुनी साधयितुं धीरौ प्रवृत्तौ शुद्धमानसौ ॥ १५ ॥
हीनाक्षरेण संयुक्तां विद्यां साधयतो मुनेः ।
काणादेवी समायाता परस्योद्दन्तुरा मुनेः ॥ १६ ॥
देवतानां विरूपत्वं नेदृशं भवति ध्रुवम् ।
परस्परं विचार्येति मंत्रव्याकरणेन च ॥ १७ ॥
न्यूनाधिकाक्षरं ज्ञात्वा कृत्वा मंत्रविशुद्धिताम् ।
तयोः साधयतो युक्त्या श्रुतदेव्यौ समागतौ ॥ १८ ॥
ततस्तौ द्वौ समागत्य गुरोः पार्श्वे सुभक्तितः ।
देवतादर्शनस्योच्चैः प्रोचतुश्चारुवृत्तकम् ॥ १९ ॥
तत्समाकर्ण्य योगीन्द्रो धरसेनो गुणोज्वलः ।
तुष्टस्तौ पाठयामास जैनसिद्धान्तसञ्चयम् ॥ २० ॥
पठित्वा च मुनीन्द्रौ तौ गुरोः सेवाविधायिनौ ॥
जातौ सिद्धान्तकर्त्तारौ जैनधर्मधुरन्धरौ ॥ २१ ॥

एतैर्यथा मुनीन्द्रैस्तु शास्त्रोद्धारो कृतो भुवि ।
तथा ह्यन्यैर्महाभव्यैः कार्योसौ धर्मवत्सलैः ॥ २२ ॥
स श्रीमान्धरसेननामसुगुरुः श्रीजैनसिद्धान्तस–
द्वार्द्धीदुर्धरपुष्पदन्तसुमुनिः श्रीभूतपूर्वो बलिः ।
एते सन्मुनयो जगत्त्रयहिताः स्वर्गामरैरर्चिताः
कुर्युर्मे जिनधर्मकर्मणि मतिः स्वर्गापवर्गप्रदे ॥ २३ ॥

इति महामुनीनामाख्यानं समाप्तम् ।

९७–सुव्रतमुनेराख्यानम् ।

श्रीजिनं सर्व देवेन्द्र-समर्चितपदद्वयम् ।
नत्वा सुव्रतयोगीन्द्र-वृत्तं वक्ष्ये हतामयम् ॥ १ ॥
सुराष्ट्रविषये रम्ये द्वारावत्यां महापुरि ।
हरिवंशे समुत्पन्नः कृष्णनामान्तिमो हरिः ॥ २ ॥
सत्यभामादिसद्राज्ञी-समूहे प्राणवल्लभः ।
त्रिखण्डेशो महीनाथ-सहस्रैः परिसेवितः ॥ ३ ॥
एकदासौ महाराजः श्रीमन्नेमिजिनेशिनः ।
समवादिसृतिं गच्छन्वन्दनार्थं सुखप्रदाम् ॥ ४ ॥
मार्गे सुव्रतनामानं मुनीन्द्रं सुतपोनिधिम् ।
व्याधिक्षीणाङ्गमालोक्य सुधीर्धर्मानुरागतः ॥ ५ ॥
जीवकाख्यमहावैद्य-प्रोक्तशुद्धौषधान्वितान् ।
भक्त्या सर्वगृहेषूच्चैः कारयामास मोदकान् ॥ ६ ॥

तन्मोदकशुभाहारैः सर्वत्र स मुनीश्वरः ।
संजातो विगतव्याधि-श्चारुचारित्रमण्डितः ॥ ७ ॥
तेन श्रीवासुदेवेन लसदौषधिदानतः ।
श्रीमत्तीर्थकरस्योच्चैः पूतं गोत्रमुपार्जितम् ॥ ८ ॥
महापात्रप्रदानेन देहिनां शर्मकारिणा ।
सतां सद्भक्तियुक्तानां किं न जायेत भूतले ॥ ९ ॥
तथैकदा मुनिः सोपि निर्व्याधिर्भूभुजा मुदा ।
दृष्टः पृष्टो मुने स्वामि-न्नस्ति देहे समाधिता ॥ १० ॥
तच्छ्रुत्वा स मुनिः प्राह निस्पृहः स्वशरीरके ।
कायोऽशुचिर्भवेद्भूप क्षणान्नानाप्रकारभाक् ॥ ११ ॥
तत्समाकर्ण्य चक्रेशो मुनेर्वाक्यं सुनिर्मलम् ।
नत्वा तं त्रिजगत्पूज्यं चक्रे चित्ते प्रशंसनम् ॥ १२ ॥
जीवाख्यः स वैद्योपि तन्निशम्य स्वमानसे ।
अहो मे मुनिनानेन गुणो नैव प्रवर्णितः ॥ १३ ॥
निन्दां चेति चकारासौ मृत्वार्त्तध्यानयोगतः ।
नर्मदा सुनदीतीरे महान्मर्कटकोभवत् ॥ १४ ॥
मूढप्राणी न जानाति मुनीनां वृत्तलक्षणम् ।
कृत्वा निन्दां जगद्वन्द्ये स्वयं याति कुयोनिताम् ॥ १५ ॥
एकदा वानरः सोपि तत्र वृक्षतले मुनिम् ।
पर्यंकस्थं पतच्छाखा-भिन्नोरस्कं सुनिश्चलम् ॥ १६ ॥
समालोक्य स्वपुण्येन भूत्वा जातिस्मरो द्रुतम् ।
क्रोधभावं परित्यज्य भूरिशाखामृगैः सह ॥ १७ ॥

अन्यशाखाप्रवल्लीभि-स्तां समाकृष्य यत्नतः ।
शाखां दूरे विधायोच्चैः पूर्वसंस्कारतो मुदा ॥ १८ ॥
महौषधं समानीय व्रणे तस्य महामुनेः ।
ददौ धर्मानुरागेण सारपुण्यं गृहीतवान् ॥ १९ ॥
जन्म जन्म यदभ्यस्तं प्राणिना शर्मकारणम् ।
तेनाभ्यासेन तेनोच्चै-स्तदेव क्रियते पुनः ॥ २० ॥
ततस्तेन मुनीन्द्रेण स्वावधिज्ञानचक्षुषा ।
प्रोक्त्वा तत्पूर्ववृत्तान्तं शीघ्रं सम्बोधितो हि सः ॥ २१ ॥
तदासौ मर्कटो धीमान्मुनेर्वाक्यप्रसादतः ।
श्रुत्वा धर्मं जिनेन्द्रोक्तं स्वर्गमोक्षसुखप्रदम् ॥ २२ ॥
सम्यक्त्वाणुव्रतान्युच्चै-र्गृहीत्वा भूरिभक्तितः ।
प्रतिपाल्य सुधीः सप्त-दिनैः संन्यासपूर्वकम् ॥ २३ ॥
मृत्वा सौधर्मकल्पे च देवो जातो महर्द्धिकः ।
जैनधर्मरतो जन्तुः किं न प्राप्नोति सत्सुखम् ॥ २४ ॥
मर्कटोपि सुरो जातो जैनधर्मप्रसादतः ।
तस्माद्धर्माद्धुरोश्चापि किं परं शर्मकारणम् ॥ २५ ॥
स जयतु जिनधर्मो यत्प्रसादाज्जनोयं
भवति सुरनरेन्द्रश्रीशिवश्रीपतिश्च ।
तदिह विदिततत्वैः श्रीजिनेन्द्रोक्तधर्मे
परमपदसुखाप्त्यै सारयत्नो विधेयः ॥ २६ ॥

इतिकथाकोशे श्रीसुव्रतमुनेराख्यानं समाप्तम् ।

९८–हरिषेणाख्यानम् ।

नत्वा श्रीमज्जिनं भक्त्या केवलज्ञानलोचनम् ।
कथ्यते हरिषेणस्य कथाशयवशाश्रिता ॥ १ ॥
अंगदेशे सुविख्याते कांपिल्यनगरे वरे ।
राजा सिंहध्वजस्तस्य राज्ञी वप्रा गुणोज्वला ॥ २ ॥
तस्याः श्रीहरिषेणाख्यो-भवत्पुत्रो विचक्षणः ।
भटाग्रणीः सतां मान्यो दाता भोक्ता सुलक्षणः ॥ ३ ॥
सा वप्रा श्राविका श्रीम-ज्जिनपादाब्जषट्पदी ।
नन्दीश्वरमहापूजां कारयत्येव भक्तितः ॥ ४ ॥
तथा प्रभोर्द्वितीया च राज्ञी लक्ष्मीमती प्रिया ।
सैकदा भूपतिं प्राह कुदृष्टिः स्वमदोद्धता ॥ ५ ॥
भो प्रभो पत्तने पूर्वं मदीयो ब्रह्मणो रथः ।
भ्रमत्वद्य तदाकर्ण्य राज्ञा प्रोक्तं भवत्विति ॥ ६ ॥
तच्छ्रुत्वा सा सती वप्रा राज्ञी सद्धर्मवत्सला ।
पूर्वं मे रथयात्रायां जातायां दत्तसम्पदि ॥ ७ ॥
भोजनादौ प्रवृत्तिर्मे प्रतिज्ञामिति मानसे ।
करोति स्म सतां नित्यं शरणं धर्म एव हि ॥ ८ ॥
भोजनार्थं समागत्य हरिषेणः सुतोत्तमः ।
दृष्ट्वा तां मातरं पृष्ट्वा कारणं निर्गतो गृहात् ॥ ९ ॥
विद्युच्चौरस्य संप्राप्तः पल्लिकामतिनिर्भयः ।
तं विलोक्य शुकः प्राह दुष्टात्मा तस्करान्प्रति ॥ १० ॥

अहो राजसुतो याति युष्माभिर्ह्रियते ध्रुवम् ।
दुष्टानां संगतिं प्राप्तः प्राणी वक्ति कुतो हितम् ॥ ११ ॥
ततो निर्गत्य वेगेन हरिषेणो विचक्षणः ।
संप्राप्तस्तापसस्याशु शतमन्योश्च पल्लिकाम् ॥ १२ ॥
तत्रापि तं समालोक्य शुकश्चान्यः शुभाशयः ।
यत्राकृतिर्गुणास्तत्र संवसन्ति स्वमानसे ॥ १३ ॥
इत्याकलय्य संप्राह राजपुत्रोयमद्भुतः ।
यात्युच्चैर्गौरवं यूयं शीघ्रं संकुरुतास्य भो ॥ १४ ॥
तच्छ्रुत्वा हरिषेणेन प्रोक्त्वा पूर्वकोदितम् ।
पृष्टः कीरो द्वितीयस्तु कथं भो गौरवं मम ॥ १५ ॥
भवान्कारयतीहोच्चै-स्तदाकर्ण्य शुको जगौ ।
श्रृणु त्वं राजपुत्राद्य वक्ष्येहं कारणं तव ॥ १६ ॥
माताप्येका पिताप्येको मम तस्य च पक्षिणः ।
अहं मुनीभिरानीतः स च नीतो गवाशनैः ॥ १७ ॥
गवाशनानां स गिरः श्रृणोति
अहं च राजन्मुनिपुङ्गवानाम् ।
प्रत्यक्षमेतद्भवता हि दृष्टं
संसर्गजा दोषगुणा भवन्ति ॥ १८ ॥
अथासौ तापसः पूर्वं शतमन्युश्चवर्तते ।
चम्पायां भूपती राज्ञी नागवत्यभिधा सती ॥ १९॥
जनादिमेजयः पुत्रः पुत्री च मदनावली ।
तस्या निमित्तिकेनोक्त-श्चोद्दशः शर्मकारणम् ॥ २० ॥
षट्खण्डाधिपतेरेषा भावि स्त्रीरत्नमुत्तमम् ।
काले कल्पशते चापि नान्यथा ज्ञानिनो वचः ॥ २१ ॥

अथोड्रविषये राजा कलादिकलनामकः ।
तमादेशं समाकर्ण्य याचयामास तां सतीम् ॥ २२ ॥
अलब्ध्वा च समागत्य महाकोपेन वेगतः ।
चम्पां वेष्टितवान्गाढं कामान्धः कुरुते न किम् ॥ २३ ॥
नित्यं युद्धे सति क्रूरे गृहीत्वा मदनावलीम् ।
सुरंगद्वारतो नाग-वती नष्ट्वा प्रवेगतः ॥ २४ ॥
पल्लिकायां समागत्य शतमन्योश्च वृत्तकम् ।
प्रोक्त्वा तत्र स्थिता याव-त्तावद्वक्ष्ये कथान्तरम् ॥ २५ ॥
पूर्वं च हरिषेणस्य तस्यां रागः प्रवर्तते ।
कन्यायां नितरां तस्मा-त्तापसैर्मुग्धमानसैः ॥ २६ ॥
निर्घाटितेन तेनोक्तं हरिषेणेन धीमता ।
यदीमां कन्यकां पूतां विवाहविधिना ध्रुवम् ॥ २७ ॥
अहं परिणयिष्यामि तदा सद्भक्तिपूर्वकम् ।
स्वदेशे कारयिष्यामि योजने योजने शुभान् ॥ २८ ॥
श्रीमज्जिनालयान्पूतान्पवित्रीकृतभूतलान् ।
स्वर्मोक्षगामिनां चित्ते जैनभक्तिर्निरन्तरम् ॥ २९ ॥
सिन्धुदेशेथ विख्याते नाम्ना सिन्धुतटे पुरे ।
राजा सिन्धुनदो राज्ञी सिन्धुमत्यभिधा तयोः ॥ ३० ॥
सिन्धुदेव्यादिपुत्रीणां शतं रूपगुणान्वितम् ।
नैमित्तिकेन चादिष्टं चक्रिणस्तदपि ध्रुवम् ॥ ३१ ॥
सिन्धुनद्यां तथा सर्व-कन्यास्नानं निरूपितम् ।
सहैव हरिषेणेन रागोत्पत्तिश्च जल्पिता ॥ ३२ ॥

तत्रासौ हरिषेणश्च जित्वा देशमहागजम् ।
ताः कन्याः परिणीयोचै-श्चित्रशालां सुखास्थितः ॥ ३३ ॥
तदा वेगवतीनाम्ना विद्याधर्य्या निशि द्रुतम् ।
सुप्तो नीतस्ततस्तेन प्रोत्थितेन नभस्तले ॥ ३४ ॥
दृष्ट्वा तारावलीं कोपा-त्तां हन्तुं खेचरीं स्वयम् ।
बद्धामुष्टिस्तदा कृत्वा प्राञ्जलिं सापि संजगौ ॥ ३५ ॥
श्रृणु स्वामिन्खगाद्रौ हि सूर्योदरमहापुरे ।
राजा श्रीन्द्रधनुर्धीमान् राज्ञी बुद्धिमती तयोः ॥ ३६ ॥
सुपुत्री जयचन्द्राख्या पुरुषद्वेषकारिणी ।
आदेशश्चेति संजात-स्तस्याः कन्याशतप्रियः ॥ ३७ ॥
भावी प्राणप्रियस्तस्मान्मया ते रूपपट्टकम् ।
तस्याः संदर्शितं सापि त्वय्यासक्ता बभूव च ॥ ३८ ॥
तत्समीपं ततो देव नीयते त्वं सुपुण्यभाक् ।
इत्याकर्ण्य प्रहर्षेण प्राप्तोसौ खेचराचलम् ॥ ३९ ॥
तद्विवाहे परिप्राप्ते गंगाधरमहीधरौ ।
कन्यामैथुनिकौ युद्धं कर्त्तुकामौ समागतौ ॥ ४० ॥
तत्संग्रामे सुरत्नानि संनिधानानि सद्भटः ।
लब्ध्वा श्रीहरिषेणोसौ भूत्वा षट्खण्डनायकः ॥ ४१ ॥
मदनादिवलीं भूत्या परिणीय निजं गृहम् ।
गत्वा मनुस्तथा जैन-रथयात्रां विधाय च ॥ ४२ ॥
सुधीः संकारयामास श्रीमज्जैनालयांस्तथा ।
अहो पुण्यवतां पुंसां किं शुभं यन्न जायते ॥ ४३ ॥

स जयतु जिनदेवो देवदेवेन्द्रवन्द्यो
यदुदितवरधर्मे शर्मभागी जनः स्यात् ।
गुणगणमणिखानिः स्वर्गमोक्षप्रयोनिः
सकलभुवनचन्द्रः केवलज्ञानसान्द्रः ॥ ४४ ॥

इति कथाकोशे हरिषेणचक्रवर्त्तिन आख्यानं समाप्तम् ।

९९—परगुणग्रहणाख्यानम् ।

नमस्कृत्य जिनं देवं सुरासुरसमर्चितम् ।
वक्ष्येहं परजन्तूनां गुणग्रहणसत्कथाम् ॥ १ ॥
धर्मानुरागतः स्वर्गे सौधर्मेण च धीमता ।
प्रोक्तं स्वस्य सभामध्ये कुर्वता गुणिनां कथाम् ॥ २ ॥
यस्त्यक्त्वा पर दोषौघान्स्वल्पं चान्यगुणं मुदा ।
सुधीर्विस्तारयत्युच्चै-रुत्तमः स जगत्त्रये ॥ ३ ॥
तत्समाकर्ण्य चैकेन पृष्टः स तु सुधाशिना ।
किं कोपि विद्यते देव तथाभूतस्तु भूतले ॥ ४ ॥
सौधर्मेन्द्रस्ततः प्राह द्वारावत्यां गुणोज्वलः ।
वासुदेवोन्तिमोप्यस्ति कृष्णनामा महाप्रभुः ॥ ५ ॥
ततः स वेगतो देवः समागत्य महीतलम् ।
श्रीमन्नेमिजिनाधीश-वन्दनार्थं प्रगच्छतः ॥ ६ ॥
तस्य त्रिखण्डभूपस्य परीक्षार्थं स्वमायया ।
मार्गे दुर्गन्धताक्रान्तं मृतकुक्कुररूपकम् ॥ ७ ॥

धृत्वा स्थितस्तदङ्गोत्थ-महादुर्गन्धतो द्रुतम् ।
सर्वसेनाजनो नष्टस्तदा सोपि सुरः पुनः ॥ ८ ॥
द्वितीयविप्ररूपेण समागत्य प्रपञ्चतः ।
वासुदेवाग्रतश्चक्रे कुक्कुरस्थप्रदूषणम् ॥ ९ ॥
तदा श्रीवासुदेवेन प्रोक्तं भो कुक्कुराननं ।
कीदृशी स्फटिकाकारा दृश्यते दन्तसन्ततिः ॥ १० ॥
तच्छ्रुत्वा मानसे तुष्टो भूत्वासौ प्रकटः सुरः ।
प्रोक्त्वा सर्वं तमभ्यर्च्य त्रिखंण्डेशं दिवं गतः ॥ ११ ॥
एवं सुभव्यैर्जिनभक्तियुक्तै—
स्त्यक्त्वात्र दोषान्परलोकजातान् ।
नित्यं तु साधुप्रगुणो हि भक्त्या
ग्राह्यो गुणज्ञैर्वरशर्मसिद्ध्यै ॥ १२ ॥

इति कथाकोशे परगुणग्रहणाख्यानं समाप्तम् ।

१००—दुर्लभमानवपर्यायदृष्टान्ताः ।

विशुद्धं केवलज्ञानं नत्वा श्रीमज्जिनेश्वरम् ।
दृष्टान्तैर्दशभिर्वच्मि मनुष्यत्वं सुदुर्लभम् ॥ १ ॥

यथा—

चोल्लय पासय धण्णं जूवा रदणाणि सुमिण चक्कं वा ।
कुम्मं जुग परमाणू दस दिट्ठंता मणुयलंभे ॥

पूर्वं चोल्लकदृष्टान्तं श्रृण्वन्तु सुधियो जनाः ।
श्रीमन्नेमिजिनाधीशे मुक्तिप्राप्ते जगद्धिते ॥ २ ॥

विनीतविषयेऽयोध्यां नगर्यां ब्रह्मदत्तवाक् ।
षट्खण्डाधिपतिर्जातश्चक्रिणामन्तिमो महान् ॥ ३ ॥
सहस्रभटनामाभू-त्तत्सामन्तो गुणोज्वलः ।
तस्य कान्ता सुमित्राख्या वसुदेवस्तयोः सुतः ॥ ४ ॥
मृते तस्मिन्सहस्रादि-भटे सामन्तके ततः ।
वसुदेवः सुतः सोपि मूर्खः सेवादिकर्मसु ॥ ५ ॥
प्राप्तो नैव पितुः स्थानं निधानं भूरिसम्पदाम् ।
विना सेवादिभिः कस्मात्प्राप्यते राजमानिता ॥ ६ ॥
तदा सुमित्रया सोपि स्थित्वा जीर्णे कुटीरके ।
जनन्या पोषितो यत्ना-द्वसुदेवो निजाशया ॥ ७ ॥
कट्यां बध्वा शुभं भारं ताम्बूलादिकमोदकम् ।
शीघ्रं च गमनेनोच्चैः स श्रमं कारितस्तया ॥ ८ ॥
इत्यसौ शिक्षतस्तस्य चक्रेशस्य कुलेशिनः ।
अङ्गरक्षणसेवायां संस्थितो नवयौवनः ॥ ९ ॥
एकदा चक्रवर्त्ती च महाटव्यां प्रवेगतः ।
दुष्टाश्वेन समानीतः क्षुत्पिपासादिपीडितः ॥ १० ॥
तत्रासौ वसुदेवेन तेन संशीघ्रगामिना ।
दत्वा भक्ष्यादिकं वस्तु चक्रवर्ती सुखीकृतः ॥ ११ ॥
प्रस्तावे स्तोकमप्युच्चै-र्दत्तं शर्मप्रदं भवेत् ।
क्षीयमाने यथा दीपे तैलं संवर्द्धते शिखा ॥ १२ ॥
ततो हृष्टेन तैनेव कस्त्वं पृष्टो जगौ च सः ।
सहस्रभटपुत्रोहं तत्समाकर्ण्य चक्रिणा ॥ १३ ॥

तस्मै व्याघुटितो दत्वा स्वकीयं रत्नकंकणम् ।
अयोध्यायां समागत्य भणितस्तलरक्षकः ॥ १४ ॥
मदीयं कंकणं नष्टं त्वं गवेषय वेगतः ।
तच्छ्रुत्वा कोट्टपालश्च द्रुतं शालास्थितं तदा ॥ १५ ॥
कंकणस्य मुदा वार्त्ता प्रकुर्वन्तं विलोक्य तम् ।
वसुदेवं समानीय दर्शयामास चक्रिणः ॥ १६ ॥
तं दृष्ट्वा चक्रभृत्प्राह याचय त्वं स्ववाञ्छितम् ।
तेनोक्तं देव जानाति माता मे च ततो गृहम् ॥ १७ ॥
गत्वा तां मातरं पृष्ट्वा सुमित्रां गुणशालिनीम् ।
पुनश्चागत्य भूपालो वसुदेवेन याचितः ॥ १८ ॥
दीयते भो महीनाथ युष्माभिः सुविचक्षणैः ।
प्रमोदजनकं चारु मह्यं चोल्लकभोजनम् ॥ १९ ॥
ब्रह्मदत्तो नृपः प्राह कीदृशं तच्च भोजनम् ।
तच्छ्रुत्वा वसुदेवोपि जगाद श्रृणु भूपते ॥ २० ॥
पूर्वं भवद्गृहे देव प्रोल्लसद्गौरवेण च ।
स्नानभोजनसद्भूषा-मनोवाञ्छितसद्धनम् ॥ २१ ॥
लब्ध्वा पश्चात्तवप्राण-वल्लभान्तःपुरे तथा ।
महामुकुटबद्धादि-परिवारगृहेषु च ॥ २२ ॥
क्रमादेवं परिप्राप्य पुनस्तेन क्रमेण वै ।
सर्वं सम्प्राप्यते भूप मया श्रीमत्सुवाक्यतः ॥ २३ ॥
तदाश्चर्यं न भो भव्याः कदाचित्प्राप्यतेखिलम् ।
मनुष्यत्वं पुनर्नष्टं प्राप्यते नैव भूतले ॥ २४ ॥

संज्ञात्वेति बुधैस्त्यक्त्वा दुर्मार्गे दुःखकारणम् ।
श्रीमज्जिनेन्द्रसद्भक्ति-र्विधेया शर्मकारणम् ॥ २५ ॥

१-इति चोल्लकदृष्टान्तः ।

अथ पाशक दृष्टान्तः कथ्यते मगधाभिधे ।
देशे पुरे शतद्वारे शतद्वाराख्यभूपतिः ॥ २६ ॥
तेन द्वारशतं राज्ञा कारितं स्वपुरे परे ।
एकादश सहस्राणि स्तंभानां द्वारकं प्रति ॥ २७ ॥
स्तंभे स्तंभे श्रयः प्रोक्तास्तथा षण्णवतिर्बुधैः ।
एकैकस्यां तथा श्र्यां च द्यूतकारकदम्बकाः ॥ २८ ॥
पाशकाभ्यां च ते सर्वे रमन्ते द्यूतकारकाः ।
एकदा शिवशर्माख्य-ब्राह्मणेन प्रयाचिताः ॥ २९ ॥
सर्वत्रैको यदा दावः पतत्येव तदा ध्रुवम् ।
जितं द्रव्यं प्रदातव्यं युष्माभिर्मह्यमित्यलम् ॥ ३० ॥
एवमस्त्विति तैः प्रोक्ते तस्मिन्नेव दिने तदा ।
एकदा यश्च सर्वत्र संपपात विधेर्वशात् ॥ ३१ ॥
तत्सर्वं विप्रकः सोपि मुदा द्रव्यं गृहीतवान् ।
पुनः सोपि तथा द्रव्यं सर्वं प्राप्नोति कर्मतः ॥ ३२ ॥
नैव शीघ्रं मनुष्यत्वं नष्टं सम्प्राप्यते क्षितौ ।
ज्ञात्वा चित्ते कथाभावं सद्भिः कार्या शुभे मतिः ॥ ३३ ॥
तत्र पुण्यं जिनेन्द्राणां भक्त्या पादद्वयार्चनैः ।
पात्रदानैः व्रतैः शीलैः सोपवासैर्मतं बुधैः ॥ ३४ ॥

२-इति पाशकदृष्टान्तः ।

धान्यदृष्टान्तकं वक्ष्ये संक्षेपेण सतां हितम् ।
जम्बूद्वीपप्रमाणं च योजनैकं सहस्रतः ॥ ३५ ॥
गंभीरा सर्षपैर्गर्त्ता पूरिता सा दिने दिने ।
एकैकसर्षपेणोच्चैः क्षीयते कालयोगतः ॥ ३६ ॥
नष्टं नैव मनुष्यत्वं प्राप्यते चाल्पपुण्यकैः ।
तस्मात्पुण्यं जिनेन्द्रोक्तं संश्रयन्तु बुधोत्तमाः ॥ ३८ ॥
तथान्यो धान्यदृष्टान्तो विनीतविषये शुभे ।
अयोध्यापत्तने राजा प्रजापालभिधानभाक् ॥ ३८ ॥
राजगेहात्तथा शत्रु-र्जितशत्रुर्महीपतिः ।
अयोध्यापुरमुद्दिश्य गृहीतुं संचचाल च ॥ ३९ ॥
तत्समाकर्ण्य भूपालः प्रजापालः प्रजां प्रतिः ।
जगौ सर्वजनैः सर्व-धान्यमेकत्र मिश्रितम् ॥ ४० ॥
संख्यां कृत्वा समानीय कोष्ठागारे मम द्रुतम् ।
रक्षणीयं प्रयत्नेन तैर्जनैस्तु तथा कृतम् ॥ ४१ ॥
ततस्तस्मिन्समागत्य जितशत्रौ मदोद्धते ।
असमर्थत्वमासाद्य पश्चाद्व्याघुटिते सति ॥ ४२ ॥
प्रजालोकैर्निजं धान्यं याचितः स महीपतिः ।
प्रजापालस्ततः प्राह परिज्ञाय निजं निजम् ॥ ४३ ॥
युष्माभिर्गृह्यते धान्यं राजानो विकटाशया ।
क्वचित्तत्संभवत्येव केनोपायेन पुण्यतः ॥ ४४ ॥
न नष्टं प्राप्यते शीघ्रं मनुष्यत्वं सुदुर्लभम् ।
मत्वेति परमप्रीत्या सन्तः कुर्वन्तु सच्छुभम् ॥ ४५ ॥

३-इति धान्यदृष्टान्तः

द्यूतदृष्टान्तमावच्मि शतद्वारपुरे तथा ।
द्वाराः पञ्चशतान्येव द्वारे द्वारे मनोहरे ॥ ४६ ॥
शालाः पञ्चशतान्युच्चैः शालां शालां प्रति ध्रुवम् ।
द्यूतकारसहस्राद्धं संप्रोक्त सुविचक्षणैः ॥ ४७ ॥
एकस्तत्र चयीनामा द्यूतकारः प्रवर्तते ।
द्यूतकाराश्च ते सर्वे जित्वा सर्वकपर्दकान् ॥ ४८ ॥
गताः सर्वदिशास्वाशु स्वेच्छया स चयी पुनः ।
तेषां च द्यूतकाराणां कदाचित्कर्मयोगतः ॥ ४९ ॥
मेलापकं करोत्येव न पुनर्नष्टतामितम् ।
प्राप्यते सुमनुष्यत्वं जन्तुभिस्तुच्छपुण्यकैः ॥ ५० ॥
अन्यस्मिन्द्यूतदृष्टान्ते तस्मिन्नेव पुरेभवत् ।
नाम्ना निर्लक्षणो द्यूत-कारः स्वप्नेपि पापतः ॥ ५१ ॥
संप्राप्नोति जयं नैव कदाचिच्छुभयोगतः ।
जित्वा कपर्दकान्सर्वान्ददौ कार्पटिकादिषु ॥ ५२ ॥
ते सर्वे तान्समादाय प्राप्ताः सर्वदिशासुखम् ।
कदाचित्कर्मयोगेन सर्वे कार्पटिकादयः ॥ ५३ ॥
भवन्त्येकत्र नैवात्र नृत्वं सम्प्राप्यते गतम् ।
कर्तव्या च ततो भव्यै-र्धर्मसेवा शुभश्रिये ॥ ५४ ॥

४-इति द्यूतदृष्टान्तः ।

रत्नदृष्टान्तमावच्मि सतां सम्बोधहेतवे ।
श्रीमद्भरतचक्रेशो द्वितीयः सगरो महान् ॥ ५५ ॥

तृतीयो मघवा चक्री तुर्यः सनत्कुमारवाक् ।
शान्तिनाथस्तथा कुन्थु-ररश्चक्री च सप्तमः ॥ ५६ ॥
सुभौमाख्यो महापद्मो हरिषेणो गुणोज्वलः ।
चक्री श्रीजयसेनाख्यो ब्रह्मदत्तोन्तिमो मतः ॥ ५७ ॥
एतेषां चक्रिणां चारु-चूडामणिसमूहकः ।
देवैः सर्वो गृहीतस्तु यथा ते चक्रवर्त्तिनः ॥ ५८ ॥
प्रोल्लसन्मणयस्तेपि पृथ्वीकायाश्च ते क्षितौ ।
तेपि देवा कदाप्यत्र मिलन्त्येकत्र नैव च ॥ ५९ ॥
तथा नष्टं मनुष्यत्वं विपुण्यैः प्राप्यते न हि ।
संविचार्य बुधैस्तस्माद्विधेयो जैनसद्वृषः ॥ ६० ॥

५-इति रत्नदृष्टान्तः ।

तथा स्वप्नप्रदृष्टान्तो-वन्तिदेशे मनोहरे ।
उज्जयिन्यां महापुर्यां हल्लाख्यः काचवाहकः ॥ ६१ ॥
तदा काष्ठान्यटव्यास्तु समानयति सोन्यदा ।
उद्याने काष्ठभारं च धृत्वा भूरिश्रमाश्रितः ॥ ६२ ॥
सुप्तः स्वप्नेऽभवत्सर्व-भूमिचक्राधिपो महान् ।
भार्ययोत्थापितः पश्चा-द्वाहति स्म स्वभारकम् ॥ ६३ ॥
यथा स्वप्नोत्थितः सोपि नैव चक्री कदाचन ।
तथा नष्टं मनुष्यत्वं प्राप्यते न विपुण्यकैः ॥ ६४ ॥

६-इति स्वप्नदृष्टान्तः ।

वक्ष्येहं चक्रदृष्टान्तं स्तंभा द्वाविंशति दृढाः ।
स्तंभे स्तंभेभवच्चक्रं चक्रे चक्रे बुधैर्मतम् ॥ ६५ ॥

आराणां च सहस्रं स्या-द्वारे चारे प्ररन्ध्रकम् ।
चक्राणां विपरीतत्वा-द्भ्रमणे सुभटैस्तदा ॥ ६६ ॥
स्तंभानामुपरिस्था च राधा संविध्यते शुभात् ।
काकंदीपत्तने राजा-भवद्द्रुपदनामकः ॥ ६७ ॥
तत्पुत्रीं द्रौपदीनाम्नीं रूपसौभाग्यशालिनीम् ।
अर्जुनेन महीभर्त्रा स्वयंवरविधौ मुदा ॥ ६८ ॥
राधावेधं विधायोच्चै-र्गृहीता द्रौपदी सती ।
पुण्योदयेन जन्तूनां किं न स्याच्छर्मनिर्मलम् ॥ ६९ ॥
तदुच्चैर्घटते सर्वं नैव नष्टा नृजन्मता ।
विना प्रव्यक्तपुण्येन तस्मात्तत्क्रियते बुधैः ॥ ७० ॥

७-इति चक्रदृष्टान्तः ।

कूर्मदृष्टान्तकं प्राहुर्भव्यानां पूर्वसूरयः ।
स्वयंभूरमणे ख्याते समुद्रे सुमहत्यपि ॥ ७१ ॥
छादिते चर्मणा तस्मिन्कूर्मो जन्तुर्महानभूत् ।
परिभ्रमञ्जले तत्र सोपि वर्षसहस्रकम् ॥ ७२ ॥
सूक्ष्मचर्मप्ररन्ध्रेण सूर्यं दृष्ट्वा कदाचन ।
पश्चादागत्य तं सूर्यं तस्मिन्नैव प्ररन्ध्रके ॥ ७३ ॥
दर्शयन्स्वकुटुम्बस्य स्वयं पश्यति भास्करम् ।
प्राप्यते न मनुष्यत्वं यत्प्रमादेन हारितम् ॥ ७४ ॥

८-इति कूर्मदृष्टान्तः ।

शृण्वन्तु युगदृष्टान्तं सज्जनाश्चारुचेतसः ।
प्रमाणं योजनानां हि लक्षद्वयसमायते ॥ ७५ ॥

पूर्वक्षारसमुद्रे च युगच्छिद्राद्विनिर्गता ।
कदाचित्समिला तत्र पतिता काष्ठनिर्मिता ॥ ७६ ॥
तथा पश्चिमवाराशौ युगं भ्रमति नित्यशः ।
तस्मिन्नेव युगच्छिद्रे कथंचित्कालयोगतः ॥ ७७ ॥
याति सा समिला चापि नैव नष्टं नृजन्म वै ।
प्राप्यते वेगतो भव्या-स्ततः कुर्वन्तु सच्छुभम् ॥ ७८ ॥

९-इति युगदृष्टान्तः ।

परमाणुप्रदृष्टान्तः कथ्यते दशमो मया ।
सर्वे चक्रेशिनां दण्ड-रत्नं हस्तचतुष्टयम् ॥ ७९ ॥
काले तस्य प्रदण्डस्य सर्वत्र परमाणवः ।
रूपान्तरं परिप्राप्य कदाचिच्च पुनस्तथा ॥ ८० ॥
दण्डरत्नत्वमायान्ति नृत्वं न प्राप्यते गतम् ।
ज्ञात्वेति पण्डितैः कार्यं शर्मकोटि प्रदं शुभम् ॥ ८१ ॥

१०-इति परमाणुदृष्टान्तः ।

भयशतैरिह दुर्लभतामितं
परमसार नृजन्म जगद्धितम् ।
बुधजनाः सुविचार्य शुभाश्रिये
जिनवृषं प्रभजन्तु जगद्धितम् ॥ ८२ ॥

इति कथाकोशे मनुष्यभवदुर्लभत्ववर्णने दश दृष्टान्ताः समाप्ताः ।

१०१-भावानुरागरक्ताख्यानम् ।

जिनपादद्वयं नत्वा सर्वसौख्यप्रदायकम् ।
भावानुरागरक्तस्य प्रवक्ष्येहं कथानकम् ॥ १ ॥
अवंतिविषये चारू-ज्जयिन्यां भूपतिर्महान् ।
धर्मपालः प्रिया तस्य धर्मश्रीर्धर्मवत्सला ॥ २ ॥
श्रेष्ठी सागरदत्ताख्यः सुभद्रा श्रेष्ठिनी तयोः ।
नागदत्तोभवत्पुत्रो जिनपादाब्जषट्पदः ॥ ३ ॥
तथा समुद्रदत्तस्य श्रेष्ठिनो रूपमण्डिता ।
पुत्री समुद्रदत्तायां प्रियंगुश्रीर्बभूव हि ॥ ४ ॥
तेन श्रीनागदत्तेन सा सती सुमहोत्सवैः ।
दानपूजाकुलाचारैः परिणीता गुणोज्वला ॥ ५ ॥
तस्या मैथुनिकः कोपि नागसेनो दुराशयः ।
तदा वैरं वहंश्चित्ते संस्थितः स्वगृहे कुधीः ॥ ६ ॥
एकदोपोषितः स श्री-नागदत्तो विचक्षणः ।
धर्मानुरागसंयुक्तः श्रीमज्जैनालये मुदा ॥ ७ ॥
कायोत्सर्गे स्थितो धीमांस्तं विलोक्य कुचेतसा ।
नागसेनेन हारं स्वं धृत्वा तत्पादयोस्तले ॥ ८ ॥
अयं चौरो भवेदित्थं पूत्कारः पापिना कृतः ।
दुष्टात्मा निन्दितं कर्म किं करोति न कोपतः ॥ ९ ॥
तत्समाकर्ण्य दृष्ट्वा च तल्गरेण प्रवेगतः ।
राज्ञः प्रोक्तं क्रुधा तेन मार्यतामिति जल्पितम् ॥ १० ॥
नीतोसौ मारणार्थं च नागदत्तस्तलारकैः ।
यः खड्गस्तद्गले मुक्त-स्तदा तत्पुण्ययोगतः ॥ ११ ॥

संजातः प्रोल्लसत्कान्ति-र्हारो वा द्युमणिद्युतिः ।
देववृन्दैर्नभोभागात्पुष्पवृष्टिः कृता स्तुतिः ॥ १२ ॥
अहो धर्मानुरागेण साधूनां साधुकारिताम् ।
के के भव्या न कुर्वन्ति येत्र सद्दृष्टयो भुवि ॥ १३ ॥
तद्दर्शनान्महास्फीतौ जैनधर्मस्थशर्मिणः ।
धर्मपालमहीनाथ-नागदत्तौ सुभक्तितः ॥ १४ ॥
दीक्षामादाय जैनेन्द्रीं मुनी जातौ विचक्षणौ ।
अन्ये चापि महाभव्या जैनधर्मे रतास्तराम् ॥ १५ ॥
सकलभुवनभव्यैः सेवितः श्रीजिनेन्द्र —
स्तदुदितवरधर्मो निर्मलः शर्महेतुः ।
विशदतरसुखश्रीः प्राप्यते यत्प्रसादा—
त्स भवतु मम शान्त्यै कर्मणां शान्तिकर्ता ॥ १६ ॥

इति कथाकोशे भावानुरागरक्ताख्यानं समाप्तम् ।

१०२—प्रेमानुरागरक्ताख्यानम् ।

संप्रणम्य जिनाधीशं प्रोल्लसद्धर्मनायकम् ।
प्रेमानुरागरक्तस्य रचयामि कथानकम् ॥१ ॥
विनीतविषये रम्ये साकेतापत्तनेभवत् ।
राजा सुवर्णवर्माख्यः सुवर्णश्रीप्रियाप्रियः ॥ २ ॥
श्रेष्ठी सुमित्रनामा च सम्पदासारसंभृतः ।
प्रेमानुरागरक्तोसौ जैनधर्मे विचक्षणः ॥ ३ ॥

एकदा पूर्वरात्रौ च स्वगृहे शुद्धमानसः ।
कायोत्सर्गेण मेरुर्वा संस्थितो निश्चलस्तराम् ॥ ४ ॥
देवेनैकेन चागत्य भार्यावित्तादिकं तदा ।
हृत्वा परीक्षितः सोपि चलितो न स्वयोगतः ॥ ५ ॥
ततो देवः समालोक्य स्थिरत्वं श्रेष्ठिनो महत् ।
कृत्वा तस्य सुमित्रस्य स्तुतिं शर्मशतंप्रदाम् ॥ ६ ॥
स्वयं च प्रकटीभूय विद्यां गगनगामिनीम् ।
दत्त्वासौ शांकरीं भक्त्या स्वर्गलोकं ययौ मुदा ॥ ७ ॥
तं प्रभावं विलोक्योच्चैः सर्वे भव्यजनास्तदा ।
श्रीमज्जिनेन्द्रसद्धर्मे संजाता भक्तिनिर्भराः ॥ ८ ॥
केचिच्च मुनयः केचि-च्छ्रावकव्रतमण्डिताः ।
केचित्सम्यक्त्वरत्नेन राजिता धर्मवत्सलाः ॥ ९ ॥
जिनपतेः पदपद्मयुगं मुदा
परमसौख्यकरं भवतारणम् ।
यजनसंस्तवनैर्जपनादिकै-
रिह भजन्तु ततः सुजनाः श्रिये ॥ १० ॥

इति कथाकोशे प्रेमानुरागरक्ताख्यानं समाप्तम् ।

१०३–मज्जनरागाख्यानम् ।

सर्वदेवेन्द्रनागेन्द्र-समर्चितपदद्वयम् ।
नत्वा जिनं प्रवक्ष्येहं वृत्तमज्जनरागजम् ॥ १ ॥

उज्जयिन्यां महीनाथः सुधीः सागरदत्तवाक् ।
जिनदत्तवसुमित्रौ सार्थवाहौ गुणोज्वलौ ॥ २ ॥
श्रीमज्जिनेन्द्रसद्धर्मे महामज्जनरागिणौ ।
दानपूजाव्रताद्यैश्च मण्डितौ श्रावकोत्तमौ ॥ ३ ॥
उत्तरापथमुद्दिश्य वाणिज्यार्थं विनिर्गतौ ।
अवसीरमहाभूध्र-मालादिवरभूध्रयोः ॥ ४ ॥
मध्येटव्यां गृहीते च सर्वसार्थे कुतस्करैः ।
ततोटवीं प्रविष्टौ तौ दिग्विमूढौ बभूवतुः ॥ ५ ॥
अपश्यन्तौ नरं कंचि-च्चारुमार्गोपदेशकम् ।
मज्जनरागरक्तौ द्वौ जैनधर्मे विचक्षणौ ॥ ६ ॥
संन्यासेन स्थितौ जैनं स्मरन्तौ चरणद्वयम् ।
अहो भव्या भवन्त्युच्चैः सौख्ये दुःखे च सद्धियः ॥ ७ ॥
तथान्यः सोमशर्माख्यो ब्राह्मणः कोपि तद्वने ।
दिग्विमूढो भ्रमन्कष्टं तयोः पार्श्वे समागतः ॥ ८ ॥
देवोर्हन्दोषनिर्मुक्तः केवलज्ञानलोचनः ।
तत्प्रणीतो भवेद्धर्मो दशलाक्षणिकः सुधीः ॥ ९ ॥
गुरुर्भार्यादिदुर्ग्रन्थ-वर्जितः शीलसंयुतः ।
ज्ञानध्यानतपोलक्ष्म्या मण्डितो भवतारकः ॥ १० ॥
जीवोप्यनादिसंसिद्धो भव्याभव्यप्रभेदभाक् ।
कर्माश्रितस्तु संसारी तन्मुक्तो मुक्तिनायकः ॥ ११ ॥
इत्यादिधर्मसद्भावं श्रुत्वा पार्श्वे तयोर्द्विजः ।
त्यक्त्वा मिथ्यात्वदुर्मार्गं श्रित्वा श्रीजैनशासनम् ॥ १२ ॥

संन्यासेन सुधीः सोपि स्थित्वा चित्ते जिनं स्मरन् ।
इन्द्रनागेन्द्रचन्द्राद्यै-र्भक्त्या नित्यं समर्चितम् ॥ १३ ॥
जित्वोपसर्गकं भूरि कीटकाद्यैर्विनिर्मितम् ।
मृत्वा महर्द्धिको देवः कल्पे सौधर्मसंज्ञके ॥ १४ ॥
अत्र श्रीश्रेणिकस्योच्चै-र्भूपतेस्तनुजोभवत् ।
अभयाख्यो महाधीरो मुक्तिगामी जगद्धितः ॥ १५ ॥
जिनदत्तवसुमित्रौ मृत्वा तौ द्वौ समाधिना ।
देवौ तत्रैव सौधर्मे संजातौ सुमहर्द्धिकौ ॥ १६ ॥
यद्धर्मं त्रिजगद्धितं शुभकरं श्रित्वा सुकष्टेप्यलं
भव्या भूरि सुखं प्रकष्टविमुखं संप्राप्नुवन्ति स्वयम् ।
स श्रीमान्सुसुरेन्द्रचक्रिखचरार्धाशैः सदाभ्यर्चितं
दद्यान्मे भवतां च निर्मलसुखं सत्केवली श्रीजिनः ॥ १७ ॥
इति कथाकोशे भञ्जनरागरक्ताख्यानं समाप्तम् ।

१०४–धर्मानुरागाख्यानम् ।

विशुद्धकेवलज्ञान-लोकालोकप्रकाशकम् ।
नमस्कृत्य जिनं वच्मि कथां धर्मानुरागजाम् ॥ १ ॥
अवन्तिविषये ख्याते प्रोज्जयिन्यां महापुरि ।
राजाभूद्धनवर्माख्यो धनश्रीकामिनीपतिः ॥ २ ॥
तयोः पुत्रः समुत्पन्नो लकुचो भूरिगर्ववान् ।
शत्रुसन्दोहमानाग्नि-शमनैकघनाघनः ॥ ३ ॥

एकदा कालमेघाख्य-म्लेच्छराजेन पीडिते ।
तद्देशेसौ कुमारश्च लकुचो बहुकोपतः ॥ ४ ॥
गत्वा स्वयं रणे धृत्वा तं रिपुं कालमेघकम् ।
समानीय द्रुतं दत्वा स्वपित्रे धनवर्मणे ॥ ५ ॥
कामचारं वरं प्राप्य ततः स्वपुरयोषिताम् ।
शीलभंगं चकारोच्चैः कामिनां सुमतिः कुतः ॥ ६ ॥
श्रेष्ठिनः पुंगलस्यापि नागधर्मास्ति कामिनी ।
भूरिरूपश्रिया युक्ता तस्यामासक्तकोभवत् ॥ ७ ॥
पुंगलोपि तदा श्रेष्ठी प्रज्वलन्कोपवह्निना ।
तं हन्तुमसमर्थः सन्तिष्ठते स्वगृहे ततः ॥ ८ ॥
उद्याने क्रीडितुं गत्वा कदाचिल्लकुचो मुदा ।
पूर्वपुण्यप्रयोगेन दृष्ट्वा तत्र मुनीश्वरम् ॥ ९ ॥
धर्ममाकर्ण्य जैनेन्द्रं शीघ्रं वैराग्यमाश्रितः ।
पुंगलेन तदा ज्ञात्वा गत्वा तत्र प्रकोपतः ॥ १० ॥
वैराल्लोहशलाकाभिः सन्धिस्थानेषु कीलितम् ।
तच्छरीरं तदा सोपि जैनधर्मानुरागभाक् ॥ ११ ॥
जित्वोपसर्गकं स्वामी परलोकं गतो ध्रुवम् ।
विचित्रं भव्यजीवानां चारित्रं भुवनोत्तमम् ॥ १२ ॥
स जयतु मुनिनाथो भूरिकष्टं सुजित्वा
सपदि लकुचनामा प्राप्तवाञ्छर्मसारम् ।
गुणगणमणिरुद्रो बोधसिन्धुः प्रसान्द्रो
जिनपतिहिमरश्मिः प्रोल्लसद्रश्मियोगात् ॥ १३ ॥

इति कथाकोशे धर्मानुरागरक्ताख्यानं समाप्तम् ।

१०५-दर्शनाऽपतिताख्यानम् ।

संप्रणम्य जिनाधीशं सर्वदोषविवर्जितम् ।
दर्शनाक्षयवनाख्यानं प्रवक्ष्ये जगदर्शितम् ॥ १ ॥
पाटलीपुत्रसन्नाम्नि पत्तने सुचिरन्तने ।
जिनदत्तोभवच्छ्रेष्ठी परमेष्ठिपदे रतः ॥ २ ॥
तद्भार्या जिनदासी च तयोः पुत्रो गुणोज्वलः ।
जिनदासो विशुद्धात्मा जिनभक्तिसुतत्परः ॥ ३ ॥
एकदा जिनदासोसौ सुवर्णद्वीपतो महान् ।
सद्धनं समुपार्ज्योच्चै-रागच्छति यदाम्बुधौ ॥ ४ ॥
शतयोजनविस्तार-यानपात्रस्थितेन च ।
दुष्टचित्तेन कालाख्य-देवेनेत्थं प्रजल्पितम् ॥ ५ ॥
जिनदास त्वया शीघ्रं कथ्यते चेदिदं वचः ।
नास्ति देवो जिनश्चापि नैव जैनं मतं भुवि ॥ ६ ॥
त्वं मया मुच्यते शीघ्रं मार्यते नान्यथा ध्रुवम् ।
तत्समाकर्ण्य तैः सर्वै-र्जिनदासादिभिर्द्रुतम् ॥ ७ ॥
मस्तकन्यस्तसद्धस्तै-र्वर्द्धमानजिनेश्वरम् ।
नमस्कृत्य महाभक्त्या संप्रोक्तं रे दुराशय ॥ ८ ॥
अस्ति श्रीमज्जिनाधीशः केवलज्ञानभास्करः ।
सर्वोत्तमं मतं तस्य वर्द्धते भुवनार्चितम् ॥ ९ ॥
तथा श्रीजिनदासोसौ सर्वेषामग्रतस्तदा ।
ब्रह्मदत्तेशिनः पञ्च-नमस्कारकथां जगौ ॥ १० ॥
तदोत्तरकुरुस्थेन निजासनसुकम्पनात् ।
अनावृत्ताख्ययक्षेण समागत्य प्रवेगतः ॥ ११ ॥

कोपाच्चक्रेण पापात्मा ताडितो मुकुटे कुधीः ।
कालदेवः कुदेवोसौ पातितो वडवानले ॥ १२ ॥
लक्ष्मीदेव्या तदागत्य सर्वे ते जैनधर्मिणः ।
अर्घे दत्वा महाभक्त्या पूजिताः परमादरात् ॥ १३ ॥
ये भव्याः सारसम्यक्त्वं पालयन्ति विचक्षणाः ।
तेषां पादार्चनं भक्त्या के न कुर्वन्ति भूतले ॥ १४ ॥
ततस्ते जिनदासाद्या जिनभक्तिपरायणाः ।
समागत्य निजं गेहं संस्थिताः पुण्ययोगतः ॥ १५ ॥
जिनदासेन पृष्टश्च सावधिज्ञानलोचनः ।
मुनिः प्राह विशुद्धात्मा सर्वं तद्वैरकारणम् ॥ १६ ॥
त्रिभुवनैकहितं शिवकारणं
शुचितरं प्रभजन्तु सुदर्शनम् ।
परमसौख्यकृते सुबुधोत्तमः
किमिह चान्यमहाश्रमकारणैः ॥ १७ ॥

इति कथाकोशे दर्शनाऽपतिताख्यानं समाप्तम् ।

१०६–अत्यक्तसम्यक्त्वाख्यानम् ।

नमस्कृत्य जिनं देवं देवदेवेन्द्रवन्दितम् ।
सम्यक्त्वामुक्तकाख्यानं द्वितीयं रचयाम्यहम् ॥ १ ॥
लाटदेशे सुविख्याते गलगोद्रहपत्तने ।
श्रेष्ठी श्रीजिनदत्तोभू-ज्जिनदत्तास्य कामिनी ॥ २ ॥

तयोर्जिनमतिः पुत्री रूपसौभाग्यशालिनी ।
संजाता पूर्वपुण्येन भवेद्रूपादिसम्पदा ॥ ३ ॥
द्वितीयस्तु तथा श्रेष्ठी नागदत्तो विधर्मकः ।
नागदत्ताभवत्कान्ता रुद्रदत्तः सुतस्तयोः ॥ ४ ॥
याचिता नागदत्तेन रुद्रदत्ताय सा सती ।
न दत्ता जिनदत्तेन तस्मै मिथ्यादृशे सुता ॥ ५ ॥
ततस्तौ नागदत्ताख्य-रुद्रदत्तौ प्रपञ्चतः ।
मुनेः समाधिगुप्तस्य पार्श्वे भूत्वान्हिकौ तदा ॥ ६ ॥
परिणीय लसद्रूपां जिनमत्यभिधां च ताम् ।
पुनर्माहेश्वरौ जातौ दुर्दृशां सुमतिः कुतः ॥ ७ ॥
रुद्रदत्तस्ततो वक्ति भो प्रिये त्वमपि द्रुतम् ।
धर्मं माहेश्वरं सारं मदीयं च गृहाण वै ॥ ८ ॥
जिनेन्द्रचरणाम्भोज-षट्पदी वदति प्रिया ।
जिनमत्यभिधा सापि न युक्तं त्रिजगद्धितम् ॥ ९ ॥
त्यक्तुं मे जैनसद्धर्मं सुरेन्द्राद्यैः समर्चितम् ।
तं शर्मदं गृहाण त्वं त्यक्त्वा मिथ्यामतं प्रभो ॥ १० ॥
स्वस्वधर्मप्रवादेन तयोर्नित्यं प्रवर्त्तते ।
कलहस्तु गृहे युक्तं कुतः सौख्यं विधर्मतः ॥ ११ ॥
धर्मं निजं निजं व्यक्तं कुर्वतोश्च तयोस्ततः ।
काले यात्येकदा तत्र पत्तने कर्मयोगतः ॥ १२ ॥
भिल्लैः प्रज्वालिते क्रुद्धै-रग्निना दुष्टमानसैः ।
जाते कोलाहले कष्टं प्राणिनां प्राणसंकटे ॥ १३ ॥

तदा श्रीजिनमत्या च भणितो रुद्रदत्तकः ।
यस्य देवः करोत्युच्चैः सर्वशान्तिं क्षणादिह ॥ १४ ॥
तस्यावाभ्यां प्रकर्त्तव्यो धर्मः शर्मकरो ध्रुवम् ।
एवमस्त्विति संप्रोक्त्वा जनान्कृत्वा च साक्षिणः ॥ १५ ॥
ततोर्घं रुद्रदत्तोसौ ददौ रुद्राय मूढधीः ।
नैव कश्चिद्विशेषोभू-द्वह्निज्वालाविजृंभिते ॥ १६ ॥
ब्रह्मादिभ्योपि दत्तार्घे नैव जातो विशेषकः ।
दुर्दर्भ्यो दुष्टचित्तेभ्यो नैव शान्तिः कदाचन ॥ १७ ॥
जिनमत्यभिधा सापि ततः सद्धर्मवत्सला ।
दत्वार्हदादिपञ्चाना-मर्घं श्रीपरमेष्ठिनाम् ॥ १८ ॥
पादपद्मद्वयेभ्यश्च प्रोल्लसद्भक्तिनिर्भरा ।
पतिपुत्रवधूवर्गं धृत्वा स्वान्ते सुनिश्चला ॥ १९ ॥
कायोत्सर्गे स्थिता चित्ते कृत्वा पञ्च नमस्कृतिम् ।
तत्क्षणादेव संजाता वह्निशान्तिः जगद्धिता॥ २० ॥
तं दृष्ट्वातिशयं सर्वे रुद्रदत्तादयो मुदा ।
नत्वा श्रीमज्जिनं देवं संजाताः श्रावकोत्तमाः ॥ २१ ॥
अहो श्रीजिनधर्मस्य महिमा भुवनोत्तमः
वर्ण्यते केन भूलोके स्वर्गमोक्षसुखप्रदः ॥ २२ ॥
यथा श्रीजिनमत्याख्या चक्रे सम्यक्त्वरक्षणम् ।
तथान्यैर्भव्यमुख्यैश्च तत्कार्यं सच्छुभश्रिये ॥ २३ ॥
श्रीमज्जैनपदाम्बुजेषु नितरां भृङ्गी पवित्राशया
सद्दृष्टिर्जिनशब्दपूर्वकमतिः शर्मप्रदा सा सती ।

नानावस्त्रसुवर्णरत्ननिकरैर्देवादिभिः पूजिता
सद्दृष्टिर्जिनभक्तिनिश्चलमतिः कैः कैर्न संपूज्यते ॥ २४ ॥
इति कथाकोशे अत्यक्तदर्शनाख्यानं समाप्तम्।

१०७–सम्यक्त्वप्रभावाख्यानम्।

श्रीजिनं त्रिजगद्देवं नमस्कृत्य सुरार्चितम्।
ब्रुवे सम्यक्त्वमाहात्म्यं चेलिनीश्रेणिकाश्रितम्॥ १ ॥
देशेत्र मगधे ख्याते पुरे राजगृहे शुभे।
राजा प्रश्रेणिको राज्ञी सुप्रभा गुणमण्डिता ॥ २ ॥
पुत्रः श्रीश्रेणिको जात-स्तयोः पुत्रशिरोमणिः।
धीरो वीरोतिगंभीरो दाता भोक्ता भटाग्रणीः ॥ ३ ॥
एकदा नागधर्मेण राज्ञा प्रत्यन्तवासिना।
दुष्टाश्वः प्रेषितः पूर्व-वैरिणा तस्य भूपतेः ॥ ४ ॥
दुष्टस्तुरंगमः सोपि प्रेरितो नैव गच्छति।
खांचितो याति वेगेन दुष्टानामीदृशी गतिः ॥ ५ ॥
बाह्यालीं निर्गतो राजा तेनाश्वेनैकदा मुदा।
प्रश्रेणिको महाटव्यां नीतो दुष्टेन कष्टतः ॥ ६ ॥
तत्र पल्लीपतिख्यातो यमदण्डो यमाकृतिः।
विद्युन्मतिः प्रिया तस्य पुत्री च तिलकावती ॥ ७ ॥
तां विलोक्य जगच्चेतो-रंजितां तिलकावतीम्।
प्रश्रेणिकस्तदासक्तो नृपो याचितवांस्तदा ॥ ८ ॥

पुत्राय तिलकावत्याः स्वराज्यं भो महीपते ।
दातव्यं च त्वया प्रोक्त्वा यमदण्डेन तेन वै ॥ ९ ॥
तस्मै तां स्वसुतां दत्वा तिलकादिवतीं सतीम् ।
यत्नेन प्रेषितो भूपः पश्चाद्राजगृहं पुरम् ॥ १० ॥
ततः कैश्चिद्दिनैः सौख्यं भुंजानस्य महीपतेः ।
पुत्रश्चिलातपुत्राख्य-स्तस्यां जातो महाभटः ॥ ११ ॥
एकदा च नरेन्द्रेण संविचार्येति मानसे ।
राजा मद्भूरिपुत्राणां मध्ये कोत्र भविष्यति ॥ १२ ॥
पृष्टो नैमित्तिको प्राह शृणु त्वं भो नरेश्वर ।
यः सिंहासनमासीनो भेरीं सन्ताडयन्मुदा ॥ १३ ॥
पायसं कुक्कुराणां च ददत्संभोक्ष्यते स्वयम् ।
अग्निदाहो तथा हस्ति-च्छत्रसिंहासनं शुभम् ॥ १४ ॥
शीघ्रं निस्सारयत्येव स ते राज्यश्रियः सुखम् ।
भोक्ता भविष्यति व्यक्तं सन्देहो न महामते ॥ १५ ॥
तच्छ्रुत्वा तत्परीक्षार्थं प्रश्रेणिकमहीभुजा ।
भोजनं सर्वपुत्रेभ्यो दत्वा मुक्ताश्च कुक्कुराः ॥ १६ ॥
तदा सर्वे कुमारास्ते नष्टाः शीघ्रं भयाकुलाः ।
श्रेणिकस्तु सुधीश्चारु सिंहासनमधिष्ठितः ॥ १७ ॥
निजान्ते भाजनान्युच्चै-र्धृत्वा सर्वाणि दूरतः ।
एकैकं भाजनं दत्वा कुक्कुराणां स्वयं पुनः ॥ १८ ॥
भुंक्ते स्म पायसं भेरीं ताडयंश्च भटोत्तमः ।
वह्निदाहे तथा हस्ति-च्छत्रसिंहासनं द्रुतम् ॥ १९ ॥

सुधीर्निस्सारयामास बुद्धिः कर्मानुसारिणी ।
संभविष्यति राजायं ततः प्रश्रेणिकः प्रभुः ॥ २० ॥
ज्ञात्वा चित्ते प्रयत्नार्थं प्रपञ्चेन विचक्षणः ।
कुक्कुरोच्छिष्टकं दोषं दत्वा तं तनयं शुभम् ॥ २१ ॥
पुरान्निस्सारयामास श्रेणिकं दोषवर्जितम् ।
भवन्ति भूतले नित्यं भूपाला गूढमंत्रकाः ॥ २२ ॥
ततः श्रीश्रेणिको धीमान्प्राप्तो मध्याह्निकेहनि ।
नन्दग्रामं तथा विप्रै-राज्यमान्यैर्मदोद्धतैः ॥ २३ ॥
तस्मान्निर्घाटितश्चापि परिव्राजकसन्मठे ।
कृत्वा तद्भोजनं तस्य गृहीत्वा विष्णुधर्मकम् ॥ २४ ॥
दक्षिणाभिमुखं पश्चा-च्चचालाथ कथान्तरम् ।
काञ्चीपुरे महाराजो वसुपालो विचक्षणः ॥ २५ ॥
वसुमत्यभिधा राज्ञी तयोः पुत्री बभूव च ।
सद्रूपयौवनोपेता वसुमित्रा गुणोज्वला ॥ २६ ॥
सोमशर्मा द्विजो मंत्री सोमश्रीब्राह्मणीप्रियः ।
तयोरभयमत्याख्या पुत्री चातिविचक्षणा ॥ २७ ॥
स मंत्री सोमशर्मा च गत्वा गंगादितीर्थकम् ।
पश्चाद्गेहं समागच्छन्मार्गे तेनैव वीक्षितः ॥ २८ ॥
प्रोक्तं च श्रेणिकेनेति विप्ररूपप्रधारिणा ।
अहो माम तव स्कन्धमारोहामि गुणोज्वल ॥ २९ ॥
मम स्कन्धं समारोह त्वकं चापि द्रुतं यतः ।
गम्यते तच्छ्रुतेस्तेन चिन्तितं ग्रहिलोस्त्ययम् ॥ ३० ॥

तथा मार्गे बृहद्ग्रामः श्रेणिकेन ह्रसो मतः ।
लघुग्रामो महानुक्तो यत्र भुक्तं सुभोजनम् ॥ ३१ ॥
धृतं वृक्षतले छत्रं मार्गे तत्संवृतं पुनः ।
पादत्राणं जले पादे धृतं हस्ते महापथि ॥ ३२ ॥
बद्धा नारी विमुक्ता वा कुट्यते चेति जल्पितम् ।
मृतोयं मृतकश्चापि जीवितो गच्छतीति वा ॥ ३३ ॥
शालिक्षेत्रं समालोक्य कुटुम्बिजनकेन च ।
एतत्किं भाक्षितं किं वा भक्ष्यते भो वद द्विज ॥ ३४ ॥
इत्यादिचेष्टितं मार्गे तं प्रकुर्वन्तमद्भुतम् ।
श्रेणिकं स द्विजो धृत्वा काञ्चीपुरबहिस्तदा ॥ ३५ ॥
स्वयं स्वगृहमायातो-भयमत्या प्रजल्पितः ।
पुत्र्या भो तात चैकाकी गतस्त्वं च समागतः ॥ ३६ ॥
तच्छ्रुत्वा सोमशर्मासौ जगौ भो पुत्रि मे पथि ।
आगच्छतो बटुश्चैको रूपवान्ग्रहिलो महान् ॥ ३७ ॥
मिलितः पुरबाह्ये स तिष्ठत्यत्र महामते ।
तत्समाकर्ण्य सा पुत्री संजगाद विचक्षणा ॥ ३८ ॥
कीदृशो ग्रहिलो सोपि भो पितश्च तदा द्विजः ।
सोमशर्मा जगौ सर्वं स्कन्धारोहणादिकम् ॥ ३९ ॥
श्रुत्वा तच्चेष्टितं कन्या तद्व्याख्यानं विधाय च ।
स्तोकं तैलं खलं तस्य प्रेषयामास मज्जने ॥ ४० ॥
याचिते भाजने चापि तदासौ कर्दमे सुधीः ।
गर्त्ताद्वयं विधायोच्चै-र्धृत्वा ते भाजने ददौ ॥ ४१ ॥

ततस्तया समाहूतः सोपि कर्दममार्गके ।
परीक्षार्थं जलं स्तोकं दत्तं तस्मै विदेशिने ॥ ४२ ॥
तेन तज्जलमादाय कर्दमं वंशकंब्ध्या ।
दूरीकृत्य सुधूर्त्तेन पादौ प्रक्षालितौ सुखम् ॥ ४३ ॥
तथा चक्रप्रवाले च प्रोतं सूत्रं स्वबुद्धितः ।
तच्चातुरीं समालोक्य ततोभयमती मुदा ॥ ४४ ॥
तं वरं श्रेणिकं चारु-विवाहविधिना द्रुतम् ।
स्वीचक्रे कृतपुण्यानां मांगल्यं च पदे पदे ॥ ४५ ॥
अथ कश्चिद् द्विजो धीमान्महाटव्यां दिगुप्सितः ।
जिनदत्ताभिधानस्य पार्श्वे श्रुत्वा जिनेशिनाम् ॥ ४६ ॥
धर्मं शर्माकरं योन्यः सोमशर्माभिधानकः ।
संन्यासेन मृतः प्राप्य स्वर्गं सौधर्मसंज्ञकम् ॥ ४७ ॥
तस्मादागत्य पुण्येन तत्र कांचीपुरे शुभे ।
श्रेणिकाभयमत्योश्च पुत्रोभयकुमारवाक् ॥ ४८ ॥
संजातः सुगुणोपेतश्चरमाङ्गो महाभटः ।
भाविमुक्तिवधूकान्तो वर्ण्यते केन भूतले ॥ ४९ ॥
अथ काञ्चीपुराधीशो वसुपालो गुणोज्वलः ।
गत्वा विजययात्रार्थं दृष्ट्वा तत्रैकमद्भुतम् ॥ ५० ॥
एकस्तंभसमुत्पन्नं प्रासादं श्रीजिनेशिनाम् ।
काञ्च्यां सम्प्रेषयामास लेखं श्रीसोमशर्मणः ॥ ५१ ॥
एकस्तंभोत्थितं चारु शर्मदं जिनमन्दिरम् ।
कार्यं त्वया प्रवेगेन तदासौ सोमशर्मवाक् ॥ ५२ ॥

तद्विज्ञानमजानंश्च चित्तेभूद्व्याकुलो महान् ।
पृष्ठा तत्कारणं तेन श्रेणिकेन महाधिया ॥ ५३ ॥
प्रासादः श्रीजिनेन्द्राणां कारितः सुमनोहरः ।
सद्विज्ञानं विना पुण्यैः प्राप्यते नैव भूतले ॥ ५४ ॥
आगतेन ततो राज्ञा दृष्ट्वा तं श्रीजिनालयम् ।
सन्तुष्टेन निजा पुत्री वसुमित्रा महोत्सवैः ॥ ५५ ॥
दत्ता श्रीवसुपालेन श्रेणिकाय गुणोज्वला ।
अतो राजगृहे जातं वक्ष्ये चान्यत्कथानकम् ॥ ५६ ॥
प्रश्रेणिको महाराजः सुधीर्वैराग्यमाश्रितः ।
दत्वा चिलातपुत्राय राज्यं जातो मुनीश्वरः ॥ ५७ ॥
ततश्चिलातपुत्रे च सर्वान्यायरते द्रुतम् ।
प्रधानैः श्रेणिकस्योच्चै-र्लेखः संप्रेषितस्तदा ॥ ५८ ॥
तं दृष्ट्वा श्रेणिकश्चापि प्रोक्त्वा भार्याद्वयं प्रति ।
पुरे राजगृहे ख्याते चारुपाण्डुकुटीं मुदा ॥ ५९ ॥
आगच्छेस्त्वमिति व्यक्तं स्वयं चागत्य वेगतः ।
पुराच्चिलातपुत्रं तं तस्मान्निर्घाट्य कण्टकम् ॥ ६० ॥
तत्र राज्ये महाप्राज्ये संस्थितो निजलीलया ।
भवेद्राज्यं समर्थस्य भूपतेर्नैव दुर्मतेः ॥ ६१ ॥
अथाभयकुमारेण पृष्टा माता क मे पिता ।
तच्छ्रुत्वाभयमत्याख्या जगौ पुत्र श्रृणु त्वकम् ॥ ६२ ॥
देशोत्र मगधे राज-गृहे पाण्डुकुटीतले ।
महाराज्यं प्रकुर्वाणः पिता ते तिष्ठति ध्रुवम् ॥ ६३ ॥

एतदाकर्ण्य पुत्रोसौ ततोभयकुमारवाक् ।
एकाकी कौतुकाच्छीघ्रं नन्दग्रामं समागतः ॥ ६४ ॥
नन्दग्रामे तदा पूर्व-निष्कासनमहाक्रुधा ।
निग्रहं कर्त्तुकामेन श्रेणिकेन महीभुजा ॥ ६५ ॥
आदेशः प्रेषितश्चेति यथा भो ब्राह्मणोत्तमाः ।
मृष्टतोयभृतं यूयं वटकूपं मनोहरम् ॥ ६६ ॥
शीघ्रं प्रेषयथात्रैव युष्माकं निग्रहोन्यथा ।
अस्माभिः क्रियते व्यक्तं तत्समाकर्ण्य ते द्विजाः ॥ ६७ ॥
संजाता व्याकुलाश्चित्ते ततोभयकुमारवाक् ।
पृष्ट्वा तत्कारणं सर्वं तेषां बुद्धिं ददौ सुधीः ॥ ६८ ॥
ततस्तद्वचनादेव ब्राह्मणैस्तुष्टमानसैः ।
श्रेणिकस्य महीभर्त्तु-र्विज्ञप्तिः प्रेषिता द्रुतम् ॥ ६९ ॥
अस्माभिर्भणितश्चापि कूपो नागच्छति ध्रुवम् ।
दृष्ट्वा पुरस्य बाह्येसौ संस्थितो भो महीपतेः ॥ ७० ॥
पुरुषस्य भवेत्स्त्री च-वशीकरणमुत्तमम् ।
तस्माद्देव भवद्ग्राम-स्थितोदुंबरकूपिका ॥ ७१ ॥
भवद्भिः प्रेष्यते चात्र यतस्तस्यास्तु पृष्ठतः ।
समागच्छति कूपोसौ तच्छ्रुत्वा श्रेणिक प्रभुः ॥ ७२ ॥
मौनं कृत्वा स्थितो युक्तं न धूर्तो गृह्यते सुखम् ।
तथान्यदा गजो राज्ञा संख्यार्थं प्रेषितस्ततः ॥ ७३ ॥
जले नावा स पाषाणै-स्तोलितो तेन धीमता ।
आदेशस्तु पुनस्तस्य समायातो महीपतेः ॥ ७४ ॥

कूपः पूर्वदिशिस्थोसौ कार्यो पश्चिमदिक्तटे ।
ग्रामस्तेन कृतः पूर्व-दिशिस्थो धूर्त्तचेतसा ॥ ७५ ॥
मेषको प्रेषितश्चापि दुर्बलो न महान्न च ।
यथा तथा प्रयत्नेन रक्षणीयो मम ध्रुवम् ॥ ७६ ॥
तदा तद्वचनेनोचै-र्ब्राह्मणैः सोपि मेषकः ।
चारयित्वा तृणं भूरि स्थापितो वृकसंन्निधौ ॥ ७७ ॥
याचितं गर्गरीसंस्थं कूष्माण्डं श्रेणिकेन च ।
संवद्धर्च गर्गरीमध्ये प्रेषितं तैश्च तद्द्रुतम् ॥ ७८ ॥
याचितायां रजोरज्वां प्रतिच्छन्दं प्रयाचितम् ।
इत्यादिके कृते राजा महाश्चर्यं गतस्ततः ॥ ७९ ॥
लेखं सम्प्रेषयामास श्रेणिकस्तुष्टमानसः ।
सोपि वैदेशिकश्चात्र प्रेषणीयो मदन्तिके ॥ ८० ॥
न रात्रौ न दिने नैव मार्गे चोन्मार्गके न च ।
श्रुत्वेत्यामंत्रणं सोपि तदाभयकुमारवाक् ॥ ८१ ॥
सन्ध्यायां शकटैकस्मिन्भागे स्थित्वाविचक्षणः ।
समागत्य पुरं राज-गृहं भूपसभावनौ ॥ ८२ ॥
सिंहासने प्रपञ्चेन स्थितं त्यक्त्वा नरं द्रुतम् ।
अंगरक्षकमध्यस्थं जनानंदप्रवीक्षणैः ॥ ८३ ॥
ज्ञात्वा श्रीश्रेणिकं भूपं ननाम विनयान्वितः ।
तदा श्रीश्रेणिकेनोचैः परमानन्दनिर्भरात् ॥ ८४ ॥
समालिंग्य प्रवेगेन स पुत्रः कुलदीपकः ।
महोत्सवशतैश्चापि पत्तने प्रकटाकृतः ॥ ८५ ॥

ततः काञ्चीपुरात्तेन राज्ञाहूता स्वमन्दिरम् ।
अभयादिमती सापि वसुमित्रा च कामिनी ॥ ८६ ॥
एवं पुत्रादिसंयुक्तः श्रेणिकोसौ महीपतिः ।
यावत्संतिष्ठति सौख्यं तावद्वक्ष्ये कथान्तरम् ॥ ८७ ॥
सिन्धुदेशे सुविख्याते विशालापत्तने शुभे ।
राजाभूच्चेटको धीमान्सद्दृष्टिर्जिनभक्तिभाक् ॥ ८८ ॥
तस्य राज्ञी सुभद्राख्या सती सद्रूपमण्डिता ।
तयोः सारगुणोपेता बभूवुः सप्त पुत्रिकाः ॥ ८९ ॥
तासामाद्याभवत्पुत्री पवित्रा प्रियकारिणी ।
तत्पुण्यं वर्ण्यते केन यत्पुत्रस्तीर्थकृद्गुणी ॥ ९० ॥
मृगावती द्वितीया च तृतीया सुप्रभा मता ।
प्रभावती चतुर्थी च चेलिनी पंचमी सुता ॥ ९१ ॥
ज्येष्ठा षष्ठी तथाऽवद्या चन्दना सप्तमी सती ।
यस्या नानोपसर्गेपि स्वशीले निश्चला मतिः ॥ ९२ ॥
स चेटको महाराजो पुत्रीस्नेहेन वीक्षितुम् ।
रूपाणि सर्वपुत्रीणां कारयामास पट्टके ॥ ९३ ॥
तस्मिन्निर्मापिते पट्टे चित्रकारेण धीमता ।
पश्यन् रूपाणि भूपोसौ चेलिन्या रूपकोरुके ॥ ९४ ॥
दृष्ट्वा बिन्दुं तदा चित्र-काराय कुपितो महान् ।
ततो नत्वा नृपं प्राह चित्रकारो विचक्षणः ॥ ९५ ॥
देव द्वित्रिचतुर्वारान्सप्त वारान्मयापि च ।
प्रमृष्टोयं पतत्येव बिन्दुरस्मिंश्च रूपके ॥ ९६ ॥

ईदृशं लाञ्छनं तत्र संभविष्यति मानसे ।
संविचार्येति भो भूप ततोसौ स्फोटितो न हि ॥ ९७ ॥
तच्छ्रुत्वा चेटको भूपः परमानन्दनिर्भरः ।
ददौ तस्मिन्महादानं सतां हर्षो न निष्फलः ॥ ९८ ॥
तदासौ नृपतिः श्रीमान्प्रीत्या देवार्चनक्षणे ।
तत्पट्टकं प्रसार्योच्चै-र्जिनबिम्बप्रसन्निधौ ॥ ९९ ॥
पूजां श्रीमज्जिनेन्द्राणां सर्वकल्याणदायिनीम् ।
करोत्येव महाभक्त्या भव्यचेतोनुरंजिनीम् ॥ १०० ॥
एकदा चेटकः सोपि केनचित्कारणेन च ।
स्वसैन्येन समागत्य राजा राजगृहं पुरम् ॥ १०१ ॥
बाह्योद्याने स्थितः स्नान-धौतवस्त्रपुरस्सरम् ।
श्रीमज्जिनान्समभ्यर्च्य तत्र स्थापितपट्टके ॥ १०२ ॥
क्षिप्तवान्कुसुमादिं च तद्दृष्ट्वा श्रेणिकः प्रभुः ।
तत्पार्श्ववर्त्तिनः प्राह किमेतदिति ते जगुः ॥ १०३ ॥
राज्ञोस्य पुत्रिकाः सप्त लिखिताश्चात्र पट्टके ।
तासु पुत्र्यश्चतस्रस्तु परिणीता गुणोज्वलाः ॥ १०४ ॥
द्वे कन्ये चेलिनी ज्येष्ठे संजाते नवयौवने ।
चन्दना सप्तमी बाला तिस्रः सन्ति गृहे पितुः ॥ १०५ ॥
तच्छ्रुत्वा श्रेणिको राजा तयोरासक्तमानसः ।
भूत्वा स्वमंत्रिणो वार्त्ता जगौ कन्याद्वयेच्छया ॥ १०६ ॥
ततस्ते मंत्रिणश्चापि नत्वाभयकुमारकम् ।
प्राहश्चेटकभूपस्य कन्यायुग्मं मनोहरम् ॥ १०७ ॥

पित्रा ते याचितः सोपि न दत्ते गतयौवनात् ।
ध्रुवं कार्यमिदं चापि कर्त्तव्यं क्रियतेत्र किम् ॥ १०८ ॥
श्रुत्वाभयकुमारोसौ मंत्रिवाक्यं विचक्षणः ।
नैव चिन्तासमर्थोहं सर्वकार्यविधायकः ॥ १०९ ॥
इत्युक्त्वा स्वपितुर्दिव्यं रूपमालिख्य पट्टके ।
स्वयं वणिग्वरो भूत्वा वाणिज्येन प्रवेगतः ॥ ११० ॥
विशालाख्यां पुरीं गत्वा महोपायेन पट्टकम् ।
कन्ययोः सम्प्रदर्श्योच्चै-स्तं चित्तं श्रेणिकोपरि ॥ १११ ॥
कृत्वा सुरंगिकां मार्गे गृहीत्वा ते सुकन्यके ।
संचचाल तदा सा च चेलिनी धूर्त्तमानसा ॥ ११२ ॥
त्यक्त्वाभरणवाक्येन ज्येष्ठां सद्रूपशालिनीम् ।
स्वयं तेन समं प्राप्य पुरं राजगृहं मुदा ॥ ११३ ॥
श्रेणिकस्य महीभर्त्तु-र्महोत्सवशतैर्द्रुतम् ।
राज्ञी शिरोमणिर्जाता स्वपुण्यात्प्राणवल्लभा ॥ ११४ ॥
अथासौ श्रेणिको राजा विष्णुभक्तोतिमुग्धधीः ।
चेलिनी श्रीजिनेन्द्रोक्त-सारधर्मे रता सती ॥ ११५ ॥
ततस्तयोर्द्वयोर्नित्यं स्वस्वधर्मप्रशंसने ।
विवादः संभवत्येव तथान्यदिवसे प्रभुः ॥ ११६ ॥
श्रेणिकश्चेलिनीं प्राह भो प्रिये कुलयोषिताम् ।
पतिरेव भवेद्देवस्ततो मे वचनाद्ध्रुवम् ॥ ११७ ॥
भोजनं विष्णुभक्तानां सद्गुरूणां प्रदीयते ।
त्वया सद्विनयेनेति तच्छ्रुत्वा चेलिनी सती ॥ ११८ ॥

ददामि भोजनं तेषा-मित्युक्त्वाहूय मण्डपे ।
गौरवात्स्थापयामास सर्वान्भागवतान्मुदा ॥ ११९ ॥
तत्र ते कपटोपेताः शठा ध्यानेन संस्थिताः ।
पृष्टास्तया भवन्तस्तु प्रकुर्वन्ति किमत्र भो ॥ १२० ॥
तदाकर्ण्य जगुस्तेपि त्यक्त्वा देहं मलैर्भृतम् ।
जीवं विष्णुपदं नीत्वा तिष्ठामो देवि सौख्यतः ॥ १२१ ॥
ततस्तया महादेव्या चेलिन्या सोपि मण्डपः ।
प्रज्वालितोग्निना नष्टा शीघ्रं ते वायसा यथा ॥ १२२ ॥
राज्ञा रुष्टेन सा प्रोक्ता भक्तिर्नास्ति यदि ध्रुवम् ।
किं ते मारयितुं युक्तं कष्टादेतांस्तपस्विनः ॥ १२३ ॥
तयोक्तं देव भो त्यक्त्वा कुत्सितं स्ववपुर्द्रुतम् ।
एते विष्णुपदं प्राप्ताः सारसौख्यसमन्वितम् ॥ १२४ ॥
नित्यं तत्रैव तिष्ठन्ति किमत्रागमनेन च ।
इति ज्ञात्वोपकाराय मयेदं निर्मितं प्रभो ॥ १२५ ॥
अस्यैव मम वाक्यस्य निश्चयार्थं महीपते ।
सद्दृष्टान्तकथां वक्ष्ये श्रूयतां परमादरात् ॥ १२६ ॥
वत्सदेशे सुविख्याते कौशाम्बीपत्तने प्रभुः ।
प्रजापालो महाराज्यं करोति स्म स्वलीलया ॥ १२७ ॥
श्रेष्ठीसागरदत्ताख्यो वसुमत्याख्रिया युतः ।
तत्रैव च समुद्रादि-दत्तश्रेष्ठी परोभवत् ॥ १२८ ॥
भार्या समुद्रदत्ताख्या श्रेष्ठिनश्च तयोर्द्वयोः ।
महास्नेहवशादुच्चै-र्वाचा बन्धोभवद्ध्रुवम् ॥ १२९ ॥

आवयोः पुत्रपुत्र्यौ यौ संजायेते परस्परम् ।
तयोर्विवाहः कर्त्तव्यो यतः प्रीतिर्भवेत्सदा ॥ १३० ॥
ततः सागरदत्तस्य वसुमत्यां सुतोजनि ।
वसुमित्राभिधः केन कर्मणासौ वशीकृतः ॥ १३१ ॥
रात्रौ दिव्यनरो भूत्वा दिने सर्पो भयानकः ।
तिष्ठति स्म गृहे चेति विचित्रा संसृतेः स्थितिः ॥ १३२ ॥
तथा समुद्रदत्तस्य नागदत्ता सुताभवत् ।
तस्यां समुद्रदत्तायां रूपलावण्यमण्डिता ॥ १३३ ॥
तेनासौ वसुमित्रेण परिणीता गुणोज्वला ।
नैव वाचा चलत्वं च सतां कष्टशतैरपि ॥ १३४ ॥
ततश्च वसुमित्रोसौ निशायां निजलीलया ।
धृत्वा पिट्टारके नित्यं कष्टं सर्पशरीरकम् ॥ १३५ ॥
भूत्वा दिव्यनरो नाग-दत्तया सह सर्वदा ।
भुंक्ते भोगान्मनोभीष्टान्विचित्रं कर्मचेष्टितम् ॥ १३६ ॥
एकदा यौवनाक्रान्तां नागदत्तां विलोक्य च ।
जगौ समुद्रदत्ता सा पुत्रीस्नेहेन दुःखिता ॥ १३७ ॥
हा विधेश्चेष्टितं कष्टं कीदृशी मे सुतोत्तमा ।
वरश्च कीदृशो जातो भीतिकारी भुजंगमः ॥ १३८ ॥
तच्छ्रुत्वा नागदत्ता सा भो मातर्मा विसूरय ।
समुद्धीर्येति वृत्तान्तं स्वभर्त्तुः संजगाद च ॥ १३९ ॥
तदाकर्ण्य समुद्रादि-दत्ता गत्वा सुतागृहम् ।
रात्रौ पिट्टारके मुक्त्वा सर्पदेहं तदा द्रुतम् ॥ १४० ॥

धृत्वा मनुष्यसद्रूपं निर्गच्छन्तं विलोक्य तम् ।
सा प्रच्छन्नं तदा भस्मी-चक्रे पिट्टारकं सती ॥ १४१ ॥
सन्दाहिते तथा तस्मिन्वसुमित्रो गुणोज्वलः ।
भुंजानो विविधान्भोगान्सदामौ पुरुषः स्थितः ॥ १४२ ॥
तथैते देव तिष्ठन्ति विष्णुलोके निरन्तरम् ।
एतदर्थं मयारब्धो देहदाहस्तपास्विनाम् ॥ १४३ ॥
तन्निशम्य महीनाथः श्रेणिकश्चेलिनीवचः ।
समर्थो नोत्तरं दातुं कोपान्मौनेन संस्थितः ॥ १४४ ॥
अथैकदा नराधीशो गतः पापर्द्धिहेतवे ।
तत्रातापेन योगस्थं यशोधरमहामुनिम् ॥ १४५ ॥
समालोक्य महाकोपान्ममेमं विघ्नकारिणम् ।
मारयामीति संचिन्त्य मुक्तवान्दुष्टकुक्कुरान् ॥ १४६ ॥
गत्वा पञ्चशतान्युच्चैः कुक्कुरास्तेपि निष्ठुराः ।
यशोधरमुनेस्तस्य तपो माहात्म्यतो द्रुतम् ॥ १४७ ॥
कृत्वा प्रदक्षिणां पाद-मूले तस्थुः सुभक्तितः ।
क्रोधान्धेन पुनस्तेन बाणा मुक्ताः सुदारुणाः ॥ १४८ ॥
शरास्तेपि बभूवुश्च पुष्पमालाः सुनिर्मलाः ।
प्रभावो मुनिनाथस्य महान्केनात्र वर्ण्यते ॥ १४९ ॥
तस्मिन्काले महीपालः सप्तमं नरकं प्रति ।
त्रयस्त्रिंशत्समुद्रायु-र्बन्धं चक्रे कुकष्टदम् ॥ १५० ॥
ततः प्रभावमालोक्य मुनेः पादाम्बुजद्वयम् ।
प्रणम्य परया भक्त्या त्यक्त्वा दुष्टाशयं नृपः ॥ १५१ ॥

पुण्येन पूर्णयोगस्य यशोधरमहामुनेः ।
वाक्यात्तत्वं जिनेन्द्रोक्तं सुरेन्द्राद्यैः समर्चितम् ॥ १९२ ॥
संश्रुत्वोपशमं सार-सम्यक्त्वं स गृहीतवान् ।
तदायुश्चतुरशीति-गुणं वर्षसहस्रकम् ॥ १९३ ॥
संचक्रे प्रथमे शीघ्रं नरके प्रस्तरादिमे ।
किं न स्याद्भव्यमुख्यानां शुभं सद्दर्शनागमे ॥ १९४ ॥
ततः पादान्तिके चित्र-गुप्तनाममहामुनेः ।
क्षायोपशमकं प्राप्य सम्यक्त्वं भक्तिनिर्भरः ॥ १९५ ॥
वर्द्धमानजिनेन्द्रस्य पादमूले जगद्गुरोः ।
गृहीत्वा शुद्धसम्यक्त्वं क्षायिकं मुक्तिदायकम् ॥ १९६ ॥
स्वीचक्रे तीर्थकृन्नाम-त्रैलोक्येशैः समर्चितम् ।
तस्माच्छ्रीश्रेणिको राजा तीर्थेशः संभविष्यति ॥ १९७ ॥
ततः सम्यक्त्वसद्रत्नं स्वर्गमोक्षसुखप्रदम् ।
अन्यैश्चापि महाभव्यैः पालनीयं जगद्धितम् ॥ १९८ ॥
यद्देवेन्द्रनरेन्द्रशर्मजनकं दुःखौघनिर्नाशकं
सम्यक्त्वं शिवसौख्यबीजमतुलं विद्वज्जनैः सेवितम् ।
तच्छ्रीमज्जिनदेवभाषितमहातत्वार्थसारे रुचिः
प्रोक्तं श्रीश्रुतसागरैर्मुनिवरैर्भव्याः श्रयन्तु श्रिये ॥१९९॥

इति कथाकोशे शुद्धसम्यक्त्वप्राप्तमहामण्डलेश्वर-श्रीश्रेणिकमहाराजाख्यानं समाप्तम् ।

१०८-रात्रिभुक्तित्यागफलाख्यानम् ।

प्रणम्योच्चैर्जिनं देवं भारतीं सद्गुरुं क्रमात् ।
रात्रिभुक्तिपरित्याग-फलं वक्ष्ये गुणोज्वलम् ॥ १ ॥
निशाभुक्तिं त्यजन्त्येव ये भव्या धर्महेतवे ।
तेषां सतां महासौख्यं भवेल्लोकद्वये सदा ॥ २ ॥
कीर्त्तिः कान्तिर्महाशान्तिः सम्पदा विविधाः सदा ।
दीर्घायुः स्यात्सुखोपेतं रात्रिभोजनवर्जनात् ॥ ३ ॥
दारिद्र्यपीडिता नित्य-मन्धाः पुत्रादिवर्जिताः ।
महारोगशतक्रान्ताः स्युर्नरा निशिभोजनात् ॥ ४ ॥
पतत्कीटपतंगादे-र्भक्षणान्निशिभोजनम् ।
त्याज्यं पापप्रदं सद्भि-र्मांसव्रतविशुद्धये ॥ ५ ॥
दिवसस्य मुखे चान्ते मुक्त्वा द्वे द्वे सुधार्मिकैः ।
घटिके भोजनं कार्यं श्रावकाचारचञ्चुभिः ॥ ६ ॥

उक्तंच श्रीसमन्तभद्रपादैः—

अह्नोमुखेऽवसाने च यो द्वे द्वे घटिके त्यजेत् ।
निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥

ताम्बूलं सुजलं किञ्चि-दौषधं दोषवर्जितम् ।
मुक्त्वा कष्टेपि सन्त्याज्यं रात्रौ सद्भिः फलादिकम् ॥ ७ ॥
ये त्यजन्ति सदाहारं रात्रौ भव्याश्चतुर्विधम् ।
स्यात्षण्मासोपवासोत्थं तेषां संवत्सरे शुभम् ॥ ८ ॥
अथ श्रीजिनसूत्रोक्तां तद्दृष्टान्तकथां ब्रुवे ।
श्रीमत्प्रीतिंकरस्योच्चैः संक्षेपेण सतां श्रिये ॥ ९ ॥

इहैव भरतक्षेत्रे देशे मगधसंज्ञके ।
नाना सत्संपदाकारि-जिनधर्मविराजिते ॥ १० ॥
सुप्रतिष्ठपुरे जातो जयसेनो महीपतिः ।
धार्मिको न्यायशास्त्रज्ञो स्वप्रजापालने स्थितः ॥ ११ ॥
श्रेष्ठी कुबेरदत्ताख्यो जिनपादाब्जयो रतः ।
तत्प्रिया धनमित्राख्या संजाता धर्मवत्सला ॥ १२ ॥
एकदा तौ महाभक्त्या दत्वान्नं प्राशुकं शुभम् ।
नाम्ना सागरसेनाय मुनये ज्ञानचक्षुषे ॥ १३ ॥
भो स्वामिन्नावयोः पुत्रो भविष्यति न वा सुधीः ।
नोचेद्दीक्षां गृहीष्यावो जैनीं पापप्रणाशिनीम् ॥ १४ ॥
तस्य पादौ प्रणम्येति प्रश्नं संचक्रतुस्ततः ।
मुनिः प्राह महाभाग्यो युवयोस्तनुजो महान् ॥ १५ ॥
चरमाङ्गधरो भव्यो भव्यसन्दोहतारकः ।
भविष्यतीति भो श्रेष्ठिन्भवद्वंशशिरोमणिः ॥ १६ ॥
श्रुत्वा तौ मुनिनाथोक्तं परमानन्दमापतुः ।
न भवेत्कस्य वानन्दः सद्गुरोर्वचनामृतात् ॥ १७ ॥
ततस्तयोर्जिनेन्द्राणां महास्नपनपूर्वकम् ।
कल्याणदायिनीं पूजां पात्रदानं सुखप्रदम् ॥ १८ ॥
कुर्वतोः सुखतः कैश्चिन्मासैर्जातः सुतोत्तमः ।
तदानन्दः स्वबन्धूना-मभूत्प्राप्ते निधौ यथा ॥ १९ ॥
तद्दर्शनात्समुत्पन्ना सर्वेषां प्रीतिरद्भुता।
प्रोक्तः प्रीतिंकरो नाम्ना तातायैः स महामुदा ॥ २० ॥

ततोसौ स्वगुणैः सार्द्धं प्राप्तानेकमहोत्सवः ।
वृद्धिं सम्प्राप्तवानुच्चै-र्द्वितीयेन्दुरिवामलः ॥ २१ ॥
रूपेण जितकन्दर्पः सौभाग्यजितभूतलः ।
चरमाङ्गधरत्वाच्च तद्बलं केन वर्ण्यते ॥ २२ ॥
जातेथ पञ्चमे वर्षे स तस्मै गुरवे मुदा ।
पित्रा समर्पितो भक्त्या पठनार्थं महोत्सवैः ॥ २३ ॥
कैश्चित्संवत्सरैः सोपि नानाशास्त्रमहार्णवम् ।
समुत्तीर्णः सुधीः स्थित्वा गुरुसेवातरण्डके ॥ २४ ॥
ततोसौ प्राप्तसद्विद्यो महाशास्त्रोपदेशनम् ।
श्रावकाणां करोति स्म धर्मसंवृद्धिहेतवे ॥ २५ ॥
तथाभूतं तमालोक्य स राजा जयसेनवाक् ।
पूजयामास सत्प्रीत्या कुमारं कनकादिभिः ॥ २६ ॥
एकदासौ पितुर्गेहे कुमारः प्रौढयौवनः ।
सत्यां सुसम्पदायां च यावन्नोपार्जयाम्यहम् ॥ २७ ॥
महद्धनं स्वयं तावन्न कुर्वे पाणिपीडनम् ।
संचिन्त्येति महामानो गत्वा द्वीपान्तरं मुदा ॥ २८ ॥
नाना रत्नादिकं द्रव्यं समादाय विभूतिभिः ।
सुखेन गृहमायातः पुण्येन सुलभाः श्रियः ॥ २९ ॥
ततस्तस्मै सुपुण्याय स भूपः परमादरात् ।
पृथिवीसुन्दरीं नाम्ना स्वपुत्रीं पुण्यशालिनीम् ॥ ३० ॥
अर्द्धराज्यं निजं प्राज्यं जयकोलाहलस्वनैः ।
द्वीपान्तरात्समायातां कन्यामन्या वसुन्धराम् ॥ ३१ ॥

अन्याश्चापि वणिक्पुत्रीः कल्याणविधिना ददौ ।
प्रीतिंकरकुमाराय विभूत्या गुणशालिने ॥ ३२ ॥
तथा राज्यादिसम्प्राप्तेर्ज्ञातव्यं कारणं महत् ।
श्रीमत्महापुराणे च विस्तरेण बुधोत्तमैः ॥ ३३ ॥
अथ प्रीतिंकरो धीमान्प्राप्य राज्यादिसम्पदाः ।
स्वपुण्येन समानीता भुंजानः सुतरां सुखम् ॥ ३४ ॥
ददत्पात्राय सद्दानं नित्यं सप्तगुणान्वितः ।
महासौख्याकरं प्रीत्या नवपुण्यैर्विराजितम् ॥ ३५ ॥
पूजां श्रीमज्जिनेन्द्राणां महास्नपनपूर्वकम् ।
कुर्वन्विध्वस्तदुर्लेश्यां स्वर्मोक्षसुखकारिणीम् ॥ ३६ ॥
जिनप्रासादविम्बादि-सप्तक्षेत्राणि तर्पयन् ।
शमशस्यप्रदान्युच्चैः स्ववित्तामृतवृष्टिभिः ॥ ३७ ॥
तन्वन्परोपकारं च यथायोग्यं विचक्षणः ।
निजशीलसमायुक्तो विद्वद्गोष्ठीषु तत्परः ॥ ३८ ॥
इत्यादिश्रीजिनेन्द्रोक्त-धर्मसेवासमग्रधीः ।
संस्थितः सुखतो नित्यं स्वप्रजाः प्रतिपालयन् ॥ ३९ ॥
चिरं यावत्तदा तस्मिन्संन्यासविधिना सुखम् ।
मुनौ सागरसेनाख्ये प्राप्ते लोकान्तरं शुभम् ॥ ४० ॥
ततो मनोहरोद्याने चारणौ शर्मकारिणौ ।
ऋजुमत्याख्यमत्यन्त-विपुलौ मुनिसत्तमौ ॥ ४१ ॥
समागत्य स्थितौ सौख्यं तदाकर्ण्य सुपुण्यवान् ।
गत्वा तत्र महाभूत्या भव्यसंत्रसमन्वितः ॥ ४२ ॥

जलाद्यैरष्टभिर्द्रव्यैः समभ्यर्च्य तयोः क्रमात् ।
भक्त्या प्रणम्य योगीन्द्रौ तौ तपोरत्नसागरौ ॥ ४३ ॥
सद्धर्मं पृष्टवानुच्चै-र्विनयानम्रमस्तकः ।
ततो ज्येष्ठमुनिः प्राह गंभीरमधुरध्वनिः ॥ ४४ ॥
श्रृणु त्वं भो महाभव्य धर्मो हि द्विविधो मतः ।
मुनिश्रावकभेदेन जिनेन्द्राणां जगद्धितः ॥ ४५ ॥
महाधर्मो मुनीन्द्राणां पूर्वः स्वपरतारकः ।
उत्तमादिक्षमादिश्च दशलाक्षणिको भवेत् ॥ ४६ ॥
श्रावकाणां तथा धर्मं श्रृणु प्रीतिंकर ब्रुवे ।
स्वर्गादिशर्मदं पूत-मपवर्गस्य कारणम् ॥ ४७ ॥
तत्राद्यं सारसम्यक्त्वं पालनीयं बुधोत्तमैः ।
अष्टाङ्गादिप्रभेदोक्त-मुक्तिबीजं सुखप्रदम् ॥ ४८ ॥
मिथ्यात्वं दूरतस्त्याज्यं कान्तिवद्धीधनैः सदा ।
येन बद्धो भवेज्जीवो भवभ्रमणदुःखभाक् ॥ ४९ ॥
तत्त्वं जानीहि मिथ्यात्वं विपरीतं जिनेशिनाम् ।
तत्त्वेभ्यो यन्महाभव्य नानादुःखशतप्रदम् ॥ ५० ॥
तथा श्रीमज्जिनेन्द्रोक्त-शास्त्राणां श्रवणेन च ।
मतिर्दर्पणवत्कार्या सदा शुद्धा विचक्षणैः ॥ ५१ ॥
मद्यमांसमधु त्याज्यं सहोदुम्बरपञ्चकम् ।
यद्भक्षणाद्भवेत्प्राणी दुर्गतेर्दुःखभाजनम् ॥ ५२ ॥
अणुव्रतानि पञ्चैव सार्द्धं त्रैधा गुणव्रतैः ।
शिक्षाव्रतानि चत्वारि पालनीयानि पण्डितैः ॥ ५३ ॥

रात्रिभोजनचर्मस्थ-हिंगुतोयघृतादिकम् ।
संत्याज्यं सुधिया नित्यं मांसव्रतविशुद्धये ॥ ५४ ॥
व्यसनानि तथा सप्त हेयान्युच्चैः सतां सदा ।
कुलजातिधनस्फीति-क्षयकारीणि देहिनाम् ॥ ५५ ॥
कन्दमूलं ससन्धानं नवनीतं च वर्जयेत् ।
महायत्नो विधेयो हि जलानां गालने बुधैः ॥ ५६ ॥
नित्यं पात्राय सद्दानं देयं भक्त्या सुभाक्तिकैः ।
आहारादिचतुर्भेदं नानाशर्मशतप्रदम् ॥ ५७ ॥
पात्रं तु त्रिविधं ज्ञेयं मुनिश्रावकदृष्टिभाक् ।
तेषां दानं फलत्युच्चैः सत्सुखं वटबीजवत् ॥ ५८ ॥
कार्या श्रीमज्जिनेन्द्राणां पूजा स्वर्मोक्षदायिनी ।
तोयाद्यैः श्रावकैर्नित्य-मभिषेकपुरस्सरा ॥ ५९ ॥
सत्तोयेक्षुरसाद्यैर्ये कृत्वा भक्त्या सुचिन्तनम् ।
अर्चयन्ति जिनाकारां-स्ते लभन्ते सुरार्चनम् ॥ ६० ॥
जिनसप्ताकृतीनां च विधिः स्याच्छर्मणां निधिः ।
तत्प्रतिष्ठा तयोर्यात्रा दुर्गतिच्छेदकारिणी ॥ ६१ ॥
इत्यादिधर्मसद्भावं समाश्रित्य सुखार्थिभिः ।
अन्ते सल्लेखना साध्या जिनपादाब्जचिन्तनैः ॥ ६२ ॥
श्रुत्वेति मुनिनाथोक्तं द्विधा धर्मं सुखप्रदम् ।
भव्यास्ते तं समादाय जाता धर्मे तरां रताः ॥ ६३ ॥
पुनः प्रीतिंकरो भक्त्या नत्वा तं मुनिपुङ्गवम् ।
ब्रूहि भो करुणासिन्धो पूर्वजन्मेति सोवदत् ॥ ६४ ॥

तच्छ्रुत्वा स मुनिः प्राह संज्ञानमयलोचनः ।
सुप्रतिष्ठपुरेत्रैव सद्वने मुनिसत्तमः ॥ ६५ ॥
पुरा सागरसेनाख्यः समायातस्तपोनिधिः ।
तं वन्दितुं समागत्य सर्वे राजादयो मुदा ॥ ६६ ॥
भेरीमृदंगकंसाल-महानादेन भक्तितः ।
समभ्यर्च्य मुनेः पादौ स्तुत्वा नत्वा पुरं ययुः ॥ ६७ ॥
तदा वादित्रसन्नादं श्रुत्वा कोयं जनो मृतः ।
पत्तनेत्र परिक्षिप्त्वा तं पौराः स्वगृहं गताः ॥ ६८ ॥
अहं तं भक्षयिष्यामि संचिन्त्येति स्वमानसे ।
जम्बुको मृतकासक्तः समायातोति पापधीः ॥ ६९ ॥
तमागच्छन्तमालोक्य स मुनिर्ज्ञानवीक्षणः ।
भव्योयं व्रतमादाय मुक्तिमाशु गमिष्यति ॥ ७० ॥
इति ज्ञात्वा सुकारुण्या-दवोचद्रे शृगालक ।
त्वं पापादीदृशो जातो मुक्त्वा धर्मं जिनेशिनाम् ॥ ७१ ॥
अद्यापि मृतकासक्तो धिग्धिक्ते मूढ चेष्टितम् ।
मुञ्च मुञ्च महापापं यावन्नरकभूमिषु ॥ ७२ ॥
पतितोसि न पापेन तावत्त्वं कुरु रे शुभम् ।
स गोमायुस्तदाकर्ण्य मुनेर्वाक्यं महाहितम् ॥ ७३ ॥
चित्तं मे स्वामिना ज्ञातं शान्तो भूत्वेति संस्थितः ।
पुनर्जगाद योगीन्द्रो मत्वा तस्य प्रशान्तताम् ॥ ७४ ॥
व्रतेन्येस्मिन्समर्थोसि नैव त्वं मांसलम्पटः ।
ग्रहाणेदं व्रतं सारं रात्रिभोजनवर्जनम् ॥ ७५ ॥

नित्यं सौख्यप्रदं पूतं सतां चेतोनुरंजनम् ।
श्रुत्वेति जम्बुकः सोपि साधुवाक्यं जगद्धितम् ॥ ७६ ॥
त्रिः परीत्य मुनिं भक्त्या तस्मादादाय तद्व्रतम् ।
मद्यमांसादिकं पश्चा-त्त्यक्तवान्पुण्यवांस्तराम् ॥ ७७ ॥
ततः कालं नयत्येवं कश्चिच्छुद्धाशनेन च ।
यावत्संतोषभावेन नित्यं पादौ मुनेः स्मरन् ॥ ७८ ॥
एकदा तपसा क्षीणः शुष्काहारं स जम्बुकः ।
भुक्त्वा महातृषाक्रान्त-स्तोयपानाय कूपकम् ॥ ७९ ॥
संप्रविश्य सुधीः सन्ध्या-काले सोपानमार्गतः ।
दृष्ट्वा कूपे तमो गाढं सूर्योस्तं गतवानिति ॥ ८० ॥
मत्वा तथां तृषाक्रान्तो बहिरागत्य भास्करम् ।
दृष्ट्वा पुनः प्रविश्यैवं कांश्चिद्वारान्गतागतम् ॥ ८१ ॥
कृत्वा तत्र रविं नीत्वा तमस्तं स्वव्रते दृढः ।
रात्रौ तृष्णाग्निसन्तप्तो विशुद्धपरिणामभाक् ॥ ८२ ॥
स्मरन्निजगुरुं पूतं संसारांभोधितारणम् ।
मृत्वा तेनात्र पुण्येन त्वं जातोसि विचक्षणः ॥ ८३ ॥
पुत्रः श्रीमत्कुबेरादि-दत्ताख्यधनमित्रयोः ।
नाम्ना प्रीतिंकरो धीमा-न्नानासम्पद्विराजितः ॥ ८४ ॥
चरमाङ्गधरो धीरो रूपलावण्यमण्डितः ।
तस्माद्भो भव्य कर्त्तव्यं कष्टेपि व्रतरक्षणम् ॥ ८५ ॥
तच्छ्रुत्वा बहवो भव्या मुनीन्द्रोक्तं सुशर्मदम् ।
धर्मे श्रीमज्जिनेन्द्रोक्ते संसक्ता भक्तितस्तराम् ॥ ८६ ॥

तथा प्रीतिंकरः सोपि स्वभवान्तरमद्भुतम् ।
श्रुत्वा संवेगमासाद्य स्तुत्वा धर्मं जिनेशिनाम् ॥ ८७ ॥
प्रीत्या प्रणम्य तौ साधू निजात्मपरतारकौ ।
संस्मरन्व्रतमाहात्म्यं सुधीः स्वगृहमागतः ॥ ८८ ॥
ततस्त्रिविधवैराग्यं प्राप्य प्रीतिंकरो महान् ।
संसारमस्थिरं ज्ञात्वा भोगान्दुःखप्रदान्भुवि ॥ ८९ ॥
शरीरं मलसन्दोहं महापूति परिक्षयि ।
सम्पदां चपलां मत्वा चंचलामिव मोहिनीम् ॥ ९० ॥
पुत्रमित्रकलत्रादि-सर्वं बुद्ध्वात्मनः पृथक् ।
त्यक्त्वा मोहमहाजालं भवभ्रमणकारणम् ॥ ९१ ॥
श्रीमज्जिनेचन्द्राणां महास्नपनपूर्वकम् ।
कृत्वा पूजां लसद्भक्त्या सर्वकल्याणदायिनीम् ॥ ९२ ॥
दत्वा दानं यथायोग्यं स्वलक्ष्मीं स्वसुताय च ।
दत्वा प्रियंकराख्याय विधिना न्यायतत्ववित् ॥ ९३ ॥
बन्धूनापृच्छ्य सद्वाक्यैः कैश्चिद्बन्धुजनैः सह ।
गत्वा राजगृहं प्राप्य वर्द्धमानजिनेशिनः ॥ ९४ ॥
पार्श्वे शक्रादिभिः सेव्यं भक्त्या नत्वा तमद्भुतम् ।
दीक्षां जैनीं जगत्पूज्यां संजग्राह शिवप्रदाम् ॥ ९५ ॥
महत्तपस्ततः कृत्वा रत्नत्रयविशुद्धिभाक् ।
शुक्लध्यानाग्निना दग्ध्वा घातिकर्मचतुष्टयम् ॥ ९६ ॥
केवलज्ञानमुत्पाद्य लोकालोकप्रकाशकम् ।
इन्द्रनागेचन्द्रार्क-खेचरेन्द्रनरार्चितः ॥ ९७ ॥

जैनधर्मामृतैर्वाक्यै-र्जगत्तापप्रहारिभिः ।
भव्यान्सम्बोध्य सन्मार्गे कृत्वा शर्मप्रभागिनः ॥ ९८ ॥
शेषकर्माणि निर्मूल्य भूत्वा सोष्टमहागुणी ।
मुक्तिं प्रीतिंकरः स्वामी सम्प्राप्तो मेस्तु शान्तये ॥ ९९ ॥
इति प्रीतिंकरस्वामि-सच्चरित्रं जगद्धितम् ।
अस्माकं भवतां भव्या भूयात्संज्ञानहेतवे ॥ १०० ॥
जिनपतिकथितं सद्धर्मलेशं श्रितोपि
प्रवरनरभवं सम्प्राप्य गोमायुरुच्चैः ।
विपुलतरसुखानि प्राप्तवान्मुक्तिलक्ष्मीं
तदिह कुरुत भव्याः सारजैनेन्द्रधर्मम् ॥ १०१ ॥

इति कथाकोशे रात्रिभुक्तित्यागफलप्राप्तप्रीतिंकर-स्वामिन आख्यानं समाप्तम् ।

१०९-पात्रदानाख्यानम् ।

श्रीमत्तीर्थकरान्नत्वा वृषभादीन् जगद्गुरून् ।
सतां तान्प्रियकारिण्याः पात्रदानकथां ब्रुवे ॥ १ ॥
श्रीमज्जिनेन्द्रचन्द्रा-स्यात्संभवा पूतभारती ।
भवत्वाशु महाज्ञान-सिन्धोः पाराय मे सती ॥ २ ॥
स सम्यग्दर्शनज्ञान-वृत्तरत्नापरिग्रहान् ।
निर्ग्रन्थान्भक्तितो वन्दे भुक्तिमुक्तिप्रदान् मुनीन् ॥ ३ ॥
आहारौषधसच्छास्त्रा-भयदानप्रभेदतः ।
प्राहुश्चत्वारि दानानि चतुराः पूर्वसूरयः ॥ ४ ॥

इतिदानादिसिद्धानि पवित्राणि जगत्रये ।
पात्रेषु योजितान्युच्चैः फलन्ति विपुलं फलम् ॥ ५ ॥
वटबीजं यथा चोप्तं युक्त्या सन्मृष्टभूमिषु ।
सुच्छायं फलति व्यक्तं पात्रदानं तथा सुखम् ॥ ६ ॥
एकवाप्या यथा नीरं नाना स्वादुप्रदं भवेत् ।
तरुभेदे तथा पात्र-भेदे दानं फलप्रदम् ॥ ७ ॥
पात्रं जिनाश्रयी चापि वरं नान्ये सहस्रशः ।
एककल्पतरुः सेव्यः श्रेयसे न परद्रुमाः ॥ ८ ॥
उत्कृष्टं मुनिनाथश्च मध्यमं श्रावकस्तथा ।
ज्ञेयं पात्रं जघन्यं तु सदृष्टिर्जिनभक्तिभाक् ॥ ९ ॥
इति त्रिविधपात्रेभ्यो दत्वा दानं सुधार्मिकैः ।
प्राप्यते किल यत्सौख्यं कथं व्यावर्ण्यते मया ॥ १० ॥
सुकान्तिकीर्तिमारोग्यं रूपसौभाग्यमद्भुतम् ।
पुण्यं सौख्यतरोर्बीजं कुलं गोत्रं च निर्मलम् ॥ ११ ॥
धनधान्यसुवर्णादि-यानजं पानकं तथा ।
पुत्रपौत्रादिसद्गेहं नानाभोगप्रसम्पदा ॥ १२ ॥
इन्द्रनागेन्द्रचक्रयादि-पदं शर्मप्रदं सताम् ।
संगमं सुजनानां च कल्याणानि दिने दिने ॥ १३ ॥
लभन्ते विमलं सौख्यं प्राणिनः पात्रदानतः ।
क्रमेण शिवसंगं च यथासौ नाभिनन्दनः ॥ १४ ॥
ज्ञात्वेति पात्रदानोत्थं फलं विपुलशर्मदम् ।
सद्भिः सत्पात्रदानेषु मतिः कार्या सदा मुदा ॥ १५ ॥

ये भव्याः पात्रदानेन फलं प्राप्ताः पुरा परम् ।
तेषां नामान्यपि ज्ञातुं कः क्षमः श्रीजिनं विना ॥ १६ ॥
तथा सूरिवरैः प्रोक्ता प्रसिद्धा दानिनो भुवि ।
तेषां कथाप्रबन्धेस्मिन्सन्नामानि प्रवच्म्यहम् ॥ १७ ॥
श्रीषेणेन महीशेन श्रीमद्वृषभसेनया ।
कौण्डेशेन वराहेण प्राप्ता ख्यातिः सुदानतः ॥ १८ ॥

उक्तंच—
श्रीषेणवृषभसेने कौण्डेशः शूकरश्च दृष्टान्ताः ।
वैयावृत्तस्यैते चतुर्विकल्पस्य मन्तव्याः ॥

श्रीषेणेन सुपात्राय दानमाहारसंज्ञकम् ।
औषधं मुनये दत्तं श्रीमद्वृषभसेनया ॥ १९ ॥
कौण्डेशेन पुरा शास्त्र-मभयं शूकरेण च ।
तेषां कथाः प्रकथ्यन्ते संक्षेपेण यथाक्रमम् ॥ २० ॥
पूर्वमाहारसद्दानं दत्वा श्रीषेणभूपतिः ।
शान्तीशः शान्तिकृज्जातः क्रमतस्तत्कथां ब्रुवे ॥ २१ ॥
जयश्रीशान्तिनाथस्त्वं भुक्तिमुक्तिप्रदो नृणाम् ।
तच्चरित्रं जगच्चित्रं संश्रितं शान्तयेस्तु नः ॥ २२ ॥
सन्तः शृण्वन्तु संक्षेपा-त्तच्चरित्रं जगद्धितम् ।
श्रुतेन येन भव्यानां भवन्ति सुखकोटयः ॥ २३ ॥
अथ जम्बूमति द्वीपे क्षेत्रे भरतसंज्ञके ।
पवित्रे श्रीजिनेन्द्रोक्त-धर्मणा शर्मकारिणा ॥ २४ ॥

मलयाख्यमहादेशे रत्नसंचयसत्पुरे ।
श्रीषेणो नामतो राजा प्रजानां हितकारकः ॥ २५ ॥
संजातः पुण्यतो धीरो दाता भोक्ता विचारवान् ।
निष्कण्टकः सदाचार-मण्डितोतीव धार्मिकः ॥ २६ ॥
तस्य राज्ञी महासाध्वी संजाता सिंहनन्दिता ।
अनन्दिता द्वितीया च रूपलावण्यमण्डिता ॥ २७ ॥
तयोः क्रमेण संजातौ पुत्रौ चन्द्रार्कसन्निभौ ।
इन्द्रोपेन्द्रादिसेनान्तौ शूरौ वीरौ बलान्वितौ ॥ २८ ॥
इत्यादिपरिवारेण स श्रीषेणः समन्वितः ।
स्वप्रजाः पालयन्नित्यं पुण्यवान्सुखतः स्थितः ॥ २९ ॥
तत्रैव सात्यकिर्नाम्ना ब्राह्मणोतिमहान्सुधीः ।
ब्राह्मणी तस्य जंघाख्या सत्यभामा सुता तयोः ॥ ३० ॥
तथा विप्रो बलग्रामे वेदवेदाङ्गपारगः ।
अग्नीलाब्राह्मणीनाथो नामतो धरणीजटः ॥ ३१ ॥
इन्द्रभूत्यग्निभूती च तयोः पुत्रौ मनःप्रियौ ।
दासीपुत्रश्च संजातः कपिलस्तस्य सूक्ष्मधीः ॥ ३२ ॥
तद्वेदाध्ययने सोपि कपिलो गूढवृत्तितः ।
वेदवेदाङ्गपारज्ञो जातो बुद्धिबलात्तराम् ॥ ३३ ॥
ग्रन्थार्थतो महाविद्वान् जातो दासीसुतोपि च ।
किं करोति नरो लोके बुद्धिः कर्मानुसारिणी ॥ ३४ ॥
तच्छ्रुत्वा ब्राह्मणाः सर्वे कुपिता धरणीजटे ।
कृतं त्वया महायोग्यं यद्दासेरः सुपाठितः ॥ ३५ ॥

इतिक्रोधयुतं वाक्यं तेषां श्रुत्वा महाभिया ।
धरणीजटविप्रेण स:स्वगेहाद्बहिष्कृतः ॥ ३६ ॥
कपिलोपि विनिर्गत्य तद्ग्रामादचलाभिधात् ।
विप्ररूपं समादाय शीघ्रं रत्नपुरं ययौ ॥ ३७ ॥
असौ सात्यकिविप्रो हि तं वीक्ष्य कपिलं तदा ।
विप्रवेषेण संयुक्तं वेदवेदाङ्गपारगम् ॥ ३८ ॥
ज्ञात्वा योग्यं महाभ्रान्त्या विभूत्या निजपुत्रिकाम् ।
जम्बूभार्यासमुत्पन्नां तां ददौ सत्यभामिकाम् ॥ ३९ ॥
तस्मै सोपि समादाय तां सतीं सुखतः स्थितः ।
राज्ञा संपूजितो भूत्वा कुर्वन्व्याख्यां मनोहराम् ॥ ४० ॥
एवं वर्षाणि जातानि कानिचित्सत्यभामिका ।
दुश्चरित्रं विलोक्यैव स्वपतेः ऋतुयोगके ॥ ४१ ॥
कस्य पुत्रोयमत्यन्त-पापात्मेति ससंशयम् ।
मानसे दुःखिता यावत्संस्थिता प्रीतिवर्जिता ॥ ४२ ॥
धरणीजटविप्रश्च पापाद्दारिद्यपीडितः ।
रत्नसंचयमायातः श्रुत्वा कपिलवैभवम् ॥ ४३ ॥
तं ब्राह्मणं समालोक्य दूरतः कपिलो रुषा ।
सन्तप्तो मानसे चापि वेगतः परया मुदा ॥ ४४ ॥
अभ्युत्थानादिकं कृत्वा वन्दित्वा च पुनः पुनः ।
विशिष्टासनमारोप्य मातुर्मे सुसहोदरः ॥ ४५ ॥
ब्रूत भो स्वामिनो यूयं सर्वे तिष्ठन्ति सौख्यतः ।
इति पृष्ट्वा सुखस्नान-भोजनैश्चित्तरंजनैः ॥ ४६ ॥

वस्त्रादिभिः समाराध्य सर्वेषामग्रतस्तदा ।
ममायं जनकः सर्व-विप्राणामग्रणीः सुधीः ॥ ४७ ॥
आचारवान्विचारज्ञः सर्वशास्त्रविचक्षणः ।
स्वमातुर्भेदसंभीतो माययैवं जगाद च ॥ ४८ ॥
सोपि दारिद्र्ययुक्तत्वा-त्तं पुत्रं प्रतिपद्य च ।
पापं श्रितस्तदा विप्रो धिग्दारिद्र्यमशर्मकम् ॥ ४९ ॥
एवं दिनेषु जातेषु केषुचिद्गूढवृत्तितः ।
स विप्रो भक्तितः पृष्टो दत्वा सारधनं तया ॥ ५० ॥
स्वनाथपितृकः सत्य-भामया ब्रूहि भो सुधीः ।
एकान्ते किं सुतस्तेयं सत्यं सत्यवताम्वर ॥ ५१ ॥
तदीयदुष्टचारित्रा-त्प्रतीतिर्मे न वर्त्तते ।
इत्याकर्ण्य द्विजः सोपि यातुमिच्छुर्निजं गृहम् ॥ ५२ ॥
चित्ते वहन्महाद्वेषं लब्धसम्पूर्णवित्तकः ।
प्रोक्त्वा तद्वृत्तकं सर्वं वेगतः स्वगृहं गतः ॥ ५३ ॥
दुष्टात्मना स्वनाथेना-निच्छन्ती सहवासताम् ।
सत्यभामाकुलाचार-मानिनी शरणं गता ॥ ५४ ॥
तं भूपतिं तदा तेन रक्षिता स्वसुतेव सा ।
कपिलोपि समायातः शोकादन्यायकं ब्रुवन् ॥ ५५ ॥
तत्कुशीलं विचार्याशु भूभुजा दुष्टमानसः ।
निर्घाटितः स्वदेशात्स लम्पटः कपटद्विजः ॥ ५६ ॥
शिष्टानां पालनं दुष्ट-निग्रहं ये महीभुजः ।
कुर्वन्ति तेन्यथा सर्वे प्रजानां धनहारिणः ॥ ५७ ॥

एकदा पुण्ययोगेन स श्रीषेणमहीपतिः ।
तपो रत्नाकरौ पूतौ पवित्रीकृतभूतलौ ॥ ५८ ॥
प्रतीक्ष्यादित्यगत्याख्या-रिंजयाख्यौ महामुनी ।
चारणौ गृहमायातौ भक्त्या ताभ्यां प्रहर्षतः ॥ ५९ ॥
दत्वान्नं विधिना प्राप पञ्चाश्चर्याणि शुद्धधीः ।
सत्यं सुपात्रदानेन किं शुभं यन्न जायते ॥ ६० ॥
रत्नवृष्टिस्तथा पुष्प-वृष्टिर्गीर्वाणदुन्दुभिः ।
त्रिधा वायुर्मरुत्साधु-कारश्चाश्चर्यपञ्चकम् ॥ ६१ ॥
ततो राज्यं विधायोच्चैः स राजा पुण्यपाकतः ।
धातकीखण्डपूर्वार्द्ध-स्थितोदक्कुरुभूतले ॥ ६२ ॥
काले मृत्वा समुत्पन्नो भोगभूभूरिभोगभाक् ।
किं न स्यात्साधुसंगेन सौख्यं स्यान्मुक्तिजं यतः ॥ ६३ ॥
ते द्वे राज्यौ तथा सा च सत्यभामा महासती ।
तत्रैवोदक्कुरूद्भोग-भूमौ राज्ञा समं तदा ॥ ६४ ॥
तिस्रो मृत्वा समुत्पन्ना-स्तत्सुदानानुमोदनात् ।
दशधा कल्पवृक्षाणां महाभोगानुरंजिताः ॥ ६५ ॥

उक्तंच—

मद्यातोद्यविभूषास्रग्-ज्योतिर्दीपगृहाङ्गकाः ।
भोजनामत्रवस्त्राङ्गा दशधा कल्पपादपाः ॥

न रोगो नैव शोकश्च न चिन्ता न दरिद्रता ।
नाल्पमृत्युर्न वैरं च न सर्पा यत्र पापिनः ॥ ६६ ॥

शीतोष्णादिकबाधा न नैव युद्धं न दुर्जनः ।
यत्र कस्यापि सेवा न मानभंगो न कस्यचित् ॥ ६७ ॥
यत्रार्यपरिणामेन सर्वे तिष्ठन्ति सौख्यतः ।
जन्मादिमृत्युपर्यन्तं पात्रदानेन देहिनः ॥ ६८ ॥
यत्रोद्भवाः स्वभावोत्थ-मार्दवेन सुदानिनः ।
प्रान्ते देवगतिं यान्ति शेषपुण्यप्रभावतः ॥ ६९ ॥
तत्र सौख्यं चिरं भुक्त्वा स्वपंचेन्द्रियतर्पणम् ।
स श्रीषेणो महीपाल-स्तद्दानप्रथमोदयात् ॥ ७० ॥
कैश्चिद्भवान्तरैः पूतै-र्महाभ्युदयकारकैः ।
क्षेत्रेस्मिन्भारते सिद्धे हस्तिनाख्यपुरोत्तमे ॥ ७१ ॥
विश्वसेनमहीभर्त्तु-रैराराज्ञ्याः सुतो महान् ।
शान्तीशः तीर्थकृज्जातः पञ्चकल्याणशर्मभाक् ॥ ७२ ॥
येत्र भव्याः करिष्यन्ति पात्रदानं सुभक्तितः ।
तेषां नूनं भविष्यन्ति लोकद्वयमहाश्रियः ॥ ७३ ॥
इति ज्ञात्वा बुधैर्नित्यं स्वशक्त्या बहुभक्तितः ।
देयं पात्राय सद्दानं स्वर्गमोक्षसुखप्रदम् ॥ ७४ ॥
सद्रत्नत्रयमण्डितोतिविमलः श्रीमूलसंघे महान्
श्रीभट्टारकमल्लिभूषणगुरुः श्रीकुन्दकुन्दान्वये ।
तच्छिष्येण सुपात्रभोजनमहादानक्षणे शर्मणे
भूयाच्छान्तिविभोः कथा विरचिता श्रीनेमिदत्तेन वः ॥७५॥

इति कथाकोशे पात्राहारदानफलप्राप्त-श्रीश्रीषेण-महाराजाख्यानं समाप्तम् ।

११०—औषधदानफलाख्यानम् ।

नत्वा श्रीमज्जिनेन्द्राणां भारत्याः सद्गुरोः क्रमान् ।
कथामौषधदानस्य वक्ष्ये त्रैलोक्यपूजितान् ॥ १ ॥
दीर्घायुः स्वस्थता चित्ते कुष्ठादिव्याधिसंक्षयः ।
नीरोगता सदानन्दो भवेदौषधदानतः ॥ २ ॥
सौभाग्यं धनधान्यं च रूपलावण्यसम्पदा ।
तेजोबलं सुखं चैव क्रमेण स्वर्गमोक्षयोः ॥ ३ ॥
ततः पात्राय सद्देयं दययान्यत्र च क्वचित् ।
दानमौषधसंज्ञं तु हितार्थैर्दोषवर्जितम् ॥ ४ ॥
दानस्यास्य फलं प्राप्तं यदनेकैर्महात्मभिः ।
तत्फलं शक्यते केन वर्णयितुं जगत्त्रये ॥ ५ ॥
फलमौषधदानस्य प्राप्तं वृषभसेनया ।
तदहं जिनसूत्रेण वक्ष्ये संक्षेपतः श्रिये ॥ ६ ॥
अथेह भरतक्षेत्रे जिनजन्मपवित्रिते ।
नाम्ना जनपदे देशे सम्पदा सारसंभृते ॥ ७ ॥
कावेरीपत्तने राजा प्रजानां हितकारकः ।
उग्रसेनोभवन्नाम्ना राजविद्याविराजितः ॥ ८ ॥
श्रेष्ठी धनपतिस्तत्र जिनपादार्चने मतिः ।
तस्य भार्या महासाध्वी धनश्रीः श्रीरिवापरा ॥ ९ ॥
तयोः पूर्वार्जितैः पुण्यैः रूपलावण्यमण्डिता ।
पुत्री वृषभसेनाख्या जाता कीर्तिवदुज्वला ॥ १० ॥

तस्य रूपवती धात्री नित्यं स्नानादिकं मुदा ।
करोति बहुयत्नेन पुण्यात्किं वा न जायते ॥ ११ ॥
श्रीमद्वृषभसेनायाः स्नानवारिभरेण च ।
जातायां तत्र गर्त्तायां कुक्कुरं रोगपीडितम् ॥ १२ ॥
एकदा सा समालोक्य धात्रिका पतितोत्थितम् ।
गतरोमहाजालं तत्क्षणाजातविस्मया ॥ १३ ॥
पुत्रीस्नानजलं व्यक्तं कारणं रोगसंक्षये ।
इत्यालोच्य समादाय तज्जलं रोगनाशकम् ॥ १४ ॥
शीघ्रं तेन जलेनैत्र परीक्षार्थं महादरात् ।
निजमातुर्महच्चक्षु-र्व्याधिना संकदर्थिते ॥ १५ ॥
द्वादशवर्षपर्यन्तं तस्याः कुथितलोचने ।
प्रक्षाल्य निर्मलीकृत्य विलोक्यात्यन्तसुन्दरे ॥ १६ ॥
ततस्तेनाम्बुना सर्व-रोगसन्तानहारिणा ।
ख्याता रूपवती जाता सर्वव्याधिविनाशने ॥ १७ ॥
अक्षिजं कुक्षिजं रोगं शिरोजं गरलोद्भवम् ।
क्षयं नयति सा तत्र सर्वकुष्ठादिकं घनम् ॥ १८ ॥
अथैकदोग्रसेनेन स्वमंत्री रणपिङ्गलः ।
मेघपिङ्गलराजस्यो-परि संप्रेषितो द्रुतम् ॥ १९ ॥
ततोसौ बहुसैन्येन तद्देशं संप्रविष्टवान् ।
जातो महाज्वरी तत्र विषोदकनिषेवणात् ॥ २० ॥
पश्चात्स्वगृहमायातो रूपवत्या जलेन सः ।
प्राणीव गुरुवाक्येन कृतो रोगविवर्जितः ॥ २१ ॥

उग्रसेनोपि भूभर्ता कोपानलकदर्थितः ।
मेघपिङ्गलराजस्य बन्धनार्थं गतो जवात् ॥ २२ ॥
तथासौ विषनीरोत्थ-महाज्वरवितर्जितः ।
व्याघुट्यैव समायातः ससैन्यो मानवर्जितः ॥ २३ ॥
रणपिङ्गलतो ज्ञात्वा तज्जलं रोगनाशनम् ।
राजा याचितवांस्तूर्णं स्वरोगक्षयहेतवे ॥ २४ ॥
तदा धनश्रिया प्रोक्तं श्रेष्ठिनं प्रति भीतया ।
स्वामिन्कथं सुतास्नान-जलं भूपतिमस्तके ॥ २५ ॥
क्षेप्यते तत्समाकर्ण्य जगौ श्रेष्ठी गरिष्ठधीः ।
यदि पृच्छति राजासौ तदास्माभिः प्रकथ्यते ॥ २६ ॥
सत्यं जलस्वरूपं हि न दोषः स्यादिति ध्रुवम् ।
ब्रुवन्ति न कदा सन्तः प्राणत्यागेप्यसत्यकम् ॥ २७ ॥
एवं मंत्रे कृते तेन जलेनैव महीपतिः ।
उग्रसेनः कृतो धात्र्या तया रोगविवर्जितः ॥ २८ ॥
नीरोगेण ततो राज्ञा पृष्टा रूपवती स्फुटम् ।
सर्वं जगाद तत्तोय-स्वरूपं शर्मकारणम् ॥ २९ ॥
ततो राज्ञा समाहूतः श्रेष्ठी धनपतिः सुधीः ।
तत्कालं स समायातो दुर्लङ्घ्यं राजशासनम् ॥ ३० ॥
दत्वा तस्मै महामानं राज्ञा श्रेष्ठी स याचितः ।
श्रीमद्वृषभसेनां तां परिणेतुं गुणोज्वलाम् ॥ ३१ ॥
श्रुत्वासौ भूपतेर्वाक्यं जगौ श्रेष्ठी सुनिश्चलः ।
राजन्देवेन्द्रचन्द्रार्क-नरेन्द्रैः खचरैः कृताम् ॥ ३२ ॥

पूजामाष्टाह्निकीं पूतां स्वर्गमोक्षसुखप्रदाम् ।
जिनेन्द्रप्रतिमानां च स्नपनं पूजनं तथा ॥ ३३ ॥
करोषि यदि सद्भक्त्या पंजरस्थान्विमुञ्चसि ।
पक्षिणश्च तथा कारा-गारान्मुञ्चसि सत्वरम् ॥ ३४ ॥
मनुष्यांश्च तदा तुभ्यं ददामि मम पुत्रिकाम् ।
रूपसौभाग्यसत्पुण्य-मण्डितां कुलदीपिकाम् ॥ ३५ ॥
उग्रसेनस्तदा सर्वं कृत्वा राजा महामुदा ।
परिणीय महाभूत्या तस्य पुत्रीं सुखप्रदाम् ॥ ३६ ॥
कृत्वा पट्टमहाराज्ञीं वल्लभां तां तथैव च ।
अन्यत्कार्यं परित्यज्य नित्यं क्रीडां करोति सः ॥ ३७ ॥
तदा वृषभसेना च प्राप्य राज्ञीपदं महत् ।
दिव्यान्भोगान्प्रभुंजाना पूर्वपुण्यप्रसादतः ॥ ३८ ॥
पूजयन्ती जगत्पूज्या-ञ्जिनान्स्वर्गापवर्गदान् ।
दिव्यैरष्टमहाद्रव्यैः स्नपनादिभिरुत्तमैः ॥ ३९ ॥
मानयन्ती महासाधून्मानैर्दानैश्चतुर्विधैः ।
पालयन्ती व्रतं शीलं स्वोचितं सारशर्मदम् ॥ ४० ॥
कुर्वती परया प्रीत्या सम्मानं च सधर्मिणाम् ।
निजोन्नतेः फलं तद्धि यद्भक्तिः स्यात्सधर्मिणाम् ॥ ४१ ॥
इत्यादिकं जगत्पूज्यं जिनधर्मं सुखप्रदम् ।
संकुर्वाणा लसद्भक्त्या सा सती सुखतः स्थिता ॥ ४२ ॥
अथ तत्र महाराजो वाराणस्याः सुदुष्टधीः ।
नामतः पृथिवीचन्द्रः कारागारे स तिष्ठति ॥ ४३ ॥

स तद्विवाहकालेपि दुष्टत्वान्नैव मोचितः ।
जन्तोरतीव दुष्टस्य क्व भवेद्बन्धनक्षयः ॥ ४४ ॥
पृथिवीचन्द्रकस्यास्य राज्ञो राज्ञी प्रवर्त्तते ।
या नारायणदत्ताख्या तया मंत्रं सुमांत्रिभिः ॥ ४५ ॥
कृत्वोच्चैः पृथिवीचन्द्र-मोचनार्थं सुकारिताः ।
नाम्ना वृषभसेनायाः शाला दानस्य सर्वतः ॥ ४६ ॥
वाराणस्यां महावस्तु-रसषट्कसमन्विताः ।
तासु वै भोजनं कृत्वा यथेष्टं ब्राह्मणादयः ॥ ४७ ॥
कावेरीपत्तने तुष्टा आगच्छन्ति निरन्तरम् ।
तेभ्यस्तां वार्त्तिकां श्रुत्वा रुष्टा रूपवती तदा ॥ ४८ ॥
कथं वृषभसेने त्वं वाराणस्यां क्षुधाहराः ।
मामनापृच्छ्य सद्दान-शालाः कारयसीति च ॥ ४९ ॥
सावोचत्तत्समाकर्ण्य प्रोक्तं वृषभसेनया ।
नाकारिता मया मात-र्मन्नाम्ना किन्तु केन वै ॥ ५० ॥
केनचित्कारणेनैव कारिताः सन्ति ताः शुभे ।
तासां शुद्धिं कुरु त्वं च तवानन्दो भविष्यति ॥ ५१ ॥
ज्ञात्वा चरैस्ततो धात्र्या सर्वं च कथितं मुदा ।
श्रीमद्वृषभसेनाग्रे तद्दानस्यैव कारणम् ॥ ५२ ॥
तया च भूपतेः प्रोक्त्वा कारागारात्तदा द्रुतम् ।
स राजा पृथिवीचन्द्रो मोचितः प्रीतितस्तराम् ॥ ५३ ॥
ततः पृथिवीचन्द्रेण फलकेत्यन्तसुन्दरे ।
राज्ञो वृषभसेनायाः शुभे रूपे च कारिते ॥ ५४ ॥

ययोरधो निजं रूपं सप्रणामं च कारितम् ।
पश्चात्तयोः प्रणम्योच्चैः फलकस्तेन दर्शितः ॥ ९५ ॥
उक्तं वृषभसेनाया-स्त्वं भो देवि ममाम्बिका ।
त्वत्प्रसादेन मे जातं जन्मेति सफलं भुवि ॥ ९६ ॥
ततः सन्तोषमासाद्य राज्ञा सम्मानपूर्वकम् ।
भणितश्चोग्रसेनेन वाराणस्याः स भूपतिः ॥ ९७ ॥
गन्तव्यं भो त्वया मेघ-पिङ्गलस्योपरि द्रुतम् ।
श्रुत्वेति पृथिवीचन्द्रो तं नत्वा स्वपुरीं गतः ॥ ९८ ॥
मेघपिङ्गलराजासौ तदाकर्ण्य विचार्य च ।
ममायं पृथिवीचन्द्रो मर्मभेदीति निश्चितम् ॥ ९९ ॥
समागत्योग्रसेनस्य सामन्तोजनि भक्तितः ।
पुण्येन मित्रतामेति शत्रुः स्वैरं न संशयः ॥ ६० ॥
अथैकदोग्रसेनेन प्रतिज्ञेयं कृता मुदा ।
ममास्थानस्थितस्योच्चै-रागमिष्यति यद्ध्रुवम् ॥ ६१ ॥
तस्याहं प्राभृतस्यार्द्धं मेघपिङ्गलकाय च ।
अर्धं वृषभसेनायै दास्यामीति तथा सति ॥ ६२ ॥
रत्नकम्बलयोर्युग्म-मैकदैव समागतम् ।
एकैकं तं ददौ राजा ताभ्यां कृत्वा समानकम् ॥ ६३ ॥
किं धनं कांचनं वस्त्रं किमायुश्च परिक्षयि ।
परोपकृतये प्रोक्तं पालनीयं वचो बुधैः ॥ ६४ ॥
मेघपिङ्गलभार्या या सैकदा तं सुकम्बलम् ।
प्रयोजनेन प्रावृत्य रूपवत्याः समीपके ॥ ६५ ॥

गता तत्र प्रमादेन परिवर्त्तोभवत्तदा ।
तयोः कम्बलयोः कष्टं प्रमादो न सुखायते ॥ ६६ ॥
तदा वृषभसेनायाः प्रावृत्यैव च कम्बलम् ।
उग्रसेनसभामध्ये स मुग्धो मेघपिङ्गलः ॥ ६७ ॥
सेवार्थी चैकदा यात-स्तं दृष्ट्वा भूपतिस्तदा ।
महाकोपेन सन्तप्तो वँह्निर्वा घृतयोगतः ॥ ६८ ॥
तदा भूपतिमालोक्य सकोपं मेघपिङ्गलः ।
ममायं कुपितो राजा ज्ञात्वेति प्रपलायितः ॥ ६९ ॥
सुदूरं गतवाञ्छीघ्रं महाहयवशीकृतः ।
दुर्जनाद्दुर्भावाद्वा सज्जनो गुणमण्डितः ॥ ७० ॥
उग्रसेनेन कोपाग्नि-सन्तप्तेनाविवेकिना ।
सती वृषभसेना सा समुद्रे पातिता वृथा ॥ ७१ ॥
धिक्कोपत्वं विमूढत्वं याभ्यां जीवो वशीकृतः ।
कदाचिन्नैव जानाति युक्तायुक्तविचारणम् ॥ ७२ ॥
तया श्रीजिनपादाब्ज-भ्रमर्या विहिता दृढम् ।
प्रतिज्ञा यद्यहं घोरा-देतस्मादुपसर्गतः ॥ ७३ ॥
उद्धरिष्यामि तच्चित्रं करिष्यामि महातपः ।
श्रीमज्जिनेन्द्रचन्द्रोक्तं जरामरणनाशनम् ॥ ७४ ॥
तदा तस्या विशुद्धाया महाशीलप्रभावतः ।
जलदेवतया तत्र कृतं सिंहासनादिकम् ॥ ७५ ॥
प्रातिहार्यं महाभक्त्या जगच्चेतोनुरंजनम् ।
अहो भव्या न तच्चित्रं सच्छीलात्किं न जायते ॥ ७६ ॥

महाग्निर्जलतामेति स्थलतामेति सागरः ।
शत्रुश्च मित्रतामेति सुधात्वं याति दुर्विषम् ॥ ७७ ॥
सच्छीलेन यशः पुण्यं निर्मलं सारसम्पदा ।
भवन्ति स्वर्गसौख्यानि क्रमेण परमं पदम् ॥ ७८ ॥
तस्माच्छीलं जिनेन्द्रोक्तं सर्वपापप्रणाशनम् ।
मनोमर्कटं रुद्ध्वा पालनीयं बुधोत्तमैः ॥ ७९ ॥
तच्छ्रुत्वा शीलमाहात्म्य-मुग्रसेनो महीपतिः ।
पश्चात्तापं तदा कृत्वा तामानेतुं गतः सतीम् ॥ ८० ॥
आगच्छन्त्या महासत्या तया वैराग्यभावतः ।
दृष्टो महामुनिस्तत्र वनमध्ये गुणान्वितः ॥ ८१ ॥
नाम्ना गुणधरो धीरः सावधिज्ञानलोचनः ।
तं प्रणम्य लसद्भक्त्या पृष्टो वृषभसेनया ॥ ८२ ॥
स्वामिन्पुराभवे किं च कृतं कर्म शुभाशुभम् ।
मया तद्ब्रूहि योगीन्द्र दयारससरित्पते ॥ ८३ ॥
तन्निशम्य मुनिः प्राह श्रृणु पुत्रि गदाम्यहम् ।
त्वं पूर्वस्मिन्भवेत्रैव जातासि ब्राह्मणात्मजा ॥ ८४ ॥
नागश्रीर्नामितो राज-कीये देवकुले सदा ।
सम्मार्जनं करोष्येव मुनीन्द्रश्चैकदा महान् ॥ ८५ ॥
मुनिदत्तोभिधानेन समागत्य निजेच्छया ।
तत्र निर्वातगर्त्तायां प्राकाराभ्यन्तरे तदा ॥ ८६ ॥
अपराह्णे सपर्यंक-कायोत्सर्गेण संस्थितः ।
त्वया चाज्ञानभावेन रुष्टया भणितो मुनिः ॥ ८७ ॥

कटकान्मे समायातो राजात्रैवागमिष्यति ।
उत्तिष्ठोत्तिष्ठ नग्न त्वं करोम्यत्र सुनिर्मलम् ॥ ८८ ॥
सम्मार्जनं तदा स्वामी महाध्यानेन संस्थितः ।
स धीरो मेरुवद्गाढं न चचाल स्वयोगतः ॥ ८९ ॥
ततस्त्वयाविवेकिन्या कतवारैर्महामुनेः ।
तस्योपरि क्रुधा कष्टं पूरयित्वा कृतं सुधीः ॥ ९० ॥
सम्मार्जनं जगत्पूज्यो यो मुनिः परमार्थतः ।
तस्य किं क्रियते कष्टं धिग्विमूढस्य चेष्टितम् ॥ ९१ ॥
प्रभाते चागतेनैव राज्ञा तत्र स्वलीलया ।
क्रीडां प्रकुर्वता वीक्ष्य तं प्रदेशं महाद्भुतम् ॥ ९२ ॥
उच्छ्वाससहितं चैव निःश्वाससहितं तथा ।
उत्खन्य स मुनिस्तेन शीघ्रं निस्सारितो मुदा ॥ ९३ ॥
त्वया तदा तमालोक्य मुनिं प्रशममन्दिरम् ।
आत्मनिन्दां तरां कृत्वा रुचिं धर्मे विधाय च ॥ ९४ ॥
महादरेण तस्यैव मुनिनाथस्य निर्मलम् ।
कृतं चौषधदानं हि महापीडाप्रशान्तये ॥ ९५ ॥
वैयावृत्यं विधायोच्चैः सर्वक्लेशविनाशनम् ।
पुत्रि तेनैव पुण्येन मृत्वेह त्वं गुणान्विता ॥ ९६ ॥
पुत्री धनपतेर्जाता धनश्रीकुक्षिसंभवा ।
सती वृषभसेनाख्या विख्याता भुवनत्रये ॥ ९७ ॥
विशिष्टौषधदानेन संजाता तेतिनिर्मला ।
सर्वौषधर्द्धिः सर्वेषां रोगाणां नाशकारिणी ॥ ९८ ॥

कतवारेण यत्स्वामी पूरितो मुग्धया त्वया ।
तत्पापेनैव लोकेभू-द्वृथा ते च कलंकता ॥ ९९ ॥
तस्मात्पुत्रि न युक्तैव साधुपीडा कदाचन ।
स्वर्गमोक्षफलप्राप्त्यै कर्तव्यं साधुसेवनम् ॥ १०० ॥
इति श्रुत्वा मुनेर्वाक्यं जगत्तापनिवारणम् ।
श्रीमद्वृषभसेना सा सद्वैराग्यपराभवत् ॥ १०१ ॥
ततश्च परलोकाय मोचयित्वा निजं मुदा ।
राजादीनां क्षमां कृत्वा भवक्लेशविनाशिनीम् ॥ १०२ ॥
दीक्षां गुणधराख्यस्य तस्य पार्श्वे सुखप्रदाम् ।
नत्वा मुनेः पदाम्भोजं संजग्राह विचक्षणा ॥ १०३ ॥
यथा वृषभसेना सा संजातौषधदानतः ।
सर्वौषधर्द्धिसम्पन्ना तथा तत्क्रियते बुधैः ॥ १०४ ॥
गुणधरयतिनोक्तं यच्चरित्रं पवित्रं
सकलभुवनसिद्धं तन्निशम्य प्रभव्याः ।
जिनपतिकथितेस्मिन्सारधर्मे बभूवुः
परमरुचिपरास्ते सा सती वः पुनातु ॥ १०५ ॥

**इति कथाकोशे सुपात्रौषधदानफलप्राप्त-
श्रीवृषभसेनाख्यानं समाप्तम् ।**

१११–शास्त्रदानफलप्राप्ताख्यानम् ।

नत्वा श्रीमज्जिनं देवं संसाराम्बुधितारणम् ।
वक्ष्येहं श्रुतदानस्यो-पाख्यानं सौख्यकारणम् ॥ १ ॥

भारतीं भुवनज्येष्ठां नमामि जिनसंभवाम् ।
अज्ञानपटलानां या सच्छलाका विनाशिनी ॥ २ ॥
मुनीनां जितमोहानां सद्रत्नत्रयशालिनाम् ।
पादपद्मानि सद्मानि पद्मायाः प्रणमाम्यहम् ॥ ३ ॥
इति श्रीजिनवाग्देवी-गुरून्नत्वा प्रकथ्यते ।
शृण्वन्तु सुधियो भव्या ज्ञानदानकथानकम् ॥ ४ ॥
यज्ज्ञानं सर्वजन्तूनां लोचनं परमोत्तमम् ।
तत्पात्राय महाभक्त्या दीयते किमतः परम् ॥ ५ ॥
ज्ञानेन विमला कीर्ति-र्ज्ञानेन परमं सुखम् ।
ज्ञानेन भुक्तिमुक्ती च प्राप्यते तन्निषेवणात् ॥ ६ ॥
सम्यग्ज्ञानं जिनेन्द्रोक्तं विरोधपरिवर्जितम् ।
सर्वथा भक्तितो नित्यं सेव्यं भव्यैः शुभश्रिये ॥ ७ ॥
दानैर्मानैर्जगत्सार-पूजनैः सप्रभावनैः ।
पठनैः पाठनैर्ज्ञान-माराध्य श्रीजिनोदितम् ॥ ८ ॥
वाचनापृच्छनासारा-नुप्रेक्षाम्नायसंयुतैः ।
धर्मोपदेशनैश्चैवं पंचधा ज्ञानभावना ॥ ९ ॥
कर्त्तव्या हि महाभव्यैः केवलज्ञानहेतवे ।
किमत्र बहुनोक्तेन जिनज्ञानं जगद्धितम् ॥ १० ॥
अनेकैर्भव्यमुख्यैश्च ज्ञानदानं कृतं पुरा ।
तेषां नामन्यपि प्राणी वक्तुं लोकेत्र कः क्षमः ॥ ११ ॥
कौण्डेशस्य महीभर्त्तुः प्रसिद्धा भुयनत्रये ।
या कथा ज्ञानदानस्य तामर्हत्सूत्रतो ब्रुवे ॥ १२ ॥

अथेह भरतक्षेत्रे जिनधर्मपवित्रिते ।
जातः कुरुमरिग्रामे गोपो गोविन्दनामभाक् ॥ १३ ॥
तेनैकदा महाटव्यां दृष्टं कोटरमध्यगम् ।
श्रीजैनं पुस्तकं पूतं पवित्रीकृतभूतलम् ॥ १४ ॥
तस्मादादाय सम्पूज्य भक्त्या दत्तं महात्मने ।
पद्मनन्दिमुनीन्द्राय वन्दिताय सुरेशिना ॥ १५ ॥
पूर्वं तेनैव शास्त्रेण तत्राटव्यां जितेन्द्रियाः ।
पूर्वभट्टारकाः केचित्कृत्वा व्याख्यां जगद्धिताम् ॥ १६ ॥
कारयित्वा महापूजां भाक्तिकैः स्वर्गमोक्षदाम् ।
विधाय श्रीजिनेन्द्राणां सद्धर्मे च प्रभावनाम् ॥ १७ ॥
भव्यान्सम्बोध्य सन्मार्गे प्रकाश्य श्रीजिनोदितम् ।
पुनस्तं कोटरे धृत्वा गतास्ते ध्वस्तकल्मषाः ॥ १८ ॥
बाल्यात्प्रभृति तेनैव गोविन्देन शुभप्रदा ।
तस्यैव पुस्तकस्योच्चैश्चक्रे.पूजा सदा मुदा ॥ १९ ॥
एकदाथ स गोविन्दो यमव्यालेन भक्षितः ।
कः को न वंचितो लोके यमेन प्राणहारिणा ॥ २० ॥
मृत्वा तत्रैव संजातः स निदानेन गोपकः ।
तेन पुण्येन संयुक्तो ग्रामकूटस्य नन्दनः ॥ २१ ॥
सुखेन वर्द्धितो नित्यं जनयन्प्रीतिमद्भुताम् ।
जनानां शुभपुण्येन सुभगो जनरंजनः ॥ २२ ॥
एकदासौ तमालोक्य पद्मनन्दिमुनीश्वरम् ।
जातो जातिस्मरो ज्ञात्वा पूर्वजन्मविचेष्टितम् ॥ २३ ॥

नत्वा तस्य पदाम्भोजं महाधर्मानुरागतः ।
दीक्षां जग्राह पूतात्मा परमानन्दनिर्भरः ॥ २४ ॥
कालेनैव तपस्तप्त्वा स गोविन्दचरो मुनिः ।
ततः प्राणात्यये जातः कौण्डेशो भूमिपस्तराम् ॥ २५ ॥
बालेन विजितारातिस्तेजसेव दिवाकरः ।
स्वरूपेणेव कन्दर्पः कान्त्या पूर्णेन्दुसन्निभः ॥ २६ ॥
महाविभवसम्पन्नो महासौभाग्यमण्डितः ।
महासौख्यनिवासोभून्महाकीर्तिविराजितः ॥ २७ ॥
भुंजानो विविधान्भोगान्पालयन्पुत्रवत्प्रजाः ।
चतुष्प्रकारजैनेन्द्र-धर्मं कुर्वन्सुखं स्थितः ॥ २८ ॥
एवं काले गलत्युच्चैः पूर्वपुण्येन सौख्यतः ।
कदाचित्सोपि संवीक्ष्य कौण्डेशः कारणं महत् ॥ २९ ॥
निस्सारश्चैष संसारो भोगा रोगा इवापरे ।
अस्थिरा सम्पदा सर्वा चञ्चला भाति मोहिनी ॥ ३० ॥
शरीरं पलसन्दोह-संभृतं दुःखराशिदम् ।
बीभत्सु पूतिसंयुक्तं क्षणादेव परिक्षयि ॥ ३१ ॥
इति ज्ञात्वा सुधीश्चित्ते जैनतत्वविदाम्वरः ।
महावैराग्यसंपन्नो राज्यं त्यक्त्वा त्रिधा द्रुतम् ॥ ३२ ॥
कृत्वा पूजां जिनेन्द्राणां शर्मकोटिविधायिनीम् ।
नत्वा गुरुं तपो धृत्वा जिनोक्तं दोषवर्जितम् ॥ ३३ ॥
संजातः पूर्वपुण्येन मुनीन्द्रः श्रुतकेवली ।
अहो भव्या न तच्चित्रं भवेद्ज्ञानेन केवली ॥ ३४ ॥

यथासौ मुनिनाथोभू-च्छ्रुतज्ञानविराजितः ।
ज्ञानदानात्तथा भव्यैः कर्त्तव्यं स्वात्मनो हितम् ॥ ३५ ॥
ये भव्याः श्रीजिनाधीश-ज्ञानसेवां जगद्धिताम् ।
महाभक्त्या प्रकुर्वन्ति स्नपनैः पूजनैस्तथा ॥ ३६ ॥
स्तवनैर्जपनैर्नित्यं पठनैः पाठनैः शुभैः ।
लिखनैर्लेखनैः पात्रे-दानैर्मानैर्विशेषतः ॥ ३७ ॥
महाप्रभावनाङ्गैश्च सारसम्यक्त्वहेतुभिः ।
तेषां सुखानि भव्यानां भवन्त्येव सहस्रशः ॥ ३८ ॥
धनं धान्यं कुलं गोत्रं पवित्रं चारुमङ्गलम् ।
कीर्तिः स्वायुर्महाज्ञानं विमलाः सर्वसम्पदाः ॥ ३९ ॥
किमत्र बहुनोक्तेन सर्वे सारमनोरथाः ।
स्वर्गमोक्षप्रसौख्यानि प्राप्यन्ते ज्ञानसेवया ॥ ४० ॥
अष्टादश महादोषै-र्मुक्तो जिननायकः ।
तदुक्तं वचनं नित्यं भावितं भवति श्रिये ॥ ४१ ॥
मयेति कथिता ज्ञान-दानस्यैषा कथा शुभा ।
अस्तु मे भवतां भव्या केवलज्ञानहेतवे ॥ ४२ ॥
गच्छे श्रीमति मूलसंघविमले सारस्वते सच्छुभे ।
श्रीभट्टारकमल्लिभूषणगुरू रत्नत्रयालंकृतः ।
तच्छिष्येण कथा जिनेन्द्रकथिता श्रीज्ञानदानोद्भवा
भव्यानां भवशान्तये विरचिता भूयात्सदा शर्मदा ॥४३॥

इति कथाकोशे सुपात्रदत्तज्ञानदानफलप्राप्तकौण्डेश-नृपाख्यानं समाप्तम् ।

११२–अभयदानफलप्राप्ताख्यानम् ।

श्रीमत्पादद्वयं नत्वा जिनेन्द्रस्य शुभश्रिये ।
कथामभयदानस्य भक्त्यार्हत्सूत्रतो ब्रुवे ॥ १ ॥
सरस्वती श्रिये मेस्तु भक्त्या भव्यशतार्चिता ।
महाश्रुताब्धिपाराय सतां या नौ मतल्लिका ॥ २ ॥
स्मरामि शान्तये नित्यं मुनीनां ब्रह्मशालिनाम् ।
येषां सद्भक्तितो नूनं सन्मार्गः सुखतो नृणाम् ॥ ३ ॥
इत्याप्तगुणसंस्तोत्र-मंगलेन मयाधुना ।
कथा वसतिदानस्य दृष्टान्तेन निगद्यते ॥ ४ ॥
अत्रैव भरतक्षेत्रे पवित्रे धर्मकर्मभिः ।
देशो मालवसंज्ञोभून्महाशोभाशतान्वितः ॥ ५ ॥
धनैर्धान्यैर्जनैर्नित्यं नानावस्तुसमुच्चयैः ।
भाति यः सम्पदासारै-र्निवासो वा जगच्छ्रियः ॥ ६ ॥
वनैरारामसंयुक्तैः सरिद्भिरिसमन्वितैः ।
पद्माकरैश्च संकीर्णो देवानामप्रियः प्रियः ॥ ७ ॥
नरनार्योवसन्त्युच्चै रूपलावण्यमण्डिताः ।
महाभोगशतैर्युक्ता यत्र पुण्यप्रसादतः ॥ ८ ॥
यत्र सद्मानि भान्त्युच्चै-र्जिनानां जितकर्मणाम् ।
ग्रामे ग्रामे महासार-पर्वतेषु वने वने ॥ ९ ॥
प्रोत्तुङ्गशिखरैर्नित्यं कनत्काञ्चनसद्घटैः ।
ध्वजोत्करकरैर्यानि दर्शयन्तीव सत्पथम् ॥ १० ॥

येषां दर्शनमात्रेण पवित्रजिनसद्मनाम् ।
क्षणात्पापं प्रयात्येव तत्र किं वर्ण्यते परम् ॥ ११ ॥
यत्र श्रीमुनयो नित्यं रत्नत्रयविराजिताः ।
भान्ति सत्तपसा स्वस्था मार्गा वा शिवसद्मनः ॥ १२ ॥
लसत्युच्चैर्जिनेन्द्राणां यत्र धर्मः सुशर्मदः ।
सम्यक्त्वरत्नसंपूतो दानपूजाव्रतान्वितः ॥ १३ ॥
दोषैर्मुक्तो जिनाधीशो देवदेवेन्द्रपूजितः ।
अष्टादशभिरित्यास्था केवलज्ञानशर्मभाक् ॥ १४ ॥
दशलाक्षणिको धर्मो गुरुर्निर्ग्रन्थलक्षणः ।
तत्वे जिनोदिते श्रद्धा सम्यक्त्वं चेति लक्षणम् ॥ १५ ॥
पूजां श्रीमज्जिनेद्राणां स्वर्मोक्षसुखदायिनीम् ।
दानं पात्रे महाभक्त्या नित्यं शर्मशतप्रदम् ॥ १६ ॥
सच्छीलमुपवासं च व्रतानि बहुभेदतः ।
यत्र भव्या विधायंति धर्मे यान्त्येव सद्गतिम् ॥ १७ ॥
तत्रोद्भवे घटग्रामे सम्पदासारसंभृते ।
संजातो देविलो नाम्ना कुंभकारो धनान्वितः ॥ १८ ॥
तत्रैव च घटग्रामे नाम्ना धर्मिलनापितः ।
ताभ्यां पथिकलोकानां वासदानायकारितम् ॥ १९ ॥
एकं देवकुलं तत्र देविलेनैकदा मुदा ।
धर्मार्थे मुनये दत्तो निवासः प्रथमं परः ॥ २० ॥
धर्मिलेन ततस्तत्र परिव्राजककः कुधीः ।
समानीय धृतस्ताभ्यां मुनिस्तस्माद्बहिष्कृतः ॥ २१ ॥

मत्यं दुष्टा दुराचारा ये नराः पापवासिताः ।
तेषां नैव प्रियः साधु-रुलोकानामिवांशुमान् ॥ २२ ॥
ततश्च मुनिनाथोमौ तस्मान्निर्गत्य लीलया ।
वृक्षमूले स्थितो रात्रौ स्वशरीरेपि निस्पृहः ॥ २३ ॥
इन्द्रचन्द्रार्कनागेन्द्र-खेचरेन्द्रैः समर्चितः ।
शीतोष्णदंशमशकैः सहमानः परीषहान् ॥ २४ ॥
प्रभाते तं मुनिं दृष्ट्वा ज्ञात्वा तत्कारणं पुनः ।
देविलः कुंभकारश्च कुपितो धर्मिलाय सः ॥ २५ ॥
युद्धं कृत्वा तदा रौद्रं हत्वा तौ च परस्परम् ।
क्रमेण शूकरव्याघ्रौ संजातौ विन्ध्यपर्वते ॥ २६ ॥
यत्रैवास्ते गुहामध्ये स देविलचरः सुखम् ।
शूकरश्चैकदा तत्र समागत्य स्थितौ मुनी ॥ २७ ॥
द्वौ धीरौ दैवयोगेन पवित्रीकृतभूतलौ ।
समाधिगुप्तित्रिगुप्ती नाम्ना त्रैलोक्यपूजितौ ॥ २८ ॥
वीक्ष्य तौ यतिनौ जाति-स्मरो भूत्वा स शूकरः ।
धर्ममाकर्ण्य जैनेन्द्रं व्रतं किमपि चाग्रहीत् ॥ २९ ॥
तदा मानुष्यमाघ्राय गन्धं तत्रैव चागतः ।
स नापितचरो व्याघ्रो मुनिभक्षणदुष्टधीः ॥ ३० ॥
शूकरोपि गुहाद्वारे तयो रक्षमतिस्तराम् ।
स्थित्वा व्याघ्रेण तेनैव समं युद्धं चकार सः ॥ ३१ ॥
दन्तैर्नखैः करोद्घातैः कृत्वा युद्धं परस्परम् ।
तौ तत्र मरणं प्राप्तौ तिर्यञ्चौ चातिदारुणम् ॥ ३२ ॥

शूकरो मुनिरक्षाभिः प्रायेण शुभयोगतः ।
कल्पे सौधर्मसंज्ञोभू-द्देवो नानर्द्धिको महान् ॥ ३३ ॥
निजदेहप्रभाभारै-र्निष्काशितमहातमाः ।
रूपलावण्यसौभाग्य-सुरंजितजगन्मनाः ॥ ३४ ॥
दिव्याम्बरधरो धीर-स्तिरीटादिविभूषणः ।
स्रग्वी सुकान्तिसंयुक्तो विनिर्जितसुरद्रुमः ॥ ३५ ॥
अणिमादिगुणोपेतः सावधिज्ञानलोचनः ।
पूर्वपुण्यप्रसादेन स देवो दिव्यसौख्यभाक् ॥ ३६ ॥
देवाङ्गनागणैर्युक्तः सुरासुरैः सुसेवितः ।
महाविभवसम्पन्नो महाकल्याणभाजनम् ॥ ३७ ॥
सर्वेन्द्रविलसन्मौलि-कोटिचर्चितपद्भवाम् ।
श्रीमज्जिनेन्द्रचन्द्राणां चरणार्चनकोविदः ३८ ॥
कृत्रिमाकृत्रिमाणां च जिनेन्द्रवरसद्मनाम् ।
जिनेन्द्रप्रतिमानां च साक्षात्तीर्थेशिनां सदा ॥ ३९ ॥
पूजां प्रीत्या प्रकुर्वाणो लसत्संपत्प्रदायिनीम् ।
सत्तीर्थेषु महायात्रां दुर्गतिच्छेदकारिणीम् ॥ ४० ॥
महामुनिषु सद्भक्तिं नित्यं साधर्मिकेषु च ।
सद्वात्सल्यं वितन्वानः स देवः सुखमन्वभूत् ॥ ४१ ॥
इति श्रीजिननाथोक्त-सारधर्मप्रसादतः ।
भव्या भवन्ति सर्वत्र सुखिनो नात्र संशयः ॥ ४२ ॥
त्रैलोके धनधान्यादि-पुत्रपौत्रादिसम्पदाः ।
प्राप्यन्ते भो महाभव्या तासां धर्मो हि कारणम् ॥ ४३ ॥

पूजा श्रीमज्जिनेन्द्राणां पात्रदानं व्रतक्रिया ।
प्रौषधादिविधिः प्रोक्तः सद्धर्मोयं सतां श्रिये ॥ ४४ ॥
स व्याघ्रस्तु महापापी मुनिभक्षणमानसः ।
मृत्वा तेनैव पापेन संप्राप्तो नरकं कुधीः ॥ ४५ ॥
ज्ञात्वेति च महाभव्यैः पुण्यपापफलाफलम् ।
श्रीमज्जिनेन्द्रचन्द्राणां धर्मे कार्या मतिः सदा ॥ ४६ ॥
इति सदभयदाने पात्रभेदेन मान्ये
परमसुखनिदाने ध्वस्तपापारिमाने ।
जिनपतिकथितेस्मिन्सारसूत्रे पवित्रे
भवति जगति सिद्धा सत्कथेयं श्रिये च ॥ ४७ ॥

इति कथाकोशेऽभयदानफलप्राप्तशूकरस्याख्यानं समाप्तम् ।

११३-करकण्डुनृपस्याख्यानम् ।

श्रीमज्जिनं जगत्पूज्यं प्रणम्य प्रगदाम्यहम् ।
करकण्डुनरेन्द्रस्य सच्चरित्रं सुखावहम् ॥ १ ॥
यः पुरा श्रीजिनाधीशं व्रतेनैकेन मुग्धधीः ।
गोपालोपि समभ्यर्च्य प्राप्तवान्सुखमुत्तमम् ॥ २ ॥
तच्चरित्रं पुराणज्ञै-र्यथोक्तं पूर्वसूरिभिः ।
तेषां पादप्रसादेन संक्षेपेण तथोच्यते ॥ ३ ॥
अत्रैव भरतक्षेत्रे देशे कुन्तलसंज्ञके ।
पुरे तेरपुरे नीलमहानीलौ नरेश्वरौ ॥ ४ ॥

श्रेष्ठी श्रीवसुमित्राख्यो जिनपादाब्जषट्पदः ।
श्रेष्ठिनी वसुमत्याख्या तस्याभूद्धर्मवत्सला ॥ ५ ॥
तद्गोपो धनदत्तश्च कदाचिदटवीं गतः ।
सहस्रदलसंयुक्तं कमलं सरसि स्थितम् ॥ ६ ॥
दृष्ट्वा जग्राह तत्रस्था नागकन्या तदावदत् ।
रे रे गोपाल मे पद्म यद्गृहीतं त्वयाधुना ॥ ७ ॥
सर्वोत्कृष्टाय दातव्यं यदीदं वाञ्छसि प्रियम् ।
ततोसौ नागकन्यायाः प्रतिपद्य वचो ध्रुवम् ॥ ८ ॥
तत्सुपद्म समादाय गत्वा स्वश्रेष्ठिनं प्रति ।
जगौ तद्वृत्तकं सोपि श्रेष्ठी श्रीवसुमित्रवाक् ॥ ९ ॥
प्रणम्य भूपतिं प्राह पद्मवृत्तान्तमद्भुतम् ।
ततः स भूपतिश्चापि श्रेष्ठी गोपादिभिर्युतः ॥ १० ॥
सहस्रकूटनामानं गत्वा श्रीमज्जिनालयम् ।
नत्वा जिनं सुगुप्ताख्यं मुनीन्द्रं च प्रपृष्टवान् ॥ ११ ॥
ब्रूहि भो करुणासिन्धो मुने सद्धर्मतत्ववित् ।
सर्वोत्कृष्टो भवेत्कस्तु तच्छ्रुत्वा मुनिरब्रवीत् ॥ १२ ॥
भो नरेन्द्र जगत्स्वामी जिनो रागादिवर्जितः ।
उत्कृष्टोत्कृष्टमाहात्म्यो वर्तते भुवनार्चितः ॥ १३ ॥
तन्निशम्य मुनेर्वाक्यं सर्वे भूपादयो मुदा ।
जय त्वं जिननाथेति प्रोक्त्वा चक्रुर्नमस्क्रियाम् ॥ १४ ॥
तदा गोपालकः सोपि स्थित्वा श्रीमज्जिनाग्रतः ।
भो सर्वोत्कृष्ट ते पद्म गृहाणेदमिति स्फुटम् ॥ १५ ॥

उक्त्वा जिनेन्द्रपादाब्जो-परिक्षिप्त्वा सुपंकजम् ।
गतो मुग्धजनानां च भवेत्सत्कर्म शर्मदम् ॥ १६ ॥
अत्रान्तरे कथामन्यां प्रवक्ष्ये शृणुतादरात् ।
स्रावस्तीपत्तने श्रेष्ठी सुधीः सागरदत्तवाक् ॥ १७ ॥
नागदत्ता कुधीस्तस्य भार्या पापात्प्रलम्पटा ।
सोमशर्मद्विजे कष्टं संजातासक्तमानसा ॥ १८ ॥
भवन्ति योषितः काश्चित्पापिन्यः कुलमन्दिरे ।
कृष्णधूमशिखाकोटि-सन्निभा दुष्टचेतसः ॥ १९ ॥
तदा सागरदत्तोसौ श्रेष्ठी श्रीजिनधर्मवित् ।
ज्ञात्वा तच्चेष्टितं कष्टं सुधीर्वैराग्यमाश्रितः ॥ २० ॥
दीक्षामादाय जैनेन्द्री भवभ्रमणनाशिनीम् ।
तपः कृत्वा दिवं गत्वा तस्मादागत्य शुद्धधीः ॥ २१ ॥
अंगदेशेत्र चम्पायां वसुपालमहीपतेः ।
वसुमत्यां सुतो राज्ञां संजातो दन्तिवाहनः ॥ २२ ॥
एवं यावत्सुखं राजा वसुपालः स तिष्ठति ।
तावत्स सोमशर्माख्यो द्विजो भ्रान्त्वा भवावलिम् ॥ २३ ॥
देशे कलिंगसंज्ञे च नर्मदातिलकाह्वयः ।
हस्ती जातः स्वपापेन प्राणी दुर्गतिभाग्भवेत् ॥ २४ ॥
केनचिच्च द्विपः सोपि वसुपालस्य भूपतेः ।
प्रेषितः कर्मयोगेन संस्थितस्तस्य मन्दिरे ॥ २५ ॥
नागदत्ता च सा मृत्वा तामलिप्तपुरे क्रमात् ।
नागदत्ता पुनर्जाता वसुदत्तवणिक्प्रिया ॥ २६ ॥

सा तदा द्वे सुते लेभे धनवत्यभिधां तथा ।
धनश्रियं च सद्रूप-मण्डितां गुणशालिनीम् ॥ २७ ॥
नागानन्दपुरे कश्चि-द्धनपालो वणिक्सुतः ।
तां धनादिवतीं कन्यां विधिना परिणीतवान् ॥ २८ ॥
वत्सदेशे सुविख्याते कोशाम्बीपत्तने शुभे ।
श्रेष्ठिनो वसुमित्रस्य धनश्रीः साभवत्प्रिया ॥ २९ ॥
तत्संसर्गेण सा तत्र धनश्रीः पुण्ययोगतः ।
श्रुत्वा धर्मं जिनेन्द्राणां संजाता श्राविकोत्तमा ॥ ३० ॥
कदाचिन्नागदत्ता च पुत्रीस्नेहेन सन्मुदा ।
धनश्रियो गृहं प्राप्ता तया पुत्र्या च सद्धिया ॥ ३१ ॥
प्राघूर्णक्रियां कृत्वा सा नीता मुनिसन्निधौ ।
हितान्यणुव्रतान्युच्चै-र्ग्राहिता सा पुनस्ततः ॥ ३२ ॥
बृहत्पुत्री समीपं च गता तत्र तया तदा ।
बुद्धभक्ता कृताप्येवं लब्ध्वा वारत्रयं पुनः ॥ ३३ ॥
ग्राहिताणुव्रतान्येवं धनवत्या निराकृता ।
ततश्चतुर्थवारे च गृहीत्वा तानि भक्तितः ॥ ३४ ॥
धर्मे श्रीमज्जिनेन्द्रोक्ते सारशर्मविधायिनि ।
दृढा भूत्वा स्वकालान्ते मृत्वा सत्पुण्यमाश्रिता ॥ ३५ ॥
कोशांब्यां वसुपालाख्य-भूपतेः कुलयोषितः ।
वसुमत्याः सुता जाता कुदिने शेषपापतः ॥ ३६ ॥
तदा राजादिभिः कन्या मंजूषायां निधाय सा ।
स्वनाममुद्रिकोपेता यमुनायां प्रवाहिता ॥ ३७ ॥

गंगायाः संगमं प्राप्य कुसुमाख्यमहापुरे ।
गता पद्महृदे दृष्टा मालाकारेण केनचित् ॥ ३८ ॥
नाम्ना कुसुमदत्तेन समानीय गृहं स्त्रियै ।
दत्ता कुसुममालायै तया सा बहुयत्नतः ॥ ३९ ॥
पद्महृदे यतः प्राप्ता ततः पद्मावतीति सा ।
प्रोक्त्वा संपोषिता तत्र संजाता नवयौवना ॥ ४० ॥
एकदा केनचिद्वीक्ष्य तस्या रूपं मनोहरम् ।
गत्वा शीघ्रं मुदा दन्ति-वाहनस्य प्रजल्पितम् ॥ ४१ ॥
सोप्यागत्य समालोक्य तद्रूपं चित्तरंजनम् ।
मालाकारं प्रतिप्राह ब्रूहि रे सत्यमेव च ॥ ४२ ॥
कस्येयं तनुजा चास्ति तच्छ्रुत्वा सोपि भो प्रभो ।
अस्याः पुंत्रीति मंजूषा तदग्रे क्षिप्तवान्द्रुतम् ॥ ४३ ॥
वीक्ष्य तत्रस्थितां राज-मुद्रिकां सुमनोहराम् ।
तां सज्जातिं परिज्ञात्वा दन्तिवाहनकोपि सः ॥ ४४ ॥
परिणीय महाभूत्या ततः पद्मावतीं सतीम् ।
समानीय गृहं शीघ्रं तया सार्द्धं सुखं स्थितः ॥ ४५ ॥
कियत्यपि गते काले वसुपालो नरेश्वरः ।
दृष्ट्वा स्वमस्तके श्वेतं केशं वा यमपाशकम् ॥ ४६ ॥
त्रिधा वैराग्यमासाद्य स्वराज्यं तनुजाय च ।
दत्वा तस्मै जिनेन्द्राणां महास्नपनपूर्वकम् ॥ ४७ ॥
गृहीत्वा संयमं सारं मुनिर्भूत्वा विचक्षणः ।
कृत्वा तपो जिनेन्द्रोक्तं स्वर्गे संप्राप्तवान्सुखम् ॥ ४८ ॥

राज्यं प्राप्य ततः सोपि दन्तिवाहनभूपतिः ।
भुंजानो विविधान्भोगान्संस्थितो धर्मतत्परः ॥ ४९ ॥
एकदा सा सती पद्मा-वती सुप्ता स्वमन्दिरे ।
स्वप्ने गजादिकं दृष्ट्वा स्वनाथस्य जगौ मुदा ॥ ५० ॥
तेनोक्तं ते सुतो भावी प्रतापी सिंहदर्शनात ।
क्षत्रियाणां भवेन्मुख्यो हे प्रिये गजवीक्षणात् ॥ ५१ ॥
भास्करस्येक्षणाच्चापि प्रजाम्भोजप्रमोददः ।
इत्याकर्ण्य प्रभोर्वाक्यं सा सन्तुष्टा तरां हृदि ॥ ५२ ॥
तस्तेरपुरे गोपो धनदत्तः स शुद्धधीः ।
शेवालकह्रदं प्राप्त-स्तरीतुं निजलीलया ॥ ५३ ॥
तत्र शेवालकेनोच्चै-र्वेष्टितो मरणं श्रितः ।
पुण्यात्पद्मावतीगर्भे समागत्य स्थितस्तदा ॥ ५४ ॥
तन्मृत्युं च परिज्ञाय स श्रेष्ठी वसुमित्रवाक् ।
संस्कार्य मृतकं तच्च स्वयं वैराग्यमाश्रितः ॥ ५५ ॥
नत्वा सुगुप्तनामानं मुनींद्रं भक्तिनिर्भरः ।
तस्माद्दीक्षां समादाय सत्तपोभिर्दिवं गतः ॥ ५६ ॥
अथ चम्पापुरे पद्मा-वत्यास्तस्याः सुमानसे ।
जातो दोहलकश्चेति सविद्युन्मेघवर्षणः ॥ ५७ ॥
अंकुशं स्वयमादाय धृत्वा रूपं नरस्य च ।
समारुह्य द्विपपृष्ठे कृत्वा राजानमप्यलम् ॥ ५८ ॥
पत्तनाद्बहिरित्युच्चै-र्भ्रमामि स्वेच्छया सुखम् ।
ज्ञात्वा तन्मानसं चेति दन्तिवाहनभूपतिः ॥ ५९ ॥

स्वमित्रवायुवेगेन खेचरेण महाधिया ।
कारयित्वा तदा मेघा-डम्बरं चपलान्वितम् ॥ ६० ॥
नर्मदातिलकं शीघ्र-मलं कृत्वा महागजम् ।
चटित्वा च तया सार्द्धं पूर्वोक्तविधिना पुरात् ॥ ६१ ॥
निर्गतस्तु महाभूत्या सेवकाद्यैः समन्वितः ।
अहो मनोरथः स्त्रीणां महाश्चर्यविधायकः ॥ ६२ ॥
ततः कर्मोदयात्सोपि करीन्द्रो दुष्टमानसः ।
तदंकुशं समुल्लंघ्य संचचाल प्रवेगतः ॥ ६३ ॥
महाटवीं गजः प्राप्त-स्तदा स नृपतिः सुधीः ।
वृक्षशाखां समादाय शिक्षां वा सद्गुरोर्दृढम् ॥ ६४ ॥
समुत्तीर्य ततश्चम्पा-पुरीं प्राप्तः स्वपुण्यतः ।
भवेत्पुण्यवतां पुंसा-मुपायः संकटेपि च ॥ ६५ ॥
ततोसौ नृपतिर्गेहे हा त्वं पद्मावति प्रिये ।
किं ते जातमिदं कष्टं कुर्वञ्छोकमिति स्फुटम् ॥ ६६ ॥
तदा विद्वज्जनैः श्रीम-ज्जैनतत्वविदाम्वरैः ।
सम्बोधितस्तदा दन्ति-वाहनः सुखतः स्थितः ॥ ६७ ॥
भवेत्सतां शुभं वाक्यं चन्दनादपि शीतलम् ।
अन्तस्तापं निहन्त्युच्चै-र्यत्क्षणात्सर्वदेहिनाम् ॥ ६८ ॥
सोपि हस्ती मदोन्मत्तो देशानुल्लंघ्य भूरिशः ।
गत्वा दक्षिणदेशं च सरः श्रान्तः प्रविष्टवान् ॥ ६९ ॥
तां तडागे गजारूढां विलोक्य जलदेवता ।
समुत्तार्य द्विपाच्छीघ्रं स्थापयामास तत्तटे ॥ ७० ॥

अत्रान्तरे समागत्य रुदन्तीं वीक्ष्य तां जगौ ।
मालाकारस्तु सम्बोध्य भो भगन्येहि मद्गृहम् ॥ ७१ ॥
तच्छ्रुत्वा च तया प्रोक्तं कस्त्वं सोपि भटाह्वयकः ।
मालाकारोहमित्युक्त्वा हस्तिनागपुरे द्रुतम् ॥ ७२ ॥
सतीं स्वगृहमानीय स्वसारं प्रतिपद्य ताम् ।
स्थापयामास सामान्यो भवेत्कश्चिच्छुभाशयः ॥ ७३ ॥
तस्मिन्क्वापि गते तस्य भार्यया मारिदत्तया ।
गृहान्निर्घाटिता सा च प्राप्ता घोरं श्मशानके ॥ ७४ ॥
प्रसूता तनुजं तत्र सती सत्पुण्यसंयुतम् ।
सर्वलक्षणसम्पूर्णं विचित्रं विधिचेष्टितम् ॥ ७५ ॥
तस्मिन्नेव क्षणे तत्र तां प्रणम्य प्रभक्तितः ।
मातंगः संजगादेति मातस्त्वं स्वामिनी मम ॥ ७६ ॥
कस्त्वं तयोदिते सोपि जगौ चात्र खगाचले ।
दक्षिणश्रेणिसंस्थेस्मिन्पुरे विद्युत्प्रभे शुभे ॥ ७७ ॥
विद्युत्प्रभः खगाधीशो विद्युल्लेखास्ति कामिनी ।
तयोरहं समुत्पन्नो बालदेवाभिधः सुतः ॥ ७८ ॥
एकदा भार्यया सार्द्धं नाम्ना कनकमालया ।
दक्षिणाभिमुखं गच्छन्व्योमयानस्थितोहकम् ॥ ७९ ॥
मार्गे रामगिरौ दृष्ट्वा विमानस्खलनेन च ।
वीरभट्टारकं तस्यो-पसर्गस्तु मया कृतः ॥ ८० ॥
तदा पद्मावती देवी निजासनसुकम्पनात् ।
समागत्य जिनेन्द्राणां चरणाम्भोजषट्पदी ॥ ८१ ॥
उपसर्गं निवार्योच्चै-र्विद्याच्छेदं मम क्रुधा ।
चक्रे सद्दृष्टयो नैवं सहन्ते साधुपीडनम् ॥ ८२ ॥

विद्याच्छेदे तदा मात-र्दन्ती वा दन्तवर्जितः ।
निर्मदोहं तरां भूत्वा तां नत्वा प्रोक्तवानिति ॥ ८३ ॥
मया चाज्ञानभावेन कृतः साधूपसर्गकः ।
भो मातस्त्वं कृपां कृत्वा विद्यां मे देहि देवते ॥ ८४ ॥
पद्मावती महादेवी शान्ता भूत्वा तदा जगौ ।
हस्तिनागपुराभ्यर्णे श्मशाने भूरिभीतिदे ॥ ८५ ॥
यो बालकः गुणोपेतः संभविष्यति रे खग ।
तस्य रक्षां प्रयत्नेन त्वं करिष्यसि भक्तितः ॥ ८६ ॥
तद्राज्ये ते महाविद्याः सर्वाः सेत्स्यन्ति तच्छ्रुतेः ।
अहं मातंगवेषेण कुर्वन्यत्नं श्मशानके ॥ ८७ ॥
तिष्ठाम्यत्र तदाकर्ण्य राज्ञी पद्मावती च सा ।
सन्तुष्टा मानसे गाढं वर्द्धयैनं त्वमङ्गजम् ॥ ८८ ॥
इत्युक्त्वा तदा तस्य खेचरस्य समर्पयत् ।
सोपि बालं समादाय निधानमिव तुष्टवान् ॥ ८९ ॥
बालेदवखगाधीशा-स्तं सुलक्षणसंयुतम् ।
ददौ कनकमालायै स्वस्त्रियै विलसत्प्रभम् ॥ ९० ॥
दृष्ट्वा तत्करयोः कण्डुं करकण्डुरयं सुतः ।
संप्रोक्त्वेति प्रयत्नात्तं पोषयामास सा सती ॥ ९१ ॥
अहो पूर्वप्रपुण्येन जन्तोः कष्टेपि सम्पदा ।
संभवत्येव तद्भव्यैः कार्यं पुण्यं जिनोदितम् ॥ ९२ ॥
पुण्यं सुपात्रसद्दानं पुण्यं श्रीजिनपूजनम् ।
पुण्यं व्रतोपवासाद्यैः संभवेच्छर्मदं सताम् ॥ ९३ ॥

ततः पद्मावती सा च गान्धारीक्षुल्लिकां शुभाम् ।
दृष्ट्वा सुपुण्यतो भक्त्या नत्वा प्रोक्त्वा स्ववृत्तकम् ॥ ९४ ॥
तया सार्द्धं प्रगत्वा च यत्नाल्लब्ध्वा जगद्धितम् ।
समाधिगुप्तनामानं प्रणम्य मुनिसत्तमम् ॥ ९५ ॥
जगौ स्वामिन्कृपां कृत्वा दीक्षां मे देहि शुद्धधीः ।
तच्छ्रुत्वा स मुनिः प्राह जैनतत्त्वविदाम्वरः ॥ ९६ ॥
अहो पुत्रि तवेदानीं दीक्षाकालो न विद्यते ।
पूर्वं वारत्रयं चक्रे त्वया सद्व्रतखण्डनम् ॥ ९७ ॥
पश्चाद्व्रतं समाराध्य त्वं जातासि नृपात्मजा ।
दुःखं ते व्रतभङ्गेन जातं वारत्रयं ध्रुवम् ॥ ९८ ॥
तत्कर्मणि प्रशान्ते च पुत्रराज्यं विलोक्य वै ।
तेन सार्द्धं सुपुत्रेण दीक्षा ते संभविष्यति ॥ ९९ ॥
श्रुत्वा समाधिगुप्तस्य मुनेर्वाक्यं सुखप्रदम् ।
नत्वा तं क्षुल्लिकाभ्यर्णे भक्त्या सौख्येन सास्थिता ॥ १०० ॥
इतोसौ बालकस्तेन बालदेवखगेशिना ।
सारसर्वकलासूचैः संचक्रे कुशलो महान् ॥ १०१ ॥
एकदा तौ समागत्य करकण्डुखगाधिपौ ।
हस्तिनागपुरस्यैव स्मशाने लीलया स्थितौ ॥ १०२ ॥
तदा तत्र समायातो मुनीन्द्रो जयभद्रवाक् ।
दिव्यज्ञानी लब्धसत्तो मुनिवृन्दसमन्वितः ॥ १०३ ॥
केनचिद्यति ना तत्र दृष्ट्वा नरकपालके ।
मुखे लोचनयोर्जातं वेणुत्रयमनुत्तरम् ॥ १०४ ॥

गुरोः प्रोक्तमहो स्वामिन्निदं किं कौतुकं स च ।
तछ्रुत्वा जयभद्राख्यो मुनिः प्राह तपोनिधिः ॥ १०५ ॥
हस्तिनागपुरे योत्र महाराजा भविष्यति ।
अंकुशाच्छत्रदण्डाः स्यु-स्तस्य चैतत्रयेण वै ॥ १०६ ॥
विप्रेण केनचित्तत्र समाकर्ण्य मुनेर्वचः ।
वेणुत्रयं समुन्मूल्य गृहीतं सुधनाशया ॥ १०७ ॥
तस्माद्विप्रात्सुधीः सोपि करकण्डुर्गृहीतवान् ।
यस्य यन्मुनिनोद्दिष्टं तस्य तद्भवति ध्रुवम् ॥ १०८ ॥
कियद्दिनेषु तत्रैव हस्तिनागपुरे मृतः ।
बलवाहनभूपस्तु विपुत्रः कर्मयोगतः ॥ १०९ ॥
तत्सज्जनैस्तदा हस्ती प्रेषितो विधिपूर्वकम् ।
स्वराजान्वेषणायोच्चै-स्ततः सोपि महागजः ॥ ११० ॥
करकण्डुं समालोक्य सारपुण्यसमन्वितम् ।
अभिषिच्य प्रयत्नेन धृत्वा तं निजमस्तके ॥ १११ ॥
राजमन्दिरमानीय स्थापयामास विष्टरे ।
ततस्तैः सज्जनैश्चापि प्रोल्लसज्जयघोषणैः ॥ ११२ ॥
महोत्सवशतैः शीघ्रं करकण्डुर्गुणोज्वलः ।
स्वप्रभुर्विहितो भक्त्या किं न स्याज्जिनपूजनात् ॥ ११३ ॥
तत्क्षणे बालदेवस्य खेचरस्य सुपुण्यतः ।
विद्यासिद्धिरभूदुच्चै-स्ततोसौ परया मुदा ॥ ११४ ॥
पद्मावतीं सतीं तस्य मातरं तां समर्प्य च ।
सस्नेहं तं प्रणम्योच्चैः खगाद्रिं खचरोगमत् ॥ ११५ ॥

तदासौ करकण्डुश्च हस्तिनागपुरे प्रभुः ।
सर्वशत्रून्समुन्मूल्य कुर्वन्राज्यं सुखं स्थितः ॥ ११६ ॥
तत्प्रतापं समाकर्ण्य कदाचिद्दन्तिवाहनः ।
दूतं संप्रेषयामास तदन्ते सोपि दूतकः ॥ ११७ ॥
समागत्य प्रभुं नत्वा करकण्डुं जगाद च ।
भो प्रभो मत्प्रभुर्वक्ति दन्तिवाहननामभाक् ॥ ११८ ॥
त्वया राज्यं प्रकर्तव्यं कृत्वा मे सेवनं सदा ।
अन्यथा ते प्रभुत्वं च वर्त्तते नैव भूतले ॥ ११९ ॥
तच्छ्रुत्वासौ प्रभुः प्राह करकण्डुर्महाक्रुधा ।
रे रे दूत त्वकं याहि मारयामि न नीतिवित् ॥ १२० ॥
रणांगणे मया कार्यं भावि यत्क्रियते हि तत् ।
इत्युक्त्वा वेगतो दत्वा प्रयाणं स्वबलान्वितः ॥ १२१ ॥
गत्वा चम्पापुरीं बाह्ये संस्थितः सुभटाग्रणीः ।
कार्ये समागते न स्युः सद्भटा मन्दबुद्धयः ॥ १२२ ॥
दन्तिवाहनराजापि स्वसैन्येन विनिर्गतः ।
तदा व्यूहप्रतिव्यूह क्रमेण द्वे बले स्थिते ॥ १२३ ॥
तस्मिन्नेव क्षणे ज्ञात्वा सर्वं पद्मावती सती ।
गत्वा शीघ्रं स्वभर्तुश्च संजगौ सर्ववृत्तकम् ॥ १२४ ॥
तदा गजात्समुत्तीर्य-समागत्य च सम्मुखम् ।
पिता पुत्रश्च सोप्याशु करकण्डुर्विचक्षणः ॥ १२५ ॥
दृष्ट्वा परस्परं तत्र पितुः पादाम्बुजद्वयम् ।
ननाम विनयोपेतः सुपुत्रो भक्तिनिर्भरः ॥ १२६ ॥

दन्तिवाहनभूपोपि तं समालिंग्य सत्सुतम् ।
विभूत्या तूर्यनिर्घोषैः पुत्राद्यैः प्रविशत्पुरीम् ॥ १२७ ॥
भक्त्या जिनान्समभ्यर्च्य महास्नपनपूर्वकम् ।
तस्था गेहे सुखं धीमान्पूर्वपुण्यप्रसादतः ॥ १२८ ॥
अथान्यदिवसे राजा सोपि श्रीदन्तिवाहनः ।
विभूत्याष्टसहस्रोरु-कन्याभिः परमादरात् ॥ १२९ ॥
विवाहं कारयित्वाशु करकण्डोर्महाधियः ।
राजभारं च तस्यैव समर्प्य गुणशालिनः ॥ १३० ॥
स्वयं पद्मावतीदेव्या सार्द्धं पञ्चेन्द्रियोद्भवान् ।
भुंजानो विविधान्भोगान्मंदिरे सुखतः स्थितः ॥ १३१ ॥
राज्ये स्थित्वा सुधीः सोपि करकण्डुर्महानृपः ।
श्रीमज्जिनेन्द्रचन्द्राणां धर्मकर्मपुरस्सरम् ॥ १३२ ॥
स्वप्रजां पुत्रवन्नित्यं पालयन्परया मुदा ।
पूर्वपुण्यप्रसादेन चिरं संतिष्ठते मुदा ॥ १३३ ॥
तदा मंत्रिवरैः प्रोक्तं प्रणम्य परमादरात् ।
श्रूयतां देव यद्भक्तै-रस्माभिः संनिगद्यते ॥ १३४ ॥
साधनीया भवद्भिस्तु चेरमाख्यस्तथा परः ।
पाण्डचश्चोलश्च राजानो गर्वपर्वतमाश्रिताः ॥ १३५ ॥
तच्छ्रुत्वासौ प्रभुस्तेषां प्रेषयामास दूतकम् ।
तेनागतेन संज्ञात्वा तेषां गर्वं च सत्वरम् ॥ १३६ ॥
गत्वा स्वयं क्रुधा युद्ध-स्थाने यावत्स्थितस्तदा ।
तेपि सम्मुखमागत्य चक्रुर्युद्धं सुदारुणम् ॥ १३७ ॥

करकण्डुस्ततो दृष्ट्वा भूपः स्वबलभङ्गकम् ।
महायुद्धं विधायोच्चै-र्धृत्वा शत्रुभूपतीन् ॥ १३८ ॥
कोपात्तन्मुकुटे पादं न्यसंस्तत्र विलोक्य च ।
जिनबिम्बानि हा कष्टं मया किं पापिना कृतम् ॥ १३९ ॥
इत्युक्त्वा तान्प्रति प्राह यूयं जैनाः किमत्र भो ।
तदातैरोमिति प्रोक्ते करकण्डुश्च भूपतिः ॥ १४० ॥
हा हा मया निकृष्टेन क्रोधान्धेन विनिर्मितः ।
उपसर्गो हि जैनानां महापापविधायकः ॥ १४१ ॥
इत्यात्मनिन्दनं कृत्वा कारयित्वा च तान्क्षमाम् ।
तैः सार्द्धं च समागच्छन्स्वदेशं प्रति संमुदा ॥ १४२ ॥
मार्गे तेरपुराभ्यर्णे संस्थितः सैन्यसंयुतः ।
तदागत्य च भिल्लाभ्यां तं प्रणम्य प्रजल्पितम् ॥ १४३ ॥
अस्मात्तेरपुरादस्ति दक्षिणस्यां दिशि प्रभो ।
गव्यूतिकान्तरे चारु पर्वतस्योपरिस्थितम् ॥ १४४ ॥
धाराशिवपुरं चास्ति सहस्रस्तंभसंभवम् ।
श्रीमज्जिनेन्द्रदेवस्य भवनं सुमनोहरम् ॥ १४५ ॥
तस्योपरि तथा शैल-मस्तके संप्रवर्त्तते ।
वल्मीकं तच्च सद्धस्ती शुभो भक्त्या दिनं प्रति ॥ १४६ ॥
शुण्डादण्डेन सत्तोयं गृहीत्वा कमलं सुधीः ।
समागत्य परीत्योच्चैः समभ्यर्च्य नमत्यलम् ॥ १४७ ॥
इत्याकर्ण्य प्रहर्षेण ताभ्यां दत्वोचितं द्रुतम् ।
करकण्डुर्महाराजो जिनभक्तिपरायणः ॥ १४८ ॥

गत्वा तत्र समालोक्य जिनेन्द्रभवनं शुभम् ।
समभ्यर्च्य जिनाधीशान्स्वर्गमोक्षसुखप्रदान् ॥ १४९ ॥
स्तुतिं चक्रे च सद्भक्त्या शर्मकोटिविधायिनीम् ।
प्रमादो नैव सद्दृष्टे-र्धर्मकर्मणि सर्वदा ॥ १९० ॥
ततो दृष्ट्वा च वल्मीकं पूजयन्तं महाद्विपम् ।
अत्रास्ति कारणं किंचि-च्चेतसि संविचार्य च ॥ १९१ ॥
तद्वल्मीकं समुन्मूल्य मंजूषां तत्र संस्थिताम् ।
दृष्ट्वोद्घाट्य प्रयत्नेन वीक्ष्य रत्नमयीं च सः ॥ १९२ ॥
श्रीमत्पार्श्वजिनेन्द्रस्य प्रतिमां पापनाशिनीम् ।
सन्तुष्टो मानसे चारु-सद्दृष्टिर्धर्मवत्सलः ॥ १९३ ॥
तस्याश्च भवनं चारु कारयित्वा सुभक्तितः ।
सुधीरग्गलदेवाख्यं स्थापयामास तत्र ताम् ॥ १९४ ॥
स मूलप्रतिमाङ्के च ग्रन्थिं दृष्ट्वा महीपतिः ।
शिल्पकर्मिणमा प्राह विरूपं दृश्यते तराम् ॥ १९५ ॥
इमां स्फोटय तच्छ्रुत्वा शिलाकर्मी जगाद च ।
अत्र तोयसिरा देव विद्यते तन्न भिद्यते ॥ १९६ ॥
भिद्यते चेदयं ग्रन्थि-स्तोयपूरो महानहो ।
निर्गच्छति ततस्तस्य महाग्रहवशेन च ॥ १९७ ॥
स्फोटितः शिल्पिनासौ च निर्गतो जलपूरकः ।
तस्मान्निर्गमने जातो राजादीनां च संशयः ॥ १९८ ॥
तदासौ करकण्डुश्च राजा श्रीजिनभक्तिभाक् ।
जलापनयनाग्राहं कृत्वा धर्मानुरागतः ॥ १९९ ॥

दर्भशय्यां समासीनो द्विधा संन्यासपूर्वकम् ।
तत्पुण्यतस्तदा शीघ्रं देवो नागकुमारकः ॥ १६० ॥
प्रत्यक्षीभूय तं प्राह नत्वा सद्विनयान्वितः ।
कालमाहात्म्यतो देव प्रतिमा रत्ननिर्मिता ॥ १६१ ॥
रक्षितुं शक्यते नैव तस्माच्च लयणं मया ।
तोयपूर्णं कृतं सर्वं भवद्भिस्तु ततः प्रभो ॥ १६२ ॥
जलापनयने चात्र कर्त्तव्यो नाग्रहः सुधीः ।
इत्याक्षेपेण देवेन स राजा धार्मिको महान् ॥ १६३ ॥
भक्त्या सद्धर्भशय्यायाः शीघ्रमुत्थापितो वदत् ।
केनेदं लयणं ब्रूहि कारितं सुमनोहरम् ॥ १६४ ॥
तथा वल्मीकमध्ये च प्रतिमा पापनाशिनी ।
स्थापिता केन तच्छ्रुत्वा जगौ नागकुमारकः ॥ ६५ ॥
अत्रैव विजयार्द्धेस्ति चोत्तरश्रेणिसंस्थितम् ।
नभस्तिलकमत्युच्चैः संपदाभिर्भृतं पुरम् ॥ १६६ ॥
तत्र चामितवेगाख्य-सुवेगौ खचराधिपौ ।
संजातौ श्रीजिनेन्द्राणां पादपद्मद्वये रतौ ॥ १६७ ॥
ज्येष्ठः परश्च भद्रात्मा तौ द्वौ चैकदिने मुदा ।
आर्यखण्डेत्र सद्भक्त्या समायातौ जिनालयान् ॥ १६८ ॥
वन्दितुं च समभ्यर्च्य मलयाख्यगिरौ जिनान् ।
भ्रमन्तौ पर्वते तत्र श्रीमत्पार्श्वजिनाकृतिम् ॥ १६९ ॥
दृष्ट्वा नत्वा समादाय मंजूषायां निधाय च ॥
अत्रैव सद्गिरौ चेमां मंजूषां सारयन्नतः ॥ १७० ॥

संस्थाप्य क्वापि गत्वा च पुनश्चागत्य भक्तितः ।
समुत्थापयतो याव-त्ता-वन्नोत्तिष्ठति त्वसौ ॥ १७१ ॥
ततस्तेरपुरं गत्वा प्रणम्यावधिलोचनम् ॥
मुनीन्द्रं प्राहतुः स्वामिन्कथं नोत्तिष्ठति प्रभो ॥ १७२ ॥
मंजूषिकेति संश्रुत्वा ज्ञानी प्राह मुनीश्वरः ।
अहो खगाधिपौ चेषा मंजूषा शर्मकारिणी ॥ १७३ ॥
लयणस्योपरि व्यक्तं लयणं संभविष्यति ।
त्रक्त्येवं च पुनर्वक्ति भावि यच्छ्रुणुतादरत् ॥ १७४ ॥
अयं सुवेगनामा च मृत्वार्त्तध्यानतो ध्रुवम् ।
गजो भूत्वा स्वमंजूषा-मिमां संपूजयिष्यति ॥ १७५ ॥
करकण्डुर्यदा राजा तां समुत्पाटयिष्यति ।
तदा द्विपस्तु संन्यासं कृत्वा स्वर्गं प्रयास्यति ॥ १७६ ॥
इत्याकर्ण्य मुनेर्वाक्यं मानसे तौ खगाधिपौ ।
प्रतिमायाः स्थिरत्वस्य संज्ञात्वा कारणं महत् ॥ १७७ ॥
पुनस्तं मुनिमानम्य पृष्टवन्तौ महामुने ।
कारितं लयणं केन शर्मदं भव्यदेहिनाम् ॥ १७८ ॥
तन्निशम्य मुनिः सोपि जगौ संज्ञानविग्रहः ।
इहैव विजयार्द्धे च दक्षिणश्रेणिसंस्थिते ॥ १७९ ॥
रथनूपुरसन्नाम्नि पुरे ख्यातौ खगाधिपौ ।
जातौ नीलमहानीलौ संग्रामे शत्रुभिः क्रुधा ॥ १८० ॥
प्राप्तविद्याधनच्छेदौ ताविहागत्य पर्वते ।
कृत्वा वासं सुखं स्थित्वा कियत्कालं सुधार्मिकौ ॥ १८१ ॥

कारयित्वा जिनेन्द्राणां लयणं सौख्यकारणम् ।
पुण्याद्विद्याः समाप्योच्चै-र्विजयार्द्धे गतौ मुखम् ॥ १८२ ॥
ततस्तौ खेचरेन्द्रौ च तपः श्रीमज्जिनोदितम् ।
कृत्वा नीलमहानीलौ प्राप्तौ स्वर्गं गुणोज्वलौ ॥ १८३ ॥
इत्यादिसर्वसम्बन्धं संश्रुत्वामितवेगवाक् ।
ज्येष्ठो दीक्षां समादाय खगेशो सुतपोनिधिः ॥ १८४ ॥
कालं समाधिना कृत्वा स्वर्गं ब्रह्मोत्तराभिधम् ।
गत्वा महर्द्धिको देवः संजातो जिनभक्तिभाक् ॥ १८५ ॥
आर्त्तध्यानेन मृत्वा स सुवेगस्तु खगाधिपः ।
हस्ती जातोयमत्युच्चै-स्तेन देवेन बोधितः ॥ १८६ ॥
भूत्वा जातिस्मरः पुण्या-त्सम्यक्त्वाणुव्रतानि च ।
समादाय च वल्मीकं भक्त्या संपूजयन्स्थितः ॥ १८७ ॥
करकण्डो महीनाथ भो त्वयोत्पाटिते सति ।
वल्मीके सोपि हस्ती च संन्यासेनात्र तिष्ठति ॥ १८८ ॥
त्वं च तेरपुरेत्रैव पुरा गोपोसि भो प्रभो ।
पूजया जिननाथस्य राजा जातोसि साम्प्रतम् ॥ १८९ ॥
तस्मादिदं जगत्सारं सुधीः श्रीमज्जिनार्चनम् ।
येन प्राणी भवत्येवं क्षणात्सत्सौख्यभाजनम् ॥ १९० ॥
इत्युच्चैस्तं सुराजानं करकण्डुं गुणोज्वलम् ।
सुधीर्नागकुमारोसौ संबोध्यैवं सुरोत्तमः ॥ १९१ ॥
नत्वा धर्मानुरागेण संप्राप्तः स्वालयं मुदा ।
अहो पुण्येन जन्तूनां मित्रत्वं तादृशं भवेत् ॥ १९२ ॥

ततस्तेन नरेन्द्रेण तृतीयदिवसे द्रुतम् ।
कारितं जैनसद्धर्म-श्रवणं तस्य दन्तिनः ॥ १९३ ॥
सोपि दन्ती तदा मृत्वा सम्यक्त्वपरिणामभाक् ।
सहस्रारं दिवं प्राप्य देवो जातो महर्द्धिकः ॥ १९४ ॥
पशुश्चापि सुरो भूत्वा बभूव सुखभाजनम् ।
भवेच्छ्रीमज्जिनेन्द्रोक्त-धर्मात्किं प्राणिनां धनम् ॥ १९५ ॥
करकण्डुश्च भूपालो जैनधर्मधुरंधरः ।
स्वस्य मातुस्तथा बाल-देवस्योच्चैः सुनामतः ॥ १९६ ॥
कारयित्वा सुधीस्तत्र लयणत्रयमुत्तमम् ।
तत्प्रतिष्ठां महाभूत्या शीघ्रं निर्माप्य सादरात् ॥ १९७ ॥
स्वपुत्रवसुपालाय राज्यं दत्वा विरक्तधीः ।
संसारदेहभोगांश्च ज्ञात्वासौ बुद्बुदोपमान् ॥ १९८ ॥
पित्रा क्षत्रियभूपाद्यै-श्चेरमाद्यैः विचक्षणः ।
पद्मावत्या समं मात्रा दीक्षां जैनेश्वरीं श्रितः ॥ १९९ ॥
कृत्वा तपो जगत्सारं संसाराम्भोधिपारदम् ।
निर्मलं निर्मलः सोपि संन्यासेन समं स्थिरः ॥ २०० ॥
ध्यायन्पादाम्बुजद्वद्वं जिनेन्द्राणां सुखप्रदम् ।
सहस्रारं दिवं प्राप्तः करकण्डुमुनीश्वरः ॥ २०१ ॥
दन्तिवाहनभूपाद्याः कालान्ते तेपि सद्धियः ।
स्वस्वपुण्यानुसारेण स्वर्गलोकं ययुः सुखम् ॥ २०२ ॥
पुरा पद्मेन संपूज्य श्रीजिनं कोटिशर्मदम् ।
करकण्डुः सुखं प्राप्तः किं पुनश्चाष्टधार्चनैः ॥ २०३ ॥

ये भव्याः श्रीजिनेन्द्राणां भक्त्या पादद्वयार्चनम् ।
नित्यमेव प्रकुर्वन्ति ते लभन्ते परं सुखम् ॥ २०४ ॥
गोपालो धनदत्तवागपि पुरा मुग्धोऽपि पद्मेन च
श्रीमज्जैनपदाम्बुजं शुभतरं संपूज्य पूज्योभवत् ।
देवाद्यैः करकण्डुनामनृपतिः श्रीमत्प्रभाचन्द्रव–
त्तस्माद्भव्यजनैर्जिनेन्द्रचरणाम्भोजं सदाभ्यर्च्यते ॥२०५॥

**इति कथाकोशे जिनपूजाफलप्राप्तकरकण्डुनृपते-
राख्यानं समाप्तम् ।**

११४–जिनपूजाफलप्राप्तभेकाख्यानम् ।

श्रीमज्जिनं जगत्पूज्यं भारतीं भुवनोत्तमाम् ।
वक्ष्येहं सद्गुरुं नत्वा जिनपूजाफलोदयम् ॥ १ ॥
श्रीमज्जिनेन्द्रचन्द्राणां पूजा पापप्रणाशिनी ।
स्वर्गमोक्षप्रदा प्रोक्ता प्रत्यक्षं परमागमे ॥ २ ॥
यः करोति सुधीर्भक्त्या पवित्रो धर्महेतवे ।
स एव दर्शने शुद्धो महाभव्यो न संशयः ॥ ३ ॥
यस्तस्या निन्दकः पापी स निन्द्यो जगति ध्रुवम् ।
दुःखदारिद्र्यरोगादि-दुर्गतेर्भाजनं भवेत् ॥ ४ ॥
स्नपनं पूजनं प्रीत्या स्तवनं जपनं तथा ।
जिनानामाकृतीनां च कुर्याद्भव्यमतल्लिकः ॥ ५ ॥

जिनयात्राप्रतिष्ठाभि-र्गरिष्ठाभिर्विशिष्टधीः ।
प्रासादप्रतिमोद्धारैः कुर्याद्धर्मप्रभावनाम् ॥ ६ ॥
यस्यां संक्रियमाणायां सत्यं स्वर्गापवर्गयोः ।
प्राप्यते कारणं पूतं सम्यग्दर्शनमुत्तमम् ॥ ७ ॥
इन्द्रनागेन्द्रचन्द्रार्क-नरेन्द्रार्चितपंकजाः ।
श्रीजिनेन्द्राः सदा पूज्याः सतां शर्मश्रिये मुदा ॥ ८ ॥
जिनेन्द्रार्चा महापुण्यं प्रसिद्धवचनं यतः ।
जिनपूजासमं पुण्यं न भूतं न भविष्यति ॥ ९ ॥
अनेकैर्भव्यसंमुख्यै-र्भरतादिभिरुत्तमैः ।
प्राप्तं जिनेन्द्रपूजायाः फलं केनात्र वर्ण्यते ॥ १० ॥
जलाद्यैरष्टभिर्द्रव्यै-र्जिनार्चायाः किमुच्यते ।
पद्मेनैकेन भेकेन फलं प्राप्तं यदुत्तमम् ॥ ११ ॥

तथा च समन्तभद्रस्वामिभिरुक्तं—

अर्हच्चरणसपर्या महानुभावं महात्मनामवदत् ।
भेकः प्रमोदमत्तः कुसुमेनैकेन राजगृहे ॥

अस्य कथा—

अथ जम्बूमति द्वीपे मेरोर्दक्षिण दिक्कृते ।
क्षेत्रे तीर्थेशिनां जन्म-पवित्रेत्रैव भारते ॥ १२ ॥
देशोस्ति मगधो नाम्ना निवेशो वा जगच्छ्रियः ।
जना यत्र वसन्त्युच्चै-र्धनैर्धान्यैः सुधर्मतः ॥ १३ ॥
तत्र राजगृहं नाम नगरं गुणिभिर्वरम् ।
भोगोपभोगसामग्री-प्राप्त्या यत्र निरन्तरम् ।॥ १४ ॥

यन्नराः सुरशोभाढ्या नार्यो वा सुरकन्यकाः ।
सम्यक्त्वव्रतसम्पन्ना-स्तस्मात्स्वर्गाधिकं पुरम् ॥ १५ ॥
यत्र शर्मकरो धर्मः प्रसिद्धो जिनभाषितः ।
तस्य किं वर्ण्यते शोभा त्रैलोक्यप्रीतिदायिनी ॥ १६ ॥
तत्पाताभूत्पवित्रात्मा श्रेणिको दर्शनप्रियः ।
श्रीमज्जिनेन्द्रपादाब्ज-सेवनैकमधुव्रतः ॥ १७ ॥
यः प्रतापः स्वशत्रूणां शान्तो वा चन्द्रमाः सताम् ।
प्रजानां पालने नित्यं पिता वा हितकारकः ॥ १८ ॥
तस्य राज्ञी महासाध्वी रूपसौभाग्यशालिनी ।
चेलिनी जिनचन्द्राणां चरणार्चनकोविदा ॥ १९ ॥
सम्यक्त्वव्रतसद्भूषा-रत्नभूषाविराजिता ।
सर्वविज्ञानसम्पन्ना जिनवाणीव सुन्दरा ॥ २० ॥
नागदत्तोभवच्छ्रेष्ठी परमेष्ठिपराङ्मुखः ।
श्रेष्ठिनी भवदत्ताख्या तस्याभूत्प्राणवल्लभा ॥ २१ ॥
सर्वदासौ महामाया-वेष्टितः श्रेष्ठिकः कुधीः ।
एकदा स्वाङ्गणे वाप्यां मृत्वा भेको महानभूत् ॥ २२ ॥
नरो मृत्वा यतो जातः पापात्तोयचरोत्र सः ।
तस्मात्पापं न कर्त्तव्यं भो भव्याः संकटेपि च ॥ २३ ॥
कदाचित्सा समायाता भवदत्ता जलार्थिनी ।
तां विलोक्य स मण्डूको जातो जातिस्मरस्ततः ॥ २३ ॥
तस्याः समीपमामत्य तदङ्गे चटितो द्रुतम् ।
निर्घाटितस्तया सोपि रोमाञ्चितशरीरया ॥ २५ ॥

तथापि पूर्वसम्बन्धाद्-र्दुरः प्रीतिनिर्भरः ।
तस्यामुच्चैश्चटत्येव मत्वेति प्राक्तनी प्रिया ॥ २६ ॥
ततस्तया ममेष्टोयं कोपि जातः कुयोनिजः ।
इति ज्ञात्वावधिज्ञानी पृष्टः श्रीसुव्रतो मुनिः ॥ २७ ॥
तेनोक्तं सुव्रताख्येन मुनिना ज्ञानचक्षुषा ।
मृतस्ते नागदत्तोयं पतिर्मायासमन्वितः ॥ २८ ॥
संजातः पापतः पुत्रि मण्डूको मोहमण्डितः ।
श्रुत्वेति तं मुनिं नत्वा भक्त्या संसारतारणम् ॥ २९ ॥
तयासौ मोहतो नीत्वा दर्दुरः स्वगृहे धृतः ।
तत्र हृष्टमनाः सोपि तस्थौ यावत्ततोन्यदा ॥ ३० ॥
आगत्य वनपालस्तं राजानं श्रेणिकं मुदा ।
नत्वा व्यजिज्ञपद्देव दिव्ये वैभारपर्वते ॥ ३१ ॥
इन्द्रनागेन्द्रचन्द्राद्यैः समर्चितपदद्वयः ।
वर्द्धमानो जिनेन्द्रोसौ समायातो जगत्प्रियः ॥ ३२ ॥
श्रुत्वेति श्रेणिको राजा जिनभक्तिपरायणः ।
दत्वा तस्मै महादानं परोक्षे कृतवन्दनः ॥ ३३ ॥
आनन्ददायिनी भेरीं दापयित्वातिसंभ्रमी ।
चलच्चामरसद्भूत्या चलितो निश्चलाशयः ॥ ३४ ॥
समवादिसृतिं दृष्ट्वा हृष्टो राजा जगद्धिताम् ।
मेघमालां मयूरो वा धातुर्वादीव सद्रसम् ॥ ३५ ॥
तं वीक्ष्य केवलज्ञान-लोचनं परमेष्ठिनम् ।
प्रणम्य प्रातिहार्यादि-संयुक्तं सेवितं सुरैः ॥ ३६ ॥

विशिष्टाष्टमहाद्रव्यै-र्जलाद्यैर्जिनपुङ्गवम् ।
संपूज्य जगतां पूज्यं चकार स्तवनं शुभम् ॥ ३७ ॥
जय त्वं जिनदेवात्र कर्मेन्धनहुताशनः ।
दुःखदारिद्यदावाग्नि-शमनैकघनाघनः ॥ ३८ ॥
जय त्वं जिनसद्भानो लोकालोकप्रकाशकः ।
वचनांशुलसज्जालै-र्भव्यपद्मविकाशकः ॥ ३९ ॥
जय जन्मजरामृत्यु-ज्वरनाशभिषग्वरः ।
अनेकगुणमाणिक्य-रोहणाद्रे महास्थिरः ॥ ४० ॥
त्वं त्राता जगतां तात त्वं त्रैलोक्यविभूषणम् ।
त्वं ह्यकारणसद्वन्धु-स्त्वमाप त्क्षयकारणम् ॥ ४१ ॥
त्वत्पादसेवया देव यत्सुखं प्राप्यते ध्रुवम् ।
अन्यैर्भूरितरक्लेशैः स्वप्ने तदपि दुर्लभम् ॥ ४२ ॥
ततः श्रीमज्जिनाधीश भुक्तिमुक्तिप्रदायिनी ।
त्वद्भक्तिर्मे सदा भूया-दासंसारं शुभप्रदा ॥ ४३ ॥
इति स्तुत्वा जिनाधीशं भक्त्या नत्वा मुहुर्मुहुः ।
गौतमादीन्मुनींश्चापि प्रणम्य श्रेणिकः स्थितः ॥ ४४ ॥
तथा च भवदत्तादौ जिनभक्त्या गते सति ।
वन्दनार्थं जिनेन्द्रस्य शर्मकोटिविधायिनः ॥ ४५ ॥
श्रुत्वा सुरखगेन्द्रादि-वादित्रध्वनिमम्बरे ।
प्रोल्लसज्जयघोषं च स भेको जातसंस्मृतिः ॥ ४६ ॥
तद्वापीसंभवं पद्म समादाय समुत्सुकः ।
श्रीमज्जिनेंद्रपादाब्ज-पूजार्थं चलितो भृशम् ॥ ४७ ॥

मार्गे गच्छन्मुदा हस्ति-पादेनैव प्रचम्पितः ।
त्रैलोक्यप्रभुपूज्यस्य वर्द्धमानजिनेशिनः ॥ ४८ ॥
पूजानुरागतोत्यन्त-समर्जितशुभोदयात् ।
मृत्वा सौधर्मकल्पेसौ देवो जातो महर्द्धिकः ॥ ४९ ॥
क्व मेकः क्व च देवोभू-न्न हि चित्रं जगत्त्रये ।
जिनपूजाप्रसादेन किं शुभं यन्न जायते ॥ ५० ॥
तत्र चान्तर्मुहूर्तेन भूत्वासौ नवयौवनः ।
रूपलावण्यसम्पन्नः पूर्वपुण्येन संयुतः ॥ ५१ ॥
नाना रत्नप्रभाजालै-र्जटिलो दिव्यवस्त्रभाक् ।
सुगन्धकुसुमोद्दाम-मालालंकृतविग्रहः ॥ ५२ ॥
लब्ध्वावधिमहाबोध-ज्ञानं पूर्वभवान्तरे ।
पूजया जिननाथस्य भावनामात्रतो यतः ॥ ५३ ॥
देवो जातोस्मि दिव्योहं तस्मात्सा क्रियते तराम् ।
संविचार्येति सद्भक्त्या मुकुटाग्रे विधाय च ॥ ५४ ॥
भेकचिन्हं महाभूत्या समागत्य सुरोत्तमः ।
प्रवृत्तो जिनपादाब्ज-पूजां कर्त्तुं प्रहर्षतः ॥ ५५ ॥
तं पूजां जिनराजस्य कुर्वाणं शर्मदायिनीम् ।
विलोक्य श्रेणिको राजा नत्वा संपृष्टवान्गुरुम् ॥ ५६ ॥
स्वामिन्नस्य किरीटाग्रे भेकचिन्हं प्रवर्त्तते ।
तस्य किं कारणं ब्रूहि संशयध्वान्तभास्करः ॥ ५७ ॥
तच्छ्रुत्वा गौतमस्वामी संज्ञानमयविग्रहः ।
अवोचत्तस्य वृत्तान्तं सर्वमेव प्रपञ्चतः ॥ ५८ ॥

श्रुत्वा तद्भव्यलोकास्ते सर्वे श्रीश्रेणिकादयः ।
पूजाफलं जगत्सारं तस्यां जातास्तरां रताः ॥ ५९ ॥
मत्वेति श्रीजिनेन्द्राणां पूजातिशयमुत्तमम् ।
महाभव्यैः सदाकार्या जिनार्चा शर्मकारिणी ॥ ६० ॥
धनं धान्यं महाभाग्यं सौभाग्यं राज्यसम्पदा ।
पुत्रमित्रकलत्रं च सत्कुलं गोत्रमुत्तमम् ॥ ६१ ।
दीर्घायुर्दुर्गतेर्नाशो विनाशः पापसन्ततेः ।
अभीष्टफलसम्प्राप्ति-र्मणिमुक्ताफलादिकम् ॥ ६२ ॥
सम्यक्त्वं मुक्तिसद्बीजं भवभ्रमणनाशनम् ।
सद्विद्या सच्चरित्रं च सौख्यं स्वर्गापवर्गयोः ॥ ६३ ॥
प्राप्यते भो महाभव्या जिनपूजाप्रसादतः ।
तस्मात्प्रमादमुत्सृत्य कार्या सा सौख्यदायिनी ॥ ६४ ॥
सम्यक्त्वद्रुमसिञ्चने शुभतरा कादम्बिनी बोधदा
भव्यानां वरभारतीव नितरां दूती सतां सम्पदे ।
मुक्तिप्रोन्नतमन्दिरस्य सुखदा सोपानपंक्तिः शुभा
पायाद्वस्तु समस्तसौख्यजननी पूजा जिनानां सदा ॥६५॥
शक्राः स्नानविधायिनः सुरगिरिः स्नानप्रपीठं पयः
सिन्धुर्यस्य सुकुण्डिका सुरगणाः सत्किंकराः सादराः ।
नर्त्तक्योप्सरसः सुकीर्त्तिमुखरा गन्धर्वसन्नाकिनो
जाता जन्ममहोत्सवेत्र भवतां स श्रीजिनः शं क्रियात् ॥६६॥

श्रीमच्चारुमयूरवाहनपरा पद्मासना निर्मला
मिथ्याध्वान्तभरप्रणाशविलसद्भास्वत्प्रभाभासुरा ।
भव्याब्जप्रवनप्रमोदजननी सन्मार्गसंदर्शिनी
देवेन्द्रादिसमर्चिता जिनपतेर्जीयात्सतां भारती ॥ ६७ ॥

जातः श्रीमति मूलसंघतिलके सारस्वते सच्छुभे
गच्छे स्वच्छतरे प्रसिद्धमहिमा श्रीकुन्दकुन्दान्वये ।
श्रीजैनागमसिन्धुवर्द्धनविधुर्विद्वज्जनैः सेवितः
श्रीमत्सूरिमतल्लिको गुणनिधिर्जीयात्प्रभाचन्द्रवाक् ॥ ६८ ॥

श्रीमज्जैनपदाब्जसारमधुकृच्छ्रीमूलसंघाग्रणीः
सम्यग्दर्शनसाधुबोधविलसच्चारित्रचूडामणिः ।
विद्यानन्दिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः
श्रीभट्टारकमल्लिभूषणगुरुर्भूयात्सतां शर्मणे ॥ ६९ ॥

श्रीसर्वज्ञविशुद्धिभक्तिनिरतो भव्यौघसम्बोधकः
कामक्रूरकरीन्द्रदुर्मदलये कण्ठीरवो निष्ठुरः ।
ज्ञानध्यानरतः प्रसिद्धमहिमा रत्नत्रयालंकृतः
कुर्याच्छर्मसतां प्रमोदजनकः श्रीसिंहनन्दी गुरुः ॥ ७० ॥

प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभङ्गीतरङ्गैः—
निर्द्धूतैकान्तमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः ।
श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेन्दुप्रवृद्धि—
र्जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यः श्रुताब्धिः॥७१॥

तेषां पादपयोजयुग्मकृपया श्रीजैनसूत्रोचिताः
सम्यग्दर्शनबोधवृत्ततपसामाराधनासत्कथाः ।
भव्यानां वरशान्तिकीर्तिविलसत्कीर्त्तिप्रमोदं श्रियं
कुर्युः संरचिता विशुद्धशुभदाः श्रीनेमिदत्तेन वै ॥ ७२ ॥

इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्य-ब्रह्म-
नेमिदत्तविरचिते जिनपूजाफलप्राप्तभेका-
ख्याने चतुर्थः परिच्छेदः समाप्तः ।